काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE

NEW SERIES.

VOL. XXXVIII

BENARES :
Printed and published by BHAGAVATI PRASAD B. A. for the
Proprietors, E. J. LAZARUS & Co , at the
Medical Hall Press.
1916.

INDEX TO VOLUME XXXVIII. New Series.

*ADVAITDIPKA, Vol. I	...	441-442
,, ,,	...	Title page.
,, Vol. II	...	1-62
BHAGAVATGITA	...	199-246
†BRAMHAMRITVARSHANI VEDANTA DARSHAN	...	401-406
,,	...	Title page.
ISAVASYOPANISHAT	...	9-16
JAIN VARTIK	...	73-160
KENOPANISHAT	...	1-20
SHAKTAYANA VAYAKARANA		685-706
,, ,, Sutrapáṭh		1-114
SHANKALAPA SURYODAYA	...	207-238
SIDDHANT SHIROMANI	...	265-288
VALMIKIYA RAMAYANA	...	375-398
VAYAKARANA DIPKA	...	873-976
,,		Bhumika and Title page.

**Errata is being written out and will be issued with Vol. XXXIX.*

†Preceeding pages will be found in Vols. XXV–XXXI.

REPRINT FROM THE PANDIT.

ईशावास्योपनिषद् ।

IŚĀVĀSYOPANIṢAD

WITH

ENGLISH TRNSLATION

AND AN

ORIGINAL COMMENTARY

by

KSHETREŚACHANDRA CHAṬṬOPADHYĀYA

Printed and published by Bhagavati Prasad, B. A.
at the Medical Hall Press, Benares, for Publishers.

E. J. Lazarus & Co.,
BENARES.

1916.

 Price per copy, Ans. 4

the other is absent, but when one is absent, the presence of the other is doubtful. Thus, a man worshipping God as अविद्या, does not necessarily secure विद्या ; so his spiritual advancement is doubtful.

On the other hand, the man, who worships Him as the lord of only *vidyā*, meets with difficulties that are not less serious. The Dualist must needs encounter *avidyā* which is surely a powerful force; when a doubt will arise in his mind. He will think, "If God is all-powerful, how can evil principles oppose and thwart good principles which alone rightly belong to him? Then perhaps He is not all-powerful." He will then cease to have faith in the power of God and gradually he will become an atheist. When he arrives at this stage, he can not only make no spiritual progress but positively does go down. (10)

विद्यां चाविद्यां च यस्तद्वेदोभयंꣳसह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११॥

TRANSLATION.

And he, who knows the principles of knowledge and ignorance to be living together (in the Lord), passes death through (worshipping Him as controlling) ignorance and attains immortality (i. e. salvation) through (worshipping Him as controlling) knowledge. (11).

COMMENTARY.

Thus the best conception of God is as the lord of both *vidyā* and *avidyā*. By worshipping Him as such the difficulties mentioned before are easily overcome. The worshipper will be blest not only by the *negation* of ignorance but also by the *positive* attainment of knowledge. Also, the danger of atheism will never threaten him. For he knows that God rules both know-

ledge and ignorance, and He can, if He pleases, remove the obstruction of ignorance substituting in its place, the propeller of knowledge.

Thus the worshipper of God as lord of *vidyā-and-avidyā* will, with his faith in the potency of God in removing ignorance, overcome the idea of death which is the worst form of ignorance and, with his faith in God's power of granting the boon of knowledge, he will attain salvation which can be reached only through knowledge.

In Kālī, both the ideas of *vidyā* and *avidyā* are combined. Hence, we read of many real worshippers of the Goddess praying to Her, the Mother, to take them from darkness (which is but one side of Her outer appearance) to light (which is the other side of tha perfect form). (11)

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो यउसंभूत्याꣳ रताः ॥१२॥

TRANSLATION.

Those, that worship (the Lord as the principle of) destruction, go to utter darkness and those, that take delight in (Him as the principle of) creation, go, as it were, to still greater darkness. (12).

COMMENTARY.

God is not simply the Destroyer as the savages suppose the Great Spirit to be, nor is He simply the Creator as He is often supposed to be. The conception of God as only the Destroyer or only the Creator is faulty and is fraught with evil. (12)

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे ॥ १३ ॥

TRANSLATION.

One thing (results) from (worshipping God as the principle of only) creation and quite a different thing from (worshipping Him as the principle of only) destruction—this is *what we have heard from the sages who have explained this to us.* (13).

COMMENTARY.

Much the same difficulties arise as in the case of the worshipper of only *vidyā* or only *avidyā*. We cannot deny the existence of either of the two phases (of creation and of destruction) in God without considerably damaging our spiritual advancement. (13).

सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳसह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १४ ॥

TRANSLATION.

He, who knows creation and destruction as living together (in the Lord as his attributes), passes death through (worshipping God as the lord of) destruction and attains immortality through (worshipping Him as the Lord of) creation. (14).

COMMENTARY

God not only creates, but He also destroys; He not only destroys but he also creates. Herein lies the real strength of the worshipper of the Goddess Kālī (Whom we may take as typifying this idea of God). He is sure that his Mother won't destroy him who is Her child but will destroy only his impurities and also that She will give him the मृतसञ्जीवनी (life-restoring nectar) of Bliss by creating in him good and uplifting tendencies. (14)

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

TRANSLATION.

The face of Truth is covered with a golden plate; O Nourisher, do thou take it off, that this devotee of Truth may see That (Truth). (15).

COMMENTARY.

To the ordinary man, weakened by passions and desires, the Great Truth is something hidden from view. If, by reason of his very good fortune, he ever wishes to pierce through the cover, he cannot. For this cover is of such a glittering nature that even though we are somewhat inclined to get at Truth, we cannot quite find it in our hearts to throw away that glittering substance which apparently satisfies our senses: though we may wish to realise the Self, we cannot give up the world with all its passions and sense-enjoyments. So, to combat this evil, we should feel such a violent longing for the realisation of Truth that we might overcome all temptations of sense-enjoyment. But whence is that *preman*-and-*vairāgya* (Love and Renunciation) to come?—Pray to lord, the Power which is in every being, sustaining and nourishing him, and He will give the necessary strength. From Him will come that maddening love, who मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्. (15).

पूषन्नेकर्षे यमसूर्य प्राजापत्य व्यूह रश्मीन् समूह ।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि
योऽसावसौपुरुषः सोऽहमस्मि ?॥ १६ ॥

TRANSLATION.

O Lord, thou Nourisher, Sole-Wise, Restrainer, Creator and Sūrya (i.e. one who leadest men to work), do expand (my views) and draw in (like) reins (my senses that are going astray), that I may see Thy effulgent and most

blessed form!—(What do I feel?)—(I feel) that the Being who is in every creature, verily I am He. (16).

COMMENTARY.

When the Lord has given me strength and purity, I can realise the Truth and that Truth is, "I am That."

The Lord has been called *puṣan* because he must give me strength to proceed in my apparently impossible course. He is the One knower. From Him emanates all knowledge and by His grace I can get a bit of that infinite store of knowledge which will enable me to discriminate between what is eternal and what is non-eternal (नित्यानित्यविचारः). For the etymology of the word सूर्य, compare सिद्धान्तकौमुदी which gives two derivations,—"सरत्याकाशे सूर्यः कर्तरि क्यप् निपातनादुत्वम्। यद्वा षू प्रेरणे तुदादिः सुवति कर्मणि लोकं प्रेरयति। क्यपो रुट्॥" I follow the second one and accordingly interpret सूर्य as the Lord who makes men work. From Him comes all incentive towards action. The Lord is the Restrainer. He will therefore restrain my senses that are going astray. He is also the Lord of evolution; by His grace alone can my present limited knowledge expand into that infinite knowledge which is Realisation. (16).

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर
कृतꣳस्मर ॥ १७ ॥

TRANSLATION.

Let the Great Energy (take me) to immortality and let my body which is to end in ashes be resolved into air (and other elements). O creator, do remember thy created! (17).

COMMENTARY.

The person addressed in this mantra is Vāyu or Prāṇa. Prāṇa is not air, nor is it the life-breath. It is

Force. All the forces that we see in the world, material, mental and spiritual, are but manifestations of that great Prāṇa. The whole world is the result of the working of Prāṇa. It combines and resolves. This force is to take me to salvation (विदेह कैवल्यम्), when my material half (the body) will be absorbed in primordial matter and my spiritual half (the soul) will be absorbed in Immortality (Brahma). (17).

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ।। १८ ।।

इति वाजसनेयसंहितोपनिषत् समाप्ता ॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिरोम् ॥

TRANSLATION.

O Leader, lead us through the right course that we may come to that treasure, Thou Who art, O God, the possessor of all knowledge! Take away from us the sin that leads us astray. We address unto thee ample words of prayer and offer our salutation unto thee. (18).

COMMENTARY.

O Lord you know what can take us to the goal and what vitiates our efforts.. So give us knowledge to discriminate and to prove superior to the bad tendencies (जुहुराणमेनः) that are already operating in us.

Agni, ordinarily, means fire. Yāska derives the word from अग्रणी (leader), in which sense the word has been used here. But there is also the meaning of fire. The worshipper is to take fire as the Divine Leader and worship him as such.

NOTE :—There are two rescensions of the Upaniṣad, the Vedic and the Vedāntic. The latter has been given above. The Vedic reading is not materially differ-rent. The most important difference in that reading is regarding the order of the last four mantras. The seven-teenth and the eighteenth mantras here are the fifteenth and the sixteenth hymns there. In the place of the fifteenth and the sixteenth hymns in the Vedāntic text we find one hymn in the Vedic text हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम् ॥ (hymn no. 17) which is the last mantra there. It will be seen that the Vedic order is in many respects more logical.

(18).

The End. K. C.

ERRATA.

Page	Line	of commentary	For	Read.
५	13	,,	infuse	infuse
६	8	,,	sation	cessation
८	6	,,	consequenently	conssequently

स्यासवर्णे इतीयङ् । अरर्ति । अरियर्ति । अररीति । अरियरीति । अर्ऋतः । अरियृतः । झि अत् यण् । रूको रोरि लोपः । न च तस्मिन्कर्तव्ये यणः स्थानिवत्त्वम् । पूर्वत्रासिद्धे तन्निषेधात् । आरर्ति । अरियर्ति । अरराञ्चकार । अरियराञ्चकार । अररिता । अरियरिता । अररिष्यति । अरियरिष्यति । अररीतु । अरियरीतु । अर्ऋतात् । अरियृतात् । आररीत् । आरियरीत् । आर्ऋताम् । आरियृताम् आरह्ः । आरियरुः । आरः । आरियर् । आररीः । आरियरीः । अर्ऋयात् । अरियृयात् । आशीर्लिङि श्तिपा निर्देशाद् गुणेऽर्तीति गुणो नरिङ् रलोपः दीर्घः । आरियात् । अरिम्रियात् । आरारीत् । आरियारीत् । आररिष्यत् । आरियरिष्यत् । ऋतश्चेति तपरत्वान्नेह । कॄ विक्षेपे । चाकरीति । तातरीति । चाकर्ति । तातर्ति । तातीर्तः । तातिरति । तातोर्हि । तातराणि । अतातरीत् । अतातः । अतातीर्ताम् । अतातरुः । अतातारीत् अतातारिष्टामित्यादि ॥

सन्वल्लघुनि चङ्परेऽनग्लोपे । ७ । ४ । ९३ ॥

चङ्परेइ ति बहुव्रीहिः ॥ स चाङ्गस्येति च पदद्वयमप्यावर्तते । अङ्गसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत् । तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति । अथवाङ्गस्येति नावर्तते । चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत् । पदमञ्जर्यां तु चङ्परे इत्यप्यनावर्त्यैव न विद्यतेऽग्लोपो यस्मिन् परतस्तादृशे चङ्परे यदङ्गं तस्य योऽभ्यासस्तस्येत्यादि व्याख्यातम् । सन्यत इत्याद्युक्तं चङ्परेऽपि तथा भवति । अचीकरत् । अपीपचत् । अचीकमत । अपीपवत् । अबीभवत् ।

मूङ् । अमीमवत् । अयीयवत् । अरीरवत् । अलीलवत् । अजीजवत् । असिस्रवत् । असुस्रवत् इत्यादि । पुयराज्परे इत्येव । नेह । अतूतवत् । और्णूनवत् । अपुस्फुरत् । लघुनि किम् । अततक्षत् । अररक्षत् । राजयते अरराजत् । ऋदित्वान्नोपधाह्रस्वः । जागरयतेः अजजागरत् । लुङि चङि जाग्रोऽवीति गुणः । सर्वत्रैव लघोरानन्तर्यमभ्यासे नास्तीति येन नाव्यवधानं तेनैव व्यवहितेऽपीत्येकेन वर्णेन व्यवधाने वचनप्रामाण्याद्भवितव्यं न पुनरनेकवर्णसंघातेन कथमचिन्नवादिति । आचार्यप्रवृत्तिर्ज्ञापयति भवति संयोगव्यवहितानामित्वमिति यदयं तद्बाधनार्थं स्मरत्यादीनामत्वं विदधाति । चङ्परे किम् । अहं पपच । परग्रहणं किम् । चङ्येव केवले मा भूत् । अचकमत । अनग्लोपे किम् अचकथत् । दृषदमाख्यत् अददृषत् ।

दीर्घो लघोः । ७ । ४ । ९४ ॥

लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये । अचीकरत् । अचूचुरत् । लघोः किम् । अबिभ्रजत् । अवीवददवूचुरदित्यादौ णयन्ताण्णिचि तु पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णौ णिलोपे तस्य स्थानिवत्त्वादग्लोपित्वाद्वा सन्वद्भावो दीर्घत्वञ्च न प्राप्नोति यथाकृतिनिर्देशाद्भवति । ननु चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यर्थे औन्दिददाटिटदित्यादौ दीर्घापत्तिः । चङ्परे णौ यदङ्गमौन्दिद् आटिट् इति तदीयोऽभ्यासो हि चङमादाय णिलोपस्य स्थानिवत्त्वेन णिमादाय वा लघुपर इति चेन्न चङ्णिभिन्नस्यैव लघोर्ग्रहणात् । अयमेव भाष्यप्रयोगश्चात्र प्रमाणमिति दिक् ।

संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते ।
तत्रैव दीर्घः सन्वच्च नानेकाच्चिति माधवः ॥ १ ॥
चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते ।
किं त्वस्यावयवः कश्चित्तस्मादेकाच्चिदं द्वयम् ॥ २ ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥ ३ ॥
चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
योर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥ ४ ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि सम्बन्धस्त्वगितामपि सिद्धये ॥

अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् । ७ । ४ । ९५ ॥

एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । असस्मरत् । अददरत् । तपरत्वसामर्थ्यादत्र न दीर्घः । अतत्वरत् । अपप्रथत् । अमम्रदत् । अतस्तरत् । अपस्पशत् ।

विभाषा वेष्टिचेष्ट्योः । ७ । ४ । ९६ ॥

अभ्यासस्यात्वं वा स्याच्चङ्परे णौ । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् ।

ई च गणः । ७ । ४ । ९७ ॥

गणेरभ्यासस्य ईत् स्याच्चङ्परे णौ चादत् । अजीगणत् । अजगणत् ।

इत्योरम्भट्टेन श्रीधोडभट्टविश्वरूपात्मजेन वैजनाथभट्टविश्वरूपापरनामधेयेन विरचितायां श्रीव्यकरणदीपिकासमाख्यायां पाणिनिसूत्रवृत्तौ सप्तमाध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः ॥

श्रीगणेशायनमः ।

अष्टमाध्यायस्य प्रथमः पादः ।

सर्वस्य द्वे । ८ । १ । १ ॥

एतच्च पदस्येत्यतः प्रागधिकृतं वेदितव्यम् । वक्ष्यति नित्यवीप्सयोरिति नित्येर्थे वीप्सायां च यद्वर्तते तस्य सर्वस्य द्वे भवतः पचति २ । ग्रामो २ रमणीयः । इदं तु स्थाने द्विर्वचनमत एव पौनःपुनिक इत्यादौ स्थानिवत्वेन प्रातिपदिकत्वाट्ठञादिसिद्धिः । द्विःप्रयोगत्वे तु समासग्रहणकृतनियमेनाप्रातिपदिकत्वान्न स्यात् । न चैवमग्नेऽग्ने इत्यादाववयवे पदकार्यसिद्धिर्न स्यात् द्वे इति द्विवचनेःनावान्तरपदत्वस्यापि स्वीकारात् स्थानिवत्वकृतपदत्वस्य समुदायेपि सत्वादाम् पचसि २ देवदत्तेत्यादावेकान्तरतासिद्धिरिति दिक् । पूर्वत्रासिद्धीयमद्विर्वचने इति वक्तव्यम् ॥ * ॥ द्रोग्धा द्रोग्धाद्रोढा द्रोढा । ढत्वघत्वयोरसिद्धत्वादकृतयोरेव द्वित्वं प्राप्नोति पश्चात्तद्विकल्पे सत्यनिष्टमपि स्यात्तन्मा भूदिति वचनमिदम् ॥

तस्य परमाम्रेडितम् । ८ । १ । २ ॥

द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् । चोर चोर घातयिष्यामि त्वाम् । आम्रेडितप्रदेशा आम्रेडितं भर्त्सने इत्येवमादयः ॥

अनुदात्तं च । ८ । १ । ३ ॥

द्विरुक्तस्य परं रूपमनुदात्तं स्यात् । दिवे दिवे ॥

नित्यवीप्सयोः । ८ । १ । ४ ॥

पदस्येति वक्ष्यमाणमिहापकृष्यते । आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञक-कृदन्तेषु च । पचति पचति । भुक्त्वा भुक्त्वा । वीप्सायाम् । वृक्षं वृक्षं सिञ्चति देवदत्तः । ग्रामो ग्रामो रमणीयः । पदस्येति किम् । नित्य-तायां विधीयमानं द्विर्वचनं धातुमात्रस्य मा भूत् । सर्वस्येति किम् । स्वादिष्विति पदसंज्ञामादाय वृक्षाभ्यामित्यादौ प्रकृतिभागमात्रस्य मा भूदित्याहुः । प्रपचति प्रपचतीत्यादौ तु द्वित्वसिद्धये सगतिकस्येति वक्तव्यम् । सगतिकस्य द्वित्वे एकपद्यं नास्त्येव स्थानिनः पदत्वा भावेनादेशेऽपि तस्य दौर्लभ्यात् । द्विःप्रयोगपक्षे तु प्रथमगतिं विहा-यावशिष्टस्य समुदायस्य पदत्वं प्राप्तं तस्मिन्सत्यपि न क्षतिरि-त्याहुः । यत्तिङन्तं नित्यतया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात्प्र-कर्षप्रत्यय इष्यते पचति २ तरामिति इह त्वाढ्यतरमाढ्यतरमान-येति प्रकर्षयुक्तस्य वीप्सायोग इष्यते ॥

परेर्वर्जने । ८ । १ । ५ ॥

परि परि वङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः । परेर्वर्जने वा वचनम् । परि वङ्गेभ्यो वृष्टो देवः । समासे तु समासेनैव वर्जन-स्योक्तत्वान्नैव भवति । परि त्रिगर्तं वृष्टो देवः ॥

प्रसमुपोदः पादपूरणे । ८ । १ । ६ ॥

एषां द्वे स्तः पादपूरणे । प्र प्रायमग्निः । सं समिद्युवसे । उपोप मे परामृश । किन्नोदुदु हर्षसे । पादपूरणे किम् । प्र देवं देव्याधिया । भाषायामनर्थकस्य प्रयोगाभावाच्छन्दस्येवेदम् ।

उपर्यध्यधसः सामीप्ये । ८ । १ । ७ ॥

उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपदेशे इत्यर्थः। अध्यधि सुखम्। सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः। अधोऽधो लोकम्। लोकस्याधस्तात्समीपदेशे इत्यर्थः। सामीप्ये किम्। उपरि चन्द्रमाः। कथं तर्हि उपरि शिरसो घटं धारयतीति अत्राहुः। औत्तराधर्यमात्रमिह विवक्षितं न तु सामीप्यमतो वस्तुतस्तत्सत्त्वेऽपि न द्वित्वम्। विवक्षा हि शब्दव्युत्पत्तेः प्रधानं कारणम्। अत्रोपक्षोपक्रमं तदाद्याचिख्यासायामिति सन्नन्तप्रयोगो ज्ञापक इति ॥

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु । ८ । १ । ८ ॥

असूयायाम्। सुन्दर सुन्दर वृथा ते सौन्दर्यम्। संमतौ देव देव वन्द्योऽसि। कोपे। दुर्विनीत। दुर्विनीत इदानीं ज्ञास्यसि। कुत्सने धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चौर चौर घातयिष्यामि त्वाम् ॥

एकं बहुव्रीहिवत् । ८ । १ । ९ ॥

द्वे इत्यनुवर्तते। तच्चानुवाद्यसमर्पकम्। द्विरुक्त एकशब्द बहुव्रीहिवत्स्यात्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरम्। इह द्वयोरपि सुपो लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप्। एकैकयाहुत्या। इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः न बहुव्रीहावित्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यातमेव तत् सूत्रमतेपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकं न बहुव्रीहाविति॰ीहातिदेशशङ्कैव नास्ति। एकैकस्मै देहि ॥

आबाधे च । ८ । १ । १० ॥

पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च । गतगतः । विरहात्पीड्यमानस्येयमुक्तिः । बहुव्रीहिवद्भावात्सुब्लुक् । गतगता । इह पुम्वद्भावः । नन्वेवं न न करोति सु सु जागर्तीत्यत्र न लोपो नञ इति नलोपो नञ्सुभ्यामित्यन्तोदात्तत्वं च स्यादिति चेन्नैवम् उभयत्रापि वनं समासे इत्यतः समासग्रहणानुवृत्त्यपकर्षाभ्यां मुख्यसमासस्यैव ग्रहणादित्याहुः । एवं धूर्धूः पथि पंथा इत्यादौ समासान्तोपि समासाच्च तद्विषयादित्यतः समासादित्यनुवर्तमाने समासांता इति पुनः समासग्रहणात्समासाधिकारविहितसमासस्यैव ग्रहणान्नेति बोध्यम् ॥

कर्मधारयवदुत्तरेषु । ८ । १ । ११ ॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यम् । प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि । अधिकारेणैव सिद्धे उत्तरेष्विति स्पष्टार्थम् ॥

प्रकारे गुणवचनस्य । ८ । १ । १२ ॥

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत् । कर्मधारयवदुत्तरेष्वित्यधिकारात् तेन पूर्वभागस्य पुंवद्भावः समासस्येत्यंतोदात्तत्वं च । पटुपट्वी । पटुपटुः । पटुसदृशः ईषत्पटुरिति यावत् । इह द्वित्वेन जातीयरो बाधो नेष्यते इति वामनः । अन्यथा ब्राह्मणजातीय इत्यादौ अगुणवचने गुणवचनेपि भेदरूपेर्थे सावकाशो जातीयर् गुणवचनेषुसादृश्ये परेण द्वित्वेन बाध्येतेति भावः । जयादित्यस्तु जातीयर्विधौ विशेष एव प्रकारशब्दार्थे इत्याह गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते । शुक्लशुक्ल

रूपम् । शुक्लशुक्लः पटः । ननु प्रकारे सर्वेषां गुणवचनत्वाद् गुणवचनग्रहणानर्थक्यम् । तत्सामर्थ्यान्मुख्यवृत्त्या गुणपराणामेव द्वित्वम् । नत्वन्येषामित्याकरः । तेन सिंहो माणवक इत्यादौ न द्वित्वम् । नव नवं प्रीतिरहो करोतीत्यत्र तु वीप्सायां द्वित्वम् । अनेन तु द्वित्वे सुब्लुक् स्यात् । यथा नवनवा वनवायुभिराददे इति पुंवद्भावः । कथं भीतभीत इव शीतमयूख इति भारविः । इव शब्देन सादृश्यस्योक्ततया इह प्रकारे द्वित्वायोगात् । भीतेभ्यो भीत इति कथंचिद्व्याख्येयम् । तेनातिभीत इति फलितम् । यत्त आधिक्ये द्वे इति वार्तिकेन भीतभीतादौ द्वित्वमिति दुर्घटादिभिरुक्तम् । तदत्तिरभसोक्तिमात्रम् । तादृशवचनानुपलम्भात् । कथं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्येति मेघदूतः । एकस्यापि खेदावस्थासु क्षयावस्थासु च भेदं परिकल्प्य वीप्सा बोध्या । अथ कथं मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वामिति मेघदूतः । मन्दमन्दमुदितः प्रययौ खमितिवल्लुक् प्राप्तः वीप्सार्थस्य चासम्भवादिति चेत्सत्यम् । एकं मन्दपदमतिशयलक्षकं कमलानि कमलानीतिवत् । आनुपूर्व्ये द्वे वाच्ये ॥ * ॥ एकस्यैकमेव मूलमितरेषां तूपरि संनिवेशापेक्षो गौणो मूलव्यपदेशः । न चैकरूपं भागानां स्थौल्यम् । किन्तु यथामूलमुपचीयते स्थौल्यम् । एकजातीयानां पदार्थानामेकरूपगुणान्वये च वीप्सेति वीप्साभावादारम्भः । मूले मूले स्थूलः ॥ मूले मूले पथि विटपिनामित्यादौ तु वीप्सायामेव द्वित्वम् ॥ स्वार्थेऽवधार्यमाणेनेकस्मिन् द्वे भवत इति वक्तव्यम् ॥ * ॥ अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहि । स्वार्थे एतद् द्विर्वचनं न तु वीप्सा-

याम् । अनेकमाषसमुदायः कार्षापणः । अत्र हि द्वावेव माषौ दीयेते । न तु सर्वे कार्षापणसम्बन्धिनो माषाः । वीप्सायां च ग्रामो ग्रामो रमणीय इत्यादौ सन्निहितस्यार्थस्य न कस्यचिद्वर्जनमस्ति । इह तु वर्जनमस्तीति वीप्साभावादारम्भः । न चात्रैकशेषप्रसक्तिः । भिन्नार्थत्वात् । तथाहि । इह । भवद्भ्यां माषौ देहीत्युक्ते एकैकं देहीत्यर्थो न गम्यते । किन्तु प्रत्येकं माषद्वयं देहीति माषं माषं देहीति तूक्ते एकैकदानप्रतीतिः । अवधार्यमाणे किम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि माषौ माषांश्च देहि । अत्र यथेष्टदाने तात्पर्यादवधारणाभावः । अनेकस्मिन्किम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि । माषमेव देहीत्यत्र तात्पर्येऽदचावधारणमस्ति । आदरेण भयेन च प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः । यावद्भिः शब्दैः संबोध्योऽर्थमवगच्छति तावतां प्रयोक्तव्यत्वात् ॥ सर्पः २ ॥ बुध्यस्व २ । सर्पः ४ । बुध्यस्व३ । क्रियासमभिहारे च लुनीहि लुनीहि इत्येवायं लुनाति । नित्यवीप्सयोरिति सिद्धे भृशार्थे द्वित्वार्थमिदम् । पौनः पुन्येपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा ॥ आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम् ॥ * ॥ भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति । नित्यवीप्सयोरिति क्रियासमभिहारे इति वा सिद्धमत्र द्वित्वमित्याहुः ॥ डाचि बहुलं द्वे भवत इति वक्तव्यम् ॥ * ॥ पटपटाकरोति पटपटायते । डाचीति विषयसप्तमीयम् । तेनानुत्पन्ने एव डाच्यकृतटिलोपस्य पटदित्यादेर्द्विर्वचनम् । ततोऽव्यक्तानुकरणादिति डाच् । ततष्टिलोपः । ततो नित्यमाम्रेडिते डाचीति तकारपकारयोः पररूपं पकारः । यदि तु डाज्विधावनेकाच इत्येव सूच्यते । तदा डाचीति

परस्यस्यैव द्वित्वे सुवचेत्यवधेयम् ॥ बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम् ॥ द्वितीयाकरोति । तृतीयाकरोति । शंबाकरोति ॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् ॥ * ॥ पूर्वं पूर्वं पुष्प्यति । प्रथमं प्रथमं पच्यते । भिन्नार्थत्वात् द्विर्वचनेनातिशायिको न बाध्यते इत्याहुः । तथाहि । पूर्वतरं भुङ्क्ते इत्युक्ते क्रियात्मसाध्यक्रियान्तरापेक्षो भोजनस्य पूर्वत्वातिशयोऽथ भोक्त्रन्तरसाध्यभोजनापेक्ष इति सन्देहः । पूर्वं पूर्वं भुंक्ते इत्यस्मात्तु भोक्तृभ्य अन्येभ्यः पूर्वं भुङ्क्ते इत्यर्थः प्रतीयते । एवं पूर्वतरं पुष्प्यतीत्युक्ते क्रियात्मनिष्ठकिसलयितताद्यपेक्षः पुष्पितत्वस्य पूर्वत्वातिशयोऽथान्यनिष्ठपुष्पितत्वापेक्ष इति सन्देहः । पूर्वं पूर्वं पुष्प्यतीत्यस्मात्तु पुष्पितृभ्य अन्येभ्यः पूर्वं पुष्प्यतीत्यर्थः प्रतीयते । अत एवाद्यादिविवक्षायामिति केचित्पठन्ति । आदेरादिविवक्षायामित्यर्थः । यत्त्विदं वचनं नावश्यकम् । एकस्य पूर्वशब्दस्यातिशयलक्षणयाप्युपपत्तेरिति तन्न । लक्षणया सिद्धवचनप्रत्याख्यानस्यायुक्तत्वात् । डतरडतमयोः समसम्प्रधारणायां स्त्रीनिगदभावे द्वे भवत इति वक्तव्यम् ॥ स्त्रीशब्देन स्त्रीलिङ्गः शब्दः निगद्यतेऽसौ निगदः । नैगदेत्यप् । स्त्रिया निगदः स चासौ भावः भूतिः ऋद्धिः सम्पत् । आढ्यतेति । एवं च स्त्रीलिङ्गशब्दाभिधेये भावे वर्तमानयोर्डतरडतमान्तयोर्द्वे भवतः । आढ्यत्वादिना समेन तुल्येन गुणेन सम्प्रधारणायां निरूपणायां विषये इत्यर्थः । उभाविमावाढ्यौ । कतरा कतरानयोराढ्यता । सर्वे इमे आढ्याः । कतमा कतमा एषामाढ्यता । उभाविमावाढ्यावित्युक्ते ऽनेकप्रकाराढ्यत्वसम्भवात्प्रतिपत्ता किं कृतमनयोराढ्यत्वमिति सन्दिहानः पृच्छति । कतरा कत-

रेति स्वार्थे चैतद्द्विर्वचनम्। डतरडतमाभ्यां स्त्रीनिगदभावाच्चा-न्यत्रापि दृश्यते इति वृत्तिः। उभाविमावाढ्यौ कीदृश्यनयो-राढ्यता। उभाविमावाढ्यौ। कतरः कतरोनयोर्विपक्षः॥ कर्मव्य-तिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्॥ * ॥ बहुलग्रहणा-दन्यपरयोर्न समासवत् इतरशब्दस्य तु नित्यम्॥ असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः॥ * ॥ अन्योन्यं विप्रा नमन्ति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतम्। अन्योन्यस्मै दत्त-मित्यादि। अन्योन्येषां पुष्करैराभृशन्त इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्जनीयस्य सः। इतरेतरं इतरेतरेणेत्यादि॥ स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वाच्यः॥ * ॥ अन्यो-न्याम्। अन्योन्यम्। इतरेतरामितरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयात एव भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूप-मित्याहुः। अन्येतूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामादेश-माहुः॥

दलद्वये टाबभावः क्लीबे चाद्विरहः स्वमोः।
समासे सोरलुक् चेति सिद्धं बाहुलकात्त्रयम्॥

तथाहि। अन्योन्यं परस्परमित्यत्र दलद्वये टाप् प्राप्तः न च सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। यां यां प्रियां प्रैक्षत कातरेत्यादावतिप्रस-ङ्गात्। अन्योन्यमितरेतरमित्यत्र चाड्डुतरादिभ्य इत्यदड् प्राप्तः। अन्योन्यसंसक्तमहस्त्रियामम्। अन्योन्याश्रयः। परस्परातिशादृ-

श्यम् । अदृष्टपरस्परैरित्यादौ सोऽलुक् च प्राप्तः । सर्वं बाहुलकबलेन समाधेयम् । प्रकृतवार्तिकभाष्योदाहरणं स्त्रियामिति सूत्रे अन्योन्यसंश्रयत्वेतदिति भाष्यं चात्र प्रमाणमिति ॥

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् । ८ । १ । १३ ॥

प्रियप्रियेण ददाति । प्रियेण वा । सुखसुखेन । सुखेन वा । द्विर्वचने कर्मधारयवद्भावात्सुब्लुकि पुनस्तदेव वचनम् । अतिप्रियमपि वस्तु अनायासेन ददातीत्यर्थः । अकृच्छ्रे किम् । प्रियः शत्रुः । सुखो रथः ।

यथास्वे यथायथम् । ८ । १ । १४ ॥

यथास्वमिति वीप्सायामव्ययीभावः । योऽयमात्मा । यच्चात्मीयं तद्यथास्वं तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते । यथायथं ज्ञाता यथास्वभावमित्यर्थः । यथात्मीयमिति वा ज्ञातेत्यस्य तृन्नन्तत्वात् षष्ठी न । तृचि तु यथायथस्य ज्ञातेत्येव ॥

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । ८ । १ । १५ ॥

द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु । तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूताः । द्वन्द्वं मन्त्रयते । रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ते माता पुत्रेण मिथुनं गच्छति । पौत्रेण प्रपौत्रेणापीति मर्यादार्थः । व्युत्क्रमणंपृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः । द्विवर्गसम्बन्धेन पृथगवस्थिताः ।

द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति । द्वन्द्वं सङ्कर्षणवासुदेवौ अभिव्यक्तौ । साहचर्येणेत्यर्थः । योगविभागादन्यत्रापीष्यते । द्वन्द्वं युद्धान्यवर्तन्त ।

पदस्य । ८ । १ । १६ ॥

पदात् । ८ । १ । १७ ॥

अनुदात्तं सर्वमपादादौ । ८ । १ । १८ ॥

इत्यधिकृत्य ।

आमन्त्रितस्य च । ८ । १ । १९ ॥

पदात्परस्यापादादिस्थस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यात् । प्रागुक्तस्य षाष्ठस्यामन्त्रिताद्युदात्तस्यापवादोऽयमाष्टमिक आमन्त्रितनिघातः । इमं मे गङ्गे यमुने सरस्वति । अपादादौ किम् । शुतुद्रि स्तोमम् ।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयो-र्वान्नावौ । ८ । १ । २० ॥

पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावौ स्तस्तौ चानुदात्तौ ॥

बहुवचनस्य वस्नसौ । ८ । १ । २१ ॥

उक्तविधयोरनयोः षष्ट्यादिबहुवचनान्तयोर्वस्नसौ स्तः । वान्नावोरपवादः ॥

तेमयावेकवचनस्य । ८ । १ । २२ ॥

उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ॥

त्वामौ द्वितीयायाः । ८ । १ । २३ ॥

द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः ॥

श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ।
स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः ॥ १ ॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ॥
सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥ २ ॥

पदात्परयोः किम् । वाक्यादौ मा भूत् । त्वां पातु मां पातु । अपादादौ किम् । वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदावतु । स्थग्रहणाच्छ्रूयमाणविभक्तिकयोरेव । नेह । इति युष्मत्पुत्रो ब्रवीति । इत्यस्मत्पुत्रो ब्रवीति । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः । वाक्यलक्षणञ्चैकतिङ्वाक्यमिति समर्थसूत्रे उक्तव्यम् । तेनेह न । वयं दण्डोहरानेन । ओदनं पच तव भविष्यति । इह तु स्यादेव । नद्यास्तिष्ठति कूले । शालीनां ते ओदनं दास्यामीति । एते वान्नावादय आदेशा अनन्वादेशे वा वक्तव्याः । अन्वादेशे तु नित्यं स्युः । धाता ते भक्तोऽस्ति । धाता तव भक्तोऽस्तीति वा । तस्मै ते नम इत्येव ॥

न चवाहाहैवयुक्ते । ८ । १ । २४ ॥

चादिपञ्चकयोगे नैते आदेशाः स्युः । हरिस्त्वां मां च रक्षतु । कथं त्वां मां वा न रक्षेदित्यादि । युक्तग्रहणात्साक्षाद्योगेऽयं निषेधः । परम्परासम्बन्धे तु आदेशः स्यादेव । हरौ हरिश्च मे स्वामी ॥

पश्यार्थैश्चानालोचने । ८ । १ । २५ ॥

अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः । चेतसा त्वां समीक्षते । परम्परासम्बन्धेऽप्ययं निषेधः । भक्तस्तव रूपं ध्यायति । आलोचने तु भक्तस्त्वा पश्यति चक्षुषा ।

सपूर्वायाः प्रथमाया विभाषा । ८ । १ । २६ ॥

विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येते आदेशा वा स्युः । भक्तस्त्वमप्यहम् । तेन हरिस्त्वां त्रायते स माम् । त्वा मेति वा ।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । ८ । १ । २७ ॥

तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः । पचति गोत्रम् । गोत्रं स्वकुलं पीडयतीत्यर्थः । एवं हि कुत्सा भवति । पचति पचति गोत्रम् । अनेकार्थत्वात्करोत्यर्थे पचिः । विवाहादौ गोत्रं पुनः पुनः सुखाकरोतीत्यर्थः । एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् । तथाहि योगविभागः कार्यः । कुत्सनाभीक्ष्ण्ययोरिति । गोत्रादीनीति वर्तते । परिभाषेयम् । यानि कुत्सनाभीक्ष्ण्यविषयाणि तान्येवात्र शास्त्रे गोत्रादीनीत्यर्थः । यत्र गोत्रादिपदघटितवाक्येन कस्यचित्कुत्सा बोध्यते । क्रियागतमाभीक्ष्ण्यं वातानीति यावत् । तेनान्यत्रापि चर्माचर्दिवेत्यादौ गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम् । तिङः किम् । कुत्सितं गोत्रम् । गोत्रादीनि किम् । पचति पापम् । कुत्सेति किम् । खनति गोत्रं समेत्य कूपम् । गोत्रं समेत्य कूपं खनतीत्यर्थः ॥

तिङ्ङतिङः । ८ । १ । २८ ॥

अतिङन्तात्पदात्परं तिङन्तं निहन्यते ॥ अग्निमीडे ॥ तिङ् किम् । नीलमुत्पलम् । अतिङः किम् । पचति भवति । पाककर्तृकम् भवनमर्थः । अयमभिप्रायः । आख्यातं सविशेषणं वाक्यम् ।

आख्यातमित्येकत्वं चाविवक्षितम् । अर्थैक्यादेकं वाक्यमित्यर्थ इति वार्तिककारस्तु एकतिङ्वाक्यमिति मन्यते ॥

न लुट् । ८ । २९ ॥

लुडन्तं न निहन्यते । श्वः कर्ता ॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्

। ८ । १ । ३० ॥

एतैर्निपातैर्युक्तं तिङन्तं नानुदात्तम् । यदादयो निपातत्वादाद्युदात्ताः । सर्वनाम्नो यच्छब्दस्य तु न ग्रहणम् ॥ यत्रयद्योः पृथक् ग्रहणात् ॥ यद्यदार्थे च हेतौ च विचारे यदि चेच्चणः ॥

हंत हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥

कच्चित्प्रश्ने निषेधे च प्रशंसायां कुवित् स्मृतः ॥

नेन्निषेधे । यत्रेत्याधारे । यदग्ने स्यामहं त्वम् । युवा यदी कृथः । हंत करोति । कुविदङ्ग आसन् । नेदेवमायुनजन्नत्र देवाः ॥ युनजन्निति लेटि रूपम् । स चेद्भुङ्क्ते । चणिति चेदर्थे णित् । समुच्चयादौ त्वणित् । इन्द्रश्च मृलयाति नः । इन्द्रश्चेदस्मान्सुखयेदित्यर्थः । अचित्तिभिश्चकृमा कच्चित् । यद्यप्येतैरेव परभूतैर्योगे निषेधो नान्यैरित्यर्थकयद्धितुपरमिति वक्ष्यमाणनियमान्निषेधो न प्राप्नोति तथापि छान्दसत्वेनात्र नियमाप्रवृत्तिरित्याहुः । पुत्रासो यत्र पितरो भवन्ति । निपातैः किम् । यत्कूजति शकटम् । इणः शतरि रूपम् । ननु प्रतिपदोक्तत्वाद्यद्यादिभिर्निपातैः साहचर्याच्च निपात एव ग्रहीष्यते । सत्यम् । अत्र प्रकरणे क्वचिन्न्यायाप्रवृत्तिज्ञापनार्थत्वात् तेन यावद्यथाभ्यामिति सूत्रे वत्वन्तस्याव्ययस्य च

पीतिकिम् ? अर्थात्प्रकरणाद्वाऽमर्षाश्रद्धयोर्गम्यमानयोर्निरुपधा-द्धातोर्मा भूत् । अवृत्तौ लृङ्-न क्षमे न श्रद्दधे तत्रभवान्नामादत्त-मग्रहीष्यत् ।

किंकिलास्त्यर्थयोर्लृट् । ४ । ४ ॥ ११४ ॥

किं किल शब्दे समुदायेऽस्त्यर्थे चोपपदे अमर्षाश्रद्धयो-र्धातोर्लृट् भवति लिङोपवादः । न क्षमे न श्रद्दधे किं किल नाम तत्रभवानकल्प्यं सेविष्यते । अस्ति नाम, भवति नाम, विद्यते नाम तत्रभावानकल्प्यं सेविष्यते । तत्र लिङ् नास्तीति लृङ् न भवति ।

यद्यदियदाजातौ लिङ् । ४ । ४ ॥ ११५ ॥

यदादावुपपदेऽमर्षाश्रद्धयोर्धातोर्लिङ् भवति । लृटोऽपवा-दः । न क्षमे अमर्षो मे न श्रद्दधे प्रत्ययो मे यद्यदि यदा जातु तत्रभवानकल्प्यं सेवेत । अवृत्तौ लृङ् तत्रभवानकल्प्यमसे-विष्यत ।

गर्हे च यच्चयत्रे । ४ । ४ ॥ ११६ ॥

यच्चयत्रयोरुपपदयोर्गर्हेऽमर्षाश्रद्धयोश्च लिङ् भवति । अम र्षाश्रद्धयोर्लृटोपवादः । गर्हे सर्वलकाराणां । न क्षमे न श्रद्दधे गर्हामहे यच्च यत्र वा तत्र भवानाक्रोशेत् । अवृत्तौ लृङ्-यच्च यत्र वा तत्रभवानाक्रोक्ष्यत् ।

चित्रे ॥ ४ । ४ । ११७ ॥

चित्रमाश्चर्यं । यच्चयत्रयोरुपपदयोश्चित्रेऽर्थे धातोर्लिङ् भवति । चित्रं यच्च यत्र वा तत्रभवानकल्प्यं सेवेत । अवृत्तौ लृङ्-चित्रं यच्च यत्र वा तत्रभावानकल्प्यमसेविष्यत ।

लृट् शेषेऽयदौ ॥ ४ । ४ । ११८ ॥

शेषे उपपदे चित्रे गम्यमाने धातोर्लृट् भवति । अयदौ

यदिशब्दश्चेन्न प्रयुज्यते । आश्चर्यमंधो नाम पर्वतमारोक्ष्यति । बधिरो नाम व्याकरणं श्रोष्यति । मूको नाम धर्मं कथयिष्यति शेष इति किम् ? यच्चयत्रयोर्लेङेव । अयदाविति किम् ? आश्चर्यं यदि स भुंजीत । अश्रद्धाप्यस्तीति लेङ् । लेङ्निमित्तं नास्तीति न लृङ् ।

बाढेप्युते लेङ् ॥ ४ । ४ । ११८ ॥

बाढार्थयोः अपि उतयोर्द्धातोर्लेङ् भवति । अपि कुर्यात उत कुर्यात् । बाढं करिष्यतीत्यर्थः । एवमप्यधीयीत । उताधीयीत बाढ इति किं ? अपि दास्यति द्वारं । उत दंडः पतिष्यति । अत्राऽऽच्छादनं प्रश्नार्थः । उताबलस्य बलवान् । उत बालस्य पंडितः । उतानृपस्य वेदज्ञः पुत्रो जनक जायते । क्वचिदित्यर्थः । अवृत्तौ लृङ् । अप्यभोक्ष्यत । उताभोक्ष्यत ।

संभाव्येऽलम्यर्थात् ॥ ४ । ४ । १२० ॥

संभाव्ये श्रद्धेयेऽर्थे वर्तमानाद्धातोः लेङ् भवति । अलम्यर्थादर्थाच्चेदलं भवति । स्वरूपतः अपि पर्वतं शिरसा भिन्द्यात् । अपि द्रोणपाकं भुंजीत । संभाव्यते एतत् शक्त इत्यर्थः । शक्त्यर्थश्चेहालंपरिगृह्यते । अलमिति किम् ? निदेशस्थो मे पायेण गमिष्यति ग्रामं नगरं वेति प्रतीयते । अर्थाविति किम् ? अलं देवदत्तो धर्मं करिष्यति । अवृत्तौ लृङ्-अपि वज्रपातो नापतिष्यत् ।

धातूक्तौ वा यदि ॥ ४ । ४ । १२१ ॥

धातूनाँ सभावनावचनेन संभावनाया उक्तौ प्रतिपादने सति संभाव्येऽर्थे वर्तमानाद्धातोरलम्यर्थात्सति लेङ्वा भवति । अयदि यच्छब्दश्चेन्न प्रयुज्यते । पूर्वेण नित्ये विकल्पः । संभावयामि श्रद्धे प्रत्येमि भुंजीत भवान् । भोक्ष्यते भवान् ।

अभुंक्त भवान् । अभुक्त भवान् । अयदीति किम् ? संभावयामि यद्भुंजीत भवान् । धातुग्रहणं किं ? अपि पर्वतं शिरसा भिन्द्यात् । अवृत्तौ लृङ् संभावयामि अभोक्ष्यत भवान् ।

सतीच्छार्थात् ॥ ४ । ४ । १२२ ॥

सति वर्तमानेऽर्थे वर्तमानादिच्छार्थाद्धातोर्लिङ्वा भवति । इच्छेत् । इच्छति । उश्यात् । वष्टि । कामयते । कामयेत । वांच्छेत् वांच्छति । गर्हेऽपि जात्वोर्लङित्यादावपि परत्वादयमेव विकल्पः ।

वर्त्स्यति फलकारणे ॥ ४ । ४ । १२३ ॥

फलं कार्यं हेतुमत्करोतीति कारणं हेतुर्निमित्तमत एव निपातनात् कर्तर्यनो दीर्घश्च वर्त्स्यति फले कारणे चार्थे वर्तमानाद्धातोः लिङ् वा भवति । यदि गुरूनुपासीत उपास्ष्यते । शास्त्रांतं गच्छेत् । गमिष्यति । दक्षिणेन चेद्यायात् । यास्यति न शकटं पर्याभवेत् । पर्याभविष्यति । वर्त्स्यतीति किम् ? दक्षिणेन चेत्याति न शकटं पर्याभवति । अवृत्तौ लृङ् । दक्षिणेन चेद्यास्यत् न शकटं पर्याभविष्यत ।

कामाविष्कारेऽकच्चिति ॥ ४ । ४ । १२४ ॥

वर्त्स्यति वेति निवृत्तं । काम इच्छाभिप्रायः । तस्याविष्कारे प्रवेदने धातोर्लिङ् भवति । अकच्चिति-कच्चित् शब्दप्रयोगेन प्रयुज्यते । काम इच्छाभिप्रायो मे भुंजीत भवान् । अनेन परस्य स्वाभिप्रायो निवेद्यते । अकच्चिदिति किम् ? कच्चित् जीवति ते पिता ।

इच्छार्थे लेङ् लेट् ॥ ४ । ४ । १२५ ॥

इच्छार्थे उपपदे कामाविष्कारे धातोर्लेङ्लेटौ भवतः । इच्छामि, कामये, प्रार्थये भुंजीत भुङ्क्तां भवान् । काम-

विष्कार इति किम् ? ? इच्छन्करोति, अत्रावृत्तौ परत्वात् लेटा लृङ् बाध्यते । केवले हि लेङ् विधौ लृङ्विधानं सावकाशमेव । एवमुत्तरत्रापि ।

विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्न-प्रार्थने ॥ ४ । ४ । १२६ ॥

विधिर्नियोगः अज्ञातविज्ञापनमित्येके । निमन्त्रणं नियोगतः कर्त्तव्यं । क्रियास्वाभिमुख्यकरणमित्येके । आमन्त्रणं यत्कामचारतः कर्तव्यं । कर्तव्येष्वनुज्ञापनमित्येके । अधीष्टं सत्कारपूर्विका व्याहारणा । संप्रश्नः संप्रधारणा बुभुत्सावेदनं । प्रार्थनं याचञा एतेषु प्रत्ययार्थविशेषणेषु धातोर्लिङ्लेटौ भवतः । विधौ—कटं भवान् कुर्यात् । करोतु । ग्रामं भवान् गच्छेत् गच्छतु । निमन्त्रणे—संध्यासु भवान्नियमं कुर्यात् । करोतु । सूत्रं यथाक्रमं भवानधियीत । अधीयताम् । आमन्त्रणे इह भवान् आसीत । आस्तां । देवदत्तःपठेत् । पठतु । अधीष्टेतत्त्वं नः प्रसीदेत् । प्रसीदन्तु पादाः । संप्रश्ने-किं नु खलु भोः व्याकरणमधीयीय । अध्ययै । धर्मशास्त्रमधीयीय । अध्ययै । प्रार्थने-भवति मे प्रार्थना व्याकरणमधीयीय । अध्ययै । भवति मे प्रार्थना अध्यात्मशास्त्रमधीयीय । अध्ययै । लेटा बाधनात् अवृत्तौ इह लृङ् भवति ।

प्रैषानुज्ञाऽवसरे लेट् व्यप् ॥ ४ । ४ । १२७ ॥

प्रेषणं प्रैषबलान्नियोगः । अनुज्ञा अतिसर्जनं, अवसरः प्राप्तकालता । एतेषु गम्यमानेषु धातोर्लेट् व्यपश्च प्रत्ययाः भवन्ति । भवान् कटं करोतु । भवता खलु कटः कार्यः । कर्तव्यः । करणीयः । कृत्यः भवान् हि प्रेषितः । अनुज्ञातः ।

भवतोऽवसरः कटकरणे । अनुज्ञायां केचिल्लेङ्याहुः । अति-सृष्टो भवान् ग्रामं गच्छेत् । नगरं गच्छेत् ।

लेङ् चोर्ध्वं मुहूर्तात् ॥ ४ । ४ । १२८ ॥

प्रैषानुज्ञावसरेषु ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य वर्तमानाद्धातोः लेङ् प्रत्ययो भवति लेट् ध्यण्च । ऊर्ध्वं मुहूर्तात् शीघ्रं भवान् कटं कुर्यात् । करोतु । भवता खलु कटः कार्यः कर्तव्यः करणीयः कृत्यः ।

लेट् स्मे ॥ ४ । ४ । १२९ ॥

स्मशब्दउपपदे प्रैषानुज्ञावसरेषु ऊर्ध्वमौहूर्तिकेऽर्थे लेङ् भवति लेङ्ध्यपोरपवादः । ऊर्ध्वं मुहूर्तात् भवान् कटं करोतु स्म ।

अधीष्टे ॥ ४ । ४ । १३० ॥

स्मे उपपदेऽधीष्टेऽर्थे लेङ् भवति लेङोऽपवादः । अङ्ग स्म राजन् अणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व ।

कालवेलासमयावसरे तुं वा ॥ ४ । ४ । १३१ ॥

कालादावुपपदेऽवसरेऽर्थे धातोस्तुं प्रत्ययो भवति वा । कालो भोक्तुं, वेला भोक्तुं, समयो भोक्तुं, अवसरो भोक्तुम् ऊर्ध्वमुहूर्तात् कालो भोक्तुं । वावचनाद्यथाप्राप्तं च । कालो भोजनस्य । अवसर इति किम् ? कालः पचति भूतानि ।

लेङ् यदि ॥ ४ । ४ । १३२ ॥

यदि सति कालादावुपपदेऽवसरे धातोर्लेङ् भवति तुमोऽपवादः । कालो वेला समयो यद्भुंजीत भवान् ।

तृच्यप्चार्हे ॥ ४ । ४ । १३३ ॥

अर्हे इति प्रकृत्यर्थस्य वा विशेषणं । अर्हे गम्यमाने धातोर्लेङ् भवति तृच्यप् च । भवान् खलु कन्यां वह्यात् ।

कन्यया वोढा । भवता खलु कन्या वोढव्या भवान् एतदर्हति ।

णिन्घ्यपावावश्यकाधमर्ण्ये ॥ ४ । ४ । १३४ ॥

आवश्यके आधमर्ण्ये च गम्यमाने धातोर्णिन्घ्यणौ भवतः । अवश्यं भावः आवश्यकं । ऋणेऽधमः अधमर्णस्तस्य भावः आधमर्ण्यं । आवश्यके-कारी । हारी । अवश्यंहारी । अवश्यंलावी । अवश्यंपावी । समासो मयूरव्यंसकादित्वात् । घ्यण्-अवश्यंभव्यः । अवश्यंगेयः । आधमर्ण्ये शतंदायी । सहस्रंदायी कारिमेऽसि कटं । हारिमेऽसि भारं । घ्यण्-गेयो गाथानाम् ।

शक्तौ लेङ् घ्यण् ॥ ४ । ४ । १३५ ॥

शक्तौ गम्यमानायां धातोर्लेङ्घ्यणौ भवतः । भवान् खलु भारं वहेत् । भवता खलु भारं उह्येत वाह्यः । वोढव्यः । वहनीयं भवान् हि शक्तः ।

लिङ् लेडाशिषि ॥ ४ । ४ । १३६ ॥

आशिषि गम्यमानायां धातोः लिङ्लेटौ भवतः । जीयात् । जीयास्ताम् । जीयासुः । जयतात् । जयताम् । जयंतु ।

माङि लुङ् ॥ ४ । ४ । १३७ ॥

माङि उपपदे धातोर्लुङ् भवति । सर्वलकारापवादः । तत् माजनि खपुष्पवत् ।

लङ् च स्मेन ॥ ४ । ४ । १३८ ॥

स्मशब्देन सह माङि धातोर्लङ्लुङौ भवतः । मा स्म करोत् । मा स्म कार्षीत् । मा देवदत्त स्म हरत मा देवदत्त स्म हार्षीत् ।

भृशाभीक्ष्ण्ये लेट् तस्मिँस्तथार्थे ॥ ४ । ४ । १३९ ॥

भृशे आभीक्ष्ण्ये चार्थे वर्तमानाद्धातोर्लेट् भवति । सर्वलकारापवादः तस्मिन् धातौ तथार्थे उपपदे यथाविधावर्थे लेडन्तस्य

लोडन्तसाधनोपग्रह इत्यर्थः । लुनीहि लुनीहि इत्येवं लुनाति । लुनीतः । लुनंति । एवं अलावीत् । अलाविष्टाम् । अलाविषुः । लविष्यति । लविष्यतः । लविष्यन्तीत्यादि नेयं । अधीष्व अधीष्वेत्येवमधीते । अधीयाते । अधीयते । अध्यगीष्ट । अध्येष्यते । अधीयस्व अधीयस्वेत्येव अधीयते । अध्यायि अध्यायिषाताम् । अध्यायिषत । अध्यायिष्यते इत्यादि । शय्यस्व शय्यस्वेति शय्यते अशायि । शायिष्यते । एवं सर्वलकारेष्वप्युदाहार्यम् । तस्मिन्निति किम्? लुनीहि लुनीहीति छिन्नतीति मा भूत् । तथार्थ इति किम्? लुनीहि लुनीहि लुनीते । अधीष्वाधीष्वेत्येवाधीयते देवदत्तेनेति मा भूत् ।

प्रचये वा सामान्यार्थे ॥ ४ । ४ । १४० ॥

अनेकधात्वर्थसमुच्चयः प्रचयः, सामान्यार्थे धातावुपपदे प्रचये गम्यमाने धातोर्लेड् वा भवति । व्रीहीन् वप । लुनीहि लुनीहीत्येव यतसे । चेष्टते । समीहते । यत्यते । चेष्ट्यते । समीह्यते । व्रीहीन्वपति । लुनाति । पुनातीत्येव यतते । यत्यते । ग्राममट वनमट । गिरिमटेत्येवाटति घटते । चेष्टते । अस्यते । घट्यते । चेष्ट्यते ग्राममटति । वनमटति । गिरिमटति इत्येवाटति । घटते । अस्यते । घट्यते ओदनं भुङ्क्ष्व सक्तून् पिबति धाना श्वादतीत्वेवाभ्यवहरति । अभ्यवह्रीयते । सामान्यार्थ इति किम्? निरुपपदः सर्वविशेषोपपदो वा प्रयोगो मा भूत् ।

निषेधेऽलङ्खलोक्त्वा ॥ ४ । ४ । १४१ ॥

वेति वर्तते । निषेधवृत्त्योरलंखल्वावुपपदयोर्धातोः क्त्वा प्रत्ययो वा भवति । पक्षे यथाप्राप्तम् । अलं कृत्वा । खलुकृत्वा । अलं बाले रुदित्वा । अलं बाले रुदितेन । रोदनेन । निषेध

इति किम् ? अलंकारः सिद्धं खलु ।

परावरे ॥ ४ । ४ १४२ ।

परे अवरे च गम्यमाने धातोः क्त्वा वा भवति । सर्वमतिक्रम्य नद्या अनदीमप्राप्य पर्वतः नदीपरा । अवरः । पर्वत इत्यर्थः । वाधिकारात् यथाप्राप्तं च । पर्वतातिक्रमणा नदी । नद्यप्राप्त्या पर्वत इत्यपि भवति ।

व्यतिहारे मेङस्तुल्यकर्तृके ॥ ४ । ४ । १४३ ॥

यस्माद्धातोः प्रत्ययो भवति तेन समानकर्तृके धातावुपपदे व्यतिहारेऽर्थे वर्तमानात् मेङः क्त्वा वा भवति । अपमित्य याचते । याचित्वा अपमयते । अपमित्य हरति हृत्वा अपमयते । अपमातुर्याचत इत्यर्थः । अप्राक्कालेयम् । क्त्वा व्यतिहार इति किम् ? अर्थान्तरे मा भूत् । अनेकार्था हि धातवः । तुल्यकर्तृक इति किम् ? देवदत्तस्यापमाने गुरुदत्तो याचते ।

प्राक्काले ॥ ४ । ४ । १४४ ॥

प्राक्कालेऽपरकाले न तुल्यकर्तृके धातोः क्त्वा वा भवति। भुक्त्वा व्रजति । आसित्वा भुङ्क्ते । स्नात्वा भुक्त्वा पीत्वा व्रजति । वानुवृत्तेरास्यति भोक्तुमित्यपि व्यादाय स्वपिति । संमील्य हसतीति व्यादानाद्युत्तरकालस्वापाद्यपेक्षायां प्रत्ययः ।

पूर्वाग्रे प्रथमाभीक्ष्ण्ये खमुञ् ॥ ४ । ४ । २४५ ॥

पूर्वादिषूपपदेषु आभीक्ष्ण्ये च धात्वर्थोपधौ तुल्यकर्तृकेऽर्थे धातोः खमुञ् वा भवति । पूर्वं भोजम् । पूर्वं भुक्त्वा । अग्रे भोजं । अग्रे भुक्त्वा । प्रथमं भोजंप्रथमं भुक्त्वा व्रजति । आभीक्ष्ण्ये-भोजं भोजं भुक्त्वा भुक्त्वा व्रजति । पायं पायं पीत्वा पीत्वा व्रजति । खमुञो मुक्ते क्त्वा । खित्वमुत्तरार्थं ।

अन्यथैवंकथमित्थमः कृञोऽनर्थकात् ॥ ४ । ४ । १४६ ॥

अन्यथादिभ्यः परात्तुल्यकर्तृकेऽर्थे करोतेरनर्थकात् खमुञो भवति । आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात् । अन्यथाकारं भुङ्क्ते । इत्येवार्थः । एवंकारं, कथंकारं, इत्थंकारं भुंक्ते । पक्षे क्त्वापि भवति । अन्यथा कृत्वा । एवं कृत्वा इत्थं कृत्वा । कथं कृत्वा । एवमुत्तरत्रापि । अनर्थकादिति किम् ? अन्यथा कृत्वा शिरः भुंक्ते ।

यथातथादीर्ष्याप्रत्युक्तौ ॥ ४ । ४ । १४७ ॥

यथातथाभ्यां परात्तुल्यकर्तृकेऽर्थे अनर्थकात्करोतेः खमुञ्वा भवति ईर्ष्या प्रत्युक्ता ईर्ष्यंचेत (?) । पृष्टः प्रतिवक्ति कथं भवान् भोक्ष्यते । यथाकारमहं भोक्ष्ये, तथाकारमहं भोक्ष्ये किन्तवानेन । किं ते मया यथाहं भोक्ष्ये, तथाहं भोक्ष्ये इत्यर्थः । अन्यत्र यथाकृत्वा तिलान् खादति । तथाकृत्वा पृथुकान् खादति । यथा कृत्वाहं भोक्ष्ये तत् तथा द्रक्ष्यसि ।

आप्यादाक्रोशे ॥ ४ । ४ । १४८ ॥

आप्यात्कर्मणः परात्तुल्यकर्तृकेऽर्थे करोतेः खमुञ् वा भवति आक्रोशे गम्यमाने । चोरंकारं । चोरं कृत्वा आक्रोशति । चोरोऽसीत्याक्रोशतीत्यर्थः । एवं दस्युकारमाक्रोशति । व्याधंकारमाक्रोशति । अन्यत्रचोरं कृत्वा हेतुभिः कथयति ।

स्वादोरच्यच्वेः ॥ ४ । ४ । १४९ ॥

स्वाद्वर्थादाप्यात्परात्तुल्यकर्तृकेऽर्थे कृञः खमुञ्वा भवति । अच्व्यच्वेः च्यदन्तं च्व्यंतं च वर्जयित्वा । स्वादुङ्कारं । संपन्नंकारं । लवणंकारं भुंक्ते । अच्यच्वेरिति किम् ? स्वादुं कृत्वा यवागुं भुंक्ते स्वादूकृत्य भुंक्ते ।

विदद्दृशिभ्यः कात्स्न्र्ये णम् ॥ ४ । ४ । १५० ॥

आप्यात्पराभ्यां विद्दृशिभ्यां प्राक्काले तुल्यकर्तृकेऽर्थे णं वा भवति कात्स्न्यें साकल्ये गम्यमाने विद्यतिवर्जितास्ते: विदादयो गृह्यन्ते। विद्यतिस्त्वकर्मकः । अतिथिवेदं भोजयति । यं यमतिथिं वेत्ति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । कन्यादर्शं वरयति । यां यां कन्यां पश्यति तां तां सर्वां वरयतीत्यर्थः । कात्स्न्यें इति किम्? अतिथिं विदित्वा भोजयति । कन्यां दृष्ट्वा वरयति ।

यावतो जीवविंदात् ॥ ४ । ४ । १५१ ॥

यावदित्येतस्मादाप्यात्पराभ्यां जीवविन्दिभ्यां तुल्यकर्तृकेऽर्थे णं वा भवति कात्स्न्यें । यावज्जीवमधीते । यावज्जीवति तावदधीते इत्यर्थः । यावद्वेदं गृह्णाति । यावल्लभते तावत्सर्वं गृह्णातीत्यर्थः ।

चर्मोदरात्पूरेः ॥ ४ । ४ । १५२ ॥

चर्मन् उदराभ्यां कर्मभ्यां पूरयतेः प्राक्काले तुल्यकर्तृकेऽर्थे णं वा भवति । चर्मपूरमास्ते । चर्मपूरयित्वास्ते इत्यर्थः । उदरपूरं शेते । उदरं पूरयित्वा शेते इत्यर्थः ।

वृष्टियत्वेऽस्यो लुग्वा ॥ ४ । ४ । १५३ ॥

आप्यात्परात् पूरयतेः णं वा भवति । अस्य पूरेः ऊकारस्य च लुग्वा भवति । वृष्टीयत्वे वृष्टेरियत्वे गम्यमाने गोष्पदप्रं गोष्पदपूरं वृष्टो देवः । सीताप्रं सीतापूरं वृष्टो देवः । यावता गोष्पदाधिपूर्णं तावत् वृष्ट इत्यर्थः । अस्येति किम्? मूषिकाबिलपूरं वृष्टो देवः । उपपदस्य ऊकारस्य मा भूत् ।

चेलार्थात् क्नोपेः ॥ ४ । ४ । १५४ ॥

चेलार्थादाप्यात्परात्क्नोपेर्द्धातोस्तुल्यकर्तृकेऽर्थे णं वा भ-

वति । वृष्टीयत्वे गम्यमाने । चेलक्नोपं वस्त्रक्नोपं वसनक्नोपं परिधानक्नोपं वृष्टो देवः । यावता चेलक्नोऽसमुच्छादनमात्रं भवति तावद्वृष्ट इत्यर्थः ।

तृतीययोपदंशः ॥ ४ । ४ । १५५ ॥

उपपूर्वाद्दंशेस्तुल्यकर्तृकेऽर्थे तृतीयान्तेन योगे णं वा भवति । मूलकोपदंशं, मूलकेनोपदंशं, मूलकेनोपदंशस्य भुंक्ते। आर्द्रकोपदंशं। आर्द्रकेणोपदंशं आर्द्रकेणोपदंशस्य भुंक्ते।

हिंसार्थात्तुल्याप्यात् ॥ ४ । ४ । १५६ ॥

हिंसार्थाद्धातोः तुल्याप्याद्धयाऽसौ तुल्यकर्तृकः तत् क्रियातुल्यकर्मणः तृतीयाया योगे णम्वा भवति । दण्डाघातम्, दण्डेन घातं गाः कालयति । खड्गप्रहारं । खड्गेन प्रहारं शत्रून् जयति । हिंसार्थादिति किम् ? चन्दनेनानुलिप्य देवदत्तं परिधापयति । तुल्याप्यादिति किम्? दंडेनाहत्य गोपालं गाः कालयति ।

तत्सप्तम्योपात्पीड्रुधकृषः ॥ ४ । ४ । १५७ ॥

तया तृतीयया सप्तम्या च योगे उपात्परेभ्यः पीडादिभ्यस्तुल्यकर्तृकेऽर्थे णं वा भवति । परिपार्श्वोपपीडं । पारिपार्श्वोपपीडं । पारिपार्श्वे उपपीडं शेते भुजोपपीडं । व्रजोपरोधं । व्रजेनोपरोधं । व्रजे उपरोधं गाः स्थापयति पाण्युपकर्षं । पाणिनोपकर्षं । पाणावुपकर्षं धाना गृह्णाति ।

प्रमाणसमासत्त्योः ॥ ४ । ४ । १५८ ॥

आयाममानं प्रमाणं, सन्निकर्षः समासत्तिः, प्रमाणसमासत्त्योः गम्यमानयोः तृतीयासप्तमीभ्यां योगे धातोस्तुल्यकर्तृकेऽर्थे णं वा भवति । प्रमाणे-द्व्यंगुलोत्कर्षं । द्व्यंगुलेनोत्क-

र्षं । द्व्यंगुले उत्कर्षं गण्डिकां छिनत्ति । त्र्यंगुलोत्कर्षं । त्र्यंगुलोत्कर्षं त्र्यंगुले उत्कर्षं गंडिकां छिनत्ति । समासत्तौ-केशग्राहं । केशैर्ग्राहं । केशेषु ग्राहं । हस्तग्राहं । हस्ताभ्यां ग्राहं हस्तेयोर्ग्राहं । अस्यपनोदं । असिनापनोदं । असिष्वपनोदं युध्यन्ते । ये एवं नाम युद्धसंरम्भात् सन्निकृष्य युध्यन्ते इत्यर्थः ।

तूर्णेऽपादानेन ॥ ४ । ४ । १५८ ॥

त्वरणं तूर्णं त्वरेत्यर्थस्तस्मिन् गम्यमाने अपादानेनापायेऽवधिना योगे धातोस्तुल्यकर्तृकेऽर्थे णं वा भवति । शय्योत्थायम् । शय्याया उत्थायं धावति । कार्यान्तराणि परित्यज्य शयनादुत्थानमात्रो धावतीत्यर्थः ।

एवं रन्ध्रापकर्षं रंध्रादपकर्षम् पयः पिबति । भ्राष्ट्रापकर्षम् । भ्राष्ट्रादपकर्षं अपूपान् भक्षयति । तूर्णे इति किम्? आसनादुत्थाय गच्छति ।

द्वितीयया ॥ ४ । ४ । १६० ॥

द्वितीयान्तेन योगे तूर्णे धातोस्तुल्यकर्तृकेऽर्थे णम्वा भवति । लोष्टग्राहम् । लोष्टान् ग्राहम् । यष्टिं ग्राहम् । युध्यते । दंडोद्यावं दंडमुद्यावं धावति । एवं नाम त्वरमाणो युध्यते यदायुधग्रहणमपि नाद्रीयत इत्यर्थः ।

स्वाङ्गेनाध्रुवाबाध्येन ॥ ४ । ४ । १६१ ॥

स्वाङ्गमुक्तलक्षणम् । यस्मिन्नसत्यपि जीवन्ति तद्ध्रुवम् । आबाधः परिक्लेशः । स्वाङ्गेन अध्रुवेण आबाध्येन च द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे णम्वा भवति । अक्षिकाणम् अक्षिणीकाणम् जल्पति । भ्रूक्षेपम् । भ्रुवौ क्षेपम् जल्पति । आबाध्येन उरःप्रतिषेधम् । उरांसि प्रतिषेधम् युध्यन्ते । शिरः च्छेदम् । शिरांसि च्छेदं युध्यन्ते । स्वाङ्गेनेति किम्? गडुमुपपीड्य

तिष्ठति । अध्रुवावाप्ययेनेति किम् ? शिरः समुत्क्षिप्य जल्पति । आवाप्यग्रहणं ध्रुवार्थम् ।

विश्यपतिपदिस्कंदाद्वीप्साभीक्ष्ण्ये ॥ ४ । ४ । १६२ ॥

विश्यादिभ्यो धातुभ्यो द्वितीयान्तेन योगे वीप्साभीक्ष्ण्ययोगे णम्वा भवति । गेहानुप्रवेशं गेहं गेहं अनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशमास्ते । गेहानुप्रतानम् गेहं गेहमप्रनुतानं गेहमनुप्रतानमनुप्रतानम् आस्ते । गेहानुप्रपादम् । गेहं गेहमनुप्रपादम् । गेहमनुप्रपादमनुप्रपादमास्ते । गेहावस्कंधम् गेहं गेहमवस्कन्धम् । गेहमवस्कन्धमवस्कन्धमास्ते । असमासे द्विर्वचनम् समासे समासस्तत्र रूढ इति न भवति । तत्र वीप्सायां द्रव्यस्याभीक्ष्ण्ये क्रियायाः वाधिकारात् क्त्वा भवत्येव । गेहंगेहमनुप्रविश्यास्ते ।

तृष्यसः काले नान्तरे ॥ ४ । ४ । १६३ ॥

क्रियामन्तरयतीत्यन्तरः क्रियाविच्छेदकः । क्रियामध्यः तस्मिन्नर्थे वर्तमानात् तृषेरस्यतेश्च धातोः कालवाचिना द्वितीयान्तेन योगे णम्वा भवति । द्व्यहतर्षम् । द्व्यहंतर्षम् । गावः पिबन्ति । द्व्यहात्यासम् । द्व्यहमत्यासं: गावः पिबन्ति अन्तर्मुहूर्तात्यासम् अन्तर्मुहूर्तमत्यासम् सम्यक्पश्यति । कालेनेति किम् ? योजनं तर्षित्वा । योजनमत्यस्य गावः पिबन्ति । अन्तर इति किम् ? अहरत्यस्य इष्वान्गतः ।

ग्रहादिशो नाम्ना ॥ ४ । ४ । १६४ ॥

ग्रहो दिशेश्च नाम्ना नामशब्देन द्वितीयान्तेन योगे णम्वा भवति । नामग्राहमाचष्टे । नामादेशमाचष्टे । असमासे नामानि ग्राहं नामानि ग्राहं नाम देवदत्तो ग्राहमाचष्टे ।

कृञाऽव्ययेनानिष्टोक्तौ णं क्त्वौ ॥ ४ । ४ । १६५ ॥

कृञो धातोरव्ययेन णम्क्त्वौ प्रत्ययौ वा भवतः । अनिष्टोक्तौ गम्यमानायाम् । ब्राह्मण पुत्रस्ते जातः । किं तर्हि वृषल नीचैःकारम् । नीचैः वृषलकारम् । नीचैःकृत्य नीचैः कृत्वा आचक्षे । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण कन्या ते गर्भिणी जाता । किं तर्हि वृषलोच्चैः कारं उच्चैः वृषलकारम् । उच्चैः कृत्य । उच्चैः कृत्वा आचक्षे । नीचैर्नाम अप्रियमाख्येयम् । अनिष्टोक्ताविति किम् ? उच्चैः कृत्वा आचष्टे । ब्राह्मण पुत्रस्ते जातः । नीचैः कृत्वा आचष्टे । ब्राह्मण कन्या ते गर्भिणी जाता । अव्ययेनेति किम् ? ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषलमंधंकृत्वा आचक्षे ब्राह्मण कन्या ते गर्भिणी जाता किं तर्हि वृषलकारं कृत्वा आचक्षे । उच्चैर्णं क्त्वाग्रहणमुभयोस्समासार्थम् । अन्यथा हि वाधिकाराद्यथाप्राप्तक्त्वाभ्यमज्ञाने टोक्त इति समासो णमेव स्यात् न क्त्वायाः तद्विधौ टोक्त्यभावात् । उत्तरत्र चोभयमनुवर्तते ।

तिरश्चापवर्गे ॥ ४ । ४ । १६६ ॥

अपवर्गस्समाप्तिर्निष्ठा तत्पूर्वको विरामः त्यागो वा । तस्मिन् कृञोऽव्ययेन तिरश्चा योगे णम् क्त्वा वा भवतः । तिर्यक्कारं । तिर्यक्कृत्य तिर्यक्कृत्वा गतः । समाप्य वासमाप्य विरम्य वा उत्सृज्य वा गत इत्यर्थः । अन्यत्र तिर्यक्कृत्वा काष्ठं गतः ।

भुवोऽनूच्चानुलोम्ये ॥ ४ । ४ । १६७ ॥

भूधातोरन्वगव्ययेन योगे अनुलोम्ये आनुकूल्ये णंक्त्वौ भवतो वा अन्वग्भावमन्वग्भूय अन्वग्भूत्वा तिष्ठति । अनुकूलो भूत्वेत्यर्थः ।

तूष्णीमा ॥ ४ । ४ । १६८ ॥

तूष्णीमायोगे भुवो णम् क्त्वा वा भवतः । तूष्णींभावम् ।

तूष्णींभूय । तूष्णींभूत्वा तिष्ठति । जोष तिष्ठतीत्यर्थः ।

स्वाङ्गात्तसौ कृभ्वः ॥ ४ । ४ । १६८ ॥

व्याश्रये तसित्यारभ्य यस्तस्प्रत्ययः स्वाङ्गाद्विहितः तदन्तेन योगे कृभूभ्यां णं क्त्वा वा भवतः । मुखतः कारम् । मुखतः कृत्वागतः । मुखतो भावम् । मुखतोभूयम् । मुखतो भूत्वा स्थितः । स्वांगादिति किम्? सर्वतः कृत्वा गतः । तसीति किम्? मुखं कृत्वा गतः ।

च्वौधाण्विनानाना ॥ ४ । ४ । १७० ॥

धाणिति संख्याया धा इत्यारभ्या तद्धितिधणः प्रत्याहारेण धाण् । ध्यमञ् धमेधाः परिगृह्यन्ते । धणस्तव्ययेनेति व्युदासः । च्वाविति च्व्यर्थनिर्देशः । धाणन्तेन च्व्यर्थवृत्तिना व्ययेन विना नाना इत्येताभ्यां च योगे कृभूभ्यां णम् क्त्वा वा भवतः । अद्विधाभूतं द्विधाभूत कृत्वा गतः । द्विधाकारम् । द्विधाकृत्य । द्विधाकृत्वा गतः । अद्विधाभूतः द्विधाभूतः स्थितः । द्विधाभावम् । द्विधाभूय । द्विधाभूत्वा स्थितः । एवमैकध्यं कारमैकध्यं कृत्य । ऐकध्यं कृत्वा ऐकध्यंभावम् । ऐकध्यंभूय । ऐकध्यंभूत्वा । द्वैधकारम् । द्वैधंकृत्य । द्वैधंकृत्वा । द्वैधं भावम् । द्वैधंभूय । द्वैधंभूत्वा । द्वेधाकारम् । द्वेधाकृत्य । द्वेधाकृत्वा द्वेधाभावम् । द्वेधाभूयं । द्वेधाभूत्वा । विनाकारम् । विनाकृत्य । विनाकृत्वा विनाभावम् । विनाभूय । विनाभूत्वा नानाकारम् । नानाकृत्य । नानाकृत्वा नानाभावम् । नानाभूय । नानाभूत्वा स्थितः । च्वाविति किम्? द्विधाकृत्वा काष्ठानि गतः ।

शुष्कचूर्णरूक्षादाप्यात्पिषस्तस्मिन् णम् ॥ ४।४।१७१ ॥

शुष्कादिभ्यः कर्मभ्यः परात्पिषेर्धातोर्णम्वा भवति । तस्मिन् यदि स एव धातुरुपपदं भवति । शुष्कपेषं पिनष्टि ।

शुष्कं पिनष्टीत्यर्थः । शुष्कपेषं पिष्टः । शुष्कः पिष्ट इत्यर्थः । एवं चूर्णपेषं पिनष्टि । रूक्षपेषं पिनष्टि । वाधिकारात् शुष्कस्य पेषं पिनष्टीति घञादयोऽपि भवन्ति ।

कृञ् ग्रहोऽकृतजीवात् ॥ ४ । ४ । १७२ ॥

अकृतजीवाभ्यां आप्याभ्यां यथासंख्यं पराभ्यां कृञ्-ग्रहिभ्यां णम्वा भवति । तस्मिन् धातावुपपदे । अकृतकारं करोति । अकृतं करोतीत्यर्थः । जीवग्राहं गृह्णाति । जीवं गृह्णातीत्यर्थः ।

निर्मूलात्कषः ॥ ४ । ४ । १७३ ॥

निर्मूलादाप्यात्परात् कषेः णम्वा भवति, तस्मिन् धातावुपपदे । निर्मूलकाषं कषति । निर्मूलं कषतीत्यर्थः ।

समूलाद्धनश्च ॥ ४ । ४ । १७४ ॥

समूलादाप्यात्पराद्धन्तेः कषेश्च णम्वा भवति, तस्मिन् धातावुपपदे । समूलघातं हन्ति । समूलं हन्तीत्यर्थः समूलंकाषं कषति समूलं कषतीत्यर्थः ।

करणात् ॥ ४ । ४ । १७५ ॥

करणवाचिनः परात् हन्तेर्णम्वा भवति । तस्मिन् धाता-वुपपदे । पाणिघातं हन्ति । पाणिना हन्तीत्यर्थः । एवं पाद-घातं हन्ति । अस्थिघातं हन्ति शरघातं हन्ति । शत्रून् । हिंसार्थादपि करणात्परत्वादयमेव विधिः । अस्मिन् सति नित्यः समासः स एव धातुरुपपदम् ।

हस्तार्थात् वृतूवर्तिग्रहः ॥ ४ । ४ । १७६ ॥

हस्तार्थात्करणवाचिनः परेभ्यो वृत्वादिभ्यः णम्वा भवति तेष्वेव उपपदेषु । हस्तवर्तं वर्तते । करवर्तं वर्तते पाणि-वर्तं वर्तते । हस्तेन वर्तत इत्यर्थः । हस्तवर्तं वर्तयति । कर-

REPRINT FROM THE PANDIT.

अद्वैतदीपिका ।

परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रमविरचिता
तच्छिष्यश्रीमन्नारायणाश्रमविरचितटीकया सहिता

तत्र साक्षिविवेको नाम

प्रथमः परिच्छेदः ।

काशीस्थराजकीयप्रधानसंस्कृतपाठशालाध्यापकानां श्रीमन्नागेश्वरपन्तधर्माधिकारिणामन्तेवासिना व्याकरणोपाध्यायपदवीकेन नेने-इत्युपनामकेन गोपालशास्त्रिणा संशोधितः ।

मेडिकल् हाल् नामकयन्त्रालये वाराणस्यां
सन् १९१६ ई० वर्षे मुद्रितः ।

ADVAITA DÍPIKÁ

OF

SRI NARASINHASHRAMA

WITH THE COMMENTARY OF
SRI' NA'RA'YANASHRAMA

VOLUME 1. SAKSHI VIVEKA.

Edited by Pandit Gopála Sástri, Nene, Vyákarnopádyáya, Student of Pt. Nageswara Panta Dharmádhikári, Late Professor Government Sanskrit College, Benares.

Printed and published by Bhagavati Prasad B. A.
for the proprietors, E. J. Lazarus & Co.,
Medical Hall Press, Benares.
1916.

1st Edition, 1000 Copies.

इदं च साक्षित्वमविद्यादशायामेव दृश्यापेक्षत्वात् । सदातनं तु निर्विकारबोधात्मकमेवेत्याह-अत एवेति ।

अत एव द्रष्टृत्वघटितं साक्षित्वं न स्वरूपम् । अपि तूदासीनबोधात्मकमेव साक्षित्वं स्वरूपम् । तस्य निष्प्रतियोगिकस्वरूपत्वात् । अयमेवात्मा "एष ते आत्मा सर्वान्तरः" इति श्रुत्याऽप्युच्यते । अहमनुभवे प्रकाशमानस्यैव चैतन्यात्मनोऽन्तःकरणादेरधिष्ठानतया सर्वान्तरत्वात् । चैतन्यातिरिक्तस्य सर्वस्य कल्पिततया बाह्यत्वात् । तथा च श्रुतिः "अतोऽन्यदार्तमिति पराञ्चि खानि व्यतृणात्स्वयंभूः । तस्मात्पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानम्" इत्यादिश्रुत्याप्ययमेव प्रत्यगात्मेत्युच्यते । अस्यैव सदानन्दकूटस्थचिदात्मनोऽनृतदुःखजडपरिणाम्यहङ्कारादिप्रातिकूल्येन प्रकाशनात् । तस्मादहमनुभवगोचरदुःखाद्याश्रयातिरिक्तः सत्यज्ञानानन्दात्मकोऽकर्तृप्रकाशरूपेण साक्षी सर्वान्तरः प्रत्यगात्मा जीवस्य वास्तवं रूपं त्वंपदलक्ष्यमिति सिद्धम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमभगवच्छिष्यश्रीनृसिंहाश्रमकृताद्वैतदीपिकायां साक्षिविवेको नाम प्रथमः परिच्छेदः ।

सर्वान्तरत्वश्रुतिरप्यत्रैवोपपद्यते, न पराभिमता त्मनीत्यभिप्रेत्याह-अयमेवेति । आत्माऽन्यस्य कल्पितत्वे तद्वाक्यं शेषं प्रमाणयति-तथा चेति । आर्तम्-अनृतमित्यर्थः । स्वयंभूः-ब्रह्मा । खानि-इन्द्रियाणि पराञ्चि बाह्य विषयप्रवणानि कृत्वा व्यतृणत्-हिंसितवान् । तस्मात्-हेतोः सर्वो लोकः पराङेव बहिरेव पश्यति न त्वन्तरात्मानम् । तर्हि मोक्षशास्त्रमनर्थकं स्यादित्याशङ्क्याह-कश्चिद्धीर इति । अत एव पराङ्विषयेभ्यः प्रत्याहृतेन्द्रियो मुमुक्षुः श्रुत्याचार्येश्वरप्रसादात्प्रत्यगात्मानं पश्यतीतिश्रुत्यर्थः । प्रतिजडं प्रातिलोम्येन अञ्चति प्रकाशत इति प्रत्यक्शब्दार्थः । स चात्मा निरूपितस्वरूपमेवेत्याह-अस्यैवेति । त्वंपदार्थशोधनमुपसंहरति-तस्मादिति ।

इतिश्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमपूज्यपादशिष्यनारायणाश्रमविरचितेऽद्वैतदीपिकाविवरणे प्रथमः परिच्छेदः ।

श्रीरामचन्द्राय परब्रह्मणेऽर्पणमस्तु ।

॥ श्रीगणेशाय नमः ॥

सार्थानि वेदान्तवचांसि येन, यो
हिरण्यविद्विट् च सुदर्शनाश्रयः ॥
प्रल्हाद उत्सर्पति यस्य चिन्तया
स मे नृसिंहो यतिराट् सदा गतिः ॥ १ ॥

अतीतपरिच्छेदे लाघवाद्युपोद्बलितानुमानादिनाऽहमर्थातिरिक्त एकः कूटस्थो निर्विशेषश्चिद्रूपः सिद्ध आत्मेत्युक्तम् । तदयुक्तम् । जीवेश्वरयोः जीवानां च परस्परभेदग्राहकप्रत्यक्षादिप्रमाणाविरोधेन लाघवानवतारादित्याद्याक्षेपनिरासाय भेदमिथ्यात्वं निरूपयितुं परिच्छेदान्तरमारभमाणस्तदर्थं प्रदर्शयन् श्रीनृसिंहं प्रार्थयते-नरहरीति ।

नरहरिवपुषा यो दारयन् दानवेरः
प्रकटयति पुमर्थोऽभेददृष्टाविताेशः ॥
निजगुणमयमायामात्रमात्रादिभेदो
गुरुतरदयया मां पातु लक्ष्मीसहायः ॥ १ ॥
जगन्नाथाश्रममुनेश्चित्रं चरणरेणवः ।
वाचामगोचरेऽप्यर्थे मूकं वाचालयन्ति माम् २ ॥

अथास्य परस्माद्विभागः परीक्ष्यते । तत्र जीवपरयोः स्वाभाविको भेदः पारमार्थिक इति केचित् । औपाधिकः पारमार्थिक इत्यन्ये ।

औपाधिको ऽनिर्वचनीय इति भगवत्पादीयमतानुसारिण: ।

ननु यद्यत्र प्रमाणत: प्रतीयेत तत्तत्र सद्विपरीतं त्वसदिति स्थिति: । जीवे च परस्माद्भेद: प्रत्यक्षादिभि: प्रतीयते ।

नरसिंहात्मकरूपमास्थाय सर्वदा स्वस्मृतिमतो हिरण्यकशिपोरनर्थहेतुशरीरबन्धमुत्पाटयन् नृसिंहपदलक्ष्यतत्त्वं पदार्थभेदद्रष्टौ चाशरीरत्वाख्यमोक्षो भवतीति य: प्रकटयति स इति द्रष्टव्यम् । अभेदप्रमैव पुरुषार्थहेतुरिति मन्वानो भेदमिथ्यात्वमाह–निजेति । निजा अनादिसिद्धा गुणमयी गुणात्मिका या मायाऽनिर्वचनीयाऽज्ञानं तन्मात्रस्तदधीनसत्ताक: प्रमात्रादिभेदो यस्मिन् स तथोक्त इत्यर्थ: ।

बहुवादिसम्मतभेदभङ्गेनाद्वैतस्थापनसामर्थ्यं गुरुचरणसेवयैव प्राप्तमिति द्योतयन् गुरुं सहीकरोति–जगन्नाथेति । 'यतो वाचो निवर्तन्ते' इतिश्रुते: शब्दाऽनभिधेयेऽपि वस्तुनि मूकमपि मां वाचालयन्ति पटुतरबहुभाषिणं कुर्वन्तीति यदिदं चित्रमित्यर्थ: । जीवस्वरूपनिरूपणानन्तरं तस्येश्वराद्भेदो विचार्यते इति प्रतिजानीते-अथेति । तदङ्गत्वेन वादिविप्रतिपत्तिं दर्शयति-तत्रेति । वादिनां मध्ये इत्यर्थ: । स्वाभाविक इति । अनौपाधिक इत्यर्थ: । भास्करादिमतमाह-औपाधिक इति । अतिरेकाद्युपाधिप्रयुक्त इत्यर्थ: । सिद्धान्तमाह-औपाधिक इति । अविद्यान्त:-करणाद्युपाधिनिबन्धन इत्यर्थ: ।

अत्र पूर्वपक्षी जीवेश्वरभेदः सन्नेवेति वक्तुं सामान्यतः सत्त्वासत्त्वप्रयोजकमाह-ननु यदीति । ततः किम् ?, तत्राह-जीवे चेति ।

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"- इत्यादिना भेददर्शनस्य बहुशो निन्दितत्वात् पूर्वपक्षत्वेनापि भेदस्थापनमनुचितमेवेति मन्वानः पूर्वपक्षं नवीनमुखत एव प्रदर्शयति—तत्रेति ।

तत्र नवीनः—प्रत्यक्षं तावज्जीवब्रह्मणोर्भेदे प्रमाणम् । नाहं सर्वज्ञो, नाहं निर्दुःख इत्यनुभवात् । न च ब्रह्मणोऽप्रत्यक्षत्वात्तद्भेदोऽप्यप्रत्यक्ष इति वाच्यम् । यत्र हि यत्सत्त्वमनुपलब्धिविरोधि तत्र तदभावः प्रत्यक्षः । न तु प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे तन्त्रम् । जलपरमाणौ पृथिवीत्वाभावस्य प्रत्यक्षत्वप्रसङ्गात् । स्तम्भः पिशाचो न भवतीति प्रत्यक्षप्रतीतेश्च । प्रतीत्यनुसारेण हि प्रयोजकं कल्प्यम् । अन्यथा जीवेश्वराभेदश्रुतेरप्रसक्तप्रतिषेधकत्वं स्यात्, तद्भेदश्रुतेश्च त्वदुक्तप्रत्यक्षप्राप्तानुवादकत्वमपि न स्यात्।

नन्वन्तःकरणविशिष्टस्य परस्माद्भेदः प्रतीयते स ममापीष्टः । यश्च नेष्टः शुद्धचैतन्यस्य परस्माद्भेदः । सोऽत्र न भातीतिचेत्, न । योऽहमस्वाप्सं, यस्य ममाज्ञानं, संसारश्च । सोऽहं निर्दुःखाद् भिन्न इत्यज्ञानसंसारयोराश्रयस्यैव

ततो भेदावगमात् । संसाराधारानाधारयोरेव हि भेदे आवयोर्विवादः । ननु चैतन्यस्य चैतन्याद्भेदे" ईश्वरस्यापि जोवाद्भेदे-"ममैवांशो जोवलोके- इत्यादितद्वचनानुमितं तदीयप्रत्यक्षं प्रमाणम् ।

ननु प्रतियोगिप्रत्यक्षत्वमभावप्रत्यक्षत्वे तन्त्रम् । अन्यथा घटे जलपरमाण्वभावः प्रत्यक्षः स्यात् । तथा चाप्रत्यक्षब्रह्मभेदो न प्रत्यक्ष इति नेत्याह-न चेति । अभावप्रत्यक्षत्वे तावदन्यदेव प्रयोजकमित्याह-यत्र हि यत्सत्त्वमिति । तर्कितमिति शेषः । प्रतियोगिप्रत्यक्षत्वं त्वन्वयव्यतिरेकव्यभिचारान्न प्रयोजकमित्याह-नत्वि- ति । प्रतीत्यनुसारेणेति । तदव्यभिचारेणेत्यर्थः । तथा च जीवे ब्रह्मतादात्म्यमनुपलब्धिविरोधीति तदभावः प्रत्यक्ष इति भावः । तत्प्रत्यक्षत्वानङ्गीकारे सिद्धान्ते बाधकमाह-अन्यथेति ।

भेदप्रत्यक्षमङ्गीकृत्य तच्छ्रुतिप्रतिपाद्याभेदावि- रोधीत्यभिप्रेत्य शङ्कते - नन्विति । सुषुप्त्यज्ञानाश्रयस्य परस्माद्भेदः प्रतीयते । स च तव निष्कृष्टाहङ्कारचिन्मात्र- मेव । तथा च कथं न प्रत्यक्षविरोध इत्याह-न योऽह- मिति । ननु तथापि चिन्मात्रं चिन्मात्राद्भिन्नमित्येव- माकारा प्रतीतिर्नास्तीत्यत आह-संसारेति । एवमीश्व- रस्यापि जीवाद्भेदे ईश्वरप्रत्यक्षं प्रमाणम् । न च तत्र मानाभावः । अंशांशिभावेन भेदाभिधायितद्वचनमूल- त्वेन तदनुमानादित्याह-ईश्वरस्येति ।

प्रत्यक्षादिभिरित्यादिशब्दोपात्तमनुमानं ताव- दाह-अनुमानमपीति ।

अनुमानमपि जीवब्रह्मभेदे प्रमाणम् । ब्रह्म जीवप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवद्दुः-खाननुभवितृत्वात्, अभ्रान्तत्वात्, असंसारित्वाच्च घटवत् । जीवो ब्रह्मप्रतियोगिकधर्मिसत्तासमानसत्ताकभेदवान् । असर्वज्ञत्वात, अस्वतन्त्रत्वाच्च । घटवत् । अत्र जीवब्रह्मशब्दाभ्यां-त्वन्मते तत्त्वमसीत्यत्र तत्त्वम्पदाभ्यां 'जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते'इत्यत्र च जीवपरमात्मशब्दाभ्यां ये विवक्षिते संसाराधाराऽनाधारचैतन्ये, ते एवात्रापि विवक्षिते इति न सिद्धसाधनम् । धर्मिशब्दस्य पित्रादिशब्दवत्संबन्धिशब्दत्वान्मिथ्यात्वं प्रति धर्मिभूतशुक्तिरूप्यसमानसत्ताकभेदेन न सिद्धसाधनम् । न हि माता पूज्येत्युक्ते स्वसुतमाता भार्य्या पूज्यते । धर्मिपदस्थाने स्वपदं वाऽस्तु । सत्तात्रैविध्यमतेऽपि ब्रह्मणि बाधाभावरूपायाः सत्तायास्तदुपलक्षितस्वरूपाया वा सत्त्वान्न बाधः । यद्वा धर्मिसत्तासमानसत्ताकेतिपदस्थाने पारमार्थिकेति, यावत्स्वमनुवर्त्तमानेति वा, स्वाज्ञानकार्यप्रतीत्यविषयेति वा, स्वज्ञानाबाध्येति वा विशेषणंदेयम् । स्वशब्दस्य समभिव्याहृततत्तत्परत्वस्य व्युत्पन्नत्वान्न कश्चिद्दोषः ॥

जीवप्रतियोगिको यो धर्मिसत्तासमानसत्ताको भेदस्तद्वदित्यर्थः । जीवप्रतियोगिकभेदवदित्युक्ते मिथ्याभेदेनार्थान्तरता स्यात् तद्वारणाय धर्मीत्यादि । तावत्युक्ते घटादिभेदेनार्थान्तरता । तदर्थं जीवप्रतियोगिकेति । जीवप्रतियोगिकब्रह्मधर्मिकभेदस्य धर्मिसमानसत्ताकत्व सत्यत्वं विना न सिध्यतीति भावः । असिद्धिवारणाय दुःखपदम् । दुःखानुभवो दुःख्यहमिति ज्ञानं तदभावश्च सर्वज्ञेऽपीश्वरेऽस्तीति नासिद्धिः । जीवप्रतियोगिकब्रह्मधर्मिकभेदस्य सत्यत्वं प्रसाध्य ब्रह्मप्रतियोगिकजीवधर्मिकभेदस्य तत्साधयति-जीव इति । विशेषणकृत्यं तु पूर्ववदेव । ननु जीवब्रह्मपदवाच्ययोर्धर्मिसमसत्ताकभेदाङ्गीकारात्सिद्धसाधनमित्यत आह-अत्रेति । 'जीवाः परमात्मनस्तत्त्वतो न भिद्यन्ते आत्मत्वात् परमात्मवत्' इत्याचार्यानुमानमभिप्रेत्याह-जीवा इति । विवक्षिते स्वाह-संसारेति । धर्मिशब्दस्य प्रकृतधर्माश्रयपरत्वान्न शुक्तिरजतसमसत्ताकभेदेन सिद्धसाधनमित्याह-धर्मीति । ननु शुक्तिरजतादेः प्रकृतजीवप्रतियोगिकभेदं प्रत्यपि धर्मित्वात्सिद्धसाधनं तदवस्थमित्यरुचेराह-धर्मीति । स्वशब्दस्य समभिव्याहृतयोग्यपरत्वान्नोक्तदोष इति भावः ननु अद्वैतमते ब्रह्मण एव सत्तारूपत्वात्तत्समानसत्ताया ब्रह्मान्तरत्वात्तदभावाद्बाध इत्यत आह-सत्तात्रैविध्येति । तदुपलक्षितेति । ब्रह्मणोऽपि बाधाभावोपलक्षितस्वरूपोपपत्तेर्न बाध इति भावः । नन्वत्र समानशब्देन सादृश्यं किं विवक्षितमुतैक्यम् ? । नाद्यः[1] । व्यावहारिकभेदसत्ताया अपि सद्व्यवहारानुकू-

१ पक्ष इत्यर्थः ।

त्वेन ब्रह्मसत्तासद्रूपत्वात्सिद्धसाधनापत्तेः । न द्वितीयः । भेदे ब्रह्मसत्तयैव सद्व्यवहार इति सिद्धान्तेऽप्यङ्गीकारादित्यरुचेराह-यद्वेति । स्वाज्ञानकार्येति । अज्ञानकार्यप्रतीतिर्भ्रान्तिः तदविषयत्वे साधितेऽर्थात्पारमार्थिकत्वसिद्धिरिति भावः । तत्र स्वपदं घटादौ साध्याप्रसिद्धिवारणाय । स्वज्ञानाबाध्येति । भेदस्य ब्रह्मज्ञानाबाध्यत्वे सत्यत्वमेव सिध्यति । अत्रापि स्वपदकृत्यं पूर्ववदेव । स्वशब्देन घटादेरप्यभिधानात्सिद्धसाधनमित्याशङ्क्याह-स्वशब्दस्येति ॥

न च घटादौ पारमार्थिकभेदवत्त्वमसिद्धमिति शङ्क्यम् । अनुमानान्तरेण सिद्धत्वादित्याह-न चाद्ये इति ।

न चाद्ये साध्ये दृष्टान्तस्य साध्यविकलता । घटो जीवप्रतियोगिकप्रतियोगिज्ञानाबाध्यभेदवान् । जीवधर्मिकधर्मिज्ञानाबाध्याभेदाप्रतियोगित्वात् । यद्यत् ज्ञानाबाध्ययद्धर्मिकाभेदाप्रतियोगि । तत्तत् ज्ञानाबाध्यतत्प्रतियोगिकभेदवत् । यथा दूरस्थवनस्पत्योरेक इत्याद्यनुमानेन तत्सिद्धेः ।

यद्वा ब्रह्म तत्त्वतो जीवाभिन्नं नेति साध्यम् । एवं च न साध्यवैकल्यशङ्काऽपि । त्वन्मतेऽपि कल्पिते घटे तात्त्विकभेदवत् तात्त्विकाभेदस्याप्यभावात् । न चान्तःकरणस्यैव दुःखानुभवितृत्वात्तदननुभवितृत्वं जीवे नैकान्तिकमिति वाच्यम् । दुःखादेर्बन्धस्य मोक्षसामाना-

धिकरण्याय जीवस्थत्वात् । त्वदभिमतानर्थाभाव एव तेन विवक्षित इति न कश्चिद्दोषः ।

घटे पटप्रतियोगिकभेदवत्त्वेन सिद्धसाधनतावारणाय जीवेति । घटो जीवप्रतियोगिकभेदवानित्युक्ते व्यावहारिकभेदेन सिद्धसाधनता, तन्निवृत्त्यर्थं प्रतियोगीत्यादि । जीवप्रतियोगिकभेदस्य प्रतियोगिभूतात्मज्ञानाबाध्यत्वे पारमार्थिकत्वसिद्धिरिति भावः । जीवधर्मिको धर्मिज्ञानाबाध्यो योऽयं भेदो जीवे जीवाभेदस्तदप्रतियोगित्वादिति हेत्वर्थः । घटस्य स्वज्ञानाबाध्यस्वाभेदप्रतियोगित्वादसिद्धिवारणाय जीवधर्मिकेत्युक्तम्। घटस्य जीवधर्मिकारोपिताभेदप्रतियोगित्वादसिद्धिवारणायाबाध्येत्युक्तम् । सामान्यव्याप्तौ साधनवैकल्यपरिहाराय धर्मिज्ञानेत्युक्तम् । विशेषसाध्याप्रसिद्धेः सामान्येन व्याप्तिमाह-यद्यज्ज्ञानेति । प्लक्षस्य न्यग्रोधधर्मिकारोपिताभेदप्रतियोगित्वेऽपि न्यग्रोधज्ञानाबाध्यतदीयाभेदाप्रतियोगित्वमेवेत्यभिप्रेत्य दूरस्थेत्युक्तम् ।

प्रतियोगिज्ञानाबाध्यभेदवानित्यत्र किं प्रतियोगिज्ञानं भ्रान्तिरूपं विवक्षितमुत प्रमारूपम् ? । नाद्यः । जीवविषयभ्रान्तिज्ञानाबाध्यतत्प्रतियोगिकभेदस्येष्टत्वात् । द्वितीये किं यत्र यद्विद्यते तद्विषयज्ञानत्वं प्रमात्वमुताबाधितार्थकत्वम् । आद्येऽशनापादिमज्जीवज्ञानस्यापि प्रमात्वेन तदबाध्यतद्भेदवत्त्वमिष्टमेव । द्वितीये तज्ज्ञानाबाध्यतत्प्रतियोगिकभेदवदिति सामान्यव्याप्तावपि ज्ञानपदेनाबाधितार्थज्ञानमेव वक्तव्यम् । तच्चासिद्धम् । ब्रह्मव्यतिरिक्तस्य सर्वस्य बाध्यत्वादित्यरुचेराह-य-

द्धेति । अद्वैतमते जीवघटयोरप्यभेदात्साध्याप्रसिद्धिरत्रा-पीत्याशङ्क्य कल्पिताकल्पितयोस्तात्त्विकाभेदाभावस्त-त्रापि संमत इत्याह-एवं चेति । सिद्धान्तिमतेनाऽऽद्यहेतो-र्व्यभिचारशङ्कां निराकरोति-न चेति । जीवस्यैव मोक्षा-न्वयित्वेन दुःखादिबन्धोऽपि तत्रैव वक्तव्यः । तथा च न तत्र हेतुरित्याह-दुःखादेरिति । ननु जीवे कल्पित एव दुःखादिबन्धो न वास्तव इत्याशङ्क्य तर्हि कल्पित-स्याभाव एव हेतुरित्याह-त्वदभिमतेति ।

ननु जीवस्य संसारित्वे तदभिन्नब्रह्मणोऽप्यसंसा-रित्वं न स्यादित्यसिद्धिः । तस्यासंसारित्वे तदभिन्नजी-वस्यापि तदिति व्यभिचारो वेत्यत आह-न चेति ।

न चासंसारित्वादेर्ब्रह्मण्यसिद्धिः । जीवे-नानैकान्तिकत्वं वा । त्वन्मतेऽप्यौपाधिकश्याम-त्वादिवत्तस्य व्यवस्थितत्वात् । एवं ब्रह्म स्वज्ञा-नाबाध्यजीवप्रतियोगिकभेदवत् । पदार्थत्वात् । घटवत् । जीवस्यापि जीवान्तराद्भिन्नत्वान्न व्य-भिचारः । श्रुतिश्च जीवेश्वरयोर्भेदे प्रमाणं द्वा-सुपर्णेत्याद्या । स्मृतिश्च—

यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् ।

सूत्राणि च 'शारीरश्चोभये ऽपि भेदेनैन-मधीयते' इत्यादीनि । न च प्रत्यक्षप्राप्तानुवा-दोऽयम् । प्रत्यक्षस्य प्रामाण्यसिद्धौ तेनैव भेद-सिद्धेः । तदसिद्धौ प्रत्यक्षस्यैक्यश्रुतिविषयापहार इव भेदश्रुतिविषयापहारेऽप्यशक्तत्वात् ।

प्रतिबिम्बसुखश्यामत्वस्यौपाधिकत्वेऽपि बिम्बेऽभावात् । बिम्बगतावदातत्वस्य प्रतिबिम्बेऽभावाद्यथाकल्पितभेदेन तयोर्व्यवस्था । एवं संसारित्वासंसारित्वादेरिति तवाभिमतत्वादित्यर्थः । केवलान्वयिहेतुमप्याह-एवमिति । मिथ्याभेदेन सिद्धसाधनतावारणाय स्वज्ञानाबाध्येत्युक्तम् । स्वशब्दः समभिव्याहृतपरः । जीवे जीवप्रतियोगिकभेदाभावाद् व्यभिचारमाशङ्क्याह-जीवस्यापीति । अनुमानदार्ढ्याय श्रुतिं स्मृतिं च प्रमाणयति-श्रुतिश्चेति । आदिपदेन "य आत्मानमन्तरो यमयति ऋतं पिबन्तौ" इत्यादिः संगृहीता । श्रुत्यपेक्षितन्यायसूचकानि सूत्राण्युदाहरति-सूत्राणि चेति । यः पृथिवीमन्तरो यमयतीत्यादिवाक्येषु श्रूयमाणोऽन्तर्यामी जीव एवेतिशङ्कानिरासायेदं सूत्रम् । न च 'स्मार्त्तमत द्धर्माभिलापात्' इति पूर्वसूत्रान्न अनुवर्तते । तथा च शारीरश्चातर्यामी न भवति । तस्य पृथिव्यादिनियमने सामर्थ्याभावात् । न च समर्थेश्वराभिन्नत्वात्सोऽपि समर्थ इति वाच्यम् । यत्कारणमुभयेऽपि काण्वमाध्यन्दिनाश्चैनं शारीरं परस्माद्भेदेनाधीयते । यो विज्ञानमन्तरो यमयतीत्यन्तर्यामिनियम्यत्वेनैनमामनन्ति काण्वाः, य आत्मानमन्तरो यमयतीति माध्यन्दिना इति सूत्रार्थः । आदिपदेन "गुहां प्रविष्टावात्मानौ" इत्यादि परिगृह्यते । ननु द्वासुपर्णेत्यादिश्रुतेः 'अग्निर्हिमस्य भेषजम्' इतिवदनुवादत्वान्न भेदे तात्पर्यमिति नेत्याह-न चेति । किं पूर्वभावि प्रत्यक्षं प्रमाणमुत न ?। आद्ये आह-प्रत्यक्षस्येति । द्वितीये श्रुतार्थस्य मानान्तरापूर्वत्वाच्छ्रुतिस्तत्परैवेत्यभिप्रेत्याह-तदसिद्धाविति ।

श्रुतेरनुवादत्वेऽपि भेदप्रत्यक्षदार्ढ्यार्थहेतुत्वान्म-दिष्टसिद्धिरिति सनिदर्शनमाह-प्रत्युतेति ।

प्रत्युत भेदश्रुतेरेव निगमनवत् तत्त्वमसीति नवकृत्वाऽभ्यासवत्, पिपासितस्यैकजलविषयश-ब्दलिङ्गप्रत्यक्षरूपप्रमाणसंघवत्, त्वत्पक्षे प्रत्यक्ष-सिद्धभावरूपाज्ञाने तम आसीदिति श्रुतिवत्, श्रुते-रैक्यतात्पर्ये मद्विधतात्पर्यलिङ्गवच्च, प्रत्यक्षानाश्वा-सनिरासेन दार्ढ्यार्थत्वात् । अग्न्यौष्ण्यप्रामा-ण्यानिश्चये "अग्निर्हिमस्य भेषजम्" इत्यनुवादो न स्यात् ।

किं च भेदश्रुतेर्भेदप्रत्यक्षानपेक्षत्वान्न सा-पेक्षानुवादत्वम् । निरपेक्षानुवादत्वं तु धारावा हिकज्ञान इव नाप्रामाण्यहेतुः । उक्तं हि नयवि-वेके सापेक्षानुवादे हि न प्रतीतिर्न दैवादनुवादे धारावाहिकवदिति ।

किं चायमनुवादो न "वायुर्वै क्षेपिष्ठा" इत्यादिवद्विधिस्तुतये, नापि "दध्ना जुहोति" इत्यत्र जुहोतिरिवान्यविधानार्थः । अन्यविधानाय प्रमाणेनानूदितस्य तात्त्विकत्वनियमात् । अनुवा-द्यस्य ह्यसत्त्वे आश्रयासिद्धौ धर्मधर्मिसंसर्गरूपा-नुमितिवेद्य इवानुवाद्यविधेयसंसर्गरूपवाक्यार्थो बाधितः स्यात् । नापि नेह नानास्तीतिनिषेधार्थः ।

तत्रैव किं च नेत्यनुवादांशस्य सत्त्वात् । न हि "न सुरां पिबेत्" इति निषेधाय 'सुरां पिबेत्' इति वाक्यमपेक्षितम् ।

निगमनवदिति । यथा निगमनावयवो मानान्तरबाधशङ्कानिरासेनानुमानदार्ढ्यार्थ एवमित्यर्थः । पिपासितस्येति । तृषार्तस्यानभ्यस्तजले प्रथमप्रवृत्तप्रमाणदार्ढ्याय प्रमाणान्तरप्रवृत्तिवदित्यर्थः । प्रत्यक्षसिद्धानुवादः प्रत्यक्षदार्ढ्यायेत्येतद्व्यतिरेकमुखेनोपपादयति अग्न्यौष्ण्येति ।

अपि च स्मृतिवत्सापेक्षानुवादत्वे निरपेक्षत्वलक्षणं प्रामाण्यं हीयेतापि । न चैतदस्ति ।

अपौरुषेयश्रुतेः प्रत्यक्षानपेक्षत्वादित्यभिप्रेत्याह किं चेति । प्रमितिः प्रतीतिशब्दार्थः ।

किं च "द्वा सुपर्णा" इत्यादिश्रुतेरनुवादमात्रत्वे निरर्थकानुवादायोगाद्विधिस्तुतये ऽन्यविधानाय वा ऽनुवाद्यनिषेधाय वाऽनुवादो वक्तव्यः । न तावदाद्यः अर्थवादत्वस्य विध्येकवाक्यत्वस्य चाभावादित्याह-, किञ्चेति । द्वितीयमपवदति—नापीति । अन्यविधानायानुवादत्वेऽनूद्यस्य तात्त्विकत्वं वाच्यमित्याह-अन्येति । तदेव सदृष्टान्तं विपक्षबाधकमुखेनोपपादयति अनुवाद्यस्येति । तृतीयं दूषयति । नापि नेहेति ।

किं च नेत्यनेन भेदस्याप्यनूदितत्वात्, द्वासुपर्णेत्यनुवादान्तरवैयर्थ्यादित्यर्थः । निषेधकवाक्यगतानुवादे सति पृथगनुवादानपेक्षायामुदाहरणमाह-न हीति ।

किं च स्ववाक्ये एवाज्ञातज्ञापनलक्षणविधिशेष-

त्वसम्भवान्न वाक्यान्तरगतरनिषेधशेषत्वमित्यभिप्रे-त्याह-अनश्नन्निति ।

अनश्नन्निति विधेयान्तरश्रवणाच्च । यत्त-न्नेत्यादिनिषेधार्थानुवादलिङ्गाभावाच्च । तदभा-वेऽपि निषेधायानुवादे तत्सत्यमित्याद्यसद्वा-इदमग्र आसीदिति निषेधाय ब्रह्मसत्त्वानुवा-दकं किं न स्यात । सर्वप्रत्ययवेद्यत्वाद्ब्रह्मस-त्त्वस्य ।

किं च नान्योऽतोऽस्तीति श्रुतिरेव "भिन्नो ऽचिन्त्यः परो जीवसङ्घात्" इत्याद्यभेदनिषेधा-यानादिवादिपरंपराप्राप्तैक्यानुवादिनी किन्न स्यात्। न चाननुवादकत्वेऽपि बाध्यव्यावहारिक-भेदपरा श्रुतिः । अप्रामाण्यापातात् । न चाभे-दश्रुतिविरोधात् तदिष्टम् । तस्या लक्षणयाऽखंड-चिन्मात्रपरत्वेन भेदाविरोधित्वात् । वैपरीत्य-स्यापि सुवचत्वात् । यदि तु भेदश्रुतिः प्रत्यक्ष-प्राप्तार्थत्वाद्दुर्बला, तर्ह्यैक्यश्रुतिरपि तद्वि-रुद्धत्वात्तथा स्यात् । यदि चैक्यश्रुतिः प्रत्यक्षा-विरुद्धैक्यपरा तर्हि भेदश्रुतिरपि तदसिद्धत्रिका-लाबाध्यभेदपराऽस्तु । न च षड्विधतात्पर्यलिङ्ग-वत्त्वादैक्यश्रुतिः प्रबला लिङ्गानां तात्पर्यमात्रज्ञा-पकत्वेनार्थतथात्वाज्ञापकत्वात् । स्वीकृतं च भे-

दश्रुतेरनुवादकत्वं त्यजता त्वयापि भेदपरत्वम् ।

निषेधशेषत्वे ज्ञापकमिति यत् तन्नेत्यादि, तदपि नेत्याह-यत्तदिति । अनुवाद एव निषेधशेषत्वे लिङ्गमित्याशङ्क्यातिप्रसङ्गमाह-तदभावे ऽपीति । तत्सत्यमित्यस्यानुवादकत्वमेव नास्ति ब्रह्मसत्ताया अन्यतोऽसिद्धत्वादित्याशङ्क्याह-सर्वेति । तव मते घटः सन्नित्यादिसत्ताबुद्धेर्ब्रह्मसत्ताविषयत्वादिति भावः । वस्तुतस्तु भेदश्रुतिगम्यनिषेधशेषाभेदानुवादाय वा भेदश्रुतिः न चाभेदस्याप्राप्तेरननुवादः । अनाद्यद्वैतवादिपरम्पराप्राप्तत्वात् ।

यद्वैके आहुरसद्वेदमग्र आसीदित्यसद्वादिसिद्धासदनुवादवदित्यभिप्रेत्याह-किं चेति । ननु श्रुतेर्भेदपरत्वेऽपि शब्दान्तराभ्यासादिकर्मभेदप्रमाणवद्व्यावहारिकभेदपरत्वमेवाऽस्त्वित्याशङ्क्य दृष्टान्तासंप्रतिपत्त्या दूषयति-न चाननुवादत्व इति । तत्त्वमसीत्यादिश्रुतिविरोधाद्भेदश्रुतेरप्रामाण्यमेवेत्याशंक्य तस्याः श्रुतेर्भेदाभावाविषयत्वाद्विरोध एव नास्तीत्याह-न चेति । विरोधमङ्गीकृत्याप्याह-वैपरीत्येति । भेदश्रुतेरधिगतार्थत्वाद्दौर्बल्यं चेदभेदश्रुतेः प्रत्यक्षविरुद्धार्थत्वात्ततुल्यत्वमित्याह-यदि त्विति । ननु व्यावहारिकभेदविषयप्रत्यक्षेण न पारमार्थिकाभेदविषयश्रुतेर्विरोध इति चेत्तर्हि पारमार्थिकभेदविषयश्रुतेर्न तेनाधिगतार्थतेत्याह-यदि चेति । ननूपक्रमोपसंहारौ, अभ्यासो, ऽपूर्वताफलम्, अर्थवादोपपत्ती चेत्येतानि तात्पर्यलिङ्गान्यभेद

श्रुतेः सन्ति । ततः सा प्रबलेति चेन्न । एतैर्लिङ्गैरभेदश्रुतेस्तात्पर्यवत्त्वसिद्धावपि तदर्थस्य विधिवाक्यार्थवत्पारमार्थिकत्वासिद्धेरित्याह-न च षड्विधेति । तर्हि तत्परत्वमेव प्राबल्यहेतुरित्याशङ्क्यानुवादत्वेऽपि व्यावहारिकभेदपरा श्रुतिरिति चोद्यसमये भेदश्रुतेस्तत्परत्वं त्वयाऽपि स्वीकृतम् । वस्तुतस्तु मया वा स्वीकृतमित्याह-स्वीकृतं चेति ।

लिङ्गं विना स्वीकारमात्रेण कथं भेदे तात्पर्यसिद्धिरित्यत आह-अस्ति चेति ।

अस्ति चात्रापि "अनश्नन्पूर्णः परो जीवसंघो ह्यपूर्णः" इत्याद्युपपत्तिरूपं "सत्यं भिदा सत्यं भिदा" इत्यभ्यासरूपं च तात्पर्यलिङ्गम् । तद्बहुत्वं च त्वत्पक्षे प्रमाणसंघवद् व्यर्थम् । अस्ति चात्र भेदे आथर्वणश्रुतौ उपक्रमो 'द्वासुपर्ण' इति । 'परमं साम्यमुपैति' इत्युपसंहारः । "तयोरन्य अनश्नन्नन्य" इत्याद्यभ्यासः शास्त्रैकगम्येश्वरप्रतियोगिकस्य तद्धर्मिकस्य वा कालत्रयाबाध्यभेदस्य शास्त्रं विनाऽप्राप्तेरपूर्वता' पुण्यपापे विधूयेति फलं च । "अस्य महिमानमिति वीतशोक" इतिस्तुतिरूपार्थवादः । अस्ति अनश्नन्नन्य इत्युपपत्तिश्च । निषेधवाक्यत्वादैक्यश्रुतिः प्रबला चेद् 'असद्वा' इत्यादिवाक्यं सत्यज्ञानादिवाक्यात्प्रबलं स्यात् ।

किं च भेद एव ऐक्यनिषेधरूपः । किं च भेदश्रुतिरेव प्रबला । प्रत्यक्षादिसंवादान्निरवकाशत्वाच्च । किं चायं भेदो न व्यावहारिकः । मुक्तावपि स्मृतेः, श्रुतेश्च । न हि सा मुक्तिरवान्तरा ।

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥

इति स्मृतौ सर्गाद्यसम्भवोक्तेः ।

'न यत्र माया किमुतापरे हरे-
रनुव्रता यत्र सुरा सुरार्चिताः ।
श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवासाः सुरुचः सुवेशसः'

इति स्मृतौ मायानिषेधाच्च ॥

अशनानशनपूर्णत्वापूर्णत्वरूपविरुद्धधर्मव्यवस्थाया अभेदे संभवाद्भेद एवोपपत्तिरिति भावः । ननु अभेदतात्पर्ये लिङ्गषट्कं भेदतात्पर्ये तु द्वयमेवेति वैषम्यमित्यत आह-तद्बहुत्वमिति । ननु पञ्चावयवैर्विनाऽनुमेयविशेषवत्षड्विधलिङ्गैर्विना न तात्पर्यसिद्धिरित्यत आह-अस्ति चेति । परमं साम्यमिति । सादृश्यस्य भिन्नाश्रयत्वादुपसंहारो भेदविषय इति भावः । अपूर्वतामाह-शास्त्रैकेति । धर्म्यादिग्रहं विना भेदग्रहायोगाद्धर्मिणः प्रतियोगिनो वैश्वरस्य मानान्तरागोचरत्वाद्भेदोऽपि तथैवेत्यपूर्वतेत्यर्थः । अस्य-ईश्वरस्य । महिमानमिति । इयं च स्तुतिरेव, न फलं जीवस्येश्वरमहिमायोगादिति

भावः । नेदं रजतमितिवन्निषेधकमानमेव बलवदित्याश-ङ्कयातिप्रसङ्गमाह-निषेधेति ।

निषेधकस्यैव प्राबल्यमङ्गीकृत्याह-किं चेति । एवं साम्यमुक्त्वा भेदश्रुतेरेव प्राबल्ये हेतुमाह-किं च भेद-श्रुतिरेवेति । न चापूर्वत्वाभिधानविरुद्धं प्रत्यक्षादिसं-वादाभिधानमिति वाच्यम् । अभेदेन तदुपपत्तेरिति भावः । प्रत्यक्षादिसिद्धभेदस्य व्यावहारिकत्वाभावे युक्त्यन्तरमाह-किं चेति । "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" "सोऽश्नुते सर्वान् कामान् सह ब्रह्म-णा"इत्यादि स्मृतिश्रुतिशब्दार्थः ततोऽवगमादिति शेषः। स्मृतेः-स्मरणात्, श्रुतेः-श्रवणादिति वाऽर्थः। कार्य-ब्रह्मलोके एव सादेश्यरूप्यादिकमुच्यते, न परममुक्ता-वित्याशङ्क्याह-न हीति । श्रीभागवते सारूप्यं गतानां मायानिषेधाच्च सा परममुक्तिरित्याह-न यत्रेति । यत्र-वैकुण्ठे, न माया । अपरे मायाकार्यभूता रागादयो नेति किमु वक्तव्यम् । यत्र हरेरनुव्रताः संति तेषामेव विशेषणं सुरासुरेत्यादि । सुवेशसः-सुष्ठ्वलंकृता इत्यर्थः ॥

सोऽश्नुते सर्वान् कामानिति च परममुक्तिरेवो-च्यते । ब्रह्मज्ञानसाध्यताऽवगमात् । कार्यब्रह्मप्राप्तेस्तू-पासनासाध्यत्वादित्याह-यो वेदेति ।

"यो वेद निहितं गुहायां सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता"इत्यत्र शुद्धब्र-ह्मज्ञानफलत्वोक्तेश्च । भूमविद्यायाः फलोक्त्यव-सरे तस्य "सर्वेषु लोकेषु कामचारो भवति ।

एकधा भवति। त्रिधा भवति" इति भेदोक्तेश्च। परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति" इतिस्वरूपाभिव्यक्त्युक्तेश्च। "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति कर्मक्षयोक्तेश्च "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इत्यादौ भेदज्ञानान्मोक्षोक्तेश्च। अभेदे च न किंचन मानमस्ति।

ननु जीवास्तत्त्वतः परमात्मनो न भिद्यन्ते। आत्मत्वात्, परमात्मवदित्यनुमानमस्तीति चेन्न। प्रत्यक्षाद्यपहृतविषयत्वात्। ज्ञातृत्वादिरूपात्मत्वस्य हेतोस्तत्वासिद्धेः, अवेद्यत्वलक्षणस्य ममासिद्धेः, जातिरूपत्वे च विरोधात्। "जीवाः परमात्मनो व्यवहारतो न भिद्यन्ते तत एव तद्वत्" इत्याद्यभ्याससमानयोगक्षेमत्वाच्च। नापि श्रुतिः प्रमाणम्। तस्याप्रत्यक्षाद्युपोद्बलितभेदश्रुतिविरोधादतत्परत्वात्। तस्मात् श्रुत्यादिप्रमाणसिद्धत्वाज्जीवेश्वरभेदः परमार्थः। अभेदे च प्रमाणाभावात्स स्वाभाविकश्चेति।

छान्दोग्येऽपि मुक्तिसमये भेदः श्रूयते इत्याह-भूमेति। "तत्र पर्येति" इति श्रुतिः परममुक्तिविषया स्वेन

रूपेणेति स्वरूपाविर्भावोक्तेरित्याह-परं ज्योतिरिति । निरञ्जनः परमं साम्यमित्यनेनापि परममुक्तिरेवोच्यते, पुण्यपापक्षयश्रवणादित्याह-तदा विद्वानिति । भेदस्य तत्त्वज्ञानविषयत्वादपि परमार्थत्वमित्याह-जुष्टमिति । एवं स्वपक्षं प्रसाध्य परपक्षं दूषयति-अभेदे चेति ।

अभेदेऽनुमानं मानमुत श्रुतिरिति विकल्पमभिप्रेत्याद्यमनूद्य दूषयति-नन्वित्यादिना । किं च हेतुकृतमात्मत्वमपि जातिरूपाधिर्वा ?। द्वितीयेऽपि ज्ञातृताद्याश्रयत्वं तत्, अवेद्यत्वं वा ? । न सर्वथाऽपीत्याह-ज्ञातृत्वादीति । आभाससाम्यमप्याह-जीवा इति । द्वितीयमपवदति—नापीति । तर्ह्यभेदश्रुतेः का गतिरित्यत आह-अतत्परत्वादिति । उपासनादिपरत्वादित्यर्थः । अत्यन्तभेदवादिमतमुपसंहरति-तस्मादिति ॥

सिद्धान्तमुपक्रमते—उच्यते इति ।

उच्यते—

"परमार्थो न जीवेशभेदो मानाप्रसिद्धितः ।
द्रष्टृभेदश्रुतिश्चैनं पौनःपुन्येन बाधते" ॥

न हि भेदस्य पारमार्थिकत्वं गोत्वादिवज्जातिरूपः कश्चिद्धर्मः पदार्थमात्रगतजातेरभावात् । सत्तायाश्च भेदानधिष्ठानत्वात् । किं तु बाधागोचरत्वम् । तच्च न जीवेश्वरभेदेऽस्ति तं, "नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञाता" इति द्रष्टृभेदस्य निषिद्धत्वात् । अथ प्रत्यक्षबाधागोचरत्वं तत् । तच्च

भेदेऽप्यस्तीति चेन्न । लाघवेन बाधागोचरत्वस्य परमार्थशब्दार्थत्वात् । चन्द्रप्रादेशिकत्वादाव तिव्याप्तेश्च ।

ननु अन्यपरमिदं वचनम् । "भिन्नोऽचिन्त्यः परमो जीवसंघात्" इत्यभेदनिषेधशेषानुवादत्वादिति चेन्न । एतस्य श्रुतित्वे एव विप्रतिपत्तेः । अस्तु वा, तथापि न तावदिदं वाक्यमभेदनिषेधकम् । निषेधबोधिनञादेरश्रवणात् । नन्वभेदाभावो भेदः, अभावबोधकं च निषेधकमिति चेत् । तथात्वे सर्वमेव प्रमाणं निषेधकं स्यात् । तत्प्रमेयस्य स्वभावाभावरूपत्वात् ।

तत्र तावत्पूर्वपक्षे दोषं श्लोकेन संगृह्णाति परमार्थ इति । मानाप्रसिद्धित इति । मानशून्यत्वादित्यर्थः । बाधितत्वाच्च न तस्य पारमार्थिकत्वमित्याह-द्रष्ट्रभेदेति । नान्योऽतोऽस्ति श्रोतेत्यादिश्रुतिरित्यर्थः । बाधितत्वेऽपि पारमार्थिकत्वं किं न स्यादित्याशङ्क्य किं पारमार्थिकत्वमखण्डधर्म उत सखण्डः ? । नाद्य इत्याह-न हीति । स किं सत्तातिरिक्तः, उत सत्तैव ? । नाद्य इत्याह-पदार्थेति । सामान्यादौ जात्यङ्गीकारेऽनवस्थाद्यापत्तेः । सत्तातिरिक्तजातेः सत्ताव्याप्यत्वनियमाच्चेति भावः । द्वितीयं दूषयति-सत्ताया इति । पराभिमतसत्ताजातेर्द्रव्यादित्रितयमात्रवृत्तित्वान्न भेदे सेत्यर्थः । भेदस्य पारमार्थिकत्वं सखण्डधर्म इति पक्षे स किं प्रामाणिकं बाधागोचरत्वं तद्भिन्नं वा ? । नाद्यः ।

तस्य निरशिष्यमाणत्वात् । शुक्तिरजतादेरपि यत्किंचित्प्रमाणगम्यत्वाच्चेत्यभिप्रेत्य द्वितीयं परिशिनष्टि-किं त्विति । श्लोकस्योत्तरार्द्धं विवृण्वन्नेव दूषयति-तच्चेति अतः—अन्तर्यामिणा इत्यर्थः । ननु प्रत्यक्षाबाधितत्वमेव यथार्थत्वं तच्च श्रुत्या बाधितेऽप्यविरुद्धमिति शङ्कते अथेति । व्यर्थविशेषणत्वेन दूषयति-न च लाघवेति । चन्द्रे दृश्यमानपरिमाणस्य मिथ्यात्वेऽपि प्रत्यक्षबाधाभावादतिव्याप्तिश्चेत्याह-चन्द्रेति । आदिपदेन गगननीलिमादि गृह्यते ।

यदुक्तं पूर्वपक्षिणा—नान्योऽतोऽस्तीति श्रुतिरेवाभेदानुवादेन तन्निषेधकभेदश्रुतिशेषभूतेति । तदनुवदति-नन्विति । भिन्नो ऽचिन्त्य इत्यस्य प्रसिद्धशाखास्व पाठाच्छ्रुतित्वमेवासंमतमिति दूषयति-न एतस्येति । श्रुतित्वेऽप्यस्य यद्यभेदनिषेधकत्वं स्यात्तर्ह्यभेदश्रुतेर्निषेध्यानुवादेनैतच्छेषता भवेत् । नत्वेतदस्ति निषेधबोधिपदाश्रवणादित्याह-अस्तु वेति । प्रतिवादी चोदयति-नन्विति । एवं च बिधिनिषेधव्यवस्था न स्यादिति दूषयति-तथात्व इति ॥

अभावविषयत्वे समानेऽपि प्रतियोगिविरहात्मत्वेन तद्बोधकत्वं निषेधकत्वमिति विशेषं शङ्कते-नन्विति ।

नन्वभावत्वेन तद्बोधकमानं निषेधकमिति चेन्न, प्रकृते तदभावात् । किं च—

"अप्रतीतेर्विरोधाच्च नाभेदः प्रातिभासिकः ।
व्यावहारिकसत्ताको नापि तस्माद्बाधितः" ॥

असतो निषेधायोगाद्भेदवाक्येनाभेदो ऽपोद्यते इति वदतः किमभेदः प्रातिभासिकः, किं वा व्यावहारिकः ? । नाद्यः । अहं ब्रह्मास्मीत्यपरोक्षमभेदाप्रतीतेः । नाहं ब्रह्मास्मीति भेदप्रत्ययविरोधाच्च । अत एव च न द्वितीयः । न हि तत्त्वाभेदप्रमायां व्यावहारिकाभेदप्रमायां वा सत्यां व्यावहारिको भेदः संभवति । अतो नाभेदवाक्यं भेदवाक्यशेषः । तदर्थानुपयोगात् । न च व्यधिकरणधर्मावच्छिन्नाभेदानुवादः । अनुवादस्यासद्विषयत्वप्रसङ्गात् । तेन विना तत्प्रकरणे ऽनुपपत्त्यभावाच्च ॥

तर्हि "भिन्नो ऽचिन्त्य" इति वाक्यस्याभेदविरहात्मतया भेदाबोधकत्वान्न निषेधकता इत्याह-न प्रकृत इति । किं च किं प्रातीतिकस्याभेदस्य निषेधः, उत व्यावहारिकस्य, किं वा पारमार्थिकस्य ? । नाद्यः शुक्तिरजतादिवदपरोक्षप्रतीत्यभावाद्भेदप्रमाविरोधाच्च तस्यासंभवात् । न द्वितीयः । समानसत्ताकयोर्भेदाभेदयोरेकत्र विरोधात् । भेदस्य पारमार्थिकत्वेऽपि तत्प्रमितिदशायां तदभावस्य व्यावहारिकत्वायोगात् । तृतीय एव परिशिष्यते । तथा च न निषेधसंभव इत्याह श्लोकेन-अप्रतीतेरिति । असत इत्यादिश्लोकविवरणं स्पष्टार्थम् । तदर्थानुपयोगादिति-अभेदवाक्यार्थस्य भेदवाक्यार्थज्ञानेऽनुपयोगादित्यर्थः । ननु जीवधर्मिकाभेदो जीवे प्रसिद्धो व्यधिकरणेन ब्रह्मप्रतियोगिकत्वेनावच्छेद्यनि-

षेधायानूद्यत इति चेन्न । परमते जीवधर्मिकेश्वरप्रतियोगिकाभेदस्य क्वाप्यभावादसदनुवादित्वं स्यात् । तथा चानुवाद्यस्येतरपदार्थसंसर्गेऽप्यसति भेदवाक्यमप्रमाणं स्यादिति त्वदुक्तोपालम्भस्त्वय्येव निपततीत्यभिप्रेत्याह-अत इति । न च व्यधिकरणधर्मावच्छिन्नघटाद्यभेदनिषेधस्येव तादृशजीवाभेदनिषेधस्यापि प्रकरणेनाऽनाकाङ्क्षितत्वान्न तत्परतेत्याह--तेन विनेति ।

ननु न भेदवाक्ये जीवेश्वराभेदस्य निषेधः । येन निषेध्यस्यासत्त्वं स्यात् । किं तु जीवतादात्म्यस्य जीवे सत एव ब्रह्मणि निषेध इत्यत आह-एतेनेति ।

एतेन भेदवाक्येन जीवतादात्म्यं ब्रह्मणि निषिध्यते इति प्रत्युक्तम् । तद्धर्मिकतत्प्रतियोगिकतादात्म्यनिषेधेऽपि ब्रह्मप्रतियोगिकजीवधर्मिकाभेदस्य 'नान्योऽतोऽस्ति' इतिवाक्यार्थस्यानिषिद्धत्वेन तस्य तदशेषत्वात् । न हि जीवस्यावच्छिन्नस्य यद्रूपं तदेवेश्वरस्वरूपमिति वेदान्ति-भिरिष्यते । तस्मात् 'नान्योऽतोऽस्ति' इतिवाक्यार्थःपरमार्थ एवाभेदः । किं च 'भिन्नोऽचिन्त्य' इति भेदो ऽनूद्य निषिध्यते । चिन्त्यत्वनिषेधस्य भेदनिषेधे पर्यवसानात् । स्वरूपाख्यानमात्रस्य वैयर्थ्यात् । नापि द्रष्टृभेदनिषेधश्रुतिरनुवादः । द्रष्टृभेदाभावस्यान्यतोऽप्राप्तेः । न चाभेदवादि(१)सिद्धेः किं

(१) अत्र टीकास्थप्रतीकानुरोधेन ग्रन्थस्त्रुटित इति प्रतिभाति ।

५८

चित्करणं निरूप्यताम् । न हि प्रमैव हेतुमपेक्षते न भ्रान्तिः । सर्वदा सर्वेषां भ्रान्तिप्रसङ्गात् ।

एतच्छब्दार्थमाह-तद्धर्मिकेति । जीवस्तच्छब्दार्थः । निषेध्यस्य जीवधर्मिप्रतियोगिकाभेदस्य नान्योऽतोऽस्तीत्यनेनाप्रतीतेस्तत्प्रतीतस्य जीवधर्मिकब्रह्मप्रतियोगिकाभेदस्य। निषेधान्नोक्तशेषशेषिभाव इति भावः । ननु तव मते जीवधर्मिप्रतियोगिकाभेद एव ब्रह्मप्रतियोगिक इति तन्निषेध एव तन्निषेध इति चेन्न । कर्तृभोक्तृजीवाभेदस्य तद्विपरीतब्रह्मप्रतियोगिकत्वानङ्गीकारात् । तदतिरिक्तजीवाभेदस्याप्रसिद्धत्वेनानुवादायोगादित्यभिप्रेत्याह-न हीति । अभेदश्रुतेरन्यपरत्वायोगेन स्वार्थे पर्यवसानात्तदर्थाभेदः परमार्थ एवेत्युपसंहरति-तस्मादिति ।

आस्तां तावद् बृहदारण्यकश्रुतिः। त्वदुदाहृतश्रुतिरेव भेदनिषेधपरेत्याह-किं चेति। परमो जीवसङ्घाद्भिन्नो न चिन्त्य इति भेद एव निषिध्यते। यथा चैत्रो दुष्टो न चिन्त्य इति दोषो निषिध्यते । भेदचिन्तानिषेधेऽपि विशेषनिषेधस्येतरानुज्ञापकत्वादभिन्नश्चिन्त्य इति स्यात् । तथा चास्मदिष्टसिद्धिरिति भावः । नन्वचिन्त्यः परमो जीवसङ्घाद्भिन्न इत्यर्थः किं न स्यादिति चेन्न । परमस्य मुमुक्षुचिन्त्यत्वेनाचिन्त्यत्वायोगात्प्राकृताचिन्त्यत्वज्ञानस्यापुरुषार्थत्वेन भेदस्य च सिद्धतया तदभिधानवैयर्थ्यादित्यभिप्रेत्याह-स्वरूपेति। एवं भेदश्रुतेरभेदनिषेधकत्वं निराकृत्याभेदश्रुतेरनुवादकत्वमपि नेत्याह-नापीति । वादिपरम्पराप्राप्तस्यानुवाद इत्युक्तमपवदति-न चाभेदेति । अभेदवादिसिद्धमित्यनेनाभेदवादिनस्तत्प्र-

सिद्धौ करणत्वं विवक्षितं कर्तृत्वं वा ? । नाद्यः । ज्ञातुरन्यस्याभावादात्मनस्त्वयापि करणत्वानङ्गीकाराच्चेत्याह-न ह्यभेदेति । द्वितीयं परिशिनष्टि-किं त्विति । किमित्यत आह--तत्प्रसिद्धेरिति ॥

तत्र नान्योऽतोऽस्तीति श्रुतेरेव तत्प्रसिद्धिमूलत्वान्नानुवादकतेति वक्तुं करणान्तरं परिसंचष्टे-न तावदिति ।

न तावत्प्रत्यक्षमभेदप्रसिद्धौ हेतुः । जीवपराभेदस्याननुभवात् । प्रत्यक्षभेदप्रमायां सत्यामभेदभ्रान्त्यनुपपत्तेश्च । नापि लिङ्गं, स्फुटतरभेदप्रत्यक्षविरोधेन वन्ह्यनौष्ण्यानुमानवत्तदनुदयात् । भेदलिङ्गानामनेकेषां सत्त्वाच्च । न च प्रत्यक्षस्य भ्रमत्वाभिमानान्न तस्यानुमानबाधकत्वमिति वाच्यम् । प्रत्यक्षसिद्धभेदस्य बाधकप्रमितिं विना भ्रमत्वाभिमानानुपपत्तेः । अनुमानस्यैव बाधकत्वेऽन्योन्याश्रयात् । नाप्यनादिपौरुषेयवाक्यमद्वैतवादिनोऽभेदभ्रमहेतुः । स्फुटतरभेदयोरयोग्यत्वनिश्चयेन शाब्दबुद्ध्यनुदयात् । शाब्दज्ञानमात्रस्यैव योग्यताज्ञानजन्यत्वात् । पौरुषेयवाक्यस्य प्रत्यक्षादिविलक्षणप्रामाण्यस्याद्वैतवादिभिरनभ्युपगमान्न तस्य भेदनिषेधश्रुतितुल्ययोगक्षेमता ।

तव मते भेदज्ञानस्य प्रमात्वादभेदज्ञानस्य च भ्रम-

त्वाद्विरोधिप्रमाकाले भ्रमस्यासंभवश्चेत्याह-प्रत्यक्षेति । परोक्षप्रमायाः प्रत्यक्षभ्रमाविरोधित्वात्, प्रत्यक्षेत्युक्तम् । भेदप्रत्यक्षस्यानुमितिप्रतिबन्धकत्वान्नानुमानमप्यभेदभ्रमहेतुरित्याह-नापीति । भेदसाधकविरुद्धधर्माध्यासाद्यनेकलिङ्गपराहतत्वाच्च नाभेदानुमितिरित्याह-भेदलिङ्गानामिति । अग्न्यौष्ण्यस्य प्रत्यक्षस्य प्रमात्वनिश्चयादनौष्ण्यानुमानबाधकत्वं, भेदप्रत्यक्षस्य तु भ्रमत्वारोपान्न प्रतिबन्धकत्वमिति विशेष इत्याशङ्क्य बाधकज्ञानं विना भ्रमत्वारोप एव न संभवतीत्याह-न च प्रत्यक्षस्येति । अनुमानस्य बाधकत्वभ्रमात् त्वत्पक्षे भ्रमत्वारोप इत्याशङ्क्याह-अनुमानस्येति । प्रत्यक्षस्य भ्रमत्वारोपेऽनुमित्युदयः । तदुदये सति तत्र बाधकत्वारोपपुरःसरं प्रत्यक्षभ्रमत्वारोप इत्यन्योन्याश्रयादित्यर्थः । ननु त्वद्गुरुवाक्यात्तवाभेदभ्रमः । त्वद्गुरोश्च स्वगुरुवाक्यात् । तस्यापि स्वगुरुवाक्यादित्यनादिकालप्राप्तोऽभेदभ्रम इति चेन्न । पौरुषेयवाक्यमात्रेण बाधाभावलक्षणयोग्यतारहितेन 'वह्निना सिञ्चेत्'इति वाक्येनेव कस्यापि बोधानुदयादित्याह-नाप्यनादीति । शाब्दप्रमायामेव योग्यताज्ञानं हेतुर्न तद्भ्रम इत्याशङ्क्य लाघवाच्छाब्दज्ञानमात्रे हेतुरित्याह-शाब्दज्ञानेति । ननु प्रत्यक्षविरोधेऽप्यपौरुषेयवाक्याद्द्वैतवादिनामभेदप्रतीतिवत् पौरुषेयवाक्यादपि तत्प्रतीतिः किन्न स्यादित्याशङ्क्य वैषम्यमाह-पौरुषेयेति । पौरुषेयवाक्यस्य प्रत्यक्षादिमानमूलतया तत्तुल्यमेव प्रामाण्यमिति न तद्बाधेन स्वार्थबोधकत्वम् । अपौरुषेयवाक्यस्य तु त्रिकालाबाध्यवस्तुप्रतिपादनलक्षण-तत्त्वावेदनप्रामाण्याङ्गीकारात्प्रबलतया प्रत्यक्षादि-

कमाभासीकृत्य स्वार्थबोधकतोपपत्तिरिति भावः।

तर्हि बाधानवतारदशायामनुमानादितो भेदभ्रम इत्यत आह-न च प्रत्यक्षेणेति।

न च प्रत्यक्षेण भेदाप्रतीतिदशायामनुमानात्पौरुषेयवाक्याद्वाऽभेदभ्रम इति वाच्यम्। जीवपरपदार्थद्वयज्ञाने सति तद्भेदज्ञानस्यावश्यकत्वात्। पदार्थद्वयज्ञानाभावे ऽभेदानुमित्यादेरनुदयात्। ऐक्यस्याभेदवादिभिः स्वतन्त्रानुमानपौरुषेयवाक्यगम्यतयाऽनङ्गीकृतत्वाच्च। सर्गप्रलययोरङ्गीकारेण पौरुषेयवाक्यानुमानप्रवाहस्योच्छिन्नत्वात्सर्गाद्यकालीनभ्रमासंभवात्।

न च तदेश्वर एव व्यामोहकारीति वाच्यम्। सर्वज्ञत्वपरमात्मत्वादिविरोधात्। न च सर्गाद्यकाले कस्य चित्पूर्वभ्रमसंस्काराद्भ्रमः संभवति। वेदमूलत्वे बाधकाभावात्। तत्कल्पने चोदनावाक्यस्याप्यनुवादकतापत्तेः।

किं जीवपरयोर्ज्ञातयोरनुमानादिप्रवृत्तिरज्ञातयोर्वा?। आद्ये धर्मिप्रतियोगिनोर्ज्ञातत्वादपेक्षणीयान्तराभावाद्भेदज्ञानं भवेदेव। द्वितीये पक्षादिज्ञानाभावान्नानुमानोदयः। पदार्थज्ञानाभावाच्च न शाब्दबोधोदय इत्याह-जीवपरेति। किं च जीवपराभेदः श्रुत्यनपेक्षानुमानाद्यगोचर इत्येव सर्वाद्वैतवादिभिर्निश्चितत्वान्न ततस्तेषां तत्प्रतीतिरित्याह-ऐक्यस्येति। किं चेश्वरवादिभिः सर्गप्रलयाङ्गीकारात्सर्गाद्यकालीनाभेदभ्रमनि-

मित्ततया पौरुषेयोपदेशानुमानायोगात् तदा तद्भ्रमाभावे तन्निमित्तोपदेशनिमित्तपुरुषान्तरभ्रमस्य चाभाव इत्येवं पूर्वपूर्वाभावे उत्तरोत्तराभाव इति अस्मदादिभ्रमस्याप्यसंभवेनेदानीमप्यनुवादो न स्यादित्यभिप्रेत्याह-सर्गप्रलयेति ।

सर्गाद्यकाले कं च न पुरुषमीश्वर एव स्ववाक्येन भ्रामयतीति नोक्तदोष इत्याशङ्क्याह- न च तदेति । किमीश्वरः संतं भेदमज्ञात्वैवाभेदं बोधयति, ज्ञात्वाऽपि प्रतारयति वा?। आद्ये सर्वज्ञत्वक्षतिः । द्वितीये परमात्मत्वपरमदयालुत्वादिविरोध इत्याह-सर्वज्ञत्वेति । न चेश्वरस्य बुद्धागमप्रणयनेन केषांचिद् व्यामोहकत्ववदद्वैतवादिमोहनायाऽऽगमान्तरप्रणयनोपपत्तिरिति वाच्यम् । तादृशागमस्य बुद्धागमवदितिहासपुराणादिष्वश्रवणात्, महाजनपरिगृहीतानेकश्रुतिस्मृतीतिहासपुराणसंवादाच्चेति भावः । सर्गाद्यकाले उपदेशाभावेऽपि पूर्वकल्पभ्रमजन्यसंस्कारात्स्मृतिरूपभ्रमसंभवान्न संप्रदायविच्छेद इत्याशङ्क्य तदा पौरुषेयवाक्यस्य दृष्टस्य तत्प्रतिपत्तिहेतोः संभवाददृष्टसंस्कारकल्पनाया अन्याय्यत्वान्मैवमित्याह-न च सर्गाद्येति । सर्गाद्यकालीनवैदिकव्यवहारस्य संस्कारमूलकत्वकल्पने तदा विधिनिषेधवाक्यार्थस्मरणस्यापि कस्य चित्संभवात् तन्मूलकस्य सूत्रादिस्मृतिपरम्पराप्राप्तार्थानुवादित्वं चोदनाभागस्यापि स्यादित्याह-तत्कल्पन इति ।

ननु "नान्योऽतोऽस्ति द्रष्टा" इति श्रुतिरेव भेदनिषेधपरतया विपर्यस्ततामवबोधयति। सैव पश्चाद्भे-

दपरतया प्रमिता सती भेदाभावमनुवदतीति । नेत्याह-न च भेदेति ।

न च भेदनिषेधश्रुतितात्पर्यभ्रमादद्वैतवादिनोऽद्वैतप्रसिद्धिः । अनुपस्थिते जीवपरभेदाभावे तत्र श्रुतितात्पर्यभ्रमस्यैव दुःसंपादत्वात् । न च तर्कादिनोपस्थिते ऽभेदे श्रुतितात्पर्यविभ्रमः । तर्कितस्य जीवपराभेदस्यान्यत्राभावात् । अत्राप्यसत्त्वे भेदश्रुत्या तन्निषेधायोगात् । अभेदश्रुतितात्पर्यज्ञानस्य यथार्थत्वात् । तस्माददद्वैतवादिनोऽद्वैतप्रसिद्धेर्मूलान्तराभावादियमेव श्रुतिः साक्षाद्भेदनिषेधे मूलमिति नाद्वैतश्रुतिरनुवादः ।

किं च प्रमाणसिद्धस्यैवानुवाद इति वदतः कथमद्वैतमप्रमाणम् । तत्र व्यावहारिकप्रमाणाप्रसरात् । तत्त्वावेदकप्रमाणस्यैव तद्विषयत्वात् । न च निषेधार्थत्वात्प्रमाणापेक्षा नेति वाच्यम् । भेदिनां मते क्वचित्प्रमितस्यैवान्यत्र निषेधात् । जीवधर्मिकेश्वराभेदस्यान्यत्राप्रमितत्वात् ।

किं जीवपराभेदेऽनुपस्थिते तत्र तात्पर्यभ्रमः उपस्थिते वा ? आद्ये विषयं निरूप्य तात्पर्यस्य विषयोपस्थितिं विना प्रतीत्ययोग इत्याह-अनुपस्थिते इति । द्वितीयेऽपि किं प्रत्यक्षादिना तदुपस्थितिः, उताभेदश्रुत्या, लाघवतर्कादिना वा । नाद्यः । निरस्तत्वात् । द्वितीयेऽ-

न्योन्याश्रय इत्यभिप्रेत्य तृतीयं दूषयति-न च तर्कादिनेति । भेदविषयप्रत्यक्षश्रुतिभ्यां विरोधेन लाघवादेरनवतारादिति भावः । किं च तर्कावतारेऽपि तर्कितो जीवपराभेदस्ततोऽन्यत्र सन्न वा? । नाद्यः । तद्भिन्नस्य तदभेदायोगादित्याह-तर्कितस्येति । द्वितीयेऽनुवाद्यस्य कुत्राप्यसत्त्वात् तस्य निषेधसंसर्गोऽप्यसन्निति तन्निष्ठभेदश्रुतिरप्रमाणं स्यादित्यभिप्रेत्याह-अत्रापीति । अभेदतात्पर्यज्ञानस्य वक्ष्यमाणविधया बाधकाभावेन प्रमात्वमेवासिद्धमित्याह-अभेदेति । नान्योऽतोऽस्तीत्यादिश्रुतेरनुवादकत्वनिराकरणमुपसंहरति-तस्मादिति ।

अभेदश्रुतेरनुवादकत्वमङ्गीकृत्यापि परमते तस्य प्रामाणिकत्वमावश्यकमित्यभिप्रेत्याह-किञ्चेति । भेदवदभेदस्यापि व्यावहारिकप्रमाणसिद्धत्वादनुवाद इत्याशङ्क्य तस्य व्यवहारानुगततया तदयोग इत्याह-तत्रेति। भेदस्य अप्रामाणिकत्वे परिशेषात्तत्त्वावेदकमानगम्यत्वमेवेत्याह-तत्त्वावेदक इति । ननु विध्यर्थानुवादस्यैव प्रामाणिकविषयत्वनियमो न निषेधार्थानुवादस्येति । इदमपि त्वत्समयविरुद्धमित्याह-न च निषेधेति । अस्तु तर्हीश्वरे मितस्य तदभेदस्य जीवे निषेध इत्याशङ्क्य एवमप्यभेदश्रुत्यर्थस्यान्यत्राप्रमितत्वान्न तस्य निषेध इत्याह-जीवधर्मिकेति ।

अभेदश्रुत्यनुवादकत्वनिरासवाद्युक्तीनामतिप्रसङ्गपराहतिं शङ्कते-नन्वेवमिति ।

नन्वेवम् "असदेवेदमग्र आसीत्" इति असदनुवादोऽपि न स्यात् । प्रपञ्चसत्ताग्राहिप्रत्यक्षविरोधेन तद्भ्रमानुपपत्तेः । अतस्तत्प्रसिद्धिरपि

किं च तत्कालयोगेन तस्य साक्षात् क्रिया यदा।
तदेदानीमसत्त्वेऽपि तस्यास्तित्वमदुर्घटम्॥

अथ यस्य भावी सुतस्तदनुभूयमानतया दृष्टस्तेनाप्रतीयमानतायाः कथमभ्रान्तता ?। तदप्यसत्।

यथा स दृष्टः शरदादिकालयुक्तस्तथा तस्य न बाधितत्वम्।
तत्कालयोगस्तु नतेन दृष्टस्तथाऽप्रतीतावपि नास्ति दोषः॥

यदपरिज्ञाने दूषणमभाणि। तदसत्। यतश्चूडामणिप्रभृतिकेवलिनामतीन्द्रियार्थानामर्हत्प्रणीतत्वेन सुप्रसिद्धत्वात्। यच्चान्यदुक्तं तदसंबद्धतयोपेक्षितमिति विस्तरेण सर्वज्ञवादटीकायामुक्तमिति विरम्यते।

बाध्यकलङ्कविकलं निखिलप्रमाण
सामान्यलक्षणमिदं विवृतं स्वबुद्ध्या।
यत्तेन तैर्थिकमतानि निरस्य नीतं
ज्ञानं व्यतीतमनसः परमां प्रतिष्ठाम्॥

इति श्रीशान्त्याचार्यविरचितायां वार्त्तिकवृत्तौ प्रथमः परिच्छेदः॥ १॥

एवं प्रमाणसामान्यलक्षणमभिधायेदानीं संख्यालक्षणगोचरफलं विप्रतिपत्तिनिराकरणद्वारेण विशेषलक्षणमभिधातुकामः व्यक्तिभेदकथनमन्तरेण प्रतिव्यक्तिनियतं लक्षणं कथयितुं न शक्यत इति व्यक्तिभेदमेव तावत् कथयितुमाह—ज्ञानापेक्षमित्यादि॥

ज्ञानापेक्षं प्रमेयस्य द्वैविध्यं न तु वास्तवम्।
दूरासन्नादिभेदेन प्रतिभासं भिनत्ति यत्॥ १॥

न हि नीलपीतवस्तुस्थित्या प्रमाणविषयस्य किञ्चिद्द्वैविध्यमस्ति, किं तु ज्ञातारमपेक्षते ज्ञानापेक्षम्। तथाहि—तदेव

वस्तु कस्यचित् प्रत्यक्षं कस्यचित् परोक्षमिति । ननु इदं द्वैविध्यं केन प्रतीयते ? । न तावत्प्रत्यक्षेण । परोक्षे तस्याप्रवृत्तेः; प्रवृत्तौ वा प्रत्यक्षतैव स्यात् ॥ अथ कस्माद्धूमदर्शनात् परोक्षे वह्नौ प्रतीतिः प्रत्यक्षा ? । नाऽनुमानम् । यतो व्याप्तिस्मरणेनात्मानमनुमानम् । न चेह तदस्ति । नैतदस्ति । यतोऽक्षासंबद्धेऽपि वस्तुनि यद्यक्षजं ज्ञानं प्रवर्त्तते तदा सकलपरोक्षवस्तुविषयं प्रवर्त्तेत । न हि सन्निहितासन्निहितयोः पक्षत्वे विशेषोऽस्ति । अथ संबद्धधूमदर्शनान्नातिप्रसङ्गः । तदसत् । यतः किं तदेव धूमदर्शनं परोक्षवन्हिविषयं कथ्यते, किं वा तज्जनितमन्यदिति ? । न तावत्तदेव । न ह्यन्यवस्तुग्राहकमन्यस्य ग्राहकम् । न च तथा प्रतीतिरस्ति । न हि तद्देशोऽन्यदेशो वा वन्हिस्तद्दर्शने प्रतिभासते । ननूक्तं संबद्धधूमदर्शनात्तद्दर्शनमिति । उक्तमिदं किं त्वयुक्तम् । यतो यद्यप्रतीतसंबन्धोऽपि धूमो धूमध्वजप्रतीतिं जनयति, किं न नालिकेरद्वीपायातस्याऽपि ? । अथ प्रतीतसंबंधस्याभ्यासादकस्मात्प्रतीतिः संबन्धस्मृतिं नापेक्षते इत्युच्यते तेनस्मरन्नेवान्तर्लीनं सबन्धं तथा प्रत्येति । अन्यथागृहीतसंबंधस्यास्य च को विशेषः ? । किं च प्रत्यक्षाप्रतीतौ विशेषरूपस्य किं न प्रतीतिः ?। कथं न दूरादिति चेत् । न, तत्रापि व्यक्तिविशेषाप्रतीतावपि भास्वरस्य रूपस्य प्रतिभासनात् । न च तथेहेति । तन्न परोक्षे प्रत्यक्षं प्रवर्त्तत इति । अन्यथा परोक्षमेव तन्न स्यात् । न चेतरेतराश्रयत्वम् । यतः स्वकारणासाक्षात्कारि विज्ञानमुत्पाद्यमानं स्वविषयस्य प्रत्यक्षतां व्यवस्थापयति । तन्न परोक्षे प्रत्यक्षस्य प्रवृत्तिरिति । नाप्यनुमानस्य प्रत्यक्षे । न च मानान्तरमस्ति, सद्भावे वा विषयद्वैविध्यादित्यनर्थकमिति । अत्रोच्यते । प्रत्यक्षं हीदन्तया स्वविषयं परिछिन्दत्

यदेवं न भवति तत्सकलमेव परोक्षं व्यवस्थापयति। तथा परोक्षमप्यनिदन्तया स्वविषये प्रवर्त्तमानं सतो ऽन्यत्प्रत्यक्षमिति व्यवस्थापयति। न च परस्परमन्वयात् कस्य द्वयप्रतीतिरिति वाच्यम्। यस्मान्न ज्ञानमात्मनः सर्वथा भिन्नं किं त्वात्मैव कर्मक्षयोपशमादिन्द्रियद्वारेण लिङ्गद्वारेण वा स्पष्टास्पष्टतया वस्तु प्रतिपद्यत इति कथमन्वयः? ॥

तदेवं विषयद्वैविध्यं व्यवस्थाप्येदानीं तयोर्लक्षणमाह। दूरासन्नेत्यादि। दूरं चासन्नं च ते आदिर्यस्य स्वच्छावरणघनावरणादेः स तथा, दूरासन्नादिश्चासौ भेदश्च तेन प्रतिभासन्ते। ज्ञानस्य स्पष्टास्पष्टत्वं यद्वस्तु करोति तत्प्रत्यक्षम्। तथा हि—प्रत्यक्षे प्रतिभासमानं दूरे घनावरणाच्छादितं चास्पष्टं, निकटे स्वच्छावरणावृत्तं च स्पष्टम्। नैवं धूमात् प्रतीयमानो वह्निः। दूरासन्नादिष्वप्येकरूपतया प्रतिभासनात्। अत एवाह।

तत्प्रत्यक्षं परोक्षं तु ततोऽन्यद्वस्तु कीर्त्तितम्।
तन्निमित्तं द्विधा मानं न त्रिधा नैकधा ततः॥२॥

पूर्वाचार्यैरिति। इह प्रामाण्यं यद्यनिमित्तं स्यात् सर्वत्र भवेत्। न चार्थवत्त्वमन्तरेणान्यन्निमित्तं संभवति। न ह्यनर्थकेन ज्ञानमात्रेण कस्यचित्प्रयोजनं हिताहितार्थं च। तदुक्तम्। अतो विषयवत्तया प्रामाण्यं व्याप्तं तदभावात्प्रत्यक्षपरोक्षाभ्यामन्यस्य न प्रमाणमत आह। तन्निमित्तं द्विधा मानं न त्रिधेति। त्रिधेत्युपलक्षणं चतुर्धादेः। प्रयोगश्च यदर्थवन्न भवति, तन्न प्रमाणम्। यथोभयाभिमतं मिथ्याज्ञानम्। नास्ति च प्रत्यक्षपरोक्षव्यतिरिक्तस्य ज्ञानस्यार्थवत्त्वमिति। व्यापकानुपलब्धि-

श्चाग्रे साधयिष्यते। तथा यद्यन्निमित्तं तस्मिन् सति भवत्येव। यथान्त्यबीजादिसामग्रीनिमित्तोऽङ्कुरः । अस्ति चानुमानादौ प्रामाण्यव्यवहारनिमित्तम्। अन्यथा प्रत्यक्षेऽपि तद्व्यवहारो न स्यादन्यनिमित्ताभावादत आह। नैकधेति। तथा—

प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः ।

प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥

अयं हि तार्किकचक्रचूडामणिंमन्यश्चार्वाकोऽनुमानमङ्गीकुर्वाणोऽप्युन्मादान्नावबुध्यते वराकः। तथा हि—प्रत्यक्षेणाशेषप्रत्यक्षव्यक्तीरप्रतिपद्यमानोऽप्यर्थवत्त्वेन तासां साकल्येन प्रामाण्यं व्यवस्थापयन्ननुमानव्यक्तीनां प्रत्यक्षेणाग्रहणेऽपि प्रामाण्यनिमित्ताभावेनाप्रामाण्यं व्यवस्थापयन्ननुमानं प्रतिक्षिपन् कथं नोन्मत्तः? । व्याहारादिलिङ्गाच्च प्रत्यक्षं परं प्रतिपद्य तदर्थं शास्त्रं रचयन् कथमनुमानं नाऽभ्युपैति? । तथाऽनुमानप्रमाण्यं विनाऽनुमानं न प्रमाणमिति स्ववचनमभ्युपगम्यानुमानप्रतिषेधं कुर्वाणः स्ववचसैव तिरस्क्रियते। परलोकादौ प्रत्यक्षं न प्रवर्त्तते, तेन च तदभावं करोतीति महत्प्रमाणकौशलमस्य। प्रत्यक्षनिवृत्तेरभाव इतिचेत्। सा किं प्रत्यक्षा सती वराको तदभावं प्रत्येति, किं वा लिङ्गभूता? । न तावत् प्रत्यक्षा। न हि प्रत्यक्षभावः प्रत्यक्षम्। अन्यथा तदभाव एव न स्यात्। यदि लिङ्गभूता। सा किं तदभावाविनाभूता किं वा नेति? । यदि न, तदा कथमेकान्तेन साधयेत्। अथाविनाभूता? । किं त्वनानुमानमिति? । एवमेकत्वसंख्यां निरस्यानेकत्वसंख्यां निरस्यन्नाह। सादृश्यमित्यादि।

सादृश्यं चेत् प्रमेयं स्यात् वैलक्षण्यं न किं तथा।

अर्थापत्तेर्न मानत्वं नियमेन विना कृतम् ॥ ३०

इह यथा गौस्तथा गवयो यथा गवयस्तथा गौरित्युपमानम् । न तावद्गोगवयव्यक्तिविषयमस्य प्रामाण्यम् । तस्याः प्रत्यक्षेण प्रतिपन्नत्वात् । सादृश्यविषयमिति चेत् । महिषगवयवैलक्षण्ये मानान्तरं स्यात् । सादृश्याभावरूपत्वाद्वैलक्षण्यस्य । नेति चेत् । वैलक्षण्याभावरूपं सादृश्यं किं न भवति? । अपि च किमिदं सादृश्यम्? । न तावत्सामान्यम् । विजातीयस्य तस्याऽनभ्युपगमात् । अथ धर्मसाधकत्वं सादृश्यं, तत्संज्ञाकरणं चोपमानफलं तथा गवाभावे गवयोपलम्भेऽपि तथाविधधर्मोत्पत्तिरिति, तर्हि मृतमिदानीं भट्टसामान्यं, जीवितं सौगतसामान्यम् । सौगतस्याऽपि हि वाहदोहाद्येकार्थक्रियाकारित्वं सामान्यनिबन्धनं, तदर्थिनो गोव्यक्तिषु सामान्यमन्तरेणापि संज्ञाकरणमुपपत्स्यत इति किं तत्कल्पनया? । यच्च धर्मसाधकत्वं हिंसायामपि, तदलं पापकथयेति । एवंविधेन च कल्पितेनार्थेनार्थत्वे प्रमाणेयत्ता न स्यात् । तन्नोपमानं विषयवत् ॥ तदेवमुपमानस्य प्रामाण्यं निरस्यार्थापत्तेर्निरस्यन्नाह—अर्थापत्तेरित्यादि । इह पूर्वं सति नियमेऽनुमानत्वं प्रत्यपादि, इदानीमनियमे तस्याः प्रमाणत्वं चक्षुर्दृष्टान्तेन प्रतिपादितं निराक्रियते । चक्षुषोऽपि हि रूपे एकसामग्र्यधीनतालक्षणोऽस्त्येव नियमः । अन्यथा यतः कुतश्चिदन्यत्सर्वं प्रतीयेत, न चैवमिति । नियमेन विना कृतं-रहितं नाऽर्थापत्तेः प्रमाणत्वमिति । अत एवास्याः षड्भेदकथनमसत् । तथा हि—हस्तस्फोटादेर्वह्नेर्दाहकशक्तिज्ञानकार्यानुमानान्न भिद्यते । न च शक्तिः काचिदस्ति । दाहस्वरूपमेव हि मन्त्रादिना तिरस्क्रियते । अन्यथा किं तस्य रूपं स्यात्? । तन्न प्रत्यक्षपूर्विकाऽर्थापत्तिः । नाऽ-

प्यनुमानपूर्विका । तथाहि—देशान्तरप्राप्तेरादित्यगत्यनुमाने तद्गमनशक्तिप्रतीतिरूपा तत्रापि न काचिच्छक्तिः ॥ यदि वा समर्थकारणानुमानं यदिति । तथा शब्दपूर्विका, पीनो देवदत्तो दिवा न भुङ्क्ते इति दिवा भोजननिषेधः शब्दादेवेत्यनन्तरं रात्रौ भोजनप्रतीतिरर्थापत्तिरिति ॥ सापि कारणानुमानान्न भिद्यत इति । तथा गोगवययोः सादृश्यमुपमानात् प्रतीत्य तच्छब्दग्राह्यता शक्तिमर्थापत्त्या प्रत्येतीति सापि शक्त्यभावान्न किंचिदिति । तथा शब्दवाच्यमेवेत्येतद्वाचकशक्तिमर्थापत्त्या प्रतिपाद्य शब्दनित्यत्वमर्थापत्त्या प्रत्येतीति साऽपि प्रथमार्थापत्तिनिरासेनैव निरस्ता । तथा जीवति देवदत्तो गृहे नास्तीति बहिस्तदस्तित्वमभावपूर्विकयाऽर्थापत्त्या प्रत्येति, तत्राऽपि देवदत्तजीवनं येन प्रमाणेन ज्ञातं तेनैव बहिरस्तित्वमपि । किमर्थापत्त्या ?। तन्नार्थापत्तिरपि प्रमाणमिति। इदानीमभावप्रमाणं निरसितुं तत्पूर्वपक्षमुत्थापयन्नाह । प्रमाणपञ्चकेत्यादि ॥

प्रमाणपञ्चकाभावे भावो भावेन गम्यते ।
नानास्तीति यतो ज्ञानं नाध्यक्षाद्भिन्नगोचरम् २

तथा हि—न तावत् प्रत्यक्षेणाभावो गम्यते । इन्द्रियसन्निकर्षाभावेऽपि हि यद्युत्पद्येत तत्प्रत्यक्षम् । सर्वाभावेऽप्युत्पद्येत । नैवाभावे सोऽस्ति । तदुक्तम् ॥

न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः ॥
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥

प्रत्यक्षनिषेधेनानुमानमपि तत्र निषिद्धम् । तत्पूर्वकत्वादस्य । न ह्यप्रतिबद्धं लिङ्गं कस्यचिद्गमकं, प्रत्यक्षस्य चतद्ग्रहणनिषेधात् कथमभावेन कस्यचिल्लिङ्गस्य प्रतिबन्धावगमः।

अनुमानेन ग्रहणेऽनवस्था, सैव न भवेद्यदि मूलभूतं तद्ग्राहकं क्वचिदुपेयते ॥ नापि सामान्यतो दृष्टाल्लिङ्गात्तदवगतिः ॥ कार्यादेर्लिङ्गस्याभावात्, अनुपपद्यमानस्य चाभावादर्थापत्तिरिति न। नाप्यागमस्तत्र प्रतिपादकः । तस्य लौकिकवैदिकभेदेन द्विधा स्थितत्वात् । लौकिकस्य प्रत्यक्षानुमाननिषेधेन निषेधः, वैदिकस्याप्यनुष्ठेयविषयप्रतिपादकस्य न तत्प्रतिपादने व्यापारः । यदपि वैदिकं वचोऽसद्वाइदमग्र आसीदित्यादि । तदर्थवादत्वेन स्वरूपप्रतिपादकं न भवति इति व्याख्यातम् । नाऽप्युपमानस्याऽभावो विषयः । तस्य द्विविधस्यापि प्रमेयान्तरप्रतिपादनात्,। एतच्च तत्प्रत्यक्षनिषेधेनाऽनुमानमभ्युपगम्योक्तं न तु तत्प्रतिपत्तेः किञ्चिल्लिङ्गमस्ति । न तावद्भावः । तेन सह पूर्वं क्वचिदप्यदृष्टत्वात् । दर्शनेऽपि व्यभिचारसम्भवात्,। यत्र यदभावो गृहीतस्तत्र तद्भावस्याऽपि क्वचिद्ग्रहणात् । अव्यभिचारे वा तयोर्यस्मादेव व्याप्तिग्राहकात् प्रमाणात्तदवगमस्तदेव प्रमेयप्रतिपत्तौ निमित्तं भविष्यतीति किं भावाख्येन लिङ्गेन? । एतेन तत्प्रतिपत्तिरप्यभावलिङ्गत्वेन निराकृता । नाप्यनुपलब्धेः प्रतिषिध्यमानवस्त्वग्रहणस्वभावाया लिङ्गता । तस्याः स्वरूपानिश्चयात् । न तावत् प्रतिषिध्यमानवस्तूपलब्धिप्रतिषेधोऽनुपलब्धिः । तस्या अभावत्वेन ग्रहणासम्भवे लिङ्गत्वानुपपत्तेः । न च तथाविधेनान्येन लिङ्गेन तद्ग्रहणम् । अनवस्थाप्रसङ्गात् । न चागृहीताया लिङ्गता । भवतु वा तस्याऽग्रहणं, तथाऽपि स्वसाध्येन सम्बन्धग्रहणं पूर्वं वक्तव्यम् । न हि पक्षधर्मत्वनिश्चयमात्रादनुमेयप्रतिपत्तिः । सम्बन्धग्रहणाभ्युपगमे वा तत्र प्रमाणं वक्तव्यम् । न तावत् सैव प्रमाणम् । तद्व्यतिरिक्तेनान्येन तयोः सम्बन्धग्रहणाभ्युपगमात् । न हि धूमाग्न्योः प्रतिब-

न्धग्रहणकाले धूमेन प्रतिबन्धग्रहः । प्रमाणान्तरसद्भावे तदेवाऽभावस्याऽनुमेयस्य प्रतिपादकमस्तु । किमनुपलब्ध्या ? । अनवस्था च तया प्रतिबन्धग्रहणे ग्रन्थकारैर्दर्शिता । तन्नोपलब्धिः प्रतिषेधोऽनुपलब्धिर्लिंगताप्यन्योपलब्धिः । विकल्पानुपपत्तेः । तस्यालिंगत्वे तद्गम्यं वस्तु वा स्यात् प्रतिषिध्यमानवस्त्वभावो वाऽसद्व्यवहारो वा ? । न तावद्वस्तु । तस्य प्रमेयत्वेऽपि अनुपलब्ध्यारव्यलिङ्गागम्यत्वात् । नापि वस्त्वभावः । तस्य तया सह पूर्वोक्तेन न्यायेन प्रतिबन्धग्रहणासम्भवात् । असद्व्यवहारश्चेत् । एतदुक्तं भवति । यद्यपि परमते भूतलोपलब्धेर्घटाभावं प्रति पूर्वोक्तेन क्रमेण लिङ्गता, तथापि तस्या। स्तद्रूपत्वं प्रतिषेद्धुमशक्यं त्वया । यतः पदार्थान्तरोपलब्धिस्वभावा सा च स्वसंवेदनप्रत्यक्षसिद्धा । प्रमेयमपि तस्या न वस्त्वतरं नापि वस्तुप्रतिषेधः । तस्य गृह्यमाणवस्तुव्यतिरेकेण सत्वात् । अत एव तेन सह प्रतिबन्धग्रहणं मृग्यम् । सद्व्यवहारस्तु तया साध्यते, स च तस्मान्निमित्तात्पूर्वमसत्त्वप्रवृत्तैर्न प्रवर्त्यते । किं तर्हि क्रियते समयस्मरणमात्रं तया । तथा चोक्तम् । स्मर्यते समयः परम् । अयमर्थः । शशविषाणादावसत्वव्यवहारनिबन्धनं भवतोऽस्मान्निमित्तान्नान्यत्किंचित्पूर्वं प्रवृत्तम् । न च तेषु कश्चिदपि सद्व्यहारं करोति । न चोक्तनिमित्तव्यतिरिक्तस्य निमित्तान्तरस्य सम्भवो यथा तदसंभवः, तथा वादन्याये निर्णीतमिति नेहोच्यते । ग्रन्थगौरवभयात् । अतेस्तन्मात्रनिबन्धनोऽसद्व्यावहारस्तया साध्यते । ननु ज्ञानाभिधानस्वभावोऽसद्व्यवहारोऽभिप्रेतः स चानुपलब्धेः पूर्वोक्तायाः साध्यमुक्तः, सा च स्वभावहेतावन्तर्भाविता, तस्यास्तस्मादर्थान्तरत्वे कथमन्तर्भावः । नैष दोषः । नात्र तया स साध्यते । तस्य

पुरुषेच्छायत्तत्वात्। किं तु तन्निमित्तप्रदर्शनेन नैमित्तिकस्य व्यवहारयोग्यत्वस्य प्रदर्शनं विवक्षितं, एवं विषयदर्शनेन विषयी प्रदर्श्यत इति यत्राभिधानं तत्राप्ययमेवाभिप्रायः। तथान्यत्रोक्तम्।

हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः॥ १॥

यथैतस्य स्वभावहेतुता तद्वदुक्तेऽपि हेतौ। यत उत्पादशब्देनात्र श्लोके न कार्योत्पत्तिरभिधीयते। तस्याः सामग्रीतोऽर्थान्तरत्वेन स्वभावत्वायोगात्। किंतूत्पद्यतेऽस्मादित्युत्पादः। समग्राणां योग्यतैवमुक्ता। तदित्थमनुपलब्धेः स्वभावहेतावन्तर्भावः। तत्र यथा शशविषाणादौ तस्मान्निमित्तादसद्व्यवहारं करोति, तथा चक्षुर्मूढोऽप्यपि मूढो घटस्य कार्यते। यत एवमुच्यते तस्य न भवता तत्र निमित्तान्तरमसद्व्यवहारे मृग्यम्। तस्य विकल्पस्यात्रापि सद्भावात्किमिति भवांस्तत्र प्रवर्त्तयति?। तस्मादनुपलब्धेर्लिङ्गादसद्व्यवहारे प्रवृत्तौ कथमिदमुक्तं लिङ्गाभावात्नाभावस्यानुमेयतेति ?। नन्वेवं सुतरां तस्यानुमेयं नास्ति। यतो यद्यल्लिङ्गत्वेन विवक्षितं तत्तन्न प्रतिपादयति। यच्च तस्मात्प्रतीयते सोऽभावो न भवति। योग्यताया भावरूपत्वात्। तस्मात्कथमनुपलब्धेर्लिङ्गात्तत्प्रतिपत्तिरित्युच्यते ?। किं च किमिति अभाव एव पूर्वोक्ताल्लिङ्गात् प्रमाणान्तराद्वा नावसीयते। किमत्रोच्यते?। तस्य भावव्यतिरेकेणासत्वात्, तथाऽन्याभावे लिङ्गात् प्रमाणान्तराद्वाऽवसीयमानो न स्वतन्त्रतया प्रतीयते, किं तु देशादिविशेषणत्वेनैव प्रतिपत्तिः। अत्रेदानीमस्य चाभावः। न चाभावस्य देशकालाभ्यां सह विशेषणविशेष्यभावो स्तः। प्रतिषेधरूपत्वेनानुपकार्योपकारकस्वभावत्वात्।

नापि भावसंबन्धिता तस्य युक्ता । तयोर्भिन्नकालत्वात् । यदा घटाख्यो भावो न तदा तदभावः । यदा तु तस्याभावत्वं न तदा घटोऽस्तीति कथं तस्य तत्संबन्धिता ? । न च स्वतन्त्रस्य प्रतिपत्तिरत्रैवमुच्यते घटो नास्तीति तयोः समानाधिकरणप्रत्ययविषता, तत्कथं नीलोत्पलादिवत्तयोः संबन्धाभावः अस्त्ययं प्रत्ययः, स तु संबन्धं विना भवन्मिथ्यात्वेन व्याख्यातृभिर्व्यवस्थापितः । यतो न प्रतिभासनिबन्धनं सत्त्वम् । तन्निबन्धनत्वे तस्य नेदानीं किञ्चिद्भवेत् । प्रतिभासस्यासत्त्वेऽपि सत्त्ववदुपजायमानत्वात् । तस्माद् घटस्याभाव इति प्रत्ययो मिथ्या । विशेषणविशेष्यभावश्च संबन्धस्तयोरस्तीति न तस्य संबन्धपूर्वकत्वेन स्थितत्वात् कथमत्र तद्भावः? । अन्यथा पुरुषेच्छायत्तयोर्विपर्ययो न स्यात् । दृश्यते च तदिच्छया विपर्ययः । कदाचिद्विशेषणत्वेऽपि व्यवस्थितं पूर्वं पश्चाद्विशेष्यत्वेन विवक्षत्येवं विशेष्येऽपि द्रष्टव्यम् । उभयोरुभयरूपत्वाददोष इति चेत् । तदनन्तरयोरसंबन्धप्रसङ्गात् । न विशेष्यस्य विशेषणेन संबन्धो, नापि विशेषणस्य तथाविधः । नापि चोभयोर्द्विरूपत्वे सर्वदा तयोर्द्विरूपा प्रतिपत्तिर्भवेत् । न चैतद्दृष्टम् । तस्मान्न घटस्याभाव इति तयोर्विशेषणविशेष्यभावो मा भूत् । असौ विरोधस्तु तयोरस्तीत्येवमभिधानमेतदसत् । तस्मिन् सति सबन्धित्वेन प्रतिभासो न स्यादपि तु विरुद्धत्वेन । मुद्गरादिवत् विरोधोऽप्यवस्थाप्यमान एवं व्यवतिष्ठते । यद्भावे सति भावो न स्यात् । प्रकाश इव तमः । न त्वेवमत्रास्ति । न हि घटे विद्यमाने कुतश्चित् स्वस्मान्निमित्तादभावो भवन् भावं विरुणद्धि । प्रकाशवदेव । किं तु स्वस्मान्मुद्गरादेर्विरोधिनः प्रत्ययात् स्वयमेव

न भवति। न च तथाऽभवनभावेन विरोधमपेक्षते। तस्यान्य विरोधिजन्यत्वात्। अथोच्यते। यथा मुद्गरापेक्षयासौ घटो न भवति, तथा संबन्धाभावापेक्षया न भविष्यतीति किमत्रानुपपन्नम्?। नन्वेतदेव, यत्तयोरसमानकालत्वम्। समानकालत्वे हि तयोर्विरोधाविरोधौ चिन्त्येते। नन्वेवमेवापि च मुद्गरादिवत्तस्य विरोधकत्वाभ्युपगमेऽनवस्थाप्रसक्तिः। यथा मुद्गरो घटस्याभावजनकत्वात्तद्विरोधी, एवमभावोऽप्यभावान्तरजनकत्वेन। न च तदप्येवमित्यनवस्था। न वा किञ्चित्करादेरुत्पन्नस्य पदार्थान्तरस्य तथात्वव्यपदेशः। तन्न भावाभावयोर्विरोधोऽपि संबन्धः। किं च तस्य शास्त्रे कार्यकारणभावत्वेन स्थापितत्वान्मुद्गराद्यपेक्षा, तस्याऽसमर्थतरासमर्थतमेत्यादि। न तु तस्य तदपेक्षया निवृत्तिः। स्वयमेवैकक्षणस्थायित्वेन स्वहेतोरुत्पन्नत्वान्न मुद्गराद्यपेक्ष्यसौ निवर्तते। स्वयमेव निवृत्तत्वात्। अन्यथा तन्निवृत्त्ययोगात्। तस्मान्न भावाभावयोः कश्चित् संबन्धः। तदभावान्न तस्य प्रतिपत्तिः। न हि भाववदभावो देशाद्यनपेक्षः स्वतन्त्रः प्रत्ययविषयो यस्मात्तस्य प्रतिपत्तिः, न हि भाववदस्ति। कथञ्चिन्निमित्तमात्रम्। तन्न प्रमाणगोचरः। यच्च प्रतीयते देशाद्यपेक्षं तन्निरूप्यमाणं न तत्वतोऽस्तीति कथमभावः प्रमेयः स्यात्?। तद्भाव एवैकदास्ति। पश्चात्स एव न। न तु तस्य पश्चादभावः। इतश्च तस्य निरूप्यमाणं तत्वमस्ति। यतोऽसौ भवनधर्मा भवेदन्यथा वा?। पूर्वस्मिन् पक्षे वस्तुन्येवाभाव इति नाम कृतं स्यात्। उत्तरस्मिन्नपि सर्वपदार्थानामसत्त्वप्रसङ्गः। सत्त्वाभ्युपगमेन तस्यानित्यताद्यभावादवश्यंभाविनी नित्यता। ततश्च विरोधिनः सर्वदा सन्निधानाद्भावो जगति नाममात्रेणाप्युच्छिद्येत। अपि च तस्यैकभावसंबन्धिता भवेत्,

सर्वसंबन्धिता वा? । पूर्वस्मिन् पक्षे विशेषो वक्तव्यो येन तस्यैवासौ नान्यस्येति । तन्निवृत्तिस्वभावत्वादेवं भविष्यतीत्यपास्तम् । अकिञ्चित्करत्वेन तस्याः । यथा ह्यसौ तत्राकिञ्चित्कार्यपि तस्य निवृत्तिस्तथा त्रैलोक्यस्यापि किमिति न भवति। तन्नैकभावसंबन्धिनामपि सर्वसंबन्धिता । एकस्य विनाशोत्पादे वा सर्वस्य विनाशोत्पादप्रसङ्गात् । न चैवमस्ति । तन्नाभावस्य केनचित् संबन्धः । तस्मात् कल्पनामात्रदर्शित एवाभावो न तत्वतः कश्चिदस्तीति स्थितम् । अत्राहुः । एवमभावनिराकरणे पर्युदासस्यैको न अर्थः स्यात् तत्र च द्वयी गतिः । वस्त्वन्तरस्य सत्ताऽन्यस्याभावः । पदार्थान्तरत्वेन वा भावविलक्षणस्याभ्युपगतस्योत्तरस्मिन् पक्षे प्रसज्यप्रतिषेधे यो दोष उक्तः, सोऽत्राप्यपरिहार्यः । न हि पदार्थान्तरोत्पत्तौ स्वरूपेणाप्रच्युतस्य भावस्य पूर्ववदुपलब्ध्याद्यकरणम् । निवृत्तौ वा स्वयमेव तस्य निवृत्तेर्वा पदार्थान्तरोत्पत्त्या किञ्चित्ततोऽन्यतरः पक्षः । नापि पूर्वत्र स एव भावोऽन्यापेक्षयाऽभावस्ततश्च घटस्य प्रध्वंसः कपालसत्ता । यदा च कुतश्चिन्निमित्तात्तेषां प्रध्वंसस्तदा गत्यन्तराभावाद्घटस्याभावे प्रतिषिद्धे सत्तया भाव्यम् । न चैतद्दृष्टम् । किं च यथा कपालानां सत्ता घटस्याकिञ्चित्कार्यः प्रध्वंसस्तथा त्रैलोक्यस्यापि स्या प्रसज्येत । ततश्चैकविनाशे सर्वविनाशः, एकोत्पादे च सर्वोत्पादः । तथा हि दध्नः प्रागभावः क्षीरमात्रम् । तन्निवृत्त्या तस्योत्पादात् । यथा च प्रागभावव्यावृत्तौ दध्नउत्पत्तिरेवं पदार्थान्तरस्यापि । तस्यैवासौ प्रागभावः प्रध्वंसो वा । तेन न पूर्वोक्तो दोषः । अत्रोक्तम् । तेन सह संबन्धे विशेषहेतुभावः तत्प्रसज्यप्रतिषेधे पर्युदासरूपस्याभावाख्यस्य प्रमेयस्याभावात् कथं तत्प्रतिपत्तिः । कुतश्चिल्लिङ्गाद्

दृश्यते । तत्रैवमभावे ग्रन्थकारैः पदार्थसंकाराख्यो दोषः प्रतिपादितः । क्षीरे दधिभवेदेवमित्यादिना । परात्मनोऽसत्त्वाभ्युपगमे पूर्वोक्तमसामञ्जस्यं प्रतिपादितम् । अथ ब्रूयात् स्यादयं दोषः । यदि स एव भावः पररूपेणासन्न भवेत् किं तु पररूपेणासत्त्वं धर्मिणो धर्मस्तदा च द्व्यात्मकः पदार्थोऽभ्युपगतो भवति । तदुक्तम् ।

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित् कदाचन ॥

न च तयोर्भावाभावलक्षणयोरंशयोरनेन प्रकारेणाभेद उक्तः । येनायं दोषः स्यात् । किंतु कथंचिद्भेदस्याभ्युपगमादुक्तम् ।

धर्मयोर्भेद इष्टो हि धर्मभेदेऽपि नः स्थिते ।

अथोक्तम् । एकान्तिको भेदस्तु तयोः कथञ्चिद्वाभेदस्तावदिष्टः । तथा सति भावस्य घटाख्यस्याभावांशेऽपि तेन पदार्थान्तरात्पटाख्या यथाऽसंकीर्णता, एवं भावाश्रयैरपि । ततश्च पटादिभावांशादपि तेनासंकीर्णेनाभावान्तरेण भाव्यम् । तस्मादप्यसंकीर्णत्वाभ्युपगमेऽनवस्था प्रदर्शितेव । तत्राभावांशाभ्युपगमेनापि पदार्थान्तरत्वात् पदार्थान्तरस्य व्यावृत्तेर्वस्त्वसंकरसिद्धिः । किं तु स्वहेतुतः समुपजायमानाभावाः परस्परासंकीर्णस्वभावा एवोपजायन्ते । अन्यथा पूर्वोक्तदोषप्रसङ्गः । तदुक्तम् । सर्वे भावाः स्वस्वभावस्थितयो नात्मानं परेण मिश्रयन्ति । तत्रास्तीति व्यवहारमात्रम् । न त्वभावो नाम तज्ज्ञानगम्यः कश्चिद्विद्यते । भाव एवैकदास्त्यन्यदा स एव न, नतु तस्याभावः । यतो भावैकपरमार्था भावाः । स्वरूपे, पररूपेण तु न सन्तो नाप्यसंतः । तथाभ्युपगमे पूर्वोक्तदोषान्नि

वृत्तिः । तत्स्थितमनुपलब्धेः सविशेषणाया अभद्व्यवहारयोग्यत्वं प्रति लिङ्गता । नन्वनुपलब्धेः किं विशेषणं, येनैवमुच्यते । किमत्र प्रष्टव्यम् । निषिध्यमानस्य दृश्यत्वम् ? । तन्न । तदानीमयं न दृश्यते कथं तथा व्यपदिश्यते? । अदृश्यमानोऽपि दर्शनयोग्यश्चेत् । तद्योग्यत्वं दर्शनाभावात् कथमवनमात्रोक्तं व्याख्यातृभिर्दृश्यत्वं समारोपितं तत्र न तु वास्तवम् । अतः समारोपितदृश्यत्वाभिप्रायेणानुपलब्धेः पूर्वोक्तं विशेषणम् । एतच्च पूर्वावगतस्य घटस्य शशविषाणस्य वानवगतस्य द्वयोरपि तुल्यम् । क्वचित्प्रतिषेधे तत्स्थितं यथोक्तं विशेषणतयाऽनुपलब्धेर्व्यवहारयोग्यतास्वभावः प्रमेयम् । ननु भावव्यतिरिक्तोऽभावः ।

अत्राहुः । सर्वज्ञस्य ज्ञानद्वयं समुपजायते इदमस्ति इदं नास्तीति । तयोश्च विभिन्नविषयावभासित्वाद्वैलक्षण्यं प्रसिद्धम् । एकस्य भावविषयत्वादपरस्याभावविषयत्वात् । तत्रैतत्स्यात् । द्वयोर्मध्ये कतरद्भावप्रतिभास्यन्यदभावस्य । न तु स्फुटे प्रतिभासेत् कुतस्त्यः संशयो बाहुः प्रतिभासोत्पादादेव । भावो हि सामर्थ्यलक्षणः शास्त्रे गीयते, तद्विलक्षणे, । न चाभावेन भवितव्यम् । अन्यथा तयोर्न स्यात् स्वरूपाभेदाद् वैलक्षण्यम् तस्मात्तस्यासमर्थत्वेनैव भवितव्यम् । असामर्थ्याच्च कुतः प्रतिभासः ?। सामर्थ्ये चाभावस्यैवाभाव इति नामकरणम् । न च तन्निबन्धनमर्थतथात्वम् । तद्भाव एव वस्त्वन्तरासंसृष्टतयोपलभ्यमानः पूर्वोक्तज्ञानद्वयं जनयति । अत इदमभावज्ञानं भावग्राहिप्रमाणसामर्थ्यादुत्पन्नं न प्रमाणान्तरम् । अत्रोच्यते । भावसामर्थ्यादस्योत्पादेऽस्तीत्येवमुत्पत्तिः स्यान्न तु नास्तीति । जनकस्य भावैकस्वभावत्वात् । यथानुभवं च विकल्पेनोत्पत्तव्यं न त्वन्यथा विकल्पः । तत्रै तद्भवेत् । अन्यापेक्षया जनकस्य प्रतिषेधरूपताऽप्य-

स्तीत्यतोऽयमदोषः । नैतच्चारु।तस्योभयरूपत्वे पूर्वोक्तदोषानुवृत्तेः। एतच्च भवद्भिरेवोपगतम्। स्वरूपेण तु न सन्नसन्निति वदद्भिस्तद्विधिस्वभावत्वादस्तीति विकल्पं जनयेत्, न प्रतिषेधविकल्पम्। अतद्रूपत्वात् । अस्ति च प्रतिषेधविकल्पो भवतां मते स्वसंवेदनप्रत्यक्षसिद्धः । स च विषयभेदात् प्रमाणान्तरम् । ननु प्रतिषेधविकल्पस्याभावविषयत्वं तस्याऽजनकत्वेन प्रतिक्षिप्तम् ।

अत्र केचिदाहुः । भावेऽयं नियमो जनकस्य प्रतिभासोऽभावस्त्वजनकोऽपि स्फुष्टप्रतिभासोत्पत्तेः प्रतिभासत इति कमुपालभेमहि । न च प्रतिभासापलापो युक्तः । अपि च भावेऽप्ययं न नियमः । जनकस्यैव भावस्य प्रतिभासो यः प्रतिभासे प्रतिभाति ग्राह्याकारो वर्त्तमानावछिन्नः, तस्य प्रतिभाससमानकालत्वेन जनकत्वं यस्य जनकता तस्यातीतत्वात् । तन्न प्रतिभासः । तन्नैतद्भवेत् । जनकस्य न साक्षात्प्रतिभासः किं तु स्वारजनमेव तस्य ग्राहकत्वं न तु प्रतिभासमानकालत्वेन तदभावस्य सामर्थ्यं तथाविधं ग्राहकत्वेन संभवति ।

अत्र वदन्ति । कथमसौ प्रतिभाससमानकाल आकारोऽनुपकारकस्तत्र प्रतिभाति । न चान्यस्योपकारकत्वेऽन्यप्रतिभासः । अतिप्रसङ्गात् । एकसामग्र्यधीनत्वेनातिप्रसङ्गनिवारणं प्रतिक्षिप्तम् । किञ्चोपकार्याभावाज्जनकस्य भावस्य ग्राह्यत्वेन परिकल्पितस्योपकारकत्वमनुपपन्नम् । न च ज्ञानप्रतिभास्याकार उपकार्यः । तस्य स तत्वतोऽसत्वेनाभ्युपगमात् । अतः कथंभावस्योपकारकत्वम्? । मा भूत् ज्ञानाकारस्योपकार्यता । ज्ञानं तु परमार्थं सद्विद्यते तदपेक्षयोपकारकत्वं भविष्यति । एतदपि स्वज्ञानप्रतिभासिन आकारस्यापरमार्थसत्वे तदव्यतिरेकज्ञानस्याप्यसत्वप्रसङ्गस्तस्य बोधरू-

पता । कः पुनस्तद्रूपता, यो दोषः? । न कश्चित्तदसत्वव्यतिरेकेण । यथा हि ग्राहकाकारे वृत्तिविकल्पादिबाधकं प्रमाणं प्रवृत्तमसत्वं प्रतिपादयति । तथा तद्व्यतिरिक्तस्यापि बोधाकारस्यासत्वमावेदयेत् तदकार्यकारणभूत एव ग्राह्यत्वेनाभिमतो भावः प्रतिभाति, तद्वदभावोऽपि । नन्वेवमजनकस्याभावस्य प्रतिभास्यत्वे सर्वदाऽभावप्रतीतिः स्यात् । स्यादयं दोषो यदि तद्ग्रहकप्रमाणोपपत्तौ निमित्तं सर्वदा स्यात् । किं पुनस्तद्यत्सर्वदा न भवति? । प्रतिषिध्यमानपदार्थस्मरणं भावोपलम्भश्च । अतः प्रमाणोपपत्तिनिमित्तान्वयव्यतिरेकानुविधानात् कादाचित्कत्वमभावग्राहिणो न त्वभावस्य । जनकत्वात्तस्य सदैव भावात् । तत्प्रमाणान्तरमभावः । एवं केचिदाहुः । अन्ये ब्रुवते । अभावस्य प्रतिभासजनकत्वं किमक्षणिकत्वान्नेष्यते, आहोस्वित् प्रतिभासजनकत्वेन भावाद्वैलक्षण्यं न स्यादित्युच्यते? । यदि पूर्वः पक्षस्तदेतत् प्रतिभासमाधास्यते । क्षणभङ्गभङ्गे यथा भावस्याकिञ्चित्करस्य सहकार्यपेक्षस्य कार्यजनकत्वं, तथाऽभावस्यापीति वक्ष्यते । अथ द्वितीयः । सोऽपि न युक्तः । न हि जन्यत्वजनकत्वाद्वैलक्षण्यानुपपत्तिः । एवं ह्यवैलक्षण्ये जगति न किंचित्कुतश्चिद्विलक्षणं भवेत् । पूर्वोक्तस्य निमित्तद्वयस्य सम्भवात् । अथ तस्मिन् सत्यपि हेतुभेदात्प्रतिभासते, भेदाच्च भावानां विलक्षणता तद्वदभावेऽपि स्यात् । अथोच्यते । सर्वसामर्थ्योपाख्याविरहलक्षणमसत्वं तदेव चाभावोऽतः कथं तस्य जनकत्वम्? । न सामर्थ्यलक्षणं सत्वम् । तस्य क्षणभङ्गभङ्गे निषेत्स्यमानत्वात् । तदभावस्य प्रतिभासाजनकत्वादप्रमेयत्वमयुक्तम् । अथ न पूर्वोक्तेन निमित्तेन तस्याप्रमेयता, किं तु भावाव्यतिरिक्तस्य तस्यासंभवात् । एवमुच्यते । एतदरूद्रूपाद्र

स्य कथं भेदः? । किमत्र प्रष्टव्यम्? । भिन्नप्रत्ययविषयत्वात्तस्य । तस्माद्भेदोऽत्राप्यस्तीति प्रत्ययप्रतिभासः स्यात् । तदसत् । तस्मिन् वाऽसति कथं विलक्षणः प्रत्ययस्तत्रैतस्यान्न प्रतिभास्यभेदान्नास्तीति प्रत्ययस्य पूर्वस्माद्वैलक्षण्यं किं तु सामग्रीभेदात् । नन्वेकोपलम्भानुभवाध्यवसाययोरुत्पादे कथं सामग्रीभेदः । नैष दोषः । प्रतिषिध्यमानस्मरणस्य नास्तीति प्रत्यये पूर्वस्मादाधिक्यान्न तु तस्यैव कथमुत्पत्तिः । न ह्यप्रतिबद्धपदार्थदर्शनेऽन्यस्य स्मरणम् । अतिप्रसङ्गादेकज्ञानसंसर्गः प्रतिबन्ध इति चेत् । वक्तव्यं तर्हि कोऽयमेकज्ञानसंसर्गः । पूर्वं द्वयोः सह प्रतिभास्यतेति चेत् तर्हि तयोर्यत्र न दृष्टस्तस्य तत्रादृश्यमानस्य प्रतिषेधो न स्यात् । प्रतिषिध्यमानस्मरणनिमित्ताभावाद्योग्यतेति चेत् । साऽपि न युक्ता । दर्शनं विना कार्यानुमेयत्वात्तस्याः । यदि ब्रूयान्न योग्यता पूर्वोक्ताऽस्माभिर्भण्यते किं तु यदि प्रतिषिध्यमानं वस्तु तत्र संनिहितं भवेत्, तदा भूतलमिव द्रष्टुं शक्यं स्यात् । इयं योग्यतैकज्ञानसंसर्गलक्षणा । अस्यामपि योग्यतायां नैकस्यैव प्रतिभासो भवेत् किं तु यावत्तत्र सन्निहितं द्रष्टुं शक्यं तस्य स्मरणे सति प्रतिषेधप्रतिभासः स्यात् । न चैतदस्ति । कस्यचिदेव प्रतिभासात् । तन्न प्रतिषेधविकल्पोत्पत्तौ प्रतिषिध्यमानस्मरणं पूर्वस्मात्सामग्र्यन्तरम् । तन्नास्तीति विकल्पो न भवेत् । एकनिमित्तोत्पन्नयोर्वैलक्षण्याभावात् । भवतु वा तदुत्पत्तौ सामग्र्यन्तरं तथापि नोपायभेदात् विकल्पयोर्भेदः, किं तु प्रतिभासस्य भेदात् । प्रत्यक्षानुमानयोरिव । तदुक्तम् ।

प्रामाण्यं वस्तुविषयं द्वयोरर्थभिदां जगौ ।
प्रतिभासस्य भिन्नत्वादेकस्मिंस्तदयोगतः ॥ १ ॥

युक्तं चैतत् । अन्यथा नास्तीतिप्रत्ययेऽप्रतिपत्तिरेव

स्यात् । ततः प्रतिभास्यं तावदसत्वान्न प्रतिभासोऽपि वक्ष्यमाणात् स्वसंवेदननिषेधान्नैव । न च वस्त्वन्तरमस्ति । अतो नास्तीति विकल्पोत्पादानुत्पादयोः प्रतिभासाभावात्तुल्यता प्रसक्ता । अथ भेदानुमानस्य प्रतिभास्यस्य संभवात्प्रत्यक्षानुमानयोर्विषयभेदाद्भेदोऽस्ति । प्रमाणत्वात् नास्तीति विकल्पस्य पुनर्न प्रतिभास्योऽस्ति । नापि प्रमाणत्वम् । अतस्तत्तुल्यता तस्य न युक्ता । नन्वनुमानेऽपि नैव प्रतिभास्यं वस्त्वस्ति । आरोपितस्य तद्विषयत्वेनाभ्युपगमात् । तच्च नास्तीति विकल्पेऽपि न दण्डवारितम् । यथा युक्तिबाधितत्वेऽपि तद्विषयस्याभ्युपगमस्तथा नास्तीति विकल्पविषयस्यापि तत्प्रामाण्यमप्यस्तीति विकल्पवन्नास्तीति विकल्पस्य प्रापकत्वान्न वार्यते । ननु न विधिविकल्पस्य तत्र प्रामाण्यं किन्तु दर्शनमेव स्वाकारार्पणात्तद्रूपतामापन्नं वस्तु प्रापयत् प्रमाणम् । प्रतिषेधविकल्पेऽपि दर्शनस्यैवंरूपता किमिति न कथ्यते? । अथ विधिविकल्पस्य पारम्पर्येण विषयो नीलादिः स प्राप्यते । प्रतिषेधविकल्पस्य तु यो विषयस्तस्य न कथञ्चित्प्राप्तिरिति तदाकारतामापन्नं दर्शनेन तत्र प्रमाणं, कथं न प्राप्तिर्यतो नीलं प्राप्यमाणं तत्प्रत्येत्याविनाभूतपीताद्यसंसृष्टम् । प्राप्यं तु न शुद्धम् । तस्याश्च पदार्थव्यवस्थानिबन्धनायाः प्रच्युतेः कथञ्चित्प्राप्तिरस्तीति कथं न तत्र दर्शनं प्रमाणम् ? । तदनभ्युपगमे च पदार्थव्यवस्था नास्तीत्युक्तं त्रैलोक्यक्षणिकविरोधं प्रदर्शयद्भिः । कल्पितायास्तस्याः सर्वाभ्युपगमाददोष इति वेदे तन्नातिप्रभाषितनमकाल्पनिकवस्तुव्यवस्थापकत्वं कल्पितत्वं च ॥ अथोच्येत । तस्याः प्रापकत्वेऽपि कथञ्चिद्दर्शकं न प्रमाणम् । तदर्थक्रियाकरणात् । ननु केयमर्थक्रिया ? । यामसौ न करोति । नीलादिसाध्यमिति चेत् । तन्न नीला-

दिष्वपि तुल्यम् । तेऽपि न परस्यार्थक्रियां कुर्वन्ति । अथ वस्त्वतरसाध्यार्थक्रियाकरणेऽपि स्वकार्यकर्तृत्वं तेषामस्तीत्युच्यते तत्प्रच्युतेरपि न केनचिद्वारितम् । तथाहि-पीताद्यवच्छेदकत्वं प्रच्युतेर्भवद्भिरभ्युपगतं, तदनुमानवद्दर्शनपृष्ठभाविविधिविकल्पवच्च प्रतिषेधविकल्पस्यापि प्रामाण्यम् । तन्नानुपलब्धेर्लिङ्गादसद्व्यवहारयोग्यताऽनुमीयते । किंत्वभाव एव तत्र प्रमाणान्तरगम्यो न तु सदुपलम्भप्रमाणगम्यः । पूर्वोक्तेन न्यायेनेतश्चैतन्न । यतः कश्चित् कुतश्चिदागतः पृच्छयते । तत्र प्रदेशे चैत्रः स्थितो न वेति । स प्रश्नो चैत्र स्मृत्वा तदभावमवगत्य वक्ति न तत्र स्थितः न च तत्र सदभावावगमे तस्य तदानीमिन्द्रियव्यापरः । नापि लिङ्गं किञ्चिद्विद्यते । न चानुपपद्यमानः । नाप्यागम, उपमानं वा । न च तदप्रतिपत्तिर्नाऽस्ति । प्रश्नस्योत्तरदानात् । नापीयं स्मृतिः । पूर्वं तदभावानवगमात् । प्रतिषिध्यमानपदार्थस्मरणं तदभावावगमे निमित्तम् । तच्च निमित्ताभावात् पूर्वं तस्य नोत्पन्नमिदानीं प्रश्ने सति सञ्जातम् । अथोत्पत्तेः पूर्वमेव तत्रोपलब्धिलक्षणप्राप्ताशेषवस्तवभावग्रहणम् । मेचकबुद्ध्या तस्मिन् सति यस्य स्मरणादि सहकारिकारणमस्ति तस्य तस्य व्यक्तितिरस्कृतमग्रहीत् तस्य स्फुटप्रतिभासविशेष्यता । एतदसाधु । यतोऽस्य ग्रहणं भवद्विकल्पद्वयं नातिवर्त्तते । स्वतन्त्रस्याशेषवस्त्वभावस्य ग्रहणमन्योपसर्ज्जनस्य वा प्राप्ते विकल्पेनैकाभावस्मरणं भवेत् । सर्वेषां सद्गृहीतत्वात् । तेनान्योपसर्जनत्वेन ग्रहणं व्याख्यातम् । तत्स्मृतिरपि न भवति । न च सदुपलम्भकं तदवगमे किञ्चित्प्रमाणमस्ति । परिशेषादभावाख्यात् प्रमाणात्तस्यावगमः । तदुक्तम् ।

स्वरूपमात्रं दृष्टं च पश्चात्कश्चित्स्मरन्नपि ।
तत्रान्यो नास्तितां पृष्टस्तदैव प्रतिपद्यते ॥

एतदपरे दूषयन्ति । प्रश्नकाले एवाभावावगमे तद्भावाशङ्का न निवर्त्तेत । तथा च तस्योत्तरम् । मया पूर्वं न दृष्टस्तत्र तेन तदानीमसौ नास्ति । नेदानीमितीदृश्येव च संवित्तिस्तदानीं नासीन्नेदानीमिति ॥ तन्न प्रश्नकालेऽभावावगमः । ननु पूर्वमप्यवगमे सर्वस्मरणलक्षणदूषणमभिहितम् । उभयत्र दूषणसद्भावात् संशयोऽस्तु न निश्चयः। अतोऽभावस्य प्रमाणान्तरगम्यत्वे पूर्वोक्त एव न्यायो न त्वनन्तराभिहितः। अत्रोच्यते । एतावदुक्तमभावो नेन्द्रियसंनिकर्षाभावान्न प्रत्यक्षगम्योऽभाव इति । तदसत् । संनिकर्षस्य पूर्वमेव निरस्तत्वात् । प्राप्यकारित्वे चक्षुषः स्पर्शनेन्द्रियस्येव वह्न्यादिना दाहाद्युपद्येत । तथाऽप्राप्यकारित्वेऽपि किं न भवति? । अयोग्यत्वान्नेति चेत्। तर्हि योग्यतैव ग्रहणनिबन्धनं, न सबन्धस्तेन भाववदभावेऽपि योग्यत्वादक्षमध्यक्षमुत्पादयति । किं च नेन्द्रियसंबन्धात्प्रत्यक्षं वस्तु किंतु प्रत्यक्षविषयत्वात् । अन्यथाकाशादेरपि प्रत्यक्षता स्यात् । तथा वा चक्षुषि रसस्यापि प्रतिभासो भवेत् । तत्रापि संयोगसंयुक्तसमवायद्वारेणैकार्थसमवायस्य वा संयुक्तविशेषणभावस्य वा भावात् । ननूक्तं योग्यात्वादिन्द्रियस्य हि त्वभावं विनैव योग्यतैव नास्ति । ननु भावांशे कथं योग्यता? । तद्विषयज्ञानोत्पत्तेरिति चेत् । अभावांशेऽपि समानम्। तथा ह्यस्तीति ज्ञानस्येव नास्तीति ज्ञानस्यापीन्द्रियान्वयव्यतिरेकानुविधानं तुल्यमस्त्येतत्किन्त्वन्यस्मात् सिद्ध तद्भावभावित्वम् । यथा धूमादग्निदर्शने रूपज्ञानस्य चेन्द्रियजत्वं तद्गतस्पर्शज्ञानस्य तस्य रूपदर्शने सति भावात्। एवमिहापि भूतलग्रहणे सति नास्तीति विज्ञानस्वभावे तद्भावभावित्वं द्रष्टव्यम् ।

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।

मानसं नास्तिताज्ञानं जायते ऽक्षानपेक्षाणादिति ॥

तदयुक्तम् । दुरादग्नौ स्पर्शज्ञानं सहचररूपोपलम्भादानुमानिकमिह भूतलस्य तत्प्रतित्तेश्च लिङ्गत्वानिषेधान्न संन्यासः । यथा च भवतां भूतलेऽनुपलभ्यमानेऽस्तीति ज्ञानस्य । ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया बुद्ध्याऽवसीयते सापि प्रत्यक्षत्वेन समतेत्यभिधानात्प्रत्यक्षता ? तथा नास्तीति ज्ञानस्यापि । किञ्च भावांशस्य ग्रहणं किं वस्त्वन्तरसंसृष्टस्य किं वासंसृष्टस्य ? । यदि संसृष्टस्य तदा प्रत्यक्षबाधितत्वादभावः प्रमाणं न स्यात् । अथासंसृष्टस्य तदा कथं भावस्य प्रत्यक्षता । अथ वस्तुमात्रमेव प्रतीयते न वस्त्वन्तराभावः । तत्किं वस्त्वन्तर तत्र प्रतिभाति ? । नेति चेत् । तत् कथं न तदभावः प्रत्यक्षग्राह्यः । अथ प्रत्यक्षेण न तद्भावो नाप्यभावः प्रतीयते । तदसत् । एवं ह्यप्रवृत्तिनिवृत्तिकं जगत् स्यात् । तदुक्तम् । न ह्ययमनलं पश्यन्नप्यनलमेव पश्यति । किं तु सलिलमपि । ततस्तदर्थी न तिष्टेन्नप्रतिष्टेतेति दुस्तरं व्यसनमापन्नमिति । तस्मादिदन्तया सदात्मकं वस्तु परिच्छिन्दत् प्रत्यक्षं सद्व्यवहारमिवासद्व्यवहारमपि करोति । न नास्तीति ज्ञानस्य पृथक् प्रामाण्यमिति । तदेवाह । नानास्तीत्यादि । क्वचिदस्तीति ज्ञानमपि लैङ्गिकमित्यभिधास्यते । नन्वभावप्रमाणनिरासे प्रमेयाभावनिरासाबभ्युपेतहानिः स्यादित्याह— अभावेऽपि चेत्यादि ।

अभावेऽपि तनैवास्ति प्रमेयो वस्तुनः पृथक् ।
प्रत्यक्षं विशदज्ञानं त्रिधेन्द्रियमनैन्द्रियम् ॥

एतदुक्तं भवति नाभावो जैनैर्नाभ्युपगम्यते किन्तु न पृथगिति । उक्तञ्चसूत्रे ।

अन्नोन्नाणुगयाणं इमं च तं चित्ति विभयणमजुत्तं ।
जहखीरपाणियाणमिति ।

नन्वशेषाभावानुभवे युगपत्स्मरणमुत्पद्यते तेन किञ्चित्यतो नानुभूतं स्मर्यत एव किन्त्वननुभूतमेव । तेनाशेषाभावानुभवेऽपि यस्य प्रतिषिध्यमानपदार्थस्मरणे प्रश्नादिनिमित्तमस्ति तस्यैव स्मृतिर्नान्येषामिति । विरोधपरिहारञ्चाभिधास्यतीति । तदेवं न प्रमाणभावः प्रमाणमित्यतः साधूक्तम् । द्विधामेयविनिश्चयादिति यत् सूत्रे द्वैविध्यं प्रत्यक्षं च परोक्षं चेत्युक्तं तदेव व्याख्यातुमाह—। प्रत्यक्षमिति । प्रतिगतमक्षं प्रत्यक्षमिति । प्राप्तापन्नेत्यादिना तत्पुरुषे परवल्लिङ्गताप्रतिषेधात् त्रिलिङ्गः प्रत्यक्षशब्दः । गमनक्रियेव गोत्वस्याक्षाश्रितत्वमर्थसाक्षात्कारित्वस्योपलक्षणम् । मानसजेऽपि तच्छब्दवाच्यता नायुक्ता । इदानीं तस्य लक्षणमाह । विशदमिति । अथ किमिदं वैशद्यम् । न तावन्निर्विकल्पकत्वम् । अनभ्युपगमात् । अथ स्पष्टत्वं तदा बालापेक्षया वृद्धस्यापि प्रत्यक्षं न स्पष्टम् । तथा दूरवस्तुनि प्रत्यक्षं चेति । अथ तच्छ्रुतं तदा यदिन्द्रियजत्वादथ त्रिधा श्रुतं प्रत्यक्षपूर्वकं लैङ्गिकं शाब्दं चेति । तन्न । प्रत्यक्षपूर्वकस्य प्रमाणभूतस्य लैङ्गिकत्वात् । नच तदप्रमाणम् । नापि लैङ्गिकम् । व्याप्तिस्मरणादेरननुभावात् । यत्प्रत्यक्षेण परोपदेशसहकारिणा शब्दोल्लेखि ज्ञानं जन्यते तत्प्रत्यक्षपूर्वकं श्रौतम् । तच्चाप्रमाणम् । प्रत्यक्षनिश्चितार्थे प्रवर्त्तमानत्वात् । तस्माद्यदुक्तं त्रिधा श्रुतमविप्लवमिति तदसंगतम् । विप्लवस्योक्तत्वात् । न येन च मूढस्य प्रत्यक्षेऽपि वस्तुनि पूर्वसाधर्म्यादर्थक्रियाकारित्वनिश्चयः क्रियते नित्यानित्यत्वनिश्चयो वा तल्लैङ्गिकम् । न चैवं

दूरदेशादौ वस्तुन्यस्पष्टज्ञानमिति । तन्नेदं लक्षणं व्यापीत्याशङ्क्याह । वैशद्यमिदंत्वेनावभासनमिति । इदमो भाव इदंत्वम् । साक्षात्कारित्वमित्यर्थः । तेनानुमानादेरसाक्षात्कारिणो निरासः । इदानीं व्यक्तिभेदमाह । त्रिधेति । त्रयो विधाः प्रकारा यस्य तत्त्रिविधम् । त्रैविध्यमेवाह । इन्द्रियं तद्विपरीतमनिन्द्रियम् ।

योगजं चेत्यवैशद्यं मिदन्त्वेनावभासनम् ।
जीवांशात्कर्मनिर्मुक्तादिन्द्रिये बाधितिक्षः ॥

योगश्चित्तवृत्तिनिरोधो घातिकर्मक्षयहेतुस्तस्माज्जातं योगजम् । चः समुच्चये । इतिरवधारणे । इयदेव प्रत्यक्षं न मानसादि । अथ किमिदमिन्द्रियं तत्र विप्रतिपत्तिदर्शनात् । तथाहि—भौतिकानीन्द्रियाणि स्थापयितुं वैशेषिकः पूर्वपक्षमुत्थापयति । नन्वाहङ्कारिकत्वादिन्द्रियाणाम् । तथाहि—प्रकाशकत्वं सत्त्वधर्म इति सात्त्विकादहङ्कारादिन्द्रियाणामुदयः । किमत्र प्रमाणमिति चेत् । अप्राप्यकारित्वम् । तच्च शाखाचन्द्रमसोस्तुल्यकालग्रहणाद्विज्ञातम् । अन्यथा हि शाखासंबन्धोत्तरकालं चिरेण चन्द्रमसा संबन्धाद्युगपद् ग्रहणं न स्यात् । अस्ति वातोऽप्राप्यकारित्वम् । तच्च भौतिकेषु न सम्भवति । प्रदीपादिकस्यम्भवादर्शनादित्यभौतिकत्वमन्येषामपि प्रतिपत्तव्यम् । चक्षुर्दृष्टान्तबलादेव तथा महदणुप्रकाशकत्वात् । भौतिकं हि यावत्परिमाणं तावत्येव क्रियां कुर्वद्दृष्टमिति । तथा स्वल्पपरिमाणं कस्यापि महान्तं वटवृक्षं प्राप्य छिद्रां न करोतीति दृष्टं किं तर्हि स्वव्याप्तप्रदेश एवेति । चक्षुरप्यल्पपरिमाणत्वान्न पर्वतादि परिच्छेदकं स्यात् । ननु दृष्टमतो न भौतिकमिति । तथाऽनियतविषयत्वाच्च यदि चक्षुस्तैजसं स्याद्रूपस्यैव तद्गुणकत्वाद् ग्राहकं भवेन्न द्रव्यसामान्यादेरिति । एवं शेषेष्वनियमेन तैजसं स्याद्रूपस्यैव तद्गुणकत्वा-

द्ग्राहकं भवेन्न द्रव्यसामान्यादेरिति । एवं शेषेष्वनियमेन स्वगुणग्राहकत्वप्रसङ्गः । न चैतद्दृष्टम् । अतो न भौतिकत्वम् । इतश्च न भौतिकानीन्द्रियाणि । इन्द्रियत्वात् । यद्यदिन्द्रियं तत्तदभौतिकं दृष्टं यथा मनस्तथा चेंद्रियाण्यमूनि तस्मान्न भौतिकानीति । यत्तावदप्राप्यकारित्वादिति साधनं तदसिद्धम् । व्यवहितार्थानुपलब्ध्या प्राप्तेरूपलम्भात् । अन्यथा हि व्यवहितस्याग्रहणम् । अन्तिके च ग्रहणं न स्यात् । अप्राप्तेरुभयत्र विशेषात् । आवरणानुपपत्तिश्च । प्राप्तिप्रतिषेधकत्वात् । तथा च प्राप्तिप्रतिषेधं कुर्वदावरणमग्रहणाय कल्पते । दृष्टं चावरणसामर्थ्यं दूरे प्रकाशकत्वमतः प्रदिपस्येव प्राप्तार्थपरिच्छेदकत्वम् । तथा चक्षुः प्राप्तार्थपरिच्छेदकम् । व्यवहिताप्रकाशकत्वात् । यद्यद्व्यवहिताप्रकाशकं तत्तत्प्राप्तार्थपरिच्छेदकम् । यथा प्रदिपः । तथा च व्यवहिताप्रकाशकं चक्षुस्तस्मात्प्राप्तार्थपरिच्छेदकमिति प्राप्तिसद्भावे प्रमाणोपपत्तेः । शखाचन्द्रमसोः कालभेदेन सम्बन्धेऽप्याशुभावोत्पलपत्रच्छातव्यक्तिभेदाभिमानवद्युगपद्ग्रहणाभिमानः । यच्च महदणुप्रकाशकत्वं तदप्यन्यथासिद्धत्वादसाधनम् । तथा हि—चक्षुर्बहिर्गतं बाह्यालोकसम्बन्धाद्विषयपरिमाणमुत्पद्यते । महदाद्यर्थप्रकाशनन, अभौतिकत्वादिति । यच्चोक्तम् । तैजसत्वाद्रूपस्यैव प्रकाशकमित्येतदसत् प्रदीपेऽदर्शनात् तर्हि प्रदीपस्तैजसत्वाद्रूपस्यैव प्रकाशको दृष्टः, किं तर्हि रूपद्रव्यसामान्यादेरिति । न च नैव विषयश्चक्षुषोऽतस्तैजसत्वं न विरुध्यते इति रूपादिषु मध्ये नियमेन रूपप्रकाशकत्वं तु तैजसत्वेऽनुमानमिति वक्ष्यामः । नियमेन गन्धादिषु गन्धस्यैव प्रकाशकत्वं च पार्थिवत्वात् घ्राणादेरिति । न चैकप्रकृतिकत्वे विषयव्यवस्थोपलब्धेरिति नानाप्रकृतिकत्वम् । तथाह्येकस्मात्कारणादुपजाताः प्रदीप-

एव न तु स्वधर्मः नापि च श्रेयोहेतुः किन्तु कर्मैव स्वधर्मः श्रेयोहेतु-श्चानुष्ठेय इत्याह—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

श्रेयानिति । वर्णाश्रमिणामयं परमोपदेशः क्रियते भगवता मम वचनं शृण्वन्तु मुमुक्षवः । स्वनुष्ठितात् यथाशास्त्रं सु सम्यङ्नियमेनानुष्ठितात् कृतात्परधर्माद्विगुणोऽपि व्यङ्गोप्यसम्यगनुष्ठितोऽपि स्वधर्मः स्वकीयः स्वस्य कर्तव्यत्वेन यः शास्त्रेण विहितः स एव स्वधर्मः पुरुषस्य श्रेयान् श्रेष्ठतरः विध्युक्तत्वात् यथा यतेः कर्मणः परधर्मत्वात्स्नानजपस्तोत्रादिकर्मापेक्षया ज्ञानसाधनश्रवणाद्येकप्रयोजनः सर्वकर्मसंन्यास एव श्रेष्ठो धर्मस्तथा कर्मसंन्यासस्य परधर्मत्वाद्गृहिणोऽपि सर्वकर्मसंन्यासापेक्षया ज्ञानसाधनसत्त्वशुद्ध्येकप्रयोजनः कर्मयोग एव श्रेष्ठो धर्मः । एवमेवेतरेषां वर्णाश्रमिणाञ्च परधर्मापेक्षया स्वधर्म एव श्रेयस्करो यथा वा लोके सौभाग्यादिगुणोपेताया परमातुः सकाशात्कुरूपापि स्वमाता पुत्रहितावहा भवति तथेत्यर्थः । किञ्च सुतरां परधर्मं परित्यज्य स्वल्पे व्यङ्गेऽपि वा स्वधर्मे नियमेन वर्तमानस्य निधनं मरणं श्रेयः श्रेयसे स्वर्गायापवर्गाय वा भवति न क्वाचिदप्यश्रेयसे नरकाय स्वधर्मं तं परित्यज्य वागगोचरेऽपि परधर्मे वर्तमानस्य निधनं न क्वचिदपि श्रेयसे भवति किन्तु परधर्मो भयावहः नियमेन सम्यगनुष्ठितोऽपि परधर्मो भयं यमदूतेभ्यो नरकं वा वाहयति सम्पादयतीति भयावहः नरकगर्भवासादिदुःखप्रवाहहेतुरेव भवतीत्यर्थः ।

अन्ये त्वित्थं योजयन्ति तथाहि ननु स्वाभाविकरागद्वेषप्रयुक्तपश्वादिसाधारणप्रवृत्तित्यागेन शास्त्रीयमेव कर्म कर्तव्यं चेत्तर्हि यत्सुकरं तदेव क्रियतां किमतिदुःखावहेन युद्धेनेत्यतआह श्रेयानिति । स्वधर्मः यं वर्णमाश्रमं प्रति वा यो विहितः स तस्य स्वधर्मः विगुणः सर्वाङ्गोपसंहारं विना कृतोऽपि परधर्मात् परं प्रति विहितात् स्वनुष्ठितात् सर्वाङ्गोपसंहारेण कृतादपि श्रेयान् श्रेष्ठतरः अतः स्वधर्मे किञ्चिदङ्गहीनेऽपि स्थितस्य निधनं मरणमपि श्रेयः श्रेष्ठतरं परधर्मस्थस्य जीवनादपि स्वधर्मस्थस्य निधनं हि इहलोके कीर्त्यावहं परलोके च स्वर्गादिप्रापकं परधर्मस्तु इहाकीर्तिकरत्वेन परत्र नरकप्रदत्वेन च भयावहः भयप्रापकोऽतो रागद्वेषादिप्रयुक्तस्वाभाविकप्रवृत्तिवत्परधर्मोऽपि हेय एवेत्यर्थः । अत्रायं सङ्ग्रहः—

श्रद्धा ह्यास्तिस्तथासूया दुष्टचित्तत्वमूढते ।
प्रकृतेर्वशवर्तित्वं रागद्वेषौ च पुष्कलौ ।
परधर्मरुचित्वञ्चेत्युक्ता दुर्मार्गवाहकाः ॥

अन्ये तु ननु तत्तदिन्द्रियविषये स्थितयो रागद्वेषयोरात्मप्रापके आत्मधर्मे विघ्नकर्तृत्वेपीन्द्रियधर्मे प्रवृत्तिकरे विषयसुखजनके विघ्नकर्तृत्वाभावादिन्द्रियधर्म एवानुष्ठेयः किमात्मधर्मानुष्ठानेन विघ्नकर्तृयुक्तेनेति चेत्त्राह श्रेयानिति । परेषामिन्द्रियाणां धर्माद्व्यापारात्प्रवृत्तिहेतुभूतात्स्वनुष्ठितात्सुगमेनानुष्ठातुं शक्यादपि स्वधर्म आत्मधर्म आत्मावगतिरूपः विगुणः प्राकृतगुणशून्यः श्रेयान् श्रेष्ठतरः मुक्तिहेतुत्वात्तत्र निधनं श्रेयः अपुनर्भवत्वात् परधर्मो भयावहः संसारपातहेतुत्वादित्याहुः ॥ ३५ ॥

ध्यायतो विषयान्पुंस इत्यादिना पूर्वमनर्थमूलमुक्तं साम्प्रतं च प्रकृतेर्गुणसम्मूढा इत्यादिना बहुविधं कथितं तत्र किं सर्वाण्यपि समप्राधान्येनानर्थकारणानि अथवैकं मुख्यकारणमितराणि तु तत्सहकारीणि केवलं? तत्राद्ये सर्वेषां पृथक्पृथङ्निवारणे महान्प्रयासः स्यात् द्वितीये त्वेकस्मिन्नेव निराकृते कृतकृत्यता स्यादित्यभिप्रेत्य विशेषेणानर्थमूलनिश्चयाय पृच्छति—

अर्जुन उवाच ।

अथ केन प्रयुक्तोयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

अथ केनेति । हे वार्ष्णेय वृष्णिकुलोद्भव सर्वानर्थमूलं पापं कर्तुमनिच्छन्नप्ययं त्वन्मताननुवर्ती सर्वज्ञानविमूढः पुरुषः केन हेतुना प्रयुक्तः प्रेरितः पापं कर्म निषिद्धं विहितमपि काम्यं च कर्माचरति करोति न तु निवृत्तिलक्षणं परमपुरुषार्थसाधनभूतं त्वदुपदिष्टं कर्मेच्छन्नपि करोति अतो येन बलादिव नियोजितः प्रेरितः राज्ञेव भृत्यः सर्वानर्थमूलं कर्म जानन्नपि करोति तमनर्थमार्गप्रवर्तकं मां ब्रूहि ज्ञात्वा तदुच्छेदाय यतेयेत्यर्थः वार्ष्णेयीसुतोऽहं त्वद्बन्धुस्त्वया नोपेक्षणीय इति सूचनाय सम्बोधनं यथा त्वमजोऽपि केनचिदतिभक्तेन प्रेरितो वृष्णिकुलेऽवतीर्णोऽसि तथा प्रकृतेऽपीति द्योतनाय वार्ष्णेयेत्युक्तमित्यन्ये ।

यद्यपि ध्यायतो विषयानिति इन्द्रियस्येन्द्रियस्येति च पुरुषस्य जननमरणाद्यनर्थपरम्परागमनकारणं निरूपितं तथापि विशेषतस्तत्स्वरूपं

तदधिष्ठानं तज्जयोपायं च विज्ञातुकामोऽर्जुनः स्वयं विस्मृतवत्तदेव पृच्छति संसारकारणे विज्ञाते पण्डितैस्तदुपायेन परिहर्तुं शक्यत इत्यर्जुन उवाच अथेति । अथशब्दः पृथक्प्रश्नारम्भार्थः ब्रह्मविदां ब्रह्मानन्दामृतं वर्षतीति वृष्णिः सम्यग्बोधस्तेनावगम्यत इति वार्ष्णेयः परमात्मा श्री भगवान्वासुदेवस्तस्य सम्बुद्धिर्हे वार्ष्णेय बलवता राज्ञाऽवान्येन वा बलात्कारेण नियोजितः भृत्यइव कार्याकार्यज्ञोऽप्ययं पुरुषः स्वयं फलं पापसाध्यमनिच्छन्नपि केन प्रयुक्तोऽस्मिन्कार्यकरणसङ्घाते बलवता केन प्रेरितो भूत्वा पापमाचरत्ययुक्तमपि कर्म करोति तं ब्रूहीत्यर्थ इत्यपरं ॥ ३६ ॥

अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् ।
यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ॥

इति न्यायेन पुंसः सकलकर्माचरणकारणं सर्वानर्थबीजं काम एवेति बोधयितुं—

श्रीभगवानुवाच ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

काम इति । सर्वेषां प्रवृत्तेः काममूलत्वात्कामः सर्वप्रत्यक्ष इत्यभिप्रेत्य एष इति पुरोनिर्देशः योग्यत्वायोग्यत्वविचारमन्तरेण वस्तु दृष्टं श्रुतं च कामयति पुमांसमिति कामो वैषयिकी प्रबलेच्छात्र कामशब्देनोच्यते एषः कामः यः पुंसः संसारकारणं स एष काम एव केनाचित्स्वविषये प्रतिबद्धः क्रोधात्मना परिणमते ततो क्रोधोऽप्येष काम एव स्वयं रजोगुणसमुद्भवः रजसः गुणो रागो रञ्जनात्मिका वैषयिकी सामान्येच्छा स एव विषयसान्निधाने काममुद्भावयतीति कामो रजोगुणसमुद्भवः । यद्वा—

प्रज्ञां तु सात्विकीं प्राहुस्तामसीन्तु विचित्तताम् ।
क्रियां तु राजसीं प्राहुर्गुणतत्त्वविदो बुधाः ॥

इतिवचनात् क्रिया रजोगुणस्तस्य समुद्भवो यस्मात्स रजोगुणसमुद्भवः काम एव प्रवृत्तिहेतुरित्यर्थः । न जातु कामः कामानामुपभोगेन शाम्यतीतिवचनान्महदियत्ताशून्यमशनमुपभोगलक्षणं यस्य स महाशनः सर्वदा तृप्तिरहित इत्यर्थः । तत एव महापाप्मा महान् पाप्मा दोषो यस्मात्पुरुषस्यायाति स महापाप्मा यतः कामाविष्टः स्वसारमप्यारोढुमिच्छति

चण्डालादप्यर्थं गृह्णाति क्रुद्धो गुरुमप्याक्रोशति गामपि च हन्त्यतः कामस्य युक्तं महापाप्मत्त्वमित्यर्थः तस्मात्त्वमिह संसार एनं काममेव मुमुक्षोर्वैरिणं विद्धि मुक्तिप्रतिबन्धकमेतमेव विजानीहीत्यर्थः।

अपरे तु यदा विवेकिनोऽपि पुरुषस्य सत्त्वगुणः प्रच्छिन्नो भवति तदा रजोगुणः प्रादुर्भवति तस्मात्कामक्रोधावुत्पद्येते तयोः क्रमेण स्वरूपमाह महाशन इति। तत्र कामो महाशनः दुःपूरत्वात् क्रोधस्तु महापाप्मा अतिक्रूरत्वात् अनयोरुभयोर्दुर्जयत्वं व्यञ्जितं एवमेनं कामं क्रोधं वा वैरिणं विद्धि उभयोरपि पापप्रवृत्तिहेतुत्वात् शत्रुरेव पापे प्रवर्तयति न तु मित्रं यथा त्वं बन्धुसुहृद्विषयकामेन स्वधर्मत्यागरूपे पातके प्रवर्त्यस इत्यर्थ इत्याहुः ॥ ३७ ॥

यदुक्तं मुमुक्षोर्मुक्तिप्रतिबन्धकत्वेन वैरित्वं कामस्य तदेव विस्पष्टयतिद्वाभ्यां—

धूमेनाव्रियते वन्हिर्यथाऽऽदर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

धूमेनाप्रकाशस्वरूपेण स्वयं प्रकाशस्वरूपोऽपि वन्हिर्यथाऽऽव्रियते आवृतो भवति मेलन लेपनस्वभावेन रजसा स्वयं बिम्बप्रकाशनेनाल्हादकर आदर्शश्च यथाऽऽव्रियते अचेतनेनोल्बेन चेतनो गर्भः शिशुर्यथाऽवृतो भवति तथाऽप्रकाशस्वरूपेण लेपकेनाचेतनेन च तेन पूर्वोक्तेन कामेन प्रकाशस्वरूपमात्मप्रकाशनेनानन्दकरं आभासव्याप्त्या चेतनतुल्यमिदं पुरुषस्य ज्ञानमावृतं तिरोहितमित्यर्थः ॥ ३८ ॥

ज्ञानावरणमेव विशदयति—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेनच ॥ ३९ ॥

आवृतमिति। यस्मादनलेन निरन्तरविषयसेवयाऽप्यलम्भावो यस्य नास्ति सोऽनलः, हृद्यन्तरनलवदाचरतीति वाऽनलस्तेन दुष्पूरेण दुःखेन पूरणमिष्टप्रापणं यस्य स दुष्पूरः कामिताप्राप्तौ पुरुषं दुःखेन पूरयतीति वा दुष्पूरस्तेन कामरूपेण काम्यतइति कामो विषयस्तमेव सर्वत्र रूपयति गोचरयति न क्वचिद्ब्रह्मेति कामरूपस्तेन तस्मादेव ज्ञानिनो नित्यवैरिणा नित्यं बाह्यालम्बनहेतुत्वेन प्रतिकूलत्वान्नित्यवैरी नित्यग्रहणहेतोर्ज्ञानस्यावरकत्वाद्वा नित्यवैरिणा एतेन कामेन ज्ञानं सर्वत्र ब्रह्मग्राहिका बुद्धिवृत्तिरावृतपङ्केन जलमिव राहुणा चन्द्रबिम्बमिव पिहितमित्यर्थः।

अन्ये तु इदं त्रयमित्थं योजयन्ति तथाहि एवमर्जुनेन पृष्टे अथो खल्वाहुः काममय एवाऽयं पुरुष इत्यादिश्रुतिसिद्धमुत्तरमाह कामेति । यस्त्वया पृष्टो हेतुर्बलादनर्थमार्गे प्रवर्तकः स एष काम एव शत्रुः यन्निमित्ता सर्वानर्थप्राप्तिर्जनानाम् । ननु क्रोधोऽप्यनर्थहेतावभिचारादौ प्रवर्तको दृष्टः कथमेष एवेत्यत आह क्रोध एष काम एव केनचिन्निमित्तेन प्रतिहतः क्रोधत्वेन परिणमतेऽतः क्रोधोप्येष काम एव एतस्मिन्नेव महावैरिणि निवारिते सर्वपुरुषार्थप्राप्तिरिति भावः । तन्निवारणोपायज्ञानाय तत्कारणमाह रजोगुणसमुद्भवः दुःखहेतुप्रवृत्तिजनको रजोगुण एव समुद्भवः प्राधान्येन कारणं यस्य सः अतस्तन्मूलत्वात्कामोऽपि तथेत्यर्थः एतेन सात्विक्या वृत्त्या रजसि क्षीणे कामोऽपि क्षीयत इत्युक्तम् । यद्वा तस्य कथमनर्थमार्गमूलत्वमित्याशङ्क्याह रजोगुणस्य प्रवृत्त्यादिरूपस्य समुद्भवो यस्मात् सः कामो हि विषयाभिलाषात्मकः स्वयमुद्भूतो रजोगुणं प्रवर्त्तयन्पुरुषं दुःखहेतौ कर्मणि प्रवर्तयति तेनायमवश्यं हन्तव्य इति भावः । ननु मास्तु दण्डो दानोपायेन निवर्तिष्यतीत्यत आह महदशनमस्येति महाशनः—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूयएवाभिवर्द्धते ॥
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥

इति स्मृतेः । अतो न दानेन सन्धातुं शक्यः नापि सामभेदाभ्यां यतो महापाप्माऽत्युग्रो विनाप्यपराधमपकारं करोत्युपकृतं च नाशयत्यत एव तेन बलात्प्रेरितोऽनिष्टफलं पापं जानन्नपि करोति अतएवैनं काममिह संसारे वैरिणं विद्धि जानीहि ज्ञात्वा च तद्वारणाय यतस्वेति भावः ।

वैरित्वमेव दृष्टान्तैः स्पष्टयति धूमेनेति । कामो हि जन्मनः प्रागन्तःकरणस्यालब्धवृत्तिकत्वात्सूक्ष्मो भवति तदनन्तरं लब्धवृत्तिकेऽन्तःकरणेऽभिव्यक्तः स्थूलः स एव विषयाचिन्तनावस्थायां स्थूलतरः स एव पुनस्तदभोगावस्थायां स्थूलतमो भवति तत्राद्यावस्थायां दृष्टान्तः यथा धूमेन सहजेनाप्रकाशात्मकेन वन्हिराव्रियते द्वितीयावस्थायां दृष्टान्तः यथा मलेनासहजेनादर्शोत्पत्त्यनन्तरं वर्द्धमानेनादर्शो दर्पण आव्रियते इत्यनुषङ्गार्थश्चकारः तृतीयावस्थायां दृष्टान्तः यथोल्बेन जरायुणाऽतिस्थूलेन सर्वतो निरुद्ध्यावृतो गर्भः तथा प्रकारत्रयेणाप्येतेन कामेनेदं ज्ञानमावृतम् । तत्राद्यावस्थेन कामेन ज्ञान-

स्यात्मस्वरूपप्रकाशात्मकत्वं द्वितीयावस्थेन यथावद्विषयस्वरूपप्रतिभानात्मकत्वं तृतीयावस्थेनोहापोहात्मकत्वं चतुर्थावस्थेन सारासारविवेचकत्वमाच्छादितमिति बोध्यम्। अत्र यथा धूमेनावृतोपि वन्हिर्दाहादिकं स्वकार्यं करोति मलेनावृतस्त्वादर्शः प्रतिबिम्बग्रहणात्मकं स्वकार्यं न करोति स्वच्छताधर्ममात्रतिरोधानात्स्वरूपतस्तूपलभ्यतएव उल्बेनावृतस्तु गर्भो न हस्तपादादिप्रसारणरूपं स्वकार्यं करोति न वा रूपत उपलभ्यते तथा प्रकृतेपीति विशेषो बोध्यः।

किं पुनस्तदिदंशब्दवाच्यं यत्कामेनावृतमित्याकाङ्क्षायामाह आवृतमिति। हे कौन्तेय एतेन कामेन ज्ञानं आवृतम्। नन्वापाततः सुखहेतुत्वादुपादेयः स्यादित्यत्राह ज्ञानिनो नित्यवैरिणा अज्ञो हि विषयभोगकाले कामं मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते वैरित्वं जानाति कामेनाहं दुःखी जात इति ज्ञानी तु भोगकालेऽपि जानात्यनेनाहमनर्थे नियोजित इति अतो भोगकाले तत्परिणामे च दुःखहेतुत्वादसौ ज्ञानिनो नित्यवैरीति सर्वथा तेन हन्तव्य एवेत्यर्थः। केन रूपेण वैरीत्यत आह कामरूपेण काममिच्छा तृष्णा सैव रूपं यस्य तेन। ननु ज्ञानिना हन्तव्यत्वेप्यज्ञेनोपादेयः स्यादित्यत आह दुःखेन पूरणमस्य तेन दुःपूरेण। कुत इत्यत आह अनलेन नाल पर्याप्तिरस्य विद्यत इत्यनलस्तेन यो हि कदाचित्तृप्तिं गच्छति सः पूरयितुं शक्य अयन्तु न तथेत्यर्थः चकार उपमार्थः अनलो वन्हिः स इव दुःपूरः स यथा हविषा पूरयितुमशक्यस्तथाऽयमपि भोगेनेति वाऽर्थः।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥

इतिस्मृतेः अतः सर्वदा सन्तापहेतुत्वाज्ज्ञानिनेवाज्ञानिनापि हेय एवेति भावः। यद्वेच्छाया विषयसिद्धिनिवर्त्यत्वादिच्छारूपः कामो विषयभोगेन स्वयमेव निवर्तिष्यते किं तत्र प्रयत्नेनेत्यत उक्तं दुःपूरेणानलेन चेति विषयसिद्ध्या तत्कालमिच्छातिरोधानेऽपि पुनः प्रादुर्भावान्न विषयसिद्धिरिच्छानिवर्तिका किन्तु विषयदोषदृष्टिरेव तन्निवर्तिकेति भावः। बन्धुवियोगो मा भवात्वित्येवंरूपेण कामेनावृतज्ञानः सन् त्वमपि स्त्रीस्वभावे शोकमोहरूपे नियोजितोऽसीति द्योतनार्थं सम्बोधनम्। नन्विच्छाकामयोर्भेदोऽस्ति न वास्ति चेत्सो वक्तव्यो नास्ति चेत्तदा प्रश्नोत्तरयोरनुपपत्तिरेकविषयकेच्छातदभावोक्तिविरोधात् तथाहि अथ केनेत्यत्र प्रश्ने तावदनिच्छन्नपीति पापेच्छाऽभावोक्तेः काम एष इत्युत्तरे तु कामापरपर्यायेच्छायाः पापहेतुत्वोक्त्या पापेच्छासद्भावावगमादिति चेन्न, इच्छातदभा-

वयोर्भिन्नविषयकत्वात् प्रश्ने तावत् पापमनिच्छन्नपीति पापविषयकेच्छाभाव उक्त उत्तरे तु तत्फलभूतपरधनलाभादिविषयककामस्य पापहेतुत्वोक्त्या तत्सद्भावउक्तोऽत इच्छाकामयोरैक्येऽपि तद्भावाभावयोर्भिन्नविषयकत्वान्न काप्यनुपपत्तिरतः पापविषयककामाभावगर्भितप्रश्नस्य तत्फलविषयककामगर्भितोत्तरस्य चोपपत्तिरित्यवेहि यैस्तु पापसाध्यं फलं नरकपातादिरूपमनिच्छन्नपि पापं चरतीति व्याख्यायते तेषां पक्षे तु शङ्कोत्थानमेव नास्ति कामतदभावयोर्भिन्नविषयकत्वस्य स्पष्टत्वादित्यपि बोध्यम् ॥ ३९ ॥

सुखेन शत्रुं नाशयितुं तदधिष्ठानं दर्शयति—

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

इन्द्रियाणीति । इन्द्रियाणि शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रादीनि वचनादानगमनविसर्गानन्दजनकानि वागादीनि च मनस्सङ्कल्पात्मकं बुद्धिरध्यवसायात्मिका चास्य कामस्याधिष्ठानमाश्रय उच्यते । कुतोऽधिष्ठानमत आह यत एष काम एतैरिन्द्रियादिभिः स्वस्वव्यापारवद्भिराधिष्ठानैर्ज्ञानं विवेकज्ञानमावृत्याच्छाद्य स्वकार्याक्षमं कृत्वा देहिनं देहाभिमानिनं जीवं विमोहयति विविधं मोहमविवेकं प्रापयतीत्यर्थः ॥ ४० ॥

एवं तदधिष्ठाने ज्ञाते तन्निरोधेन तन्निवर्त्यत्वमाह—

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मादिति । हे भरतर्षभ यस्मादिन्द्रियाद्याश्रय एव कामो देहिनं विमोहयति तस्मात्त्वमादौ मोहनात्पूर्वं कामनिरोधात्पूर्वं वा इन्द्रियाणि नियम्य वशीकृत्य स्वस्वव्यापारेभ्यो निवर्त्य पाप्मानं सर्वपापमूलभूतमेनं कामं वैरिणं प्रजहि आत्मनः सकाशात्परित्यज तत्पराभवं कुरु हि यस्मात् ज्ञानविज्ञाननाशनं ज्ञानं शास्त्राचार्योपदेशजं परोक्षं विज्ञानं तत्फलमपरोक्षं यद्वा ज्ञानं तत्त्वम्पदार्थज्ञानं विज्ञानं तदैक्यसाक्षात्कारस्तयोर्ज्ञानविज्ञानयोरनर्थनिवृत्तिपरमानन्दप्राप्तिहेत्वोर्नाशनमदर्शनसम्पादकमित्यर्थः नश अदर्शन इति स्मृतेः तथा च मुमुक्षुणा मोक्षसाधनज्ञानविज्ञानप्राप्तये यतमानेनेन्द्रियाणि नियम्य ज्ञानविज्ञानावरकः कामस्त्याज्य एव उत्पन्नयोस्तु ज्ञानविज्ञानयोर्नाशनं तदभिभवेन तत्कार्याक्षमत्वसम्पादकत्वं कदाचित्प्रारब्धवशादाभासरूपेणो-

त्पन्नस्य कामस्य सम्भवतीति भावः । भरतैरप्ययं शत्रुः त्यक्तस्त्वन्तु भरतर्षभोतस्त्वयापि त्याज्यएवेति सूचनाय सम्बोधनम् । इन्द्रियेषु वशीकृतेषु मनोबुद्ध्योरपि वशीकरणं सिद्ध्यति सङ्कल्पाध्यवसाययोरिन्द्रियप्रवृत्ति द्वारैवानर्थहेतुत्वादतो न तयोः पृथग्ग्रहणं इन्द्रियत्वेन तयोरपि सङ्ग्रह इति वा बोध्यम् ।

अन्येत्विदं द्वयमित्थं योजयन्ति तथाहि ननु संसारकारणं कामस्तत्कार्यं ज्ञानतिरोधानं विषयसन्निधापनं तापनं दुःखप्रापणं च निरूपितं तथापि मुमुक्षोस्तज्जयो दुर्घटस्तदधिष्ठानाऽज्ञानाज्ज्ञाते हि शत्रोः स्थाने ताज्जित्यै यत्नः कर्तुं शक्यत इत्याकाङ्क्षायामाह इन्द्रियाणीति ।

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥

इतीत्येतच्छ्रुतितात्पर्यज्ञैरिन्द्रियादीनां कामाश्रयत्वमुच्यते कामस्यैव तच्चेष्टाहेतुत्वात्तत इन्द्रियाणि चक्षुरादीनि मनो बुद्धिश्चास्य कामस्याधिष्ठानमाश्रय इति बोद्धव्यम् । स्वप्रवृत्तिद्वारभूतैरिन्द्रियव्यापारैरेष कामो ज्ञानं प्रत्यग्दृष्टिमावृत्य वृत्तेर्बहिः प्रणवतां कृत्वा देहिनं देहात्मबुद्धिं पुरुषं ज्ञानिनमज्ञानिनं च मोहयति अहं भोक्ता इदं भोग्यं रम्यमिदमरम्यं सुखमिदं दुःखमित्यादिना विविधं भावयति कामदोषेणैव बुद्धेश्चलनं देहेन्द्रियादितादात्म्यापत्तिरहं ममेति संसारः पुंस इत्यर्थः ।

निःशेषकामनिबर्हणाभावे बुद्धेर्नैश्चल्यं न सम्भवति तदसम्भवे ज्ञानं विशुद्धं न भवति तदभावे मोक्षाभावस्ततो मुमुक्षुणा तज्जयोऽवश्यं कर्तव्य इति सूचयितुमाह तस्मादिति । हि यस्मान्मनोबुद्धीन्द्रियव्यापारैकबलः कामो मुमुक्षोस्तव नित्यशत्रुस्तस्मात्त्वमादाविन्द्रियाण्यनन्तरं मनो बुद्धिं च नियम्य विषयग्रहणविमुखानि कृत्वा इन्द्रियाण्यादावित्युक्तिर्मनोबुद्ध्योर्नियमनं सूचयति नियमविधावादिपदस्यानन्तरकृत्यद्योतकत्वात्सत्यामन्तर्विषयचिन्तायामिन्द्रियनिग्रहस्य विफलत्वात् 'मनस्तु पूर्वमादद्यात्कुमीनमिव मत्स्यहेति' वचनाद्वस्तुदर्शने मनस एव कारणत्वाच्चात इन्द्रियनियमनानन्तरमेव मनोबुद्ध्योरपि निग्रहः कर्तव्य एव । एवं कामाधिष्ठाननिरोधं कृत्वा ज्ञानविज्ञाननाशनं ज्ञानं श्रुतियुक्तिभिः पर्वते वन्हिरस्तीतिवत्परोक्षको वस्तुनिश्चयः सर्वं ब्रह्मैवेति, विज्ञानं तु विषयव्याप्तवृत्तिजन्यमहानसाग्निज्ञानवदिदमेवाहमित्येवंरूपयोर्मोक्षे-

कप्रयोजनयोश्चन्द्रसूर्ययोरिव विशेषस्फुरणयोर्ज्ञानविज्ञानयोर्नाशनं विध्वंसकमतएव स्ववैरिणं पाप्मानं पापिष्ठमेनं कामं प्रजहि निःशेषं विध्वंसयेत्यर्थः ॥ ४० । ४१ ॥

ननु कामो दुर्जयः दुर्जयस्य जये बलवदाश्रयोऽपेक्ष्यते मुमुक्षुः कमाश्रित्य कस्य महिम्ना कामं जयेदित्याकाङ्क्षायां "रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते" इतिन्यायेन परमात्मानं सर्वान्तरं सर्वगमवगम्य तदाश्रयणेन त्वं कामं जहीति बोधयितुमात्माधिगमप्रकारमाह—

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

इन्द्रियाणीति । 'इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः' इत्याद्याः श्रुतय इन्द्रियाणि पराण्याहुः इन्द्रियाणि श्रोत्रादीनि पंच वागादीनि कर्मेन्द्रियाणि च स्वापेक्षया जडं बाह्यं स्थूलं व्याप्यं कार्यं प्रवर्त्यं च यच्छरीरं तस्मात्प्रकाशकत्वान्तरत्वसूक्ष्मत्वप्रवर्तकत्वव्यापकत्वकारणत्वादिधर्मैः पराण्युत्कृष्टतराण्याहुर्वदन्ति येन यत्प्रकाश्यते प्रवर्त्यते च तत्तदपेक्ष्य व्यापकं सूक्ष्मं परं भिन्नं च भवति यथाऽयसोयस्थो वन्हिस्तथा देहमपेक्ष्येन्द्रियाणि देहतद्धर्मप्रकाशकत्वात्प्रवर्तकत्वाच्च पराणि भिन्नानि च भवन्तीत्यर्थः तथेन्द्रियेभ्यो मनः प्रकाशकत्वादिधर्मेणपरमुत्कृष्टं भिन्नं च भवति इन्द्रियतद्धर्माणां प्रकाशकत्वादिधर्मैर्बुद्धिः परा भवति बुद्ध्या खलु मनस्तद्धर्माश्च प्रकाश्यन्ते प्रवर्त्यन्ते च ततस्तत्परत्वं भिन्नत्वं च बुद्धेः सिद्धमेव सूक्ष्मान्तरत्वव्यापकत्वकारणत्वप्रवर्त्तकत्वप्रकाशकत्वादिधर्मैर्यः स्वयं सर्वतो व्याप्य बुद्ध्यादिस्थूलपर्यन्तकार्यकरणसंघातं स्वसन्निधिमात्रेण प्रवर्तयन् तद्धर्मतत्कर्मगुणतद्विकारांश्च सर्वानविकारात्मना साक्षाज्जानाति प्रकाशयति स एवात्मा बुद्धेः परतः परः सर्वस्मादुत्कृष्टतमः भिन्नश्च नित्यत्वात्सर्वज्ञत्वात्सर्वप्रकाशकत्वात्सर्वसाक्षित्वाच्च 'पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति'रिति श्रवणात् यत एवं ततः सर्वस्मात्परं सर्वद्रष्टारमतएव देहेन्द्रियादिभ्यो भिन्नं सर्वप्रकाशकं चिदानन्दैकरसं सन्मात्रं परिपूर्णमेतमेव स्वात्मानं विजानीहीत्यर्थः ।

अन्ये तु इत्थं योजयन्ति । इन्द्रियाण्यादौ नियम्य वैरिणं कामं जहीत्युक्तं तत्र किमाश्रयः कामं जह्यादित्याकाङ्क्षायां रसोऽप्यस्य परं दृष्ट्वा निवर्तत इत्यत्रोक्तं रसपदाभिधेयतृष्णात्यागसाधनं परदर्शनं स्मारयन्

परपदाभिधेयं शुद्धमात्मानमाश्रयं देहादिभ्यो विविच्य दर्शयति इन्द्रियाणीति। इन्द्रियाणि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि स्थूलं जडं परिच्छिन्नं बाह्यं च देहमपेक्ष्य पराणि सूक्ष्मत्वात्प्रकाशकत्वाद्व्यापकत्वादन्तःस्थत्वाच्च प्रकृष्टान्याहुः पण्डिताः श्रुतयो वा तथेन्द्रियेभ्यः परं मनः तत्प्रवर्तकत्वात् मनसस्तु परा बुद्धिः निश्चयात्मिकबुद्ध्यधीनत्वात्सङ्कल्पात्मकमनःप्रवृत्तेः यस्तु बुद्धेः परतस्तद्भासकत्वेनावस्थितः यं देहिनमिन्द्रियाद्याश्रयः सन्कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा पर आत्मा स एष इह प्रविष्ट इतिवद्व्यवहितस्यापि देहिनस्तत्पदेन परामर्शः।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥

इतिश्रुतेः। अत्रात्मनः परत्वस्यैव वाक्यतात्पर्यविषयत्वादिन्द्रियादिपरत्वस्याविवक्षितत्वादिन्द्रियेभ्यः परा ह्यर्थाः इति स्थानेऽर्थेभ्यः पराणीन्द्रियाणीतिविवक्षाभेदेन भगवदुक्तं न विरुध्यते बुद्धेर्व्यष्टिबुद्धेर्महानात्मा समष्टिबुद्धिरूपो हिरण्यगर्भः परस्तस्मान्महतः समष्टिबुद्धिरूपात्परमव्यक्तं जगद्बीजं मायाख्यं तस्मादव्यक्तात्पुरुषः पूर्णआत्मा परस्तस्मात्पुरुषान्न परं किञ्चित् कुत एवं यस्मात्सा काष्ठा समाप्तिः सर्वाधिष्ठानत्वात्सा परा गतिः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यादिश्रुतिप्रसिद्धा परा गतिरपि सैवेत्यर्थः तदेतत्सर्वं यो बुद्धेः परतस्तु स इत्यनेनोक्तम् ॥४२॥

ततः किमित्याकाङ्क्षायामिन्द्रियादिसमाधानपूर्वकादात्मज्ञानात्कामजयो भवतीत्युपसंहरति—

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसम्वादे कर्मयोगो नाम तृतीयोऽध्यायः ॥३॥

एवमिति। आत्मना संस्कृतमनसा पूर्वोक्तनिश्चयात्मिकबुद्ध्या वा आत्मानं मनः संस्तभ्य स्थिरीकृत्य समाधाय एवं रसोऽप्यस्य परं दृष्ट्वा निवर्तते इत्यत्र परशब्देनोक्तं पूर्णमात्मानं बुद्धेः परं तत्साक्षिभूतं बुद्ध्वा साक्षात्कृत्य शत्रुं सर्वपुरुषार्थशातनं कामरूपं तृष्णारूपं दुरासदं दुःखेना-

सादनीयं दुर्विज्ञेयानेकविशेषं जहि परित्यजेत्यर्थः महद्भिर्बहुभिरप्युपायैर्जेतुमशक्यमप्येनं कामरूपं शत्रुं मदुक्तेनोपायेन जेतुं योग्योऽसीति सूचनाय महाबाहवित्युक्तं उपायः कर्मनिष्ठाऽत्र प्राधान्येनोपसंहृता उपेया ज्ञाननिष्ठा तत्तद्गुणत्वेन कीर्तिता ।

अन्ये तु एवं बुद्ध्यादेर्दृश्यजातस्य द्रष्टारमात्मानं सन्मात्रमात्मत्वेनाधिगम्य तन्निष्ठया स्वशत्रोः कामस्य संसारहेतोर्निःशेषनिर्मूलनं कुर्विति कर्मयोगस्य मोक्षोपायभूतस्योपेयभूतया ज्ञानयोगनिष्ठया सम्भाव्यमानसर्वकामनिर्मोक एव मुक्तिरिति सूचयन् कर्मयोगमुपसंहरति एवमिति। मुमुक्षोः कामरूपशत्रुसंहारस्य पटीयस्त्वद्योतनार्थं सम्बोधनं हे महाबाहो बुद्धेर्बुद्ध्यादेः सर्वदृश्यस्य परं विलक्षणं द्रष्टारमखण्डानन्दैकरसमात्मानमयमेवाहमस्मीत्येवं स्वात्मना सम्यग्बुद्ध्या आत्मन्येवात्मत्वबुद्धिं दृढां कृत्वा त्वमात्मानं कामस्याश्रयभूतं कारणभूतं चान्तःकरणमात्मना स्वस्वरूपेणान्तर्बहिःपूर्णेनाखण्डैकरसेन संस्तभ्य संयोज्यारोपितनामरूपग्रहणमकृत्वा तदधिष्ठानभूतब्रह्मदर्शन एव नियोज्य सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मदर्शनादन्यत्र दुरासदं दुर्जयं जेतुमशक्यस्वभावं कामरूपं शत्रुं जहि-विध्वंसय विशिष्य विषयग्रहणमेव कामाविर्भूतिकारणं सर्वत्र ब्रह्मदृष्ट्या तदग्रहणमेव कामविनाशनहेतुरतः सर्वं ब्रह्मैव पश्यन् कामं निर्मूलयेदित्यर्थः। अत्र न कर्मणामनारम्भादिति कर्मयोगमुपक्रम्य मुमुक्षोस्तत्त्यागनिन्दनपूर्वकं बहुवचनैः कर्मण एव कर्तव्यत्वं प्रतिपाद्य अहं ममेति प्रवृत्तिलक्षणस्य संसारस्य कारणं कामएवेति काममाहात्म्यं वर्णयित्वा कर्मणा प्राप्तचित्तशुद्धेः पुरुषस्य ज्ञानयोगनिष्ठया तज्जयः कर्तव्य इति वदता भगवता कामा येऽस्य हृदि श्रिता इत्यादिश्रुतिप्रमाणककामनिर्मोक एव मोक्ष इति सूचितं भवति । तेन मोक्षहेतोर्ज्ञानयोगस्यैव प्राधान्यं कर्मयोगस्योपसर्जनतैवेत्यस्याध्यायस्य ज्ञानयोगपर्यवसायित्वात्तत्परत्वमेवेति सिद्धम् ।

यज्ञाद्यं वर्णधर्मोचितमपि नियतं कर्म शर्मप्रदं स्यात्
न त्याज्यं कार्यमेतद्विगुणमपि यतोऽकर्मणः कर्म शस्तम् ॥
जीवन् मर्त्यः कदाचित्करचरणयुतो नैव तिष्ठत्यकर्मा
तस्माच्छ्रेयान्स्वधर्मो यदुपतिगदितश्चित्तशुद्ध्यै तृतीये ॥ १ ॥

इत्यध्यायतात्पर्यसंग्रहश्लोक इत्याहुः ४३ ॥

इति श्रीमद्रामचन्द्रप्रीत्यभिलाषिणा जयरामाख्येन विदुषा विरचितायां श्रीभगवद्गीतासारार्थसंग्रहाख्यायां तृतीयोऽध्यायः ॥३॥ ग्रन्थसंख्या ११००

श्रीगणेशायनमः ।

श्रीरामचन्द्रायनमः ।

स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता बुधाः ।
तं कृष्णं परमानन्दं तोषयेत्सर्वकर्मभिः ॥ १ ॥

एवं द्वितीयतृतीयाध्याययोर्यो ज्ञानयोगः कर्मयोगैकोपायः एषा ब्राह्मी स्थितिरिति संस्तभ्यात्मानमात्मनेत्यादिवाक्यैर्मोक्षैकफलत्वेन प्रतिपादितोऽधुना तस्यैव योगस्य एष पन्था एतत्कर्म तद्ब्रह्मेत्यादिश्रुतिप्रमाणकत्वे सिद्धेऽपि सिद्धपरम्पराभ्युपगतत्वेनापि प्रामाण्यं सूचयितुमिदमाह श्रीभगवान्—

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

इममिति । अहं परमात्मा सृष्ट्यादौ अव्ययं न स पुनरावर्तते इतिश्रुत्युक्ताव्ययमोक्षफलहेतुत्वादव्ययवेदप्रमाणकत्वाद्वाऽव्यय नित्यफलमित्यर्थः इममध्यायद्वयेन प्रतिपादितं मोक्षैकप्रयोजनं योगं ज्ञानयोगं विवस्वते सूर्याय प्रोक्तवानस्मि स्वयं तीर्णः परान् तारयतीतिन्यायेन सोऽपि विवस्वान्मनवे स्वपुत्राय प्राहोक्तवान्मनुरपि स्वपुत्रायेक्ष्वाकवेऽब्रवीदुपदिष्टवानित्यर्थः ॥१॥

स्वप्रोक्तज्ञानयोगस्य विशिष्टजनपरिगृहीतत्वमेव विस्पष्टयति—

एवम्परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

एवमिति । ब्रह्मनिष्ठया परं शत्रुं कामक्रोधादिलक्षणं तापयति नाशयतीति परन्तप एवमुक्तरीत्या विवस्वदादिविशिष्टजनपरम्पराप्राप्तमिमं ज्ञानयोगमर्वाचीना राजर्षयो जनकादयो विदुरेवमेव विदुरिति वा राजानश्च ते ऋषयश्च इदं ब्राह्मणादीनामुपलक्षणं राजानश्च ऋषयश्च विदुर्ज्ञातवन्तः तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेत्यादिश्रुतेः । ननु राजभिर्जनकादिभिः ऋषिभिर्वामदेवादिभिर्महापुरुषैः परिगृहीतत्वेन सर्वत्र प्रसिद्धत्वात्किं त्वयोपदिश्यत इत्यत आह स इति । पूर्वं विवस्वदादिषु मया

प्रवर्तितो यो योगः स इदानीं महता कालेन कालदेशविपर्यासेन प्रवर्त्य-प्रवर्तकजनाभावादिहास्मिल्लोके नष्टः सम्प्रदायविच्छित्तिं प्राप्त इत्यर्थः ॥२॥

विनष्टसम्प्रदायः स योगः किमर्थं पुनरिदानीं त्वया प्रवर्तित इत्याकांक्षायां कूटस्थासङ्गचिद्रूपत्वात्मन्यविक्रिये विषयेऽनात्मतद्धर्मकर्माण्यध्यस्य कर्त्ताऽहं भोक्ताऽहं सुखीति मोमुह्यमानमिमं लोकमालोक्य कृपया तं संसार-सागरादुद्दिधीर्षया मया त्वां निमित्तीकृत्य प्रवर्तित इत्याशयेनाह—

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

सएवेति। पूर्वं विवस्वते सम्प्रदायप्रवृत्तये पुरातनोऽनादिश्रुतिमूलकत्वात्सनातनो यो योगः प्रोक्तः संसारध्वान्तविध्वंसकः स एवायं योगो मयाऽद्य ते कर्तृत्वादिभ्रान्त्या मुह्यमानाय तुभ्यं प्रोक्तो बुद्धिमोहविच्छित्तये उपदिष्ट इत्यर्थः। अर्जुनस्य ज्ञानोपदेशयोग्यतां दर्शयति भक्त इत्यादिना। 'यथा शिवमयो विष्णुरेवं विष्णुमयः शिव' इति शिवकेशवयोरभेदश्रवणाच्छिवरूपं मामेव भजस्यतो मे भक्तोऽसि सदा मद्भजनशीलोऽसि सखा चासि सख्युः स्मरणश्रवणादिभिर्द्रवीभूयमानचित्तः स्निग्धश्चासि ममायं भक्तः स्निग्धश्चेति हेतोरेव स योगस्तउपदिष्ट इत्यर्थः। किमेवं पात्रपरीक्षणं योगोपदेशाय क्रियत इत्याशङ्क्याह रहस्यमिति। हि यस्मादेतज्ज्ञानशास्त्रं रहस्यं गोप्यं यस्मै कस्मैचित्पृष्टवते वक्तुमयोग्यं तत्कुत इत्यत आह उत्तममिति। उत्तमं सर्वोत्तमं परं ब्रह्म तत्प्राप्तिहेतुत्वादुत्तमं मुक्तेः साधनमतएव रहस्यमतएव न यस्मै कस्मैचिद्वक्तव्यमित्यर्थः।

अन्ये तु इदं त्रयमित्थं योजयन्ति। यद्यपि पूर्वाध्यायद्वयेनोपेयोपायभावेन ज्ञानयोगकर्मयोगौ कथितो तयोरेव च वेदार्थस्य समाप्तत्वाद्वक्तव्यावशेषो नास्ति तथापि तयोः कृत्रिमत्वशङ्कानिवृत्तये वक्ष्यमाणाध्यायेष्वनेकविधगुणविधानाय च तदुपदेशसम्प्रदायकथनपूर्वकं स्तुतिं श्रीभगवानुक्तवान् इममित्यादित्रिभिः। अहं इममध्यायद्वयेनोक्तं योगं कर्मनिष्ठोपायलभ्यं ज्ञानयोगं विवस्वते सर्वक्षत्रियवंशबीजभूतायादित्याय प्रोक्तवान् प्रकर्षेण सर्वसंशयोच्छेदादिरूपेणोक्तवानास्मि सर्गादिकाले राज्ञामनेन बलाधानेन तद्द्वारा सर्वजगत्पालयितुमित्यर्थः। कथमनेन बलाधानमित्याशङ्क्याह अव्ययं न व्येति स्वफलान्न व्यभिचरतीत्यव्ययमव्यभिचारिफलं यद्वा अव्ययवेदमूलत्वादव्ययमोक्षफलत्वाच्चेत्यर्थः तथाचैतादृशेन बलाधानं संभवतीति

भावः । स च विवस्वान् मनवे वैवस्वताय स्वपुत्राय प्राह प्रोक्तवान् स च मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् उक्तवानित्यर्थः । यद्यपि प्रतिमन्वन्तरं स्वायम्भुवमन्वादिसाधारणोऽयं भगवदुपदेशस्तथापि वर्तमानमन्वन्तराभिप्रायेणादित्यमारभ्य सम्प्रदायो गणितइति बोध्यम् ॥ १ ॥

यथोक्ते योगे परम्परागते विशिष्टजनसंमतिमुदाहरति एवमिति । हे परन्तप एवमादित्यमारभ्य गुरुशिष्यपरम्परया प्राप्तमिमं योगं राजानश्च ते ऋषयश्चेति राजर्षयः ऐश्वर्यादिमत्वेन प्रभुत्वे सति सूक्ष्मार्थनिरीक्षणसमर्था निमिप्रभृतयः स्वपित्रादिप्रोक्तं विदुः लब्धवन्तः तस्मादनादिवेदमूलत्वेनानन्तफलत्वेनानादिगुरुशिष्यपरम्पराप्तत्वेन च कृत्रिमत्वशङ्कानास्पदत्वान्महाप्रभावोऽयं योग इति श्रद्धातिशयाय स्तूयते । नन्वेवं परम्पराप्राप्तत्वे कथमिदानीमुच्यते इत्याशङ्क्याह स कालेनेति। स एवं महाफलोपि योगः महता दीर्घेण धर्महासकरेण कालेन इह इदानीमावयोर्व्यवहारकाले द्वापरान्ते नष्टोऽजितेन्द्रियाननधिकारिणः प्राप्य कामक्रोधादिशत्रुभिरभिभूयमानतया विच्छिन्नसम्प्रदायो जातः तं विना पुरुषार्थाप्राप्तरहो दौर्भाग्यं लोकस्येति शोचति भगवान् । परान् शत्रून् कामक्रोधादीन् शौर्य्येण विवेकेन तपसा च तापयतीति परन्तपः शत्रुतापनोऽजितेन्द्रिय इत्यर्थः । उर्वश्युपेक्षणाद्यद्भुतकर्मदर्शनात् त्वं जितेन्द्रियत्वादाजितेन्द्रियान्प्राप्य नष्टं योगं मत्तः प्राप्य पुनर्लोकोद्धाराय स्थापयेति सम्बोधनाशयः ॥ २ ॥

पूर्वो योगो विच्छिन्नसम्प्रदायोऽधुना त्वन्ययोगो मदर्थमुच्यते भगवतेत्याशङ्क्याह स एवेति । य एव पूर्वमुपदिष्टोऽप्यधिकार्यभावाद्विच्छिन्नसम्प्रदायोऽभूत् यं विना च पुरुषार्थो न लभ्यते स एवायं पुरातनोऽनादिगुरुपरम्परागतो योगोऽद्य सम्प्रदायविच्छेदकाले मया ते तुभ्यं प्रकर्षेणोक्तः न त्वन्यस्मै कस्मैचित् । कस्मात् ? भक्तोऽसि मे सखा चेति इति शब्दो हेतौ यस्मात्त्वं मम भक्तः मत्प्रीतिमांश्च पुनः सखा समानवयाः स्निग्धः सहायोऽसि अतस्तुभ्यमुक्तइत्यर्थः । अन्यस्मै कुतो नोच्यते तत्राह हि यस्मादेतज्ज्ञानमुत्तमं रहस्यमतिगोप्यम् ॥ ३ ॥

अपरे तु एवं द्वितीयतृतीयाध्यायाभ्यां ज्ञानकर्मयोगौ निरूप्येदानीं ब्रह्मार्पणत्वेनैव कृतं कर्म मोक्षप्रापकं भवतीति निरूपणार्थं चतुर्थाध्याय आरभ्यते तत्र वक्ष्यमाणप्रमेयं मदुपदेशात्परम्परया बहुभिरनुष्ठितमित्याह इममिति त्रिभिः । इमं वक्ष्यमाणं योगं अव्ययमनुपक्षीणं पूर्वं विवस्वते

प्रोक्तवानस्म्यहं ततस्तमेव योगं विवस्वान् सूर्यो मनवे प्राह मनुरिक्ष्वाकवे-ब्रवीत् ॥ १ ॥

एवमिक्ष्वाकोः सूर्यवंशप्रधानीभूताद्राज्ञः सकाशात्परम्परया प्राप्तं राजर्षयो राजानो ऋषयश्च विदुर्ज्ञातवन्तः स एव पुरातनो योगो महता कालेन नष्टस्त्यक्तोऽभूत् ॥ २ ॥

सोऽयं योग इति कारणान्मया तेऽद्य प्रोक्तः वक्तुमुपक्रान्तः । इतीति किं यतस्त्वं मद्भक्तः सन् सखा भवसि साखित्वलक्षणा भक्तिस्त्वयि वर्तत इत्यर्थः । अथान्यत्रास्यानिर्वाच्यत्वमाह उत्तमं रहस्यं एकान्तवेद्यमित्यर्थ-इत्याहुः ॥ ३ ॥

भगवति सर्वज्ञे नित्येप्यनीश्वरत्वासर्वज्ञत्वशङ्का मूर्खाणां तत्परि-हाराय बोधमिव कुर्वन्नर्जुन उवाच—

अर्जुनउवाच ।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

अपरमिति । भवतो जन्म शरीरग्रहणमपरमवार्चीनामिदानीन्तनं वसु-देवगृहे विवस्वतश्चादित्यस्य जन्म परं पूर्वं सर्गादिकालेऽतो विरुद्धार्थ-तया कथमेतत् त्वमादौ प्रोक्तवानित्येतद्वचनं विजानीयां निश्चिनुयामित्यर्थः। त्वमिदानीन्तनो मनुष्योसर्वज्ञः सर्गादौ प्रादुर्भूताय सर्वज्ञायादित्याय प्रोक्त-वानित्येतद्वचनं विरुद्धार्थं मम भातीति भावः ।

ननु तव देहान्तरावच्छेदेनादित्यं प्रत्युपदेष्टत्वमेतद्देहावच्छेदेन वा नाद्यः जन्मान्तरानुभूतस्यासर्वज्ञेन स्मर्तुमशक्यत्वात् जन्मान्तरानुभूतं च न स्मर्यत इत्यभियुक्तोक्तेः अन्यथा ममापि जन्मान्तरानुभूतस्मरणप्रसङ्गस्तव मम च मनुष्यत्वेनासर्वज्ञत्वाविशेषात् नापि द्वितीयः सर्गादाविदानीन्तनस्य देहस्यासद्भावादिति पक्षद्वयाभिप्रायेणार्जुनस्य प्रश्नः तत्र द्वितीयस्यानङ्-गीकारेण निरस्तत्वादाद्यस्य सर्वज्ञत्वेन परिहारं श्रीभगवानुवाच—

श्रीभगवानुवाच ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

बहूनीति । हेऽर्जुन मे मम जन्मानि लीलादेहप्रादुर्भावानि बहूनि

व्यतीतान्यतिक्रान्तान्यतीतानेकजन्मवत्वं ममैव नासाधारणं किन्तु सर्व प्राणिसाधारणमित्यभिप्रेत्याह तव चेति । तवाज्ञानिनः चादन्येषामपि जीवानां जन्मानि कर्मार्जितानि देहप्रादुर्भावानि बहून्यनेकानि व्यतीतानीत्यनुषङ्गः । तानि प्रमाणाभावान्न प्रतिभान्तीत्याशङ्क्याह तानीति । तानि जन्मानि सर्वाणि मदीयानि त्वदीयान्यन्यदीयानि वाऽहं सर्वज्ञः सर्वशक्तिरीश्वरो वेद जानामि नित्यशुद्धबुद्धमुक्तस्वभावत्वेनानावृतज्ञानत्वात्स्वतःसिद्धं मम सर्वज्ञत्वमितिभावः । अत्र वृक्षपाण्डवसाधारणार्जुननाम्ना सम्बोधयन्नावृतज्ञानत्वं सूचयति । तर्हि किमिति तानि मम न प्रतीयन्ते तवावृतज्ञानत्वादित्याह न त्वमिति । त्वं न वेत्थ न जानीषे धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वादित्यर्थः परान्परिकल्प्य तत्परिभवार्थं रागद्वेषादिपूर्वकं प्रवृत्तत्वात्तव ज्ञानावरणं सम्भाव्यते इत्यभिप्रेत्याह परन्तपेति । परं शत्रुं भेददृष्ट्या परिकल्प्य तापयतीत्यर्थः तदनेन सम्बोधनद्वयेनावरणविक्षेपौ द्वावप्यज्ञानधर्मौ दर्शिताविति बोध्यम् ॥ ५ ॥

अन्यराजसाधारणोऽयं कृष्णः वसुदेवपुत्रत्वादनेनोक्तमिदं शास्त्रमप्रमाणमित्याशङ्कायामत्र गीतायां सर्वेषामविश्वासः स्यात्तद्वक्तुर्भगवत ईश्वरत्वे विज्ञाते श्रद्धाभक्तिभ्यां प्रवृत्तिः सम्पद्येत तया सर्वे कृतार्थाः स्युरिति श्रीकृष्णस्य परमेश्वरत्वं तन्मुखेनैव प्रथयितव्यमित्याशयेनार्जुन उवाच अपरमिति । भवतः श्रीकृष्णाभिधानस्य जन्मापरमर्वाचीनं वसुदेवगृहे त्वदुत्पत्तेर्दृष्टत्वाद्विवस्वतः सर्वजगत्प्रकाशकं तेजोऽस्यास्तीति विवस्वान् सूर्यस्तस्य तु जन्म परं प्राचीनं सृष्ट्यादौ चक्षोः सूर्यो अजायतेतिश्रुतेः । एवमुभयोर्जन्मव्यत्यासे सति त्वमादौ विवस्वत इमं योगं प्रोक्तवानित्येतद्वचनं सत्यमित्यहं कथं विजानीयामन्यो वा कथं विजानीयात् एष वन्ध्यासुनो यातीति वाक्यइवास्मिन्वाक्ये त्वदुक्तगीताशास्त्रे च सर्वेषामविश्वास एवोदेतीत्यर्थः ॥ ४ ॥

इदं मम मायाविलासवैभवमेव सत्यमिति जानतां केवलमूढानामेवं प्रत्ययो न तु मत्तत्वं विदितवतां पण्डितानां तेषामस्त्येव मयीश्वरत्वभावना श्रद्धा भक्तिश्च मदुक्तौ च प्रमाणताबुद्धिः अहन्तु स्वयमजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावस्तथापि तस्यैतस्य स्वमहिम्ना सिद्धनित्यज्ञानैश्वर्यशक्तिबलवीर्यतेजःसम्पन्नस्य लोकनिग्रहानुग्रहचिकीर्षोर्ममैवमेव बहूनि जन्मानि सन्तीत्याह बहूनीति ममाप्रमेयस्वभावस्यानन्तशक्तेः परमेश्वरस्य देवतिर्यङ्मनुष्येषु जन्मानि बहून्यसङ्ख्यानि सन्ति व्यतीतान्य-

ततः प्रविशति परिगृहीतपृथुलपादुकः प्रतिक्षणविक्षिप्यमाणवि-
कटभुजदण्डो दृढतरदण्डावलम्बितप्रतिज्ञापत्रिकापताको दर्पः ।

दर्पः-अहं किल राज्ञा महामोहेन प्रकृष्टजनतिरस्काराय प्रणिहितः सकललोकतारतम्यदिदृक्षया परिक्रान्तः पितामहगृहान्मध्यमलोकमवतरन्नाचक्रवालमवलोकितदिशाचक्रवालः पुरन्दरपुरोगमैर्लोकपालैरभ्यर्चितस्सुरभिमदिरासुधाचन्द्रपारिजातमणिवरवितरणमहावदान्येन मन्दरमन्थमथनसंक्षोभसर्वंसहेन मधुकैटभमथनबन्धुना सिन्धुना समाहृतं हारोपहारमाविभ्राणः प्रत्यागतोऽस्मि भारतं वर्षम् ।

अपि च ।

त्रयोदशमिवादित्यं रुद्राणां द्वादशं तथा ।
मन्वीत नियतं लोको वसूनां नवमं च माम् ॥४॥

(विचिन्त्य सरोषहासं) अहो नु खलु जगतो मौढ्यं येषामस्मद-

परिगृहीते पृथुले पादुके येन स तथा । प्रतिक्षणं विक्षिप्यमाणौ धूयमानौ विकटौ दीर्घौ भुजदण्डौ येन स तथा । दृढतरे दण्डे अवलम्बिता प्रतिज्ञापत्रिका अहमेव पण्डितः नान्यदिति प्रतिज्ञासूचिकी पत्रिका सैव पताका यस्य स तथा

स्वविभवमाह अहं किलेति-॥ प्रकृष्टाः उत्कृष्टा ये जनाः तेषां तिरस्काराय प्रणिहितः प्रेरित इत्यर्थः तारतम्यं तरतमभावः तद्दिदृक्षया परिक्रान्तः सञ्चरन् पितामहगृहात् सत्यलोकात् मध्यमं लोकं भूलोकं आचक्रवालं चक्रवालाचलपर्यन्तमवलोकितं दिशानां चक्रवालं समूहो येन स तथा सुरभिः कामधेनुः मदिरासुरा मणिवरः कौस्तुभः एषां वितरणेन विश्राणनेन महावदान्यः परमोदारः तेन मन्दरेण मन्दराचलेन यन्मथनं तेन संक्षोभः तस्य सर्वसहेन मधुकैटभमथनो भगवान् तस्य बन्धुना श्वशुरेण सिन्धुना क्षीरार्णवेन समाहृतमानीतं हाररूपमुपहारमाबिभ्राणः॥

त्रयोदशमिति-॥ मन्वीत जानीयात् आदित्यरुद्रवसुभ्योऽप्यधिकतरतेजोविशिष्टं मां दृष्ट्वा लोक एवमेव मन्वीत इति भावः ॥ ४ ॥

वक्ष्यमाणार्थप्रतिसंधानेन रोषहासौ ।

मौढ्यमेव विशदयति येषामिति-॥ अस्मदनुचराणां प्रतिनिधिपर्वणि अवस्था-

नुचरप्रतिनिधिपर्यवस्यनमपहास्यं तेऽपि मत्सामर्थ्यमाधिक्यं वा प्रतिलब्धुं मोघवृत्तिं मनोरथमारोहन्ति ।

इहहि ।

छन्दश्छन्दितबुद्धयः पदविदः कल्पे विकल्पत्यजः
शिक्षाशिक्षितमानसा विगणितज्योतिर्गणावृत्तयः ।
निर्णीतार्थनिरुक्तयस्त्रिविधया मीमांसया मांसला
नृत्यन्तो नयविस्तरेषु सुधियस्सर्वे मया खर्विताः ॥५॥

(आकाशे) रेरे बालिश किं ब्रवीषि कुतस्तवेयं शिक्षा कीदृशी च परिचितिरिति (सहस्तास्फालनं विहस्य)

विधिमन्तरेण विहगेन कुत
पयसोरशिक्ष्यत विवेकविधिः ।

तमनुचराणामस्वविधाने तत्प्रतिनिधितया समावेशोऽप्यपहास्य इत्यर्थः । मोघा व्यर्था वृत्तिः प्रवृत्तिः यस्य तम् । मनोरथमारोहन्ति अनुचरप्रतिनिधिपर्यवस्यानमपहास्यमित्युक्तं तत्कथमित्यपेक्षायाम् । साङ्गागमादिविदस्सर्वे मया लघवः कृता इत्याह

छन्दइति—॥ छन्दश्शब्दः छन्दोविचितिपरः । छन्दोभिः उक्थात्युक्थादिभिः छन्दिताः अलङ्कृताः बुद्धयो येषां ते तथा पदविदः व्याकरणविदः कल्पे कल्पसूत्रेषु आश्वलायन बोधायन द्राह्यायणादिषु विकल्पत्यजः संदेहत्यजः निस्संशया इत्यर्थः । शिक्षया वर्णस्वरादिकया शिक्षितानि मानसानि येषां ते तथा विगणिताः विशेषेण गणिताः निश्चिताः ज्योतिर्गणस्य सूर्यादेरावृत्तयः तत्तद्राशिषु संचाराः यैस्ते तथा-निर्णीतार्था निरुक्तयो यैस्ते तथा त्रिविधया कर्मदेवताब्रह्मगोचरया मीमांसया मांसलाः पूर्णाः तदभ्यसनैकपराः नयविस्तरेषु काणादादिन्यायशास्त्रेषु नृत्यन्तः तदभ्यासवन्तुष्टाः एवं भूता बहवस्सर्वेऽपि मया खर्विताः खर्वाः कृताः स्वसामर्थ्यादल्पाः कृताः इत्यर्थः ॥ ५ ॥

रेरे इति क्षुद्रं प्रति संबोधनम् । हस्तयोः आस्फालः आघट्टनम् ॥

विधिमिति—विहगेन हंसेन पयसोः क्षीरनीरयोः विवेकविधिः इदं क्षीरं इदं नीरमिति विवेचनं विधिमदृष्टमन्तरेण विना कुतः कस्माद्धेतोः

कति वा दिनानि वद पर्यचिनोत्
कलशीसुतः कवलयन्जलधिम् ॥ ६ ॥

वास्तां तावद्विश्वतोमुखीयमास्माकी विद्या अभिजनवृत्ताभ्यामप्यहं निस्समाभ्यधिकः ।

तथाहि ।

मद्वंशोद्भवयाजनार्हपुरुषाभावादमुष्मिन्जग-
त्या गोत्रप्रथमादनध्वरतया प्रख्यातमस्मत्कुलम् ।
अप्रत्यक्षमनक्षपीडनविधिप्रागल्भ्यतस्स्थापितं
विष्वग्वृत्ति तपः परं किमपि मे विश्वाधिकं के विदुः ॥७॥

पुरस्तात्पश्यन् अहह ।

बहव इह नरच्छात्रा-वाद्याः कुदृष्ट्य इत्यमी
मिषति विबुधस्तोमे मेरुं विगूहयितुं क्षमाः ।

अशिक्ष्यत शिक्षितः । जलधिं कवलयन् कलशीसुतः अगस्त्यः कति कियन्ति दिनानि पर्यचिनोत् तथेदमपि मम शार्यत्वं स्वाभाविकमेवेति भावः ॥ ६ ॥

विश्वतः सर्वतः मुखं यस्याःसा विश्वतोमुखी सर्वशास्त्रावगाहिनीत्यर्थः । विद्या-ज्ञानं अभिजनं कुलशुद्धिः वृत्तं आचारः ताभ्यामप्यहं निस्समाभ्यधिकः समाधिकरहितः । तदेवोपपादयति तथाहीति ॥

मद्वंशोद्भवेति—मद्वंशोद्भवानां याजने र्हिस्यपुरुषस्य अलाभात् दौर्लभ्यात् अस्मत्कुलं आ गोत्रप्रथमात् गोत्रप्रथममारभ्य अनध्वरतया अध्वररहिततया प्रख्यातम् । अप्रत्यक्षं प्रत्यक्षागोचरं अक्षाणां इन्द्रियाणां पीडनं नियमः यस्मिन्नविद्यते सोऽनक्षपीडनः सचासौ विधिश्च विधीयत इति-विधिः कर्म तस्य प्रागल्भ्यतः स्थापितं विष्वक् सर्वत्र वृत्तिः वर्त्तनं यस्य तत्तथा विश्वस्मात् तपसः अधिकं श्रेष्ठं किमपि अचिन्त्यं मे तपः के विदुः नकोऽपि जानीयुः ॥ ७ ॥

अहहेति हर्षे ।

बहव इति—॥ विबुधस्तोमे देवसमूहे मिषति चक्षुरुन्मील्य पश्यत्यपि मेरुं हेमाद्रिं

प्रबलकुहनागम्भीराभिः प्रलोभनयुक्तिभि-
र्जडबधिरपङ्ग्वन्धप्रायं जगज्जनयन्ति च ॥ ८ ॥

अथवा ।

अनपह्नुतवद्भिरव्ययावत्
प्रतिपक्षानिह किं प्रमाणवर्गैः ।
स्ववशे विनिवेशयामि विश्वं
मणिमन्त्रौषधिवञ्चनोपजापैः ॥ ९ ॥

किमाह कश्चित् प्रतिष्ठिते प्रमाणवर्गे कथं कैश्चिदेवं पाटच्चरवृत्तिः प्रतिपत्तव्येति । सरोषहुङ्कारं पश्य अरे ब्राह्मणापसद सार्वलौकिकं गगनतलमलिनिमप्रत्यक्षं किं न प्रामाणिकैः परिभूयते ॥

अपि च ।

षड्भिः पूर्वप्रणीतैरलमिह समयैश्श्रद्धानप्रमाणै-
र्वस्तुस्थित्यैकरूप्ये मतिविहतिहते कस्य कीदृग्व्यवस्था ।

विगूहयितुं क्षमाः शक्ताः बाह्याः कुदृष्टय इत्यमी नः बहवः छात्राः शिष्याः सन्तीति शेषः प्रबलाभिः कुहनाभिः कापटैः गभीराभिः दुरवगाहाभिः प्रलोभने वञ्चने युक्तिभिः जगज्जगति स्थितान् जडबधिरपंग्वन्धप्रायं जडादितुल्यं जनयन्ति कुर्वन्ति च । अनेन अहं शिष्यसंपदा च निस्समाभ्यधिक इत्यस्याभिप्रायः ॥ ८ ॥

पक्षान्तरमाह अथवेति ।

अनपह्नुतेति—॥ अव्ययावत् अव्ययपर्यन्तं प्रतिपक्षान् विरोधिनः अनपह्नुतवद्भिः अतिरस्कुर्वद्भिः प्रमाणानां प्रत्यक्षादीनां वर्गैः स्तोमैः किं न किमपि प्रयोजनं इह जगति मणिमन्त्रौषधिवञ्चनोपजापैः विश्वं स्ववशे विनिवेशयामि उपजापः समीपे स्थित्वा बहुधा निवेदनम् ॥ ९ ॥

प्रमाणवर्गैः किमित्युक्तं तदसहमानस्य वाचमनुवदति किमाहेति—॥ प्रतिष्ठिते स्थिरतरे सति पाटच्चराणां तस्कराणां वृत्तिर्व्यापारः प्रतिपत्तव्या अंगीकर्तव्या इति किमाह एवमस्माकं पुरस्तादयुक्तमुक्तवानिति क्रोधाहङ्कारो । सार्वलौकिकं सर्वलोकविदितं गगनतलमलिनिमविषयं प्रत्यक्षं प्रामाणिकैः परिभूयते न किं परिभूयत एवेत्यर्थः । अतः प्रमाणानामपि परस्परव्याघातोऽस्त्येवेति भावः ।

अक्षुभ्यदूह्निक्रकदयाव्यवहरणसहानस्मदुन्नीतयुक्त्या
सिद्धान् सिद्धान्तभेदान्मदुपहितधियः प्रत्यवस्थापयन्तु ।

(अपसव्यं पश्यन्) एते मगधकलिङ्गान्ध्रद्रमिडकर्णाटकेरलकोङ्कणा-
दयो जनपदाः अहह ।

अष्टाचत्वारिंशतं बौद्धभेदान्
नीचोक्त्याहं हेलया निर्मिमाणः ।
अध्यासीनो बोधिवृक्षस्य मूलं
विद्यादर्पं वैदिकानामहार्षम् ॥ ११ ॥

ततः प्रभृति सुगृहीतनामानो नाममात्रनिश्शेषितविपक्षास्सप्तद्वी-
पविहितजयस्तम्भास्सञ्चरन्त्यस्माकमन्तेवासिनः ।

अपि च ।

अद्वैतं क्वचिदर्पितं क्वचिदिह द्वैतं मयासाधितं
द्वैताद्वैतसमाहृतिः क्वचिदसौ सुस्थाव्यवस्थापिता ।

अन्यदप्याह अपिचेति–॥

षड्भिरिति–॥ श्रद्धधानानां प्रमाणैः प्रमाणभूतैः पूर्वप्रणीतैः प्राचीनपुरु-षप्रणीतैः षड्भिः समयैः अलं तेषु आदरः न कार्य इत्यर्थः । वस्तुस्थितेः ऐकरूप्ये मति-विहत्या मतीनां विरोधेन हते सति कस्य वस्तुनः कीदृक् व्यवस्था कस्याश्चिदपि व्यवस्थाया अभावात् । एवं सति सिद्धान्तभेदो न सिद्ध्येदित्यत आह अक्षुभ्यदिति–। अस्माभिः उन्नीतया युक्त्या सिद्धान् अक्षुभ्यन्तीनां द्वित्रकक्ष्याणां व्यवहरणसहान् सिद्धान्तभेदान् मया उपहिता उद्भाविता धियो येषां ते तथा सन्तः प्रत्यवस्थापयन्तु प्रत्यवस्थितान् कुर्वन्तु-॥ १० ॥

एते मगधादयो जनपदाः ।

अष्टेति–॥ नीचा हीना उक्तिर्यस्यां तया भाषया भेदान् निर्मिमाणः कुर्वन् अहं बोधिवृक्षस्य अश्वत्थस्य मूलं अध्यासीनस्सन् वैदिकानां विद्यादर्पं विद्याजनितं दर्पं अहार्षं हृतवानस्मि ॥ ११ ॥

सुगृहीतनामानः नाममात्रेण स्वनामश्रवणमात्रेण निश्शेषिताः विनाशिताः विपक्षा येषां ते तथा ।

तत्तद्भक्तिसुधाग्रहोदितकथाकल्लोलतो वादिनां
मन्ये सम्प्रति मल्लमेषसमरप्रेक्षारसम्प्राप्नुमः ॥ १२ ॥

(परिवृत्यावलोक्य) एते पुनर्यवनतुरुष्काद्युपप्लुताः प्रत्यन्तदेशाः । इह च ।

वादद्यूतपणं प्रकल्प्य किमपि क्षिप्ताभिमानः क्वथन्
कश्चिद्वैदिकपद्धतिं द्विजपतिः क्षिप्रं मया त्याजितः ।
अर्हद्बुद्धबृहस्पतिप्रभृतिभिः क्लृप्तान्कृतान्तक्रमा
नन्योन्यव्यतिहारितानपि पठन्व्यामोहयत्यर्भकान् ॥१३॥

अमी च पशुमृगपक्ष्यादिकल्पैरनार्यैरधिष्ठिता नास्मद्दृष्टिगोचरतामर्हन्ति । एतेष्वनिश्चिताक्षराः कक्षावलम्बितपुस्तका विस्तारितकूर्चभाराः केचिदेते विपश्चित इवाभान्ति । आः प्रतारितोस्मि गाढमापातदृष्ट्या ।

अद्वैतमिति-॥ एतेषु क्वचित् केषुचित्पुरुषेषु अद्वैतमैक्यं अर्पितमुपदिष्टं मया क्वचिद द्वैतं भेदस्साधितः क्वचित् दुस्था दुःखेन स्थिता असौ द्वैताद्वैतयोः समाहृतिः समाहारः व्यवस्थापिता वादिनां तत्तद्भक्त्या तत्तन्मतादरेण यो सुधाग्रहः व्यर्थाग्रहः तेन उदितायाः उत्पन्नायाः कथायाः वादस्य कल्लोलतः तरङ्गजालात् संप्रति मेषाणां मल्लानां च समरस्य युद्धस्य प्रेक्षया दृष्ट्या यो रसः प्रतीतः तं प्राप्नुमः ॥ १२ ॥

यवनतुरुष्काद्युपप्लुता आदिशब्देन तत्तुल्यशीला अवैदिका गृह्यन्ते उपप्लवः उपद्रवः प्रत्यन्तदेशाः पाश्चात्यसमुद्रसमीपवर्तिनः देशाः ।

वादेति-॥ कश्चित् द्विजपतिः मण्डनमिश्रः किमपि परस्परमतप्रवेशं वाद एव द्यूतं तस्मिन्पणं प्रकल्प्य प्रतिवादिना जितः अत एव क्षिप्ताभिमानः क्वथन् परितप्यमानः वैदिकानां पद्धतिं मया क्षिप्रं त्याजितः अन्योन्यव्यतिहारितान् परस्परव्यामिश्रान् अर्हत्प्रभृतिभिः क्लृप्तान् कृतान्तक्रमान् पठन् सन् अर्भकान् व्यामोहयत्यपि च मन्दमतीन् मोहयति च । अत्रेयं कथा अनुसन्धेया । पूर्वं कदाचित् शङ्करमण्डनमिश्रौ परस्परमतप्रवेशपणं प्रकल्प्य वादमकुरुतां ततः शङ्करेण जितः मण्डनमिश्रः तन्मतं प्रविश्य एकदण्डसन्यासं कृत्वा सुरेश्वरवार्त्तिकाख्यं प्रबन्धं निर्माय तेन मन्दमतीन् मोहितवानिति ॥ १३ ॥

तथा हि ।

अनियतबहुजल्पैरल्पबोधावलिप्तै
रवमतगुरुवर्गैरत्रिवर्गापवर्गैः ।
अभिनयविधुताङ्गैरङ्गुलीनृत्तसारैः
अलमिहजडभूभृत्पीठमर्दैरमीभिः ॥ १४ ॥

(उत्तरतोदृष्टिं दत्वा) कश्चिद्विद्वासौ काश्मीरतो वा जलन्धराद्वा दक्षिणाभिमुखस्समायाति । एतस्मात्तावत्प्रिययोरवस्थानं परिपृच्छामि । भद्र सुब्राह्मण किञ्जानासि दुर्मतसमाद्देशाददद्रिराजपरिक्रमणाय प्रस्थितयोरस्मद्गृहिण्योरीर्ष्यासूययोरधुनातनं वृत्तान्तं । कर्णन्दत्वा, (किमाह) ते किल सुमतिसखीभिर्मैत्रीकरुणामुदितोपेक्षाभिः प्रतारिकाभिः कस्याञ्चिन्निवृत्तिपथसुरङ्गायाञ्चिरुद्धे इति । (सक्रोधं) आः पापोयं अलीकवादी ब्राह्मणवेतालः । रेरे दुरात्मन् वैधवेय श्रोत्रियब्रह्मराक्षस कथं सर्वलोकाभिसरणेप्यस्मत्सहधर्मचारिणीत्वमनुभ्रुन्त्योर्महाभागयोरनयोरेतादृशम-

---

अस्मद्दृष्टिगोचरतां नार्हन्ति अनिश्चितान्यक्षराणि यैस्तैं तथा । आपातदृष्ट्या अनिरूपणेन प्रतारितोऽस्मि वञ्चितोऽस्मि । प्रतारितत्वमेव विशदयति तथाहीति–॥

अनियतेति–॥ अनियता बहवो जल्पाः येषां तैः अल्पेन बोधेनावलिप्तैः अवमताः अवज्ञाताः गुरूणां वर्गा यैस्तैः नविद्यते त्रिवर्गापवर्गौ येषांतैः अभिनयेषु तत्तदर्थाभिनयेषु विधुतानि पटूनि अंगानि येषां तैः अङ्गुलीनां नृत्तं चलनमेव सारो येषां तैः जडाः मूढाः ये भूभृतः राजानः तेषां पीठमर्दैः

पीठमध्यस्यपुरतः प्रयोक्ता नायकादिषु ।
स पीठमर्दो विश्वास्यो कुपितस्यः प्रसादकः ॥

इत्युक्तलक्षणैः अमीभिः अलम् एतैः न किञ्चिदपि प्रयोजनमित्यर्थः ॥ १४ ॥

जलन्धरोनाम देश विशेषः । प्रिययोः इष्टयोः अवस्थानं स्थितं । अद्रिराजे हिमाद्रौ परिक्रमणाय संचाराय अधुनातनं अद्यतनं । प्रतारिकाभिः वञ्चनपराभिः निवृत्तिपथः निवृत्तिधर्मः स एव सुरङ्गा तस्यां । ब्राह्मणवेतालः ब्राह्मणरूपपिशाचः वैधवेयः विधवापुत्रः । सर्वलोकाभिसरणे सत्यपि अस्मत्सहधर्मचारिणीत्वं अनुभ्रुन्त्योः सर्वलोकाभिसारिणयोः सहधर्मचारिणीत्वासम्भवेपि तादृशमहिमशा-

त्याहितं सम्भविष्यति । निर्वर्ण्य प्रागप्यवगतोयं पर्वतीयैर्व्याधपतिभिः प्रणिधिभावेन प्रेषितः पर्यटनशीलः कश्चित्पान्थः (सपरिहासं) अहो देशकालविशेषसंभवोयं दोषसमवायः ।

यथा ।

श्वश्रूरस्य दिगम्बरव्रतवती सम्बन्धिनस्सौगता
माता चास्य पिता च पाशुपतिनौ वैशेषिको देशिकः ।
जाया तिष्ठति सांख्ययोगसमये चार्वाकशिष्यस्सखा
मिथ्याचारसमाह्वयस्स्वयमसौ विप्लावकोवैदिकः ॥१५॥

तदयं मिथ्याचारनामा व्याधप्रणिधिर्लौकवादी चासंभाष्यो मा दृशैर्महात्मभिः । एतदवलोकनदोषपरिहाराय दिवाकरमात्मानं वा पश्यामि । (विकटं परिक्रम्य) अहहै महानद्योरिह गङ्गायमुनयोरमी मध्यमा जनपदाः । एतेषु चावधीरितबृहस्पतिप्रज्ञानामस्माकमनन्तसिद्धान्तसृष्टिकर्बुरमुपन्यासं प्रजापतिपशुपतिदत्तवरोपि कः पुनः प्रत्येष्यति । कुतः

लिन्यावेते इति हृदयं । अत्याहितं विपद् । निर्वर्ण्य सम्यक् दृष्ट्वेत्यर्थः । अवगतः ज्ञातः प्रणिधिभावेन चारत्वेन प्रेषितः । वक्ष्यमाणार्थस्मरणादपहासः । देशकालयोर्विशेषाभ्यां सम्भव उत्पत्तिर्यस्य स तथा । समवायमेवाह यथेति ।

श्वश्रूरिति—॥ अस्य श्वश्रूः दिगम्बराणां व्रतं दिगम्बरव्रतं तद्वती । सम्बन्धिनः स्नुषायाः पुत्र्यादेश्च जनकादयः सौगताः बौद्धाः पितरौ पाशुपतिनौ पाशुपतनिष्ठौ देशिकः गुरुः वैशेषिकः जाया स्त्री साङ्ख्ययोगसमये साङ्ख्ययोगः साङ्ख्यविषयकं ज्ञानं समयः तज्जनकं शास्त्रं तस्मिन्तिष्ठति सखा चार्वाकशिष्यः लोकायतिकशिष्यः असौ समवाः मिथ्याचारसमाह्वयः मिथ्याचाराख्यः विप्लावकः आचाराणां विप्लवकारी अत एव अवैदिकः ॥ १५ ॥

एतदवलोकनदोषस्य अवलोकनजनितदोषस्य परिहाराय दिवाकरं पश्यामीत्युक्त्वा तत्रापरितोषात् ततोपि पावनमात्मानं स्वदेहं वा वाशब्दएवार्थः स्वदेहमेव पश्यामीति वदति । अनन्तानां सिद्धान्तानां सृष्ट्या कर्बुरं नानारूपं प्रजापतिपशुपतिभ्यां दत्तवरोपि कः प्रत्येष्यति ज्ञास्यति अपवर्गमार्गस्य निरोधे उद्यतेन अधरो-

पुनरनुवादादयः । इह चापवर्गमार्गनिरोधोद्यतेनास्मत्स्वामिना समाहूतैरपरान्तवासिभिर्म्लेच्छपतिभिरधरोत्तरीकृता राजधान्यः । वर्तन्ते चात्र केचिदमी चक्रवर्तिनो डाम्भिकानां ।

एते च ।

अयाचन्तः किंचित्स्वयमुपनतेनादरगिरो
धनायाशैलूषीसहचरितसाकूतगतयः ।
निवृत्त्याख्ये धर्मे स्थितिमभिनयन्तो निरुपधिं
नमस्यन्ते सद्भिर्नवमरसनाडिन्धमदृशः ॥ १६ ॥

अपि च हन्तैतत्कलेरनङ्कुशमाधिराज्यं महामोहस्य वा तपसां परिपाकः ।

स्वतन्त्रवरवर्णिनीसुरतकेलिसौत्रामणी
रसार्चितमनोभवां रहसि निर्विशद्भिः क्षपां ।
दिवा विविधभूमिकाविहितकञ्चुकैर्वञ्च्यते
वियातकितवैरिदं वितथदत्तवित्तं जगत् ॥ १७ ॥

त्तराः कृताः अधरोत्तरीकृताः विपर्यस्ता इत्यर्थः । डांभिकानां चक्रवर्तिनः राजानः ॥

अयाचन्त इति–॥ किञ्चिदपि वस्तु अयाचन्तः स्वयमुपनते धनधान्यादिके अनादरा आदररहिता गिरो येषां ते तथा धनाया धनेच्छा सैव शैलूषी नर्त्तकी तया सहचरिताः तत्सहिताः साकूताश्च गतयो व्यापारा येषां ते तथा निवृत्याख्ये निवृत्तिसंज्ञे धर्मे निरुपधिं निर्व्याजां स्थितिमभिनयन्तः नवमरसनाडिन्धमाः शान्तिरसनाडिन्धमाः दृशः येषां ते तथा शान्तिरसोत्तंभकनयनविलसिताः इत्यर्थः सद्भिर्नमस्यन्ते ॥ १६ ॥

अनंकुशमप्रतिहतं । परिपाकः फलनिष्पत्तिः । किं तदित्यत्राह–

स्वतन्त्रेति-॥ स्वतन्त्राः स्वाधीनाः वरवर्णिन्यो वेश्याः तासां सुरतकेलिः सुरत क्रीडा सैव सौत्रामणी इष्टिविशेषः तस्यां रसः तेनार्चितः आराधितः मनोभवः यस्यां तां क्षपां रात्रिं रहसि निर्विशद्भिः नयद्भिः दिवा दिवसे विविधाश्च ताः भूमिकाश्च ताभिः विहितकञ्चुकैः वियातकितवैः धृष्टचौरैरिदं जगत् वितथं व्यर्थं यथा तथा दत्तं वित्तं धनं यस्य तत्तथासत् वञ्च्यते ॥ १७ ॥

अत्र चामी म्लेच्छाधिष्ठितं देशमपरित्यजतां बहिरावरणमात्र संरक्षितवर्णाश्रमधर्माणामनन्यगतिकानां द्विजानामव्यवहाराः ।

एतेषु च

संस्काराः परमुत्सवैकवपुषस्सन्ध्या विनोदावधि-
स्सावित्री जनवादजर्झरतनुश्शौचन्नटप्रायिकं ।
इत्थं मोहमहीपतेरनुमते विश्वं विपर्यस्यतः
कालस्यैष कलेरलेपकमतव्यक्तक्रमः प्रक्रमः ॥ १८ ॥

अहो नु खलु अयमपि महानत्र धर्मक्रमः

तरुणाकृतयः कचेषु कृष्णा-
स्त इमे दम्पतयस्सहैव साध्यम् ।
इतरेतरदैवतं भजन्ते
मदनोपज्ञमजस्रमग्निहोत्रम् ॥ १९ ॥

बहिरावरणमात्रेण वेषमात्रेण न तु मनश्शुद्ध्यादिनेति भावः संरक्षिता वर्ण-धर्माः आश्रमधर्माः येषां तेषां ।

संस्कारा इति—॥ संस्काराः गर्भाधानादयः परमधिकं उत्सवैकवपुषः उत्सव मात्रशरीराः न तु विध्युक्तमन्त्रतन्त्रादिसङ्कृताः सन्ध्या प्रातस्सन्ध्यादिका विनोदानां सहासोक्तीनां अवधिरेव अवधिः परा काष्ठा यस्यास्सा तथा सावित्री सन्ध्यासु जप्यमाना सावित्री जनानां वादैः जर्झरा विशीर्णा तनुः यस्यास्सा तथा शौचं शुद्धिः नटप्रायिकं नटानामिव अत्यल्पं मोहमहीपतेः महामोहस्य राज्ञः अनुमते विश्वं विपर्यस्यतः विपरीतं कुर्वतः कलेः कालस्यैष प्रक्रमः प्रकारः अलेपकानां प्रपञ्चस्य बुद्धिपूर्वोत्तराघाश्लेषं वदतां मते व्यक्तः स्फुटं क्रमो यस्य स तथा । एवं वर्णाश्रमधर्मविपर्यासहेतुः कलिरलेपकमतानुसारीति भावः ॥ १८ ॥

कोऽसौ धर्म इत्यत आह—

तरुणेति—॥ तरुणा आकृतयः तनवो येषां ते तथा कचेषु कृष्णाः विशेषणद्वयेन युवत्वं जरावैधुर्यं च द्योत्यते कृष्णकेशोऽग्नी नादधीतेति अग्निहोत्रे अधिकारश्च । त इमे तदंपतयः सहैव मिलित्वैव साध्यं इतरेतरदैवतं परस्परदेवताकं मदनोपज्ञं मन्मथोपदेष्टृकं अग्निहोत्रमजस्रं भजन्ते ॥ १९ ॥

अपि च

प्रतिवीथिकमाश्रयन्त एते
कुहनासूक्तिमयीं कुसीदवृत्तिम् ।
अपरीक्षितशिष्यमद्य सर्वे
शुकवद्ब्रह्म पठन्ति शुद्धवेषाः ॥ २० ॥

अन्यतोऽवलोक्य एते चिरार्पितमुक्तपुरुषसाविभाः पुराणपठितमठभित्तिकोणमाश्रित्य जोषमासते (सूक्ष्मं निर्वर्ण्य) अहहामी दीर्घतरदर्भपूलपूरिताङ्गुलिविवरेण दक्षिणकरेण नासिकाङ्कुवलयन्तः प्राणसंशयेनापि प्राणसंयमनमभिनयन्ति (सहस्तास्फालनं)

अपटुभणितिभावाद्बिभ्रतो मौनमुद्रा-
मनितरशरणत्वादादृतान्योन्यसङ्घाः ।
अगतिविहितभिक्षावृत्तयः केचिदेते
चिरविधृततुरङ्गब्रह्मचर्या महान्तः ॥ २१ ॥

अन्यदप्याह अपि चेति—॥

प्रतीति—॥ कुहनासूक्तिः कपटोक्तिः तन्मयीं कुसीदवृत्तिं वार्धुषिकवृत्तिं प्रतिवीथिकं वीथ्यां वीथ्यामाश्रयन्त एते अपरीक्षिताः शिष्याः यस्मिन्कर्मणि तद्यथा भवति तथा शुद्धवेषास्सन्तः शुकवत् अर्थज्ञानविरहेण ब्रह्म वेदं पठन्ति ॥ २० ॥

पुराणानां पठितमठः पुराणपठितमठः तस्य भित्तिः तत्कोणमाश्रित्य जोषं तूष्णीमासते । दीर्घतरेण दर्भपूलेन पूरितान्यङ्गुलीनां विवराणि यस्य तेन दक्षिणकरेण प्राणस्य संशयेन प्राणोऽस्ति वा न वेति संशयेनापि प्राणसंयमं प्राणायाममभिनयन्ति ।

अपट्विति—॥ अपटुः भणितिः व्यवहारो यस्य स तथात्वात् असमीचीन भाषणत्वादित्यर्थः मौनमुद्रां बिभ्रतः न विद्यते इतरशरणं येषां ते अनितरशरणाः तत्वात् समर्थास्तु अन्ये एतैः न संगच्छन्ते अतः आदृतान्योन्यसंघाः संमानितपरस्परसमूहाः न विद्यते गतिर्येषां ते अगतयः अगतित्वात् विहितभिक्षावृत्तयः दरिद्रतया कृतभिक्षाजीवाः चिरविधृतं तुरङ्गब्रह्मचर्यं यैस्ते तथा । तुरङ्गब्रह्मचर्यं नाम मन्दुराबद्धानां तुरंगाणां मैथुनराहित्यं एवं भूताः केचिदेते वर्तन्त इति शेषः ॥ २१ ॥

(सोपक्रोशं हस्तौ विधून्वन्)

अनल्पमदपित्तलैरनुपरुद्धमानग्रहै-
रजल्परणकर्कशैरपरिदृष्टतर्कक्रमैः ।
अतथ्यनियमस्थितैरनतिवृत्तडंभोद्यमै-
रशिक्षितचमत्कृतैरलमसद्भिरेतादृशैः ॥ २२ ॥

(अन्यतो दृष्टिं प्रसारयन्) अमी पुनरमुष्टिमेययज्ञोपवीतसंछन्नवक्षसः करावलम्बिताक्षमालाः करचरणनयननासादिषु मन्त्रवर्णानिरन्तरं न्यस्यन्तस्तीर्थयात्रोत्सुकपथिकसार्थयातायातपद्धतिपरिसरप्रतिष्ठापितं चेलाजिनकुशोत्तरमासनमधितिष्ठन्ति । हन्तैषां महायोगिनामद्भुतनैरपेक्ष्यं येनस्वयमप्यन्तर्हसन्ति । यतश्च

डम्भस्येव ध्वजममितया मण्डितं दर्भमुष्ट्या
द्राघीयांसं कमपि पुरतस्संप्रतिष्ठाप्य दण्डम् ।

उपक्रोशः जुगुप्सा ।

अनल्पेति—॥ अनल्पेन मदेन पित्तलैः पित्ताधिकैः अनुपरुद्धः अप्रतिबद्धः मानः अभिमान एवग्रहः भूतविशेषो येषां ते तथा जल्पः कथा विशेष एव रणः तस्मिंश्चकर्कशाः तैः अपरिदृष्टा अपरिचिताः तर्कक्रमाः यैस्तैः अतथ्येषु नियमेषु स्थितैः नविद्यते अतिवृत्तिः यस्य सः अनतिवृत्तिः डंभोद्यमो येषां तैरशिक्षितं चमत्कृतं चमत्कारः येषां तैरलं ॥ २२ ॥

अमुष्टिमेयानि अमुष्टिपरिमितानि यज्ञोपवीतानि तैस्संछन्नं वक्षो येषां ते तथा । करतलेन अवलंबिता अक्षमाला येषां ते तथा मन्त्रवर्णानि मन्त्राक्षराणि तीर्थान्युद्दिश्य यात्रायां उत्सुकानां रसिकजनानां यातायातपद्धतौ गतागतमार्गे प्रतिष्ठापितं चेलाजिनकुशोत्तरं चेलं वस्त्रं अजिनं व्याघ्रचर्मादि कुशाःदर्भविशेषाः तान्युत्तराणि उपरिक्षिप्तानि यस्य तत्तथा आसनं अधितिष्ठन्ति । महायोगिनामित्यत्र व्यतिरेकलक्षणा अद्भुतमदृष्टपूर्वं येन नैरपेक्ष्येण । अन्तर्हृदये । कुतोहसन्तीत्यत आह यत इति—॥

डंभस्येति—॥ अमितया दर्भमुष्ट्या मण्डितं डम्भस्य ध्वजमिव स्थितं द्राघीयांसं अधिकोन्नतं कमपि दण्डं पुरतः संप्रतिष्ठाप्य नामतः आख्यामात्रेण तीर्थपान्थाः

पादोपान्तप्रणिहितधनान्प्राणिनो भक्तिनम्रान्
नावेक्षन्ते कितवमुनयो नामतस्तीर्थपादाः ॥२३॥

अहहामी निरन्तरमान्तरं ध्यानमभिनयंतः पुरः प्रतिष्ठापितान्देवतामपि नोद्वीक्षन्ते अभ्यर्णमागतानपि आचार्यमातापितृप्रमुखानर्धनिमीलितेन लोचनेनावलोकयन्तोऽप्यनवलोकननाटयन्ति। का कथा-प्रणामादीनाम्। एतेषु च।

शमदमवृत्तसमाधिषु निस्पृहभावे च नैष्ठिका डम्भाः।
अयुतायुतांशकक्ष्यामडम्भडम्भस्य नार्हन्ति ॥ २४ ॥

अयं पुनरिहानुपतितमार्जारधूर्तबकवृत्तीनां त्रयोविद्यातपस्विनामग्रगण्यो महातपाः।

शिक्षाविशेषनिभृताकृतिरूर्ध्वबाहुः
प्रक्रीडयन्निव निजान्तपसि प्रतिष्ठाम्।
दर्भावृते क्षिततले निहितैकपादः
चित्रं सजीवमिव तिष्ठति डाम्भिकेन्द्रः ॥ २५ ॥

तीर्थपावनचरणाः कितवमुनयः कपटतापसाः पदयोरुपान्ते प्रणिहितं न्यस्तं धनं यैस्तान् भक्त्यानम्रान् प्रह्वान् प्राणिनः नावेक्षन्ते न विलोकयन्ति ॥ २३ ॥

आराधनाय पुरतः प्रतिष्ठापितां अभ्यर्णं अभ्याशं अवलोकनस्याप्यभावे प्रणामादीनां काकथा।

शमेति—॥ शमः चित्तप्रशान्तिः दम इन्द्रियजयः वृत्तं वर्णाश्रमाचारः समाधियोगः एषु निस्पृहत्वे च नैष्ठिका निष्ठावन्तः डंभाः अडंभडंभस्य अडंभं अभिनयतोऽडंभस्य अयुतांशस्य यः अयुतांशः तस्य कक्ष्यां साम्यं नार्हन्ति। एतडंभडंभस्यान्ये डंभाः अयुतायुतांशकक्ष्यामपि नार्हन्तीति भावः ॥ २४ ॥

समीपागतानपि क्षुद्रमत्स्यानपीडयन् बकोधूर्तबकः अनुगता तद्वृत्तिर्यैस्तेषां। त्रैविद्यतपस्विनां त्रयोपठननिरततपस्विनां अग्रगण्यः अग्रेगणयितुं योग्यः।

शिक्षेति—॥ शिक्षाविशेषेण निभृताकृतिः निश्चलशरीरः निजां तपसिप्रतिष्ठां प्रक्रीडयन्निवस्थितः दर्भैरावृते उच्चिते प्रोच्चिते च तले निहितः एकः पादः यस्य सतथा डांभिकानां इन्द्रः सजीवं जीवसहितं चित्रमिव तिष्ठति ॥ २५ ॥

इतश्चायमेतादृशो यायजूकः

अलिकचिबुकनासाजानुबाहूदराद्यै-
र्विवृतनतिविशेषो मृत्तिकालेपचिह्नैः ।
कनकगिरिमिवेच्छन् कश्चिदग्नीन्समिन्धे
मुकुलितनयनार्धो मूर्तिमानेष डम्भः ॥ २६ ॥

(परिवृत्यावलोक्य) अहोनुखलु काषायदण्डमात्रशरणानां कलियुगसन्यासिनां नैरपेक्ष्यम् ।

भिक्षेति शिष्यजनरक्षणदक्षिणेति
शाटीति शाश्वतमठोपधिकल्पनेति ।
ग्रन्थोपसंग्रहणमूल्यमिति ब्रुवाणाः
सन्यासिनोपि दधते सततन्धनाशाम् ॥ २७ ॥

सहर्षं, नूनमीदृशपुरुषावष्टब्धे जीवलोके सिद्धप्रायं समीहितं महामोहस्य । अथाप्येतदिह सितासितनदीसंभेदो विवेकस्थानमिव किञ्चिदाभाति । यदुत

एतादृशः अस्यायमेव सदृशः यायजूकः यज्ञशालः ।

तमेवाह-

अलिकेति-॥ मृत्तिकायाः लेप एव चिह्नं येषां तैः अलिकं ललाटं आदिशब्देन अङ्गुष्ठबाहुन्तरकपोलानां ग्रहणं अलिकाद्यैरवयवैर्विवृतः विस्तृतः प्रकाशितः इत्यर्थः नतिविशेषः प्रणामविशेषः यस्य स तथा मुकुलितं नयनार्धं यस्य स तथा मूर्तिमान् विग्रहवानेष डम्भः कनकगिरिं मेरुमिच्छन्निव अग्नीन्समिन्धे ॥ २६ ॥

काषायदण्डावेव शरणं येषां तेषाम् ।

नैरपेक्ष्यमेव विशदयति-

भिक्षेति ॥- शिष्यजनानां सेवनदक्षिणा सेवाभृतिरिति शाटीकाषायवस्त्रं शाश्वतस्य सन्यासिपरंपराप्राप्तस्य मठस्य उपधिकल्पना तद्दार्ढ्यहेतुस्थूणातुलादि कल्पना ग्रन्थोपसंग्रहणस्य पुस्तसंपादनस्य मूल्यम् ॥ २७ ॥

हर्षहेतुमाह नूनमिति समीहितमिष्टं सिद्धप्रायं सिद्धतुल्यमित्यर्थः । सितासित नद्योः गङ्गायमुनयोः संभेदः संमेलनम् । विवेकस्थानत्वे हेतुमाह यदुतेति-॥

आचारोदधिसैकतप्रतिनिधिर्मृत्पिण्डकूटः क्वचित्
पापच्छेदनशस्त्रजालपरुषः कुत्रापि दर्भोत्करः ।
पूजाशेषितपुष्पपल्लवफलस्तोमस्स्फुरत्यन्यतो
मन्ये कस्यचिदेतदाश्रमपदं मान्यं महायोगिनः ॥ २८ ॥

अत्र च

विरुद्धमतिकर्दमं विषयवृत्तिविन्ध्याटवीं
त्रिवर्गमृगतृष्णिकां त्रिगुणवागुरायन्त्रणाम् ।
निवर्त्य नियमक्रमैस्स्फुरति मुक्तवत्कोऽप्यसा-
वपत्यमथवाग्रजस्सवितुरेष तातोऽपि वा ॥ २९ ॥

उपसर्पामि तावदेनम् । (इत्याश्रममासीदति निमित्तं सूचयन् सहर्षं) नूनमिह मे प्रियासमागममत्यासन्नमभिव्यनक्ति दर्शितस्पन्दलास्यं दक्षिणञ्चक्षुः । ततः प्रविशति प्रव्रजितवेषधारिण्यसूया—

आचारोदधिसैकतेति—॥ आचारः वर्णाश्रमोचितशौचाचमनाद्यनुष्ठानं स एवोदधिः तस्य सैकतप्रतिनिधिः पुलिनसदृशः महान्क्वचित्प्रदेशे मृत्पिण्डानां कूटः समूहः पापानां छेदेन शस्त्रजालवत्परुषः क्रूरः दर्भाणां उत्करः उच्चयः पूजायाः शेषितान्यवशिष्टानि पुष्पपल्लवफलानि तेषां स्तोमः राशिः स्फुरति अतः कस्यचिदाश्रमपदं मन्ये ॥ २८ ॥

अत्र आश्रमपदे ।

विरुद्धेति—॥ विरुद्धा वेदविरुद्धा मतिर्ज्ञानं सैव कर्दमः तं विषमा शास्त्रनिषिद्धा वृत्तिर्व्यापारः सैव विन्ध्याटवी तां त्रयो वर्गाः धर्मार्थकामाः त एव मृगतृष्णिका मरीचिका तां त्रयो गुणाः सत्वरजस्तमांसि त एव वागुरा जालं तस्यायन्त्रणं बन्धनं नियमानां क्रमैः परंपराभिः निवर्त्य कोऽपि मुक्तवत्स्फुरति असौ तु सवितुः अपत्यं अथवा अग्रजः तेजोविशेष्यात् अथवा तातः ॥ २९ ॥

निमित्तं दक्षिणाक्षिस्पन्दनरूपं सूचयन्नभिनयन् । दर्शितः स्पन्दनं चलनं स एव लास्यं येन तत् ।

प्रव्राजितानां सन्यासिनां यो वेषः तद्धारिणी । स्वरूपमाह अहंहीति—।

असूया—अहं हि विवेकपरिपन्थिचूडामणेर्महाराजस्य महामोहस्य देव्या दुर्मत्या विश्वजनहृदयविस्रम्भकवेषपरिग्रहेण विदुषां चित्तमुपप्लावयितुमादिष्टा परिक्रान्तचतुर्दशभुवना प्रयागतीर्थमवगाह्य प्रतिगतास्मि भगवतो धर्मध्वजाख्यस्य कुलपतेराश्रमम् । निपुणमिहापि गुणवद्विषये दोषानुद्घाटयितुं चारतन्त्वं तन्त्रयितव्यम् । स्वसामर्थ्यं बहुमत्य

मयि दत्तावधानायां विश्वदोषापहारिणा ।
न शक्यमीश्वरेणापि निरवद्येन वर्तितुम् ॥ ३० ॥

निरङ्कुशाः खलु मत्परिगृहीताः पुरुषा नित्यमविद्यमानमपि दोषं विद्यमानवदापादयन्ति किमुत विद्यमानं ।

तथाहि—

निरवधिगुणग्रामे रामे निरागसि वागसि
स्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।

विवेकस्य परिपन्थिनां विरोधिनां चूडामणेः श्रेष्ठस्य विश्वेषां जनानां हृदयस्य विस्रम्भकः यो वेषः तस्य परिग्रहेण विदुषां चित्तं उपप्लावयितुं संक्षोभयितुं परिक्रान्तानि चतुर्दशभुवनानि यया सा तथा गुणवति विषये दोषानुद्भावयितुं उत्पादयितुं च चारतन्त्वं चारकृत्यं तन्त्रयितव्यं कारयितव्यम् ।

बहुमत्य बहुत्वेन मत्वेत्यर्थः ।

तत्प्रकारमेव आह—

मयीति—॥ मयि दत्तावधानायां अवहितायां सत्यां विश्वान्दोषानपहरतीति विश्वदोषापहारी तेन ईश्वरेणापि निरवद्येन निर्दोषेण वर्त्तितुं न शक्यं । असूयालवो हि भगवतेऽपि दोषानुद्भावयन्तीति भावः ॥ ३० ॥

निरवधीति—॥ वागेव असिः तस्य स्फुरणेन मुषितः अपहृतः आलोकः ज्ञानं प्रकाशः येषां ते तथा लोकाः जनाः निरवधिः गुणग्रामो यस्य तस्मिन् निरागसि रामे भरतनोः ताटकायाः हतिं वालिद्रोहं अन्येन युध्यमानस्य हननं मनाक् अल्पं अपसर्पणं खरायोधने पश्चादेकस्य पदस्यापसर्पणं सतामन्तिके समीपे अतः परि-

स्वेष्टकाले सूर्यचन्द्रसाधनार्थं चैत्रादितिथयो गृहीता भवन्ति एकमासान्तरत्वात् । अत उपपन्नं सैकाधिरेकानित्यादि । अहर्गणसाधनेऽप्यधिमासानां सैकनिरेकत्वेन चैत्रादिगतमासा एव सैका निरेकाः कृता इत्येव भवतीति न विपरीतिः । अत एव यदाऽधिमासः पतितो गणितेन च प्राप्तस्तदा स्वतः सिद्धोऽहर्गणोऽभीष्टकाल इति तत्र सूर्यचन्द्रसाधनार्थमधिमासत्वेऽपि चैत्रादिगतमासा न सैका इति सुगमम् ॥४॥

इदानीं शुद्धौ विशेषमाह ।

शुद्ध्यागमे त्वपतितोऽपि स लभ्यते चे-
च्छुद्धा तदा खदहनैर्युतया दिनौघः ।
एतद्विदन्ति सुधियः स्वयमेव किन्तु
बालावबोधविधये मयका निरुक्तम् ॥ ५ ॥

वा. भा.—शुद्ध्यानयने स स्पष्टोऽधिमासोऽपतितोऽपि यदि लभ्यते तदा सोऽपि न ग्राह्यः । तस्मिन्नगृहीते त्रिंशदधिका शुद्धिर्भवति । तयाऽहर्गणस्तदा कर्तुं युज्यते । स्पष्टमासस्य ग्रहणात् ॥ ५ ॥

मरीचिः—ननु यदा शुद्ध्यानयनेन चैत्रेऽधिमासः पतितः स्पष्टमानेनापतितस्तदा प्रत्यब्दशुद्ध्या ग्रहानयनेऽनया रीत्या व्यभिचारः । तथा हि नवाधिकपञ्चदशशतमितशके १५०९ अब्दपः ३ । ३३ । १८ । शुद्धिः ० । ३३ । १८ । अवमघटिकाः १२ । ४२ । क्षेपदिनानि १३ । २० । ६ । कार्त्तिकशुक्लपौर्णमास्यां रवौ चैत्रादिगततिथयश्चतुष्पञ्चाशदुत्तरशतद्वयम् २५४ । तथाऽधिमासस्य तिथीर्गृहीत्वानयनेन वैशाखपतिताधिमासस्यापि ग्रहणात् । तत उक्तप्रकारेणाहर्गणः २४८ । २६ । ४२ । अस्मादुक्तप्रकारेणार्कः ८ । ४ । ५२ । ८ बृहदहर्गणानीतसूर्येणानेन ७ । ६ । २ । २६ न सम इति स्फुटो व्यभिचारः । न चाधिमासग्रहणेन सहजमेवैकराश्यन्तरमिति । तदग्रहे सूर्यस्य ७ । ५ । १८ । २ । आगतत्वान्न दोष इति वाच्यम् । एवमपि वैशाखाधिमासशुक्लप्रतिपदि

बुधे लघ्वहर्गणात् २९ । २६ । ४२ साधितसूर्यस्य ० । २९ । ३ । १६ । बृहदहर्गणानीतसूर्येण ११ । २८ । १३ । ३० विसंवादात् तत्र स्फुटो व्यभिचारः । तथाऽधिमासस्य तिथीर्गृहीत्वेति विशेषणस्य व्यर्थत्वापत्तिश्चेत्यतः सिंहोद्धृतयाऽऽह शुद्ध्यागमे इति । शुद्ध्यानयने खरामैर्भक्ते स्पष्टमानेनापतिताधिमासोऽपि सोऽधिमासश्चेद्यदि लभ्यते । अपतितोऽपि न लब्धः पतितो वा लब्धस्तन्निवारणार्थं चेदित्युक्तम् । तदा तद्रूपं यथागतशुद्ध्या त्रिंशद्युतया 'चैत्रसितादिगतः' इत्याद्यनेनाहर्गणः साध्यो न तु यथागतया । तथा चोक्तस्थले न व्यभिचार इति भावः । यथा प्रथमस्थले तिथिगणः २५४ त्रिंशद्युतशुद्ध्या ३० । ३३ । १८ ऊनः २२३ । २६ । ४२ । अतोऽहर्गणः २२० । २६ । ४२ । अस्मात् सूर्योऽयं ७ । ७ । १६ । १९ । बृहदहर्गणानीतसम इति । द्वितीये तु 'यावत् तिथ्यश्च' इत्युक्तेन पूर्वंवर्षसमाप्तेरेतादृशशुद्ध्या ३० । ३३ । १८ ग्रहानयनाप्रसङ्ग इति न क्षतिः । ननु यथेदमुक्तं तथा यदा स्पष्टाधिमासः पतितोऽपि शुद्ध्या नयने नागतस्तदा यथागतशुद्धिस्त्रिंशद्युतचैत्रादितिथिगणे ऊना कार्या ततोऽहर्गणः साध्योऽन्यथोक्तरीत्या व्यभिचारापत्तिरित्ययं विशेषः कथं नोक्तः । न चास्योक्तवैपरीत्येनोक्तप्रायत्वादिति वाच्यं विपरीतस्यापि सुवचत्वात् । त्रिंशदूनशुद्धिसंभवेनैतद्विशेषकथनस्योक्तविशेषापेक्षयाऽऽवश्यकत्वाच्चेति चेत् । न । अव्यवहितगतत्रेतायुगस्य सहस्रनृपयम—२१६०००मितगतवर्षकालमारभ्यागामित्रेतायुगचरणस्य सहस्रपवनवाग्नि—३९६०००मितगतवर्षकालपर्यन्तं तादृशस्थलाप्रसक्तेः । ननु तथाऽपि कल्पावच्छिन्नकाले तस्य प्रसिद्धत्वात् तदुक्तस्यावश्यकत्वात् । अन्यथा ब्रह्मगतायुर्विचारश्लोकस्य व्यर्थत्वापत्तेरत आह एतद्विति । एतत् । यदा स्पष्टमानेनाधिमासः पतितोऽपि शुद्ध्यानयने न लभ्यते तदा त्रिंशत ऊनया शुद्ध्याऽहर्गणः साध्य इति विशेषरूपं प्रमेयम् । सुधियस्तीक्ष्णबुद्धयः स्वयमेव मत्कथनं

विना स्वबुद्ध्या विदन्ति जानन्ति । उक्तविशेषवैपरीत्येनाल्पबुद्धीनामपि स्वतस्तज्ज्ञेयत्वादिति भावः । एवं तर्ह्यभीष्टेत्यादि शुद्ध्यागमे इत्याद्यन्तयन्त्योक्तविशेषस्यापि तेषां स्वतो ज्ञेयत्वात् तत्कथनं व्यर्थमत आह किन्त्विति । मयका । "अव्ययसर्वनाम्नामकच् प्राक् टेः" इति सूत्रेण मयेत्यस्य सुबन्तस्याकच्प्रत्यय इति मयैवोक्तं न पूर्वाचार्यैरिति स्वप्राधान्यद्योतनार्थं मयकेत्युक्तम् । बालावबोधविधये बालानां स्वत उपपत्त्यज्ञानामेतद्विशेषस्यावबोधो भवतु तदर्थम् । निरुक्तं प्रोक्तम् । अन्यथा तेषां वासनानभिज्ञतयोक्तस्थले यहगणितासंवादादतिव्याकुलत्वं स्यात् । यद्वा नन्वभीष्टवारार्थमित्यादिविशेषाः ब्रह्मगुप्तश्रीपतिलल्लादिभिः प्राचीनैरनुक्तत्वात् त्वदुक्ता अप्रमाणा भवन्त्यत आह एतदिति । अभीष्टवारार्थमित्याद्युक्तविशेषप्रमेयम् । तथा चैतद्विशेषाणां स्पष्टत्वेन स्वतः सुधीज्ञेयत्वात् । पूर्वाचार्यैर्नोक्ता न तु वासनाशून्यत्वेनोपेक्षिताः । एवं चेत् । त्वया किमर्थमुक्ता अत आह किन्त्वित्यादि । वस्तुतस्तु नन्वेते विशेषाः प्राचीनग्रन्थानुक्तत्वेन किमर्थमुक्ता अत आह किन्त्वित्यादि । किन्तु एतत् प्रमेयं मयैवोक्तम् । तथा चैतत् कथनं व्यर्थं नेति भावः । ननु प्राचीनानुक्तत्वेन न त्वदुक्तमप्यप्रमाणमत आह एतदिति । एतत् । मदुक्तविशेषप्रामाण्यं सुधियः स्वयमेव बुद्ध्या मनसि जानन्ति । तथा च मया वासनाभिज्ञतयैतद्विशेषाणामुक्तत्वान्मदुक्तप्रामाण्ये सुधियः स्वतः प्रमाणमिति न क्षतिरिति भावः ।

अत्रोपपत्तिः । यदा स्पष्टमानेन स्पष्टचैत्रे नाधिमासः पतितः शुद्ध्यानयनेऽधिकः फले लब्धश्चेत् तदा स्पष्टचैत्रस्य मध्यममानेनाधिकत्वम् । स्पष्टचैत्रात् स्पष्टाग्रिममासस्य वैशाखाधिकाख्यस्य वैशाखाख्यस्य वा मध्यममानेन चैत्रत्वमतो गणितागता शुद्धिः प्रसिद्धचैत्राग्रिममासस्योक्ताख्यस्य मध्यममाने य आरम्भकालस्तस्मान्मध्यममेषसंक्रमणकालपर्यन्तमन्तरं रूपम् । तस्माच्छुद्ध्यादिकालरूपमध्यमचैत्रादितो गतमास-

ज्ञानार्थं प्रसिद्धस्पष्टचैत्रादिगणनागृहीतगतमासा निरेकाः कार्यास्तत्र यथागतशुद्धिरविकमासदिनात्मकसंख्यया त्रिंशन्मितया लाघवार्थं योजिता। तादृशशुद्धया प्रसिद्धचैत्रादितिथिगणो हीनश्चेन्मध्यमसौरवर्षान्तात् तिथिगणो गृहीतः स्यात् । अत एव "गताब्दाधिमासान्तरम्" इत्यादिना ऽब्दपसाधने मध्यममानेन गताधिमाससंख्याप्रयोजनम् । त्रिंशदूनत्वेनोनरूपशुद्धेरावश्यकत्वाच्च दिनौघ इत्युक्तम् । तेन वास्तवपतिताधिमाससंख्याज्ञानार्थमागताधिमासा निरेकाः कार्याः । ननु गणितार्थमिति द्योतितम् । एतद्विषयः स्पष्टशुद्ध्यानयने लब्धाधिमाससंख्या मध्यमशुद्ध्यानयनागताधिमाससंख्याया निरेका भवति तदैव एतदर्थं स्पष्टचैत्रादिस्पष्टमेषसंक्रमरूपसौरवर्षाद्योरन्तरकालरूपा स्पष्टशुद्धिर्ज्ञेया । तत्राव्यवहितगतत्रेतायुगचरणस्य सहरुघ्ननृपयम-२१६०००मितगतवर्षकालमारभ्यागामित्रेतायुगचरणस्य सहरुघ्नपवनरामभितम्३९६००० गतवर्षकालपर्यन्तं सौरवर्षादौ सूर्यस्य तुलादिकेन्द्रत्वेन मन्दफलस्य धनत्वान्मध्यमसौरवर्षादितः स्पष्टसौरवर्षादेर्मन्दफलकालेन पूर्वं सम्भवः । अतोऽनुपातेन ज्ञातरविमन्दोच्चतः केन्द्रद्वारा स्पष्टाधिकारोक्तप्रकारेणानीतमन्दफलाद्यदि कल्पसौरांशैः कल्पचान्द्रदिनानि तदा मन्दफलांशैः कानीत्यनुपातेन ज्ञातदिनादिना षष्ट्यधिकशतत्रयसौरांशैरेकवर्षावमघटिका— ४८ । २२ । ७ । ३० स्तत्रा मन्दफलांशैः किमित्यनुपातेन ज्ञातावमघटीभिश्चागतशुद्धिः क्रमेणोना युक्ता च स्पष्टमेषादिसंक्रमणरूपस्पष्टवर्षादौ शुद्धिः । तत्र यदा शुद्धिरूना न भवति तदा लब्धाधिमासेभ्य एकाधिमासग्रहणेन तत्त्रिंशद्विनयुतशुद्धिरूना भवतीति स्पष्टशुद्ध्याभिप्रायेण मध्यमानीताधिमासा निरेका भवन्तीति सिद्धम् । तथा च यथा सांप्रतमीदृशार्कमन्दोच्चा-२ । १८ । ० । ० नीतमन्दफला-२ । ८ । ३० नीतचन्द्रदिना-२ । १२ । २७ वमघटी-५१०संस्कारोत्पन्नदशपलाधिकद्वादशघटीयुतदिनद्वय-२ । १२ । १० रूपदिनादेरानीतमध्यमशुद्धिरूना

तदा स्पष्टशुद्ध्या त्रिंशदूनया स्पष्टाधिमासपाताभावेऽपि मध्यशुद्ध्या मध्यमाधिमासपात इति विषयः सिद्धः । अत एव यदा मध्यमानीतशुद्ध्या नाधिमासपातस्तदा स्पष्टशुद्ध्या तदूनया सुतरां मध्यसौरवर्षादितः पूर्वं स्पष्टसौरवर्षादेः सिद्धत्वादुक्तकाले स्पष्टाधिमासः पतितः शुद्ध्यानयने नागत इत्यस्यासिद्धिः । यदा तु अधिमत्रेतायुगचरणगतसहस्रघ्नपञ्चघराममितवर्षकालमारभ्य लक्षघ्नशरवेदवर्ष ४५०००००मध्ये मेषादिकेन्द्रत्वेनर्णमन्दफलद्वारा मध्यवर्षादितः स्पष्टसौरवर्षकालस्याग्रे सत्त्वान्मध्यममानेनालब्धोऽधिमासः स्पष्टमानेन कदाचित् पतितः स्यात् तदा चैत्राधिमासस्य मध्यमत्वेन शुद्धचैत्रत्वात् । तदादितो गततिथिगणयहार्थं प्रसिद्धाधिमासोत्तरचैत्रादिगणनागृहीतगततिथयस्त्रिंशत्तिथियुताः कार्या इति सिद्धम् । वास्तवगताधिमाससंख्याज्ञानार्थं शुद्ध्यानयनानीताधिमासाः सैका इदमाचार्यैः कालान्तरीयत्वेनोपेक्षितं सुधीज्ञेयत्वाच्चेत्यलं विस्तरेण ॥ ५ ॥

इदानीमधिमासस्य क्षयमासस्य च लक्षणमाह ।

असंक्रान्तिमासोऽधिमासः स्फुटं स्याद्-
द्विसंक्रान्तिमासः क्षयाख्यः कदा चित् ।
क्षयः कार्त्तिकादित्रये नान्यतः स्यात्
तदा वर्षमध्येऽधिमासद्वयं च ॥ ६ ॥

वा. भा–यस्मिन् शशिमासेऽर्कसंक्रान्तिर्नास्ति सोऽधिमास इति प्रसिद्धम् । तथा यत्र मासे संक्रान्तिद्वयं भवति स क्षयमासो ज्ञेयः । यतः संक्रान्त्युपलक्षिता मासाः । अत एकस्मिन् मासे संक्रान्तिद्वये जाते सति मासयुगलं जातम् । स क्षयमासः कदाचित् कालान्तरे भवति । यदा भवति तदा कार्त्तिकादित्रय एव । तदा क्षयमासात् पूर्वं मासत्रयान्तर एकोऽधिमासोऽग्रतश्च मासत्रयान्तरितोऽन्यश्चासंक्रान्तिमासः स्यात् ।

अत्रोपपत्तिः । चन्द्रमासप्रमाणमेकोनत्रिंशत् सावनदिनान्येकत्रिं-

शद्घटिकाः पञ्चाशत् पलानि २९ । ३१ । ५० । तथाऽर्कमासस्त्रिंशद्दिनानि षड्विंशतिर्घटिकाः सप्तदश पलानि ३० । २६ । १७ । एतावद्भिर्दिवसै रविर्मध्यमगत्या राशिं गच्छति । यदाऽर्कगतिरेकषष्टिः कलास्तदा सार्धैकोनत्रिंशता दिनै २९ । ३० राशिं गच्छति । अतश्चान्द्रमासादल्पोऽर्कमासस्तदा स्यात् । एवं रविमासस्य परमाल्पता २९ । २० । ४० । सा चैकषष्टिर्गतिर्वृश्चिकादित्रयेऽर्कस्य । स ईदृशोऽल्पोऽर्कमासो यदा चान्द्रमासस्यानल्पस्यान्तःपाती भवति तदैकस्मिन् मासे संक्रमणद्वयमुपपद्यते। अत उक्तं त्रयः कार्त्तिकादित्रय इति । पूर्वं किल भाद्रपदोऽसंक्रान्तिर्जातस्ततोऽर्कगतेरधिकत्वान्मार्गशीर्षो द्विसंक्रान्तिस्ततः पुनर्गतेरल्पत्वाच्चैत्रोऽप्यसंक्रान्तिर्भवति । ततो वर्षमध्येऽधिमासद्वयमित्युपपन्नम् ॥ ६ ॥

मरीचिः—ननु स्फुटमानेनाधिमासः पतितोऽपतितो वा कथं ज्ञेय इत्यतोऽधिमासलक्षणं तत्प्रसङ्गात् । क्षयमासलक्षणं सविशेषं भुजङ्गप्रयातेनाह असंक्रान्तिमास इति । स्फुटोऽसंक्रान्तिमासोऽधिमासः स्यात् । तिथ्यादिपञ्चस्य स्पष्टमानेन सत्त्वात् । स्पष्टशुक्लादिप्रतिपत्पूर्वक्षणमारभ्याव्यवहिततदुत्तरस्पष्टामावास्यान्तिमक्षणपर्यन्तं कालविशेषः स्पष्टचान्द्रमासः। अत्र सूर्यस्य स्पष्टमानेनैकमेव स्वाधिष्ठितराश्यव्यवहिताग्रिमराश्यादिस्थानसंचाररूपसंक्रमणं भवति। तदा चैत्रादिमाससंज्ञाक्रमेणोक्तसंज्ञको मासः शुद्धः। यदि तत्र तद्रूपसंक्रमणाभावस्तदाऽयमशुद्धोऽधिकसंज्ञाव्यवहार्यः । तस्य चैत्रादिद्वादशराशिभ्योऽतिरिक्तत्वात् । एवं स्फुटो द्विसंक्रान्तिमासः । तत्र यदि तद्रूपसंक्रमणद्वयं तदाऽपि शुद्धमासलक्षणाभावादशुद्धः क्षयसंज्ञाव्यवहार्यः ।

"यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयः........................... ।"

इति काठकगृह्यवचनेन मलत्वाभ्युपगमात् । तत्रासंक्रान्तिमासस्याधिकत्वम् ।

"यस्मिन् दर्शस्यान्तादर्वाग्रेकापरं दर्शम् ।
उल्लङ्घ्य भवति भानोः संक्रान्तिः सोऽधिमासः स्यात् ॥"

इति भुजबलभीमपराक्रमवचनेन—

"अमावास्यामहोरात्रे यदा संक्रमते रविः ।
स तु मासः पवित्रः स्यादतीते त्वधिको भवेत् ॥"

इत्यादिपुण्यवचनेन च युक्तम् । अत्रादिपुण्यवचने प्रथमपादस्य शुक्लादिदर्शान्तमास इत्यर्थः । अतीते मासेऽतीत इत्यर्थ इति ध्येयम् । द्विसंक्रान्तिमासस्य क्षयत्वम् ।

"तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्धे तदुत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥"

इति वचनेनैकमासद्विमासाभिधेयत्वाद्युक्तम् । ननु वर्षत्रयमध्येऽधिमासस्यावश्यं पतनं दृश्यते तथोक्तरूपक्षयस्य दर्शनाभावेन खपुष्पायितक्षयमासकथनं न युक्तमत आह कदा चिदिति । तथा चाधिमासवन्नियतकालाभावात् कालान्तरे तत्सम्भवप्रसिद्धोक्त इति भावः । ननु तथापि चैत्रादिसप्तस्वधिमासस्य यथा पातस्तथा क्षयमाससम्भवः केषु मासेषु भवत्यत आह क्षय इति । संक्रान्तिद्वययुक्तचान्द्रमासः कार्त्तिकादित्रये कार्त्तिकमार्गशीर्षपौषान्यतममासे । शुद्धमासाव्यवहिताग्रिमसंज्ञासम्भावनया कार्त्तिकाद्युक्तम् । अन्यथा स्वरूपासिद्धेरिति ध्येयम् । अन्यतस्तद्रहितमासेषु न स्यात् । यद्वा ननु चैत्रादिसप्तस्वधिमासपातदर्शनेऽप्यधिमासपतनविषयमासानामनुक्तत्वात् सर्वमासेष्वधिकसम्भवः । सर्वेषु मासेष्वधिमासकः स्यात्" इति वसिष्ठोक्तेश्च । तथा क्षयस्यापीति कथं कार्त्तिकादित्रये इत्युक्तमत आह नेत्यादि । अन्यतः पारिभाषिकवर्त्तमानकालान्यकाले कार्त्तिकादित्रये इत्युक्तं न सम्भवति । तथा च वर्त्तमानकालानुरोधेन मासनिर्णयः कृतः । न तु कालत्वावच्छेदेनेति न क्षतिः । ननु

"मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।
"प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः ॥"

इति धर्मशास्त्रवचनम् । एकवर्षेऽधिमासद्वयान्तरं परमन्यूनाष्टाविंशतिमासासम्भवेनाधिमासद्वयाप्रसिद्धेः कथमुपपन्नं भवत्यत आह तदेति। यदा क्षयमासपातस्तदेत्यर्थः । वर्षमध्ये क्षयमाससम्बन्धिसौरवर्षाद्यन्ताऽवच्छिन्नकाले उक्तरूपमधिमासद्वयम् । च समुच्चये भवति । तथा चाधिमासान्तरनियमस्य क्षयमासमुक्तवर्षान्यकालविषयत्वात् । क्षयमासपातवर्षेऽधिमासद्वयपातप्रसिद्धेर्वचनमुपपन्नमिति भावः । कालनिर्णयदीपिकाविवरणकारास्तु "अधिमासद्वयं नान्यतः स्यात् ।" अन्यतोऽन्यतरस्मिन् एकतरस्मिन्निति यावत् । तथा च क्षयमासकालात् पूर्वकाले उत्तरकाले वा न स्यात् किन्तु तत्प्रागुत्तरकालयोरधिमासद्वयं स्यादित्यर्थयुक्तं प्राहुः ।

अत्रोपपत्तिः । ननु 'द्वादश मासाः संवत्सरः" इति श्रुतेः । सौरचान्द्रसावनवर्षेषु द्वादशाधिकमासाभावादप्रसिद्धोऽधिकमास इति चेत् । सत्यम् । 'अस्ति त्रयोदशो मासः ''इति द्वितीयश्रुतेः । सौरवर्षे त्रयोदशचान्द्रमासानां कदाचित् संभवात् पारतन्त्र्येणाधिकमासप्रसिद्धेर्मानयोरतुल्यत्वेन परस्परं तन्न्यूनाधिकत्वावश्यंभावात् । वर्षमासयोः सौरचान्द्रत्वेन व्यवहारे गृहीतत्वादितरमानेभ्यस्तदसिद्धेः । अन्यथा श्रुतेर्वैयर्थ्यापत्तेः । अत एव वेदबाह्यानां मते मानानां स्वतन्त्रत्वेनाधिकमासः खपुष्पायितः । एतेन कल्पादौ युगपत् प्रवृत्तयोः सौरचान्द्रमासयोरधिकन्यूनमानयोरिष्टकाले तत्संख्ययोर्न्यूनाधिकयोरन्तरं गताधिमासा गणितेनैकरूपेण भवन्तीति सूचितम् । तथा चानुपातेनैकसौरमासे चान्द्रदिनानि ३० । ५५ । १९ । २२ । ३० । एकचान्द्रमासे चान्द्रदिनानि ३० । अनयोरन्तरेण चान्द्रमाससमाप्त्यनन्तरं सौरमाससमाप्तिरधिकचान्द्रैतद्दिनादिना ०।५५ । १९ । २२ । ३० । जाताऽतोऽनेनाधिकेन सौर एकोऽधिमासः । एतदधिकचान्द्रैकमासो वा तदा त्रिंशच्चान्द्रदिनात्मकैकाधिकमासेन के

LXXVIII.

[1]तच्छ्रुत्वा जामदग्न्यस्य रामो रामस्य भाषितम् ।
गौरवाद् यन्त्रितकथो [2]जामदग्न्यमथाब्रवीत् ॥ १ ॥
[3]श्रुतवानस्मि ते कर्म्म घोरं यत्तु त्वया कृतम् ।
न तेऽभ्यसूये तत् कर्म्म पितुरानृण्यकारिणः ॥ २ ॥
[4]वीर्यशक्तिपरिक्षीणं क्षत्रमुत्सादितं त्वया ।
मा च क्रूरेण तेन त्वं कर्म्मणा गर्वितो भव ॥ ३ ॥
आनयेदं धनुर्दिव्यं पश्य मे बलपौरुषम् ।
क्षत्रस्यापि महत्तेजः पश्याद्य भृगुनन्दन ॥ ४ ॥
[6]इत्युक्त्वा तद्धनुर्दिव्यं रामो जग्राह वीर्यवान् ।
रामस्य जामदग्न्यस्य हस्तादीष[7]त्स्मयन्निव ॥ ५ ॥
शरञ्च हस्तादादाय ततो लघुपराक्रमः ।
सन्धाय सशरं [8]कृत्वा विचकर्ष महायशाः ॥ ६ ॥

1. "For this SL. B, LXXVI. 1. श्रुत्वा तु जामदग्न्यस्य वाक्यं दाशरथिस्तदा । गौरवाद्यन्त्रितकथः (a) पितूराममथाब्रवीत् ॥ (a) S. रामं राम अथाब्रवीत् । 2. G. LXXVII. 33. पितुर्वचनमब्रवीत्, but P. agrees with our text. 3. For this SL. B. 2. श्रुतवानस्मि यत्कर्म कृतवानसि भार्गव । अनुरुध्यामहे ब्रह्मन् पितुरानृण्यमास्थितः ॥ 4. For this and the following SL. B. 3. वीर्यहीनमिवाशक्तं क्षत्रधर्मेण भार्गव । अवजानासि मे तेजः पश्य मेऽद्य पराक्रमं ॥ 5. G. 35. नातिक्रूरेण &c., P. is worm eaten here. 6. For this, and the following 2 Slokas, B. 4. & 5. इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य वरायुधं । शरं च (a) प्रतिजग्राह हस्ताल्लघुपराक्रमः ॥ आरोप्य स धनू रामः शरं सज्यं चकार ह । जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीदिदं ॥ (a) S. प्रतिसंगृह्य &c. 7. G. 37. कृतस्मितः ॥ 8. G. 38. चापं &c., P. is

विकृष्य बलवच्चापि तद्धनुः सशरं तदा ।
रामो दाशरथिर्वाक्य[1]मिदं राममुवाच तम् ॥ ७ ॥
ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृ[2]तेन च ।
[3]शक्तोऽपि ते न मोच्येऽहमिमं प्राणहरं शरम् ॥ ८ ॥
[4]इमां तु ते गतिं दिव्यां निहन्मि तपसार्जिताम् ।
[5]अहो लोकान् सुपुण्यांस्ते हन्म्यद्य शरतेजसा ॥९॥
[6]नह्ययं वैष्णवो राम शक्तो दिव्यो महाशरः ।
मया मोघं समुत्स्रष्टुं [7]परदर्पविनाशनः ॥ १० ॥
[8]ततो वरायुधधरं रामं दशरथात्मजम् ।
द्रष्टुं ब्रह्मादयो देवाः समाजग्मुर्मनोजवाः ॥ ११ ॥
देवानुपस्थितांस्तत्र दृष्ट्वा दिव्येन चक्षुषा ।
बुद्धा च ध्यानयोगेन रामं [9]नारायणांशकम् ॥ १२ ॥

illegible here. 1. G. 39. मुवाच प्रथितं पुनः, but P. agrees with our text. 2. P. तत्र ॥ 3. For this line B. 6. तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरं ॥ G 40. शक्तोऽपि न ते &c., but P. शक्तोऽपि तेन &c. 4. For this SL. B 7. इमां वा त्वद्गतिं राम तपोबल (a) समर्जितान् । लोकानप्रतिमान् वापि हनिष्यामीति मे मतिः ॥ (a) V. & S. समर्जितां. 5 G. 41. लोकान् वाप्रतिमान् पुण्यान् हन्मि ते शरतेजसा ॥ P. is worm eaten here. 6. For this SL. B. 8. नह्ययं वैष्णवो दिव्यः शरः परपुरंजयः । मोघः पतति वीर्येण बलदर्पविनाशनः ॥ 7. G. 42. बलदर्प &c. 8. For this SL. B. 9. & 10. वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः । पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः गंधर्वाप्सरसश्चैव सिद्धचारणकिन्नराः । यक्षराक्षसना-गाश्च तद्द्रष्टुं महदद्भुतं ॥ 9 G. 44. नारायणांगजं ।

[1]रामाभिभूत[2]वीर्यश्च जामदग्न्यस्ततोऽब्रवीत् ।
कृताञ्जलिरिदं वाक्यं रामं दशरथात्मजम् ॥ १३ ॥
कश्यपाय[3]मया राम यदा दत्ता वसुन्धरा ।
विषये मे न वस्तव्यं[4]त्वयेति मम शासनात् ॥ १४ ॥
[5]सोऽहं ततः प्रभृत्यस्यां न वसामि क्षितौ क्वचित् ।
मिथ्याप्रतिज्ञः काकुत्स्थ [6]न स्यामिति परन्तप ॥१५॥
[7]ततो नार्हसि मे हन्तुं गतिं दिव्यां मनोजवाम् ।
लोकांस्तु जहि मे पुण्यान् शरेणानेन राघव ॥ १६ ॥
[8]अक्षयं मधुहन्तारं जानामि त्वां [9]जनार्दन ।
धनुषोऽस्य परामर्षात्[10]स्वस्ति तेऽस्तु प्रसीद मे ॥१७॥
[11]एते सुरगणा राम पश्यन्ति त्वां [12]सवासवाः ।

---

1 For this SL. B. 11.& 12. जड़ीकृते तदा लोके रामे वरधनुर्धरे। निर्वीर्यो जामदग्न्योऽसौ रामो राममुदैक्षत ॥ तेजोभिर्गतवीर्यत्वाज्जामदग्न्यो जड़ीकृतः। रामं कमलपत्राक्षं मंदं मंदमुवाच ह ॥ 2. G. 45. वीर्योऽसौ &c. P. वीर्योऽपि &c. 3. G. 46 यदा राम मया &c. B. 13 मया दत्ता यदा पूर्वं &c. 4 G. 46. इति मे कश्यपोऽब्रवीत्, P is worm—eaten here. B. 13. इति मां काश्यपोऽब्रवीत् ॥ 5. For this SL. B. 14. सोऽहं गुरुवचः कुर्वन् पृथिव्यां न वसे निशां। तदा प्रभृति काकुत्स्थ कृता मे काश्यपस्य ह ॥ 6. G. 47. मा भूवमिति निश्चितं। 7. For this SL. B. 15 & 16. तामिमां मद्गतिं वीर हंतुं नार्हसि राघव। मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमं ॥ लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया। जहि तान् शरमुख्येन मा भूत् कालस्य पर्य्ययः ॥ 8. B. 17. अक्षय्यं &c., but S. has अक्षयं &c. 9. G. 49. सनातनं. B. 17 सुरेश्वरं ॥ 10. G. 49. अस्तु स्वस्ति &c. B. 17. स्वस्ति तेस्तु परंतप ॥ 11. B. 18. एते सुरगणाः सर्वे निरीक्षंते समागताः। त्वामप्रतिमकर्माणमप्रतिद्वंद्वमाहवे ॥ 12- G. 50. समागताः &c., P. is worm-eaten here.

वरायुधधरं वीरं साक्षाद्विष्णुमिवापरम् ॥ १८ ॥
न चेयं [1]मम काकुत्स्थ व्रीडा भवितुमर्हति ।
त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ १९ ॥
[2]इत्युक्तः स शरं रामो मुमोच रघुनन्दनः ।
लोकेषु जामदग्न्यस्य रामस्यामिततेजसः ॥ २० ॥
[3]ततः प्रभृति रामोऽभूदलोकः शरतेजसा ।
मुक्ते तस्मिन् शरे देवाः प्राशंसन् राघवं तदा ॥२१॥
[4]आकाशस्थविमानेषु स्वेषु दिव्येष्ववस्थिताः ।
आसन् वितिमिराः सर्वा दिशश्च विदिशस्तथा ॥२२॥
रामोऽपि जामदग्न्यस्तं रामं दशरथात्मजम् ।
प्रदक्षिणमुपावृत्य जगामाथ स्वमाश्रमम् ॥ २३ ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते
परशुरामलोकवधः ।

---

1. B. 19. तव &c. but V. & S. have मम &c. After this SL. B. (20) reads the additional SL. शरमप्रतिमं राम मोक्तुमर्हसि सुव्रत । शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमं ॥ 2. For this SL. B. 21. तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् । रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमं ॥ 3. For this & the following two Slokas B. 22-24. स हतान् दृश्य रामेण स्व लोकांस्तपसार्जितान् । जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमं ॥ ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा । सुराः सर्षिगणा रामं प्रशशंसुरुदायुधं ॥ रामं दाशरथिं रामो जामदग्न्यः (a) प्रपूजितः । ततः (b) प्रदक्षिणीकृत्य जगामात्मगतिं प्रभुः ॥ (a) V. & S. प्रशस्य ह । (b) V. & S. प्रदक्षिणं कृत्वा &c. 4. G. 54. आकाशगा &c. P. is worm-eaten here.

LXXIX.

[1]जामदग्न्ये गते रामे रामो दाशरथिर्धनुः ।
लब्ध्वा संदर्शयामास पितुः स्वबलनिर्जितम् ॥ १ ॥
[2]तांश्चाभिवादयांचक्रे वशिष्ठ[3]प्रमुखानृषीन् ।
प्रोवाच पितरं चेदं रामागमनविह्वलम् ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिनी ।
[4]अयोध्याधिपते सेना त्वया नाथेननाथिनी ॥ ३ ॥
[5]रामस्य तद्वचः श्रुत्वा राजा दशरथः सुतम् ।
बाहुभ्यां संपरिष्वज्य[6]मूर्द्ध्नि चाघ्राय राघवम् ॥४॥
[7]गतो राम इति श्रुत्वा प्राप्य हर्षमनुत्तमम् ।
योजयित्वा पुनः सैन्यं जगाम[8]स्वपुरं प्रति ॥ ५ ॥
[9]समुच्छ्रितध्वजवतीं तूर्यस्वनविनादिताम् ।
सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्कराम् ॥ ६ ॥

---

1. For this SL. B. LXXVII. 1. गते रामे प्रशांतात्मा रामो दाशरथिर्धनुः । वरुणायाप्रमेयाय ददौ हस्ते महायशाः ॥ 2. For this SL. B. 2. अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन् । पितरं (a) विकलं दृष्ट्वा प्रोवाच रघुनंदनः ॥ (a) V. & S. विह्वलं &c. 3. G. LXXVIII. 2 प्रभृतीनृषीन्, P. is illegible here. 4. B. 3. अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ G. 3. अयोध्याभिमुखो &c. 5. B. 4. रामस्य वचनं &c. G. 4. रामस्येतद्वचः &c. 6. B. 4. मूर्द्ध्न्युपाघ्राय &c. 7. For this SL. B. 5-6. गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः । पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ चोदयामास तां सेनां जगामाशु ततः पुरीं ॥ 8. G. 5. स्वपुरीं &c., but P. has स्वपुरं &c. 9. For this SL. B. 6-7. पताकाध्वजिनीं रम्यां तूर्योद्घु-

[1]राजप्रवेशाभिमुखीं पैारैर्मङ्गलवादिभिः ।
संकीर्णां प्राविशद्राजा पुरीं स्वं च निवेशनम् ॥ ७ ॥
[2]महेन्द्रभवनप्रख्यं नानारत्नमहर्द्धिमत् ।
कैाशल्या च सुमित्रा च कैकेयी च सुमध्यमा ॥ ८ ॥
[3]वधूप्रतिग्रहं चक्रुस्तथान्या राजयोषितः ।
सीतां रामस्य पत्नीं तामूर्म्मिलां लक्ष्मणस्य च ॥९॥
[4]कुशध्वजसुते चैव [5]परिवार्य्यानुगृह्य च ।
[6]ततः प्रवेशयामासुर्नृपवेश्म स्वलंकृताः ॥ १० ॥
[7]मङ्गलालभनीयैश्च शोभिताः क्षौमवाससः ।
उपनिन्युश्च[8] ता नार्यो देवतायतनान्यपि ॥ ११ ॥

पट निनादितां ॥ सिक्त &c. &c. 1. For this & the following SL. B. 7-10. राजप्रवेशसुमुखे. पैारैर्मंगलपाणिभिः ॥ संपूर्णां प्राविशद्राजा जनोघैः समलंकृतां । पैारैः प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः ॥ पुत्रैरनुगतः श्रीमान् श्रीमद्भिश्च महायशाः । प्रविवेश गृहं राजा हिमवत्सदृशं प्रियं ॥ ननंद स्वजने राजा गृहे कामैः सुपूजितः । कैासल्या च &c. G. 7. राजप्रवेशाभिमुखैः &c. 2 This line is wanting in G., P. is illegible. 3. For this SL. B. 11. वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः । ततः सीतां महाभागामूर्मिलां च यशस्विनीं ॥ G. 8. Line. 2. agrees with Line. 1. of this SL. in B, for the second line G. 9. has ततः सीतां श्रीप्रतिमामूर्मिलां च यशस्विनीं । P. is illegible here. 4. For this line B. 12. कुशध्वजसुते चोभे जगृहुर्नृपयोषितः । 5. G. 9. परिगृह्यानुगृह्य च. P. is illegible. 6. This line is wanting in B. 7. For this SL B. 12-13. मंगलालपनैर्होमैः शोभिताः क्षैामवाससः ॥ देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् । 8. G. 11. ता एता &c., P. तास्तत्र देवतायतनानि च ॥

[1]अभिवाद्याभिवाद्यांस्तांस्तत्र[2]पूज्यगुरूंस्तथा ।
[3]रमयाञ्चक्रिरे काले भर्तृप्रियवशानुगाः ॥ १२ ॥
[4]तासां भूयो विशेषेण मैथिली जनकात्मजा ।
रमयामास भर्त्तारं विष्णुं श्रीरिव रूपिणी ॥ १३ ॥
प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ।
प्रियभावः स तु तया स्वगुणैरभिवर्द्धितः ॥ १४ ॥
तथैव रामः सीतायाः [5]प्राणैः प्रियतरोऽभवत् ।
हृदयं ह्येव जानाति प्रीतियोगं परस्परम् ॥ १५ ॥
सीतया तु तया रामः प्रियया सह संगतः ।
प्रियोऽधिकतरं तस्या विजहारामरोपमः ॥ १६ ॥

तया स राजर्षिसुतोऽनुरूपया
समेयिवानुत्तम[6]राजकन्यया ।
अतीव रामः शुशुभे स कान्तया
स्वयं श्रिया विष्णुरिवापराजितः ॥ १७ ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते
अयोध्याप्रवेशः ।

---

1. For this SL. B. 13-14. अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ रेमिरे मुदिताः सर्वा (a) भर्तृभिर्मुदिता रहः । (a) V. has सहिता रहः । 2. G. 11. पूज्यान् &c. 3. G. 12. रेमिरे मुदितास्तत्र भर्तृप्रियहिते रताः । P. is worm-eaten here. 4. This and the following 4 Slokas are wanting in B. 5. G. 14. प्राणेभ्योऽपि प्रियोऽभवत् । 6. G. 16. रूप &c, P. is worm—eaten here.

LXXX

[1]कस्यचित्त्वथकालस्य राजा दशरथः सुतम् ।
भरतं केकयीपुत्रं[2]समाहूयेदमब्रवीत् ॥ १ ॥
अयं केकयराजस्य पुत्रो वसति पुत्रक ।
[3]त्वां नेतुमागतो [4]वीर युधाजिन्मातुलस्तव ॥ २ ॥
[5]तस्मान्मातामहं द्रष्टुमितोऽनेन सह त्वया ।
गन्तव्यं [6]पश्य पुत्र त्वं पुरं मातामहस्य तत् ॥ ३ ॥
श्रुत्वा दशरथस्यैतद् भरतः केकयीसुतः ।
[7]गमनायोपचक्राम शत्रुघ्नसहितस्तदा ॥ ४ ॥
[8]दृष्ट्वैव भ्रातरं तं वै[9]कैकेयी चाभ्युपागतम् ।
भरतञ्चाभ्यनुज्ञातं श्रुत्वा राजीवलोचनम् ॥ ५ ॥
अभवत्तत्र कैकेयी मुदा परमया युता ।
चिन्तयामास च तदा गमनं भरतस्य सा ॥ ६ ॥
ततोऽभ्यनुज्ञाप्य नृपं सुतं सुरसुतोपमम् ।
प्रेषयामास कैकेयी गृहान् पितृगृहं स्वकम् ॥ ७ ॥
अमात्यैर्बलमुख्यैश्च रथैश्च बहुभिर्युतम् ।

---

1. Before this SL of our text B. (LXXVII. 14-15) reads कृत दाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ शुश्रूषमाणाः पितरं वर्तयंति नरर्षभाः ॥ 2. B. 15. अब्रवीद्रघुनंदनः । 3. G. LXXIX. 2. नेतुं त्वाम् &c. 4. B. 17. वीरो &c. 5 This SL is wanting in B. 6. G. 3. पुत्र पश्य &c. 7. B. 18 गमनायाभिचक्राम &c. 8. This & the following 20. Slokas are wanting in B. 9. G, 5. कैकेय्योऽभ्युपागतं । P. is worm-eaten

यावच्छब्दस्य ग्रहणमिति स्पष्टमाकरे ॥ युक्तग्रहणं किम् । अन्यच साक्षादन्वितैरेतैः परंपरासंबन्धे मा भूत् । यत्र क्व च ते मनो दक्षं दधस उत्तरम् । यत्रेत्यस्योत्तरमित्यनेन साक्षात्संबन्धः । दध धारणे अनुदात्तेत् ॥

नह प्रत्यारम्भे । ८ । ३१ ॥

नहेति निपातसमुदायो निषेधे वर्तते । पूर्वं भुङ्क्ष्वेत्युक्ते कर्तव्यतयोपन्यस्तस्य भोजनादेरवज्ञानेऽवज्ञातुरुपालिप्सया पुनः क्रोधेनोपहासेन वा यत्र प्रतिषेधयुक्तं पृच्छ्यते स प्रत्यारम्भः । प्रतिषेधयुक्त आरम्भ इत्यर्थः । नहेत्यनेन युक्तं तिङन्तं नानुदात्तम् । न ह भोक्ष्यसे । प्रत्यारम्भे किम् । नह वैतस्मिन् लोके दक्षिणमिच्छति ।

सत्यं प्रश्ने । ८ । १ । ३२ ॥

सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने ॥ सत्यं भोक्ष्यसे । प्रश्ने किम् । सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम ॥

अङ्गाऽप्रातिलोम्ये । ८ । १ । ३३ ॥

अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम् ॥ अङ्ग कुरु । अप्रातिलोम्ये किम् । अङ्ग कूजति वृषलः । अनभिप्रेतमसौ कुर्वन् प्रतिलोमो भवति ॥

हि च । ८ । १ । ३४ ॥

हियुक्तं तिङन्तं नानुदात्तम् । आ हि ष्मा याति आ हि रुहतम् । अवधारणे हि शब्दः ॥ स्मशब्दो निपातत्वादाद्युदात्तः ।

छान्दसे दीर्घत्वषत्वे । अप्रातिलोम्ये इत्येव । नेह । हि कूज वृषल । अत्रामर्षे हिशब्दः ॥

छन्दस्यनेकमपि साकाङ्क्षम् । ८ । १ । ३५ ॥

हीत्यनेन युक्तं साकाङ्क्षमनेकमपि नानुदात्तम् । अपिना एकमपि । अनृतं हि मत्तो वदति पाप्मा नचैनं युनाति । हियंत इत्यर्थे । यतोऽयं मत्तोऽनृतं वदति अतः पाप्मा पापं न युनाति न व्याप्नोति । अनृतवदनदोषेण न युज्यते इत्यर्थः । युञ् बन्धने इत्यस्य रूपं युनातीत्याहुः तिङन्तद्वयमपि न निहन्यते । अग्निर्हि पूर्वमुदजयत्तमिन्द्रो नूदजयत् । अत्राद्यमजयदित्यट्स्वरेणाद्युदात्तम् । अपरं निहतमेव । अत्र हेतुहेतुमद्भावद्योतको हिरित्यनेकमपि तिङन्तं हियुक्तम् । तत्र पूर्वेण सर्वस्य निघातनिषेधे प्राप्ते क्वचिदेकस्य क्वचिदनेकस्येत्येतदर्थमिदम् । छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था ॥

यावद्यथाभ्याम् । १८ । १ । ३६ ॥

आभ्यां योगे तिङन्तं नानुदात्तम् । यावद्भुङ्क्ते । सकलं भुङ्क्ते इत्यर्थः । यथाचित्कण्वमावतम् । वतुबंतस्यापि यावच्छब्दस्य ग्रहणात् यावदस्य नेषःसरोजनेभ्यः कृणवत् इत्यत्र कृणवदित्यस्य लेडन्तस्य निघातप्रतिषेधः सिद्धः । परेणापि योगे भवति । देवदत्तः पचति यावत् देवदत्तः पचति यथेतिवृत्तिः ।

पूजायां नानन्तरम् । ८ । १ । ३७ ॥

यावद्यथाभ्यां युक्तं तिङन्तं पूजायां न नानुदात्तम् । प्रतिषेधप्रतिषेधोऽयम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । पूजायां

किम् । यावद्भुङ्क्ते । यथा भुङ्क्ते । अनन्तरं किम् । यावद्देवदत्तः पचति शोभनम् । पूर्वेणाच निघातः प्रतिषिध्यते ।

उपसर्गव्यपेतं च । ८ । १ । ३८ ॥

पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधानार्थं वचनम् । यावत्प्रपचति शोभनम् । यथा प्रपचति शोभनम् । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति शोभनम् ।

तुपश्यपश्यताहैः पूजायाम् । ८ । १ । ३९ ॥

एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम् । माणवकस्तु भुङ्क्ते शोभनम् । पश्य माणवको भुङ्क्ते शोभनम् । पश्यत माणवको भुङ्क्ते शोभनम् । आदह स्वधामनु पुनर्गर्भत्वमेरिरे । पूजायां किम् । पश्य मृगो धावति । तत्वकथनमेतत् । पूजायामिति वर्तमाने पुनः पूजाग्रहणमनन्तरग्रहणस्यानिघातनिषेधस्य चानुवृत्तिनिवृत्त्यर्थम् । निषेधानुवृत्तौ तु निपातैर्यद्यदीत्यस्य प्रतिषेधः संभाव्येत ॥

अहो च । ८ । १ । ४० ॥

एतद्योगे तिङन्तं नानुदत्तं पूजायाम् । अहो देवदत्तः पचति शोभनम् । पृथग्योगकरणमुत्तरार्थम् ।

शेषे विभाषा । ८ । १ । ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं वानुदात्तमपूजायाम् । अहो कटं करिष्यति । असूयावचनमेतत् । शेषग्रहणं स्पष्टार्थम् । पूर्वेच चानुकृष्टत्वादेव पूजायामित्यस्य निवृत्तेर्योगविभागसामर्थ्याच्च । पूजायां नित्यं तदभावे विकल्प इति व्यवस्थोपपत्तेः ।

पुरा च परीप्सायाम् । ८ । १ । ४२ ॥

पुरेत्यनेन युक्तं तिङन्तं वानुदात्तं त्वरायाम् । अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामिन्यत्र पुराशब्दः विद्योतनादावध्ययनं प्रतिषिद्धमतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यते । परीप्सायां किम् । न तेनस्म पुराधीयते । चिरातीतेऽत्र पुरा ।

नन्वित्यनुज्ञैषणायाम् । ८ । १ । ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तमनुप्रार्थनायाम् । ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । अन्विति किम् । अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतत् । नन्वित्यस्यैकनिपातत्वं ज्ञापयितुमितिशब्दः ।

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् । ८ । १ । ४४ ॥

क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम् । किं द्विजः पठत्याहोस्विद्गच्छति । क्रियेति किम् । साधनप्रश्ने मा भूत् । किं भक्तं पचत्यपूपान्वा । प्रश्ने किम् । किं पठति । क्षेपोऽयम् । अनुपसर्गं किम् । किं प्रपचति । उत प्रकरोति । अप्रतिषिद्धं किम् । किं द्विजो न पचति ।

लोपे विभाषा । ८ । १ । ४५ ॥

क्रियाप्रयोगे पूर्वविषये उक्तं वा । देवदत्तः पचत्याहोस्वित्पठति ।

एहि मन्ये प्रहासे ऌट् । ८ । १ । ४६ ॥

एहि मन्ये इत्यनेन युक्तं ऌडन्तं नानुदात्तं क्रीडायाम् । गत्यर्थलोटा ऌडित्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहि मन्ये युक्ते

प्रहासे यत्र नान्यचेति । एहि मन्ये भक्तं भोक्ष्यसे न हि भोक्ष्यसे भुक्तं तत्त्वतिथिभिः । प्रहासे किम् । एहि मन्ये ओदनं भोक्ष्यसे । अप्रहासेपि वैयधिकरण्यादुत्तमप्रयोगः । एहि त्वमोदनं भोक्ष्यसे इत्यहं मन्ये इत्यर्थः । भोक्ष्यसे इत्यस्य निघातो भवत्येव । उत्तमस्यातंत्रत्वादेहि मन्यसे ओदनं भोक्ष्ये सुष्ठु मन्यसे इत्यत्रापि नियमादनिघाताभाव इति केचिदाहुः ।

जात्वपूर्वम् । ८ । १ । ४७ ॥

अविद्यमानपूर्वं यज्जातु तेन युक्तं तिङन्तं नानुदात्तम् । जातु भोक्ष्यसे । अपूर्वं किम् । कटं जातु करिष्यति ।

किंवृत्तं च चिदुत्तरम् । ८ । १ । ४८ ॥

अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यंतं डतरडतमान्तं किमो रूपं किंवृत्तम् । कश्चिद् भुङ्क्ते । कतरश्चित् कतमश्चिद्वा । चिदुत्तरं किम् । को भुङ्क्ते । अपूर्वमित्येव । रामः किंचित्पठति ।

आहो उताहो चाऽनन्तरम् । ८ । १ । ४९ ॥

आहो उताहो इत्याभ्यामपूर्वाभ्यां युक्तं तिङन्तं नानुदात्तम् । आहो उताहो वा भुङ्क्ते । अनन्तरमित्येव । शेषे विभाषां वक्ष्यति । अपूर्वेति किम् । देव आहो भुङ्क्ते ।

शेषे विभाषा । ८ । १ । ५० ॥

आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम् । आहो देवः पचति । अपूर्वाभ्यामित्येव । तेनायमाहो देवो वर्षतीत्यत्र निहतमेव ।

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् । ८ । १ । ५१ ॥

गत्यर्थानां लोटा युक्तं तिङन्तं नानुदात्तम् यत्रैव कारके लोट् तत्रैव लृडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यसि । उह्यन्तां दत्तेन शालयः रामेण भोक्ष्यंते । गत्यर्थेति किम् । पच देव ओदनं भोक्ष्यसेऽन्नम् । लोटा किम् । आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम् । लृट् किम् । आगच्छ देव ग्रामं पश्यस्येनम् । न चेदिति किम् । आगच्छ देव ग्रामं पिता ते ओदनो भोक्ष्यते । सर्वेति किम् । आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातनिषेधो यथा स्यात् । यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते ।

लोट् च । ८ । १ । ५२ ॥

लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम् । आगच्छ देव ग्रामं पश्य । गत्यर्थेति किम् । पच देवौदनं भुङ्क्ष्वेनम् । लोट् किम् । आगच्छ देव ग्रामं पश्यसि । न चेत्कारकं सर्वान्यदित्येव । आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्वग्रहणात्त्विह स्यादेव ग्रामं त्वं चाहं च पश्याव । योगविभाग उत्तरार्थः ॥

विभाषितं सोपसर्गमनुत्तमम् । ८ । १ । ५३ ॥

लोडन्तं गत्यर्थलोटा युक्तं वानुदात्तं न चेत्कारकं सर्वान्यत् । प्राप्तविभाषेयम् । आगच्छ देव ग्रामं प्रविश । सोपसर्गं किम् । आगच्छ देव ग्रामं पश्य । अनुत्तमं किम् । आगच्छानि देव ग्रामं प्रविशानि ।

हन्त च । ८ । १ । ५४ ॥

हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश ।

सोपसर्गमित्येव । हन्त कुरु । निपातैर्यदिति निघातप्रतिषेधः । अनुत्तमं किम् । हन्त प्रभु भजावहै ।

आम एकान्तरमामन्त्रितमनन्तिके । ८ । १ । ५५ ।

आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तमनन्तिके यन्न सन्निहितं नापि दूरं तत्रेत्यर्थः । अत एवोदाहरणे प्लुतैकश्रुती न । आम् पचसि देवदत्त । आमन्त्रितत्वादाद्युदात्तत्वम् । आम् भो देवदत्तेत्यत्र नामन्त्रित इत्यविद्यमानवत्त्वनिषेधादेकान्तरत्वम् । आमः किम् । शाकं पचसि देवदत्त । एकान्तरं किम् । आम्प्रपचसि देवदत्त । आमन्त्रितं किम् । आम् पचति देवदत्तः । अनन्तिके किम् । आम् पचसि देवदत्त । अत्रान्तिकत्वान्नैकश्रुतिः । किन्तु निघात एव । भाष्येऽनन्तिकं दूरमिति पक्षांतरमप्युक्तम् तत्र सामर्थ्यादेकश्रुतेर्निषेधः । अन्यथा निघातस्यैकश्रुत्या बाधितत्वादिदं व्यर्थमेव स्यात् । अत एव तस्यादित उदात्तमर्द्धह्रस्वमित्यारभ्य नवसूत्र्याः स्वस्थानादुत्कर्षेण अ अ इत्यतः प्राक् स्थापनेनैकश्रुतेरसिद्धत्वेपि तदभावोपि बोध्यः । प्रकरणाच्च निघातस्यापि निषेधः । अन्यथैकश्रुतिप्रकरणे एव नाम एकांतरमिति वदेत् तेनैकश्रुतौ निषिद्धायां निघातोपि न भवति । प्लुतोदात्तत्वस्य तु नायं प्रतिषेधः । अस्मिन्पक्षे आम एकान्तरे ऐकश्रुत्यप्रतिषेध इति वार्तिकादिति दिक् ।

यद्धितुपरं छन्दसि । ८ । १ । ५६ ॥

तिङन्तं नानुदात्तम् । उदसृजो यदङ्गिरः । इन्दवो वामुशन्तिहि । आख्यास्यामि तु ते । निपातैर्यदिति हिचेति तुपश्येति च सिद्धे नियमार्थमिदम् । एतैरेव परभूतैर्योगे नान्यैरिति । जाये

स्वारोहावेहि । एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति ।

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ।८।१।५७॥

एषु षट्सु परतस्तिङन्तं नानुदात्तम् । देवः पचति च न । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचति पचति । अगतेः किम् । देवः प्रपचति चन । अनेन गतिशब्देनोपसर्गस्यैव ग्रहणमिष्यते । नेह । शुक्लीकरोति चन । अत्र निघातः प्रतिषिध्यत एव । कुत्सनाभीक्ष्ण्ययोरेव गोत्रादीनीत्युक्तम् । नेह । सुखिकरोति गोत्रम् । अत्र निघात एव ।

चादिषु च । ८ । १ । ५८ ॥

न च वाहेति सूत्रनिर्दिष्टाश्चादय इह गृह्यन्ते । संनिकृष्टत्वात् । चवाहाहैवेषु परेषु तिङन्तं नानुदात्तम् । देवः पचति च खादति च । खादतीत्यस्य न निघातप्रसंगः । नानावाक्यत्वात् । समुच्चयविकल्पयोरनेकधर्मत्वात्परन्तदुक्तिः । अगतेरित्येव । देवः प्रपचति च प्रखादति च । प्रथमस्य च वा योगे इति निघातः प्रतिषिध्यते । तत्रागतेरित्यस्य पूर्वसूत्रे चानुकृष्टत्वान्निवृत्तेः । द्वितीयं तु निहन्यत एव ।

चवायोगे प्रथमा । ८ । १ । ५९ ॥

चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता ॥ गांश्च चारयति वीणां च वादयति । इतो वा सातिमीमहे । उत्तरवाक्ययोरनुषंजनीयतिङन्तापेक्षयेयं प्राथमिकी । योगे किम् । पूर्वभूतयोरपि योगे निघातप्रतिषेधो यथा स्यात् । प्रथमाग्रहणं तु द्वितीयादेस्तिङन्तस्य

निषेधाभावार्थम् लचापि योगोऽस्त्येव । चवायोगो हि समुच्चये विकल्पे वा सति भवति सह्यनेकस्य धर्मः ।

हेति क्षियायाम् । ८ । १ । ६० ॥

हयुक्ता प्रथमा तिङन्तविभक्तिर्नानुदात्ता धर्मव्यतिक्रमे । स्वयं ह रथेन याती ३ उपाध्यायं पदातिं गमयति । क्षियाशीरिति प्लुतः ।

अहेति विनियोगे च । ८ । १ । ६१ ॥

अहयुक्ता प्रथमा तिङन्तविभक्तिर्नानुदात्ता नानाप्रयोजनके नियोगे क्षियायां च । त्वमह ग्रामं गच्छ । त्वमह रथेनारण्यं गच्छ क्षियायाम् । स्वयमह रथेन याती ३ उपाध्यायं-पदातिं नयति ।

चाहलोप एवेत्यवधारणम् । ८ । १ । ६२ ॥

च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्तैवेत्येतच्चेदवधारणार्थं प्रयुज्यते । देव एव ग्रामं गच्छतु । देव एवारण्यं गच्छतु । ग्रामं चारण्यं च गच्छत्वित्यर्थः । देव एव ग्रामं गच्छतु । राम एवारण्यं गच्छतु । ग्रामं केवलं अरण्यं केवलं गच्छत्वित्यर्थः । इहाह लोपः स च केवलार्थः । समानकर्तृके चशब्दस्य लोपः । नानाकर्तृके त्वहशब्दस्य । अवधारणं किम् । देव क्वेव भोक्ष्यसे । देव क्वेव अध्येष्यसे । न क्वचिदित्यर्थः । अनवक्लृप्तावेतः ।

चादिलोपे विभाषा । ८ । १ । ६३ ।

चवाहाहेवानां लोपे प्रथमा तिङ्विभक्तिर्वानुदात्ता । चलोपे शुक्ला व्रीहयो भवन्ति । श्वेता गा आज्याय दुहन्ति । समानकर्तृके चलोप इति नियमो ऽवधारणार्थैवशब्दप्रयोगे एव । न तु सर्वेत्य-

स्त्यत्र चलोप इति पाक्षिको निघाताभावोऽत्र भवति । इन्द्र वाजेषु नोवेत्यत्र तु चलोपेऽपि अवेत्यस्य निघात एव । अस्य निषेधस्य वैकल्पिकत्वात् । अतस्तन्निघाताभावस्य नोदाहरणम् । वालोपे व्रीहिभिर्यजेत । यवैर्यजेत ॥

वैवावेति च छन्दसि । ८ । १ । ६४ ॥

वै वाव इत्याभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता ॥ अहर्वै देवानामासीत् । रात्रिर्वा असुराणामासीत् । अयं वाव हस्त आसीत्। नेतर आसीत् । वै स्फुटार्थे अक्षमायां च वावेति प्रसिद्धौ स्फुटार्थे च।

एकान्याभ्यां समर्थाभ्याम् । ८ । १ । ६५ ॥

आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता छन्दसि । अजामेकां जिन्वति । प्रजामेकां रक्षति । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति । समर्थाभ्यां किम् । एको देवानुपातिष्ठत्। एक इति संख्यापरं नान्यार्थम् ।

यद्वृत्तान्नित्यम् । ८ । १ । ६६ ॥

इह यत्र पदे यच्छब्दस्तत्सर्वं यद्वृत्तम् न तु विभक्त्यन्तं डतरडतमन्तं च यदो रूपं तदेव ततः परं तिङन्तं नानुदात्तम्। यो भुङ्क्ते । यदध्यङ् वायुर्वाति । अत्र व्यवहितेऽपि कार्यमिष्यते ॥ वा याथाकाम्ये इति वक्तव्यम् ॥ * ॥ याथाकाम्यं यथेच्छं प्रवृत्तिर्देशकालावनपेक्ष्य तत्र गम्यमाने वा निघातप्रतिषेधः । यत्र क्वचन यजते ॥

पूजनात्पूजितमनुदात्तम् । ८ । १ । ६७ ॥

काष्ठादिभ्यः इति वक्तव्यम् काष्ठादयोऽद्भुतपर्यायाः पूजनवचना भवन्ति । उत्तरसूत्रे तिङ्ग्रहणादिदं सुबन्तविषयम् । पूजनवचनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः ॥ मलोपश्च वक्तव्यः ॥ * ॥ दारुणाध्यापकः । दारुणाभिरूपकः । अज्ञाताध्यापकः । अध्यापनमाभिरूप्यं च दारुणादिशब्देन विशेष्यते इति दारुणादिशब्दस्य क्रियाविशेषणत्वान्नपुंसकत्वं कर्मत्वं च यथा ग्रामं गत इत्यादौ गुणभूताया अपि क्रियायाः साधनेन योगस्तयाच विशेषणेनापीति । दारुणं यदध्यापनं तत्कर्तेति बोधे वैयधिकरण्यात्समासाभावान्मलोपो विधीयते । एवं च दारुणमध्यापक इति प्रयोगो नैव भवति । वृत्तिकारास्तु असमासे नेव मलोप इष्यते । केन तर्हि समासो भवति । मयूरव्यंसकादित्वात् । कस्मादिह न भवति । दारुणमध्यापक इति समासान्तोदात्तत्वापवाद एतत्समासे इष्यते । मलोपश्चेत्यनेनापि अयमेव विषय आख्यायते । यत्र विभक्तेरभावान्मकारो न श्रूयते तत्रानुदात्तत्वमितीत्याहुः ॥ पूजनादित्येव संबन्धिशब्दत्वात्पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयते इति तेन पूर्वसूत्रे व्यवहितेऽपि कार्यसिद्धिः । पूजनात्किम् । दारुणाध्यापकः । दारुणसंज्ञक इत्यर्थः । काष्ठादिभ्यः किम् । शोभनाध्यापकः ।

सगतिरपि तिङ् ।८।१।६९॥

पूजनेभ्यः काष्ठादिभ्यः परं सगतिकमपिनाऽगतिकं च तिङन्तं पूजितमनुदात्तम् । यत्काष्ठं प्रपचति । यत्काष्ठं पचति । यद्दारुणं पचति । इह मलोपो न । पूर्वसूत्रसन्नियोगशिष्टत्वात्तस्य च सुबन्त-

विषयत्वस्योक्तत्वात् । एतदर्थमेवागतिकस्य निघातार्थमपिग्रहणम् । तेनैवागतिकस्य निघाते इष्यमाणे तु मलोपः स्यात् । तिङ्ङतिङ इति निघातस्य निपातैर्यदिति निषेधे प्राप्ते विधिरयम् । सगतिरिति सह शब्दस्तुल्ययोगे । तेन गतिरपि निहन्यते । अपापि गतिग्रहणेनो-पसर्गग्रहणमिष्यते ॥ * ॥ नेह । यत्काष्ठं शुक्लीकरोतीति । चनचिदि वेत्यत्र भाष्ये स्पष्टम् ।

कुत्सने च सुप्यगोत्रादौ । ८ । १ । ६९ ॥

इतः प्रभृति पदादित्यधिकारो निवृत्तः । कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः । पचति पूति । प्रपचति पूति । पचति मिथ्या । प्रपचति मिथ्या । पूतिशब्दः कुत्सित-वाची क्रियाविशेषणत्वान्नपुंसकत्वम् । कुत्सने किम् । प्रपचति शोभ-नम् । सुपि किम् । पचति क्लिश्नाति । पाकक्रियाकर्तृकः क्लेश इत्यर्थः । अगोत्रादौ किम् । पचति गोत्रम् ॥ क्रियाकुत्सने इति वाच्यम् ॥*॥ कर्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः ॥ पूतिश्चानुबन्ध इति वाच्यम् ॥ * ॥ तेनायं चकारानुबन्धत्वादन्तोदात्तः । अयं भावः । पूतिरयमिति सामानाधिकरण्यदर्शनात्पूतिशब्दो न क्तिन्-न्तो नापि क्तिजन्तोऽसंज्ञात्वात्तस्मादव्युत्पन्नं प्रातिपदिकम् । तत्र प्रातिपदिकस्वरेणान्तोदात्तत्वे सिद्धे निघातनिमित्तस्यैव तस्यान्तो-दात्तत्वं यथा स्यादन्यत्र त्वाद्युदात्तत्वमिति वचनमित्याहुः । नन्वाद्युदात्तत्वं लक्षणाभावात्कथं स्यात् । एवं तर्हि वसेस्तिबिति तिबन्तो बाहुलकादुत्पाद्यः । तत एव गुणाभावोऽपि बोध्य इती-त्याहुः ॥ वा बह्वर्थमनुदात्तमितिवाच्यम् ॥ * ॥ पचन्ति पूति ।

यदि त्वत्र पदादित्यनुवर्तेत। देवदत्तो यत्पचति पूतीत्यत्रैव तिङन्तस्य निघातः स्यान्न तु पचति पूतीत्यत्र। इदानीं तु यत्पचतिपूतीत्याद्यावपीदं परत्वात्प्रतिषेधान्बाधते॥

गतिर्गतौ। ८। १। ७०॥

अनुदात्तः। अभ्युद्धरति। अभिसंहरति। गतिः किम्। दत्तः प्रपचति। गतौ किम्। आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः।

तिङि चोदात्तवति। ८। १। ७१॥

गतिरनुदात्तः। यत्प्रपचति। यच्छुक्लीकरोति। अत्र पूर्वे श्चित्वेपि चित्स्वरो येन नाप्राप्तिन्यायेन निपातायुदात्तत्वमेव बाधते न त्वेतम्। तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्। अन्यथा हि यं प्रति गतिस्तत्र धात्वावेवोदात्तवति स्यात्। इह तु प्रत्यये उदात्तवति न स्यात्। यत्प्रकरोतीति। उदात्तवति किम्। प्रपचति।

आमन्त्रितं पूर्वमविद्यमानवत्। ८। १। ७२॥

स्पष्टम्। अग्ने तव देवास्मान्पाहि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशास्तिङन्तनिघात आमन्त्रितनिघातश्च न। सर्वदा रक्ष देव न इत्यत्र तु देवेत्यस्याविद्यमानवद्भावेपि ततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः। एवमिमन्मे गङ्गे यमुने सरस्वतीति मन्त्रे यमुने इत्यादिभ्यः प्राचीनामन्त्रिताविद्यमानवद्भावेपि मेशब्दमेवाश्रित्य सर्वेषां निघातः।

नामन्त्रिते समानाधिकरणे सामान्यवचनम्।८।१।७३॥

विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत्स्यात्॥ हरे दयालो नः पाहि। अग्ने तेजस्विन्। अग्ने

चातः । सामान्यवचनं किम् । पर्यायेषु मा भूत् । अघ्न्ये देवि सरस्वति सामान्यवचनम् ।

विभाषितं विशेषवचने । ८ । १ । ७४ ॥

अत्र भाष्यकृता बहुवचनमिति पूरितम् । सामान्यवचनमिति च पूर्वसूत्रे योजितम् । आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा । देवीः षडुर्वरुरु नः कृणोत । अत्र देवीनां विशेषणं षडिति । तस्मिन्परे देवीरित्यामन्त्रितं नाविद्यमानवत् । तेन षडित्यस्य निघातो वैकल्पिकः । देवाः शरण्याः । इह द्वितीयस्य निघातो वैकल्पिकः ॥

इत्योरम्भट्टेन श्रीधोंडभट्टविश्वरूपात्मजेन वैद्यनाथभट्टविश्वरूपापरनामधेयेन विरचितायां व्याकरणदीपिकासमाख्यायां पाणिनिसूत्रवृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

अष्टमाऽध्यायस्य द्वितीयः पादः ।

पूर्वत्रासिद्धम् । ८ । २ । १ ॥

आ आध्यायपरिसमाप्तेरधिकारोयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् । हर यहि । विष्ण इह । श्रिया उद्यतः । गुरा उत्कः । इह लोपः शाकल्यस्येति लोपशास्त्रस्यासिद्धत्वान्न सरसन्धिः । अमुष्मै । अमुष्मात् । इह मुत्वस्यासिद्धत्वात् स्मायादयो भवन्ति । मनोरथः । मनस् रथ इत्यत्र रुत्वे कृते हशिचेत्युत्वं बाधित्वा परत्वाद्रोरीति लोपे प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव ॥ गुडलिण्मान् । गुडलिहोस्य सन्तीति मतुप् । अत्र ढत्वस्यासिद्धत्वाज्झय इति वत्वं न भवतीति दिक् ॥

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति । ८ । २ । २ ॥

सुब्विधौ स्वरविधौ संज्ञाविधौ कृतितुग्विधौ च नलोपोऽसिद्धो नान्यत्र । राजाश्व इत्यादौ । सुब्विधिशब्देन सुप्त्वव्याप्यधर्मावच्छिन्नोद्देश्यकविधेरेव ग्रहणम् । अन्यथा दण्डिष्वित्यादौ षत्वरूपसुब्विधावप्यसिद्धत्वविधानार्थत्वापत्त्या वैरूप्यापत्तेः । सुब्विधौ । राजभ्याम् । राजभ्यः । राजभिः । अत्र नलोपस्य नलोपः सुबित्यसिद्धत्वादात्वमेत्वमैस्त्वं च न भवति । स्वरविधौ । पञ्चार्मम् । अत्र दिक्संख्ये संज्ञायामिति समासे नलोपे कृते अवर्णान्तं पूर्वपदं जातमित्यर्मे चावर्णं द्व्यच् त्र्यजिति पूर्वपदाद्युदात्तत्वं प्राप्तं

नलोपस्यासिद्धत्वान्न भवति । संज्ञाविधौ पञ्च सप्त ब्राह्मण्यः । अत्र नलोपे कृतेऽपि ष्णान्ता षडिति षट्संज्ञां प्रति नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वान्न षट्स्वस्रादिभ्य इति टाप् न भवति । कृति किम् । वृचहच्छत्रम् । छे चेति तुक् स्यादेव ।

न मुने । ८ । २ । ३ ॥

नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात् ॥ अमुना । कृतेऽपि नाभावे मुभावस्यासिद्धत्वनिषेधात्सुपिचेति दीर्घो न भवति ।

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।८।२।४।।

उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् ॥ अभ्यभि हि । अभिरुपसर्गाश्चाभिर्जमित्युक्तेः फिष इत्यन्तोदात्तः । नित्यवीप्सयोरिति द्वित्वम् । अनुदात्तं चेति परोऽनुदात्तः । पूर्वस्य यणि उदात्तयणः परत्वात्स्वरितः । स्वरितयणः । खलप्व्याशा खलं पुनातीति क्विप् । उपपदसमासः । कृदुत्तरप्रकृतिस्वरेणान्तोदात्तत्वम् ङौ परतः । ओःसुपीति यणादेशः । तस्मात्परस्य ङेः सुप्त्वादनुदात्तस्योदात्तयणो हल्पूर्वादित्युदात्तत्वे प्राप्ते नोङ्धात्वोरिति निषिद्धेऽनेन स्वरितस्तस्य यणि ततः पराशाशब्दाद्याकारस्यानेन स्वरितः । आशाशब्दः आशाया अदिगाख्या चेदिति फिट्सूत्रेणान्तोदात्तः । आशाशब्दप्रथमाकारे जातस्यास्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वात् । शाशब्दाकारस्य शेषनिघातो न । नन्विकारस्थानिकयणं प्रति स्वरितस्यासिद्धत्वात्स्थानिन्येव यण् प्रवृत्त इति नास्य स्वरितयणः परत्वम् । न चोजढदित्यादौ

अन्तरङ्गत्वात् ढन्वादिषु कृतेषु हतशब्दमुख्या ढशब्दे द्वित्वं प्रवर्तते यथा तथाच स्वरितबुद्ध्यभावेऽपि । वस्तुतः स्वरितस्यानिकयणा सत्वाददोषइति वाच्यम् । वाक्यसंस्कारपक्षे स्वरितयणोरेककालप्रवृत्तिकत्वेन तथा वक्तुमशक्यत्वात् । न च स्वरितयण इत्याश्रयात्सिद्धत्वम् । अतिप्रसङ्गात् । उदात्तादनुदात्तस्येति विहितस्यापि सिद्धत्वापत्तेः । तथा च प्रत्यग्निरित्यादावपि एतत्प्रवृत्त्यापत्तिः । न च नोदात्तस्वरितोदयमिति निषेधः । अनन्तरस्येति न्यायेनोदात्तादनुदात्तस्येति स्वरितस्यैव तेन निषेधात् । अन्यथा खलप्व्याशान्यग्निमित्यादावप्यस्य निषेधापत्तिः । अत एव तित्स्वरितं स्वरितो वानुदात्ते इत्यादीनां न निषेध इति चेन्न । योगविभागेन भाष्ये एव समाधानात् । उदात्तयणः । उक्तोऽर्थः । ततः स्वरितयणः । इह पूर्वसूत्रमनुवर्तते । उदात्तयण इत्येवं निर्वृत्तस्वरितस्यानिकयणः परस्येत्यर्थः । एवं चास्यैवाश्रयात्सिद्धत्वं नान्यस्येति न दोषः । यद्वा इह स्वरितग्रहणं न करिष्यते । खलप्व्याशा इत्यादावप्युदात्तयण परत्वादेव सिद्धम् । न च स्वरितयणा व्यवधानं स्वरविधौ व्यञ्जनस्याविद्यमानवत्त्वात् । न चैवं सत्यग्ने इत्यादौ वेदेत्यकारकारे पठ्यमानस्वरितासंगतिः । तत्र हि सन्तीतीकारस्योदात्तादनुदात्तस्येति स्वरितत्वम् । तच्च सन्तीति प्रत्ययस्वरेणाद्युदात्तं तेन शेषनिघातः । अग्ने इत्यामन्त्रितानुदात्तमिति वाच्यम् । सशब्दाकारमाश्रित्योदात्तादनुदात्तस्येत्येवाग्निशब्दाकारस्य स्वरितसिद्धेः । न च स्थानिवद्भावादचा व्यवधानम् । पूर्वत्रासिद्धीये तन्निषेधात् । एतेन द्वितीयपक्षोऽयुक्तः । स्थानिवद्भावेनाचा व्यवधानात् । व्यञ्जनस्य ह्यविद्यमानवत्त्वं नत्वच इति वृत्त्युक्तमपास्तम् । स्वरे कर्तव्ये

लोपाजादेश एव न स्थानिवदिति नियमस्तु स्वरविधौ नेति प्रतिपदोक्तस्यैव निषेधस्य न तु पूर्वत्रासिद्धीयत्वप्रयुक्तस्येत्याहुः । केचित्तु एकपदाश्रयत्वादन्तरङ्गं स्वरितपदद्वयाश्रयस्तु यण् बहिरङ्गः । ततोऽसिद्धं बहिरङ्गमन्तरङ्गइति यणोऽसिद्धत्वात्पूर्वत्रेति निर्दिष्टविषयाभावाद्यणोऽसिद्धत्वप्रसङ्गः स्वरितस्य नास्तीत्याहुः ॥ उदात्तस्वरितयोरिति किम् । वेदी आशा वेद्याशा । शार्ङ्गरव्याशा । अनुदात्तस्येति किम् । कुमार्यत्र । अत्रेत्ययमाद्युदात्तो लित्स्वरेण ।

एकादेश उदात्तेनोदात्तः । ८ । २ ५ ॥

उदात्तेन सहैकादेश उदात्तः स्यात् । वोश्वाः क्वावर मरुतः । अवरशब्दः स्वाङ्गशिटामित्याद्युदात्तः । उदात्तयोरेव स्थानित्वे आन्तरत म्यादेव सिद्धम् । अन्यतरस्यानुदात्तत्वे स्वरितत्वे वा सिद्धं तूभयान्तर्यादिति न्यायेनान्तरतम्यात्स्वरिते प्राप्ते विधिरयम् । यदि तु तस्यादित इति सूत्रभाष्ये सुब्रह्मण्याशब्देन स्वरितान्तेनोमित्युदात्तस्यैकादेशः स्वरितस्तस्य न सुब्रह्मण्यामित्यनेनोदात्त इत्युक्तेरत्र सूत्रे ऽनुदात्तस्येत्यस्यानुवृत्तिर्लभ्यते इत्युच्यते । तदा क्वावरमिति बह्वृचानामुदात्तपाठश्छान्दसत्वाद्बोध्य इत्याहुः उदात्तेनेति किम् । पचन्ति । लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः ॥

स्वरितो वानुदात्ते पदादौ । ८ । २ । ६ ॥

अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् । पक्षे पूर्वसूत्रेणोदात्तः । वीऽदं ज्योतिर्हृदये । विर्निपातत्वादाद्युदात्तः । इदम्शब्दः फिट्स्वरेणान्तोदात्तः । अस्य श्लोको

दिवीयते । दिवीति विभक्तिरूपमिदं पदादीत्युदात्ता । ईडो दिवादेरीयत इति तिङ इति निहतम् । व्यवस्थितविभाषात्वाद्ध्रस्वेकारयोः स्वरितः । दीर्घप्रवेशे तूदात्तः । किञ्च यद्यपि गाङ्गेऽनूपे इत्यत्रापमेकादेशः स्वरितो वेति भाष्ये उक्तम् । गङ्गाया इदमिति तस्येदमित्यण् । प्रत्ययस्वरेणान्तोदात्तः । ततो ङिः सुप्त्वादनुदात्तः । तयोरेकादेश उदात्तः । अपोनुगतमनूपमिति प्रादिसमासः । तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरे प्राप्ते अनोरप्रधानकनीयसी इत्युत्तरपदमन्तोदात्तं शेषनिघातस्तथापि वेदे एङः पदान्तादिति पूर्वरूपे स्वरित एव । तेऽवदन् । सोऽयमागात् । उक्तं च प्रातिशाख्ये

इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु च ।
उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेदिति ॥

ह्रस्वेकारयोः प्रश्लेषे क्षैप्रसन्धिषु चाभिनिहतसन्धिषु च अविशेषेण उदात्तपूर्वरूपेषु अनुदात्तोत्तररूपेषु शाकल्यस्य मते स्वरितः कार्य इति तदर्थः । एवमिति स्वरितनिर्देशः । स्रुचीव घृतं यो जान्विन्द्रते हरी ते वर्धन्तस्वत वस इति क्रमेणोदाहरणानीति तद्भाष्यकृतः । सन्धिविशेषस्य क्षैप्र इति संज्ञा तद्विशेषस्याभिनिहितेति प्रातिशाख्ये । द्वितीयपटले स्थितं हि एङःपदान्तादित्यादिरभिनिहितसन्धिः । ह्रस्वद्वयस्यानिकसवर्णदीर्घगुणवृद्ध्यादिः प्रश्लिष्टसन्धिः । दीर्घद्वयस्यानिकसवर्णदीर्घयणादिः क्षैप्रसन्धिरित्युक्तम् । स्वरितग्रहणं शक्यमकर्तुम् । वानुदात्ते पदादावित्येवोदात्ते विकल्पिते आन्तर्यतः पक्षे स्वरितसिद्धेः । न चानेन स्वरितेन वर्ज्यमानता मा भूदित्यर्थं स्वरितविधानमिति वाच्यम् । पदद्वयाश्रयत्वेनैकादेशस्य बहिरङ्गासिद्धत्वेनान्तर्यत आगतस्य तदाश्रितस्य स्वरितस्यापि बहिरङ्गासिद्धत्वेन

तेन सहैकपदविषयस्वरे चरितार्थस्यानुदात्तम्पदमित्यस्यैकवाक्यताया अभावेनैव वर्ज्यमानताया अभावसिद्धेः अतएव क्रियमाणेपि स्वरितग्रहणे कन्यानूपे इत्यत्र वर्ज्यमानता न । कन्याशब्दः कन्याराजन्यमनुष्याणामन्तइत्यन्तस्वरितः। ततः स्वरितानुदात्तयोरेकादेशः आंतर्यतः स्वरित इति स्पष्टं भाष्यकैयटयोः । अनुदात्ते किम् । देवदत्तोऽत्र। पदादौ किम्। वृचौ ॥ एकादेशस्वरोवान्तरङ्गः सिद्धो वक्तव्यः । वृक्षयिदम् । एकादेशस्वरस्य सिद्धत्वादान्तर्यत उदात्त अयादेशो भवति । गाङ्गे ऽनूपे गांगे । इत्येकादेशस्वरस्य सिद्धत्वादेङः पदान्तादित्येकादेशः स्वरितो वेति पक्षे स्वरितः । अन्यथैकादेशं प्रत्युदात्तत्वासिद्धत्वे आन्तर्यकृतस्वरितबुद्धिसत्वात्स्वरितानुदात्तयोरेकादेशः स्वरित एव स्यात् । न तु कदाचिदुदात्तः । तुदती । एकादेशस्वरस्य सिद्धत्वात् शतुरनुमो नद्यजादीत्यन्तोदात्ताद्वित्येव स्वरो भवति । तुदन्ति । एकादेशस्वरस्य सिद्धत्वाच्छेषनिघातो भवति । ब्राह्मणास्तुदन्ति । एकादेशस्वरस्य सिद्धत्वात्तिङ्ङतिङ इति निघातः सिध्यति अन्यथा तस्यासिद्धत्वात्पूर्वं निघाते पश्चादेकादेशस्योदात्तत्वं जायमानं प्रयोगे श्रूयते । अन्तरङ्ग इत्युक्तेः । प्रपचतीतीत्यादावेकादेशस्य पूर्वान्तवत्वात्तिङि चोदात्तवतीति न । सोमसुत्पचतीतीत्यादावीकारस्य तिङतिङ इति निघातश्च न । एतच्च वचनं शतुरनुम इत्यनुम् प्रतिषेधाज्ज्ञापकात्सिद्धम् । अनुम्प्रतिषेधो हि तुदन्ती इत्यादावुदात्ताभावार्थः । यद्येकादेशस्वरोऽसिद्धः स्यात्तदा तद्वैयर्थ्यं स्पष्टमेव ॥ संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः ॥ हरिवो मेदिनं त्वा ॥ हरिशब्दान्मतुपि छन्दसीर इति वत्वे नुमि संयोगांतलोपे मतुवसोरिति रुत्वे उत्वे गुणः ॥ सिज्लोप एकादेशे सिद्धो वक्तव्यः ॥

अलावीत् । इट ईटीति सिज्लोपस्य सिद्धत्वात्सवर्णदीर्घो भवति । एकादेशे किम् । अलविध्वम् । इटि कर्तव्ये धिचेति सलोपोऽसिद्ध एव । निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः * ॥ वृक्णः । वृक्णवान् । निष्ठादेशस्य सिद्धत्वाज्झल्परत्वाभावाद्व्रश्चेति षत्वं न भवति संयोगादिलोपकृत्वे तु भवत एव । स्वरप्रत्यययो-रुदाहरणम् । क्षीबः । क्षीबिकः । अनुपसर्गात्फुल्लक्षीबेति निपातितः क्षीबशब्दः । अत्र निष्ठाच द्व्यजनादिति निष्ठान्तस्य द्व्यचो विधीयमानमाद्युदात्तत्वं नोऽद्व्यचष्ठन् च न प्राप्नोति । निष्ठादेशस्य सिद्धत्वाद्भवति । इदं चेट्सहितस्य निष्ठातकारस्य लोपो निपात्यतेइति पक्षे यदा तु तकारमात्रस्य लोपो निपात्यते तदा नेदं प्रयोजनमिति व्यर्थं तयोर्ग्रहणम् । तदेव चेड्विधिग्रहणं क्षीबे कृशे उल्लाघे चेड्व्यावृत्यर्थम् ॥ प्लुतविकारस्तुग्विधौ सिद्धो वक्तव्यः ॥ * ॥ अग्ना३इ च्छत्रम् । पटा३उ च्छत्रम् । प्लुतविकारस्य सिद्धत्वाच्छे चेति तुग्भवति । प्लुतविकारस्य सिद्धत्वेपि प्लुतस्य सिद्धत्वाभावाद-ग्निचो इत् सोम सूश्त् इत्यत्र ह्रस्वस्य पितीति तुग्भवत्येव ॥ श्चुत्वं धुटि सिद्धं वाच्यम् ॥ * ॥ अटतीत्यट् श्चोतति इह धुट् न । श्चोततिरुपदेशे सादिः । अत एव श्चुत्वस्य धुटि सिद्धत्वेपि तुक्यसिद्धत्वात्सन् श्चोततीत्यत्र शितुग्न भवति ॥

नलोपः प्रातिपदिकान्तस्य । ८ । २ । ७ ॥

पदस्येति वर्तते । नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे । प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः स्यात् ॥ राजा । राजभ्याम् । राजभिः । राजत्वम् । राजता । राजतरः । राजतमः ।

प्रातिपदिकग्रहणं किम् । अहन् । पदस्य किम् । राजानौ । राजानः ॥

न ङिसंबुद्ध्योः । ८ । २ । ८ ॥

नस्य लोपो न स्याङ्डौ संबुद्धौ च । ङौ तु छन्दस्युदाहरणम् । सुपां सुलुगिति ङेर्लुक् । निषेधसामर्थ्यात्प्रत्ययलक्षणम् । परमे व्योमन् । संबुद्धौ । हे राजन् ॥ ङावुत्तरपदे प्रतिषेधो वक्तव्यः ॥ * ॥ चर्मणि तिला अस्य चर्मतिलः । ब्रह्मनिष्ठः । संबुद्धौ नपुंसकानां नलोपो वा वक्तव्यः ॥ हे ब्रह्म । हे ब्रह्मन् ॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः । ८ । २ । ९ ॥

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्परस्य पदावयवस्य मतोर्मस्य वः स्यात् ॥ किम्वान् । ज्ञानवान् । विद्यावान् । लक्ष्मीवान् । लक्ष्मीवन्तौ । यशस्वान् । भास्वान् । यवादेस्तु यवमान् । भूमिमान् । मादुपधायाः किम् । अग्निमान् । नृमतोऽपत्यं नार्मत इत्यत्र त्ववर्णोपधत्वेपि वृद्धेर्बहिरङ्गासिद्धत्वान्न भवति ॥

झयः । ८ । २ । १० ॥

झयन्तान्मतोर्मस्य वः स्यात् । अपदान्तत्वान्न जश्त्वम् । विद्युत्वान् । उदश्वित्वान् । मरुत्वान् । दृषद्वान् ॥

संज्ञायाम् । ८ । २ । ११ ॥

मतोर्मस्य वः । अहीवती । मुनीवती ।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । ८ । २ । १२ ॥

एते षट् संज्ञायां निपात्यन्ते । आसन्नशब्दस्यासन्दीभावः ।

आसन्दीवानग्राम: । अन्यत्रासन्नवान् । अस्थिशब्दस्याष्ठीभावः । अष्ठीवान् शरीरैकदेशः । अस्थिमानन्यत्र । चक्रशब्दस्य चक्रीभावः । चक्रीवान्नाम राजा । चक्रवानन्यत्र । कक्ष्यायाः सम्प्रसारणम् । कक्षीवान्नाम ऋषिः कक्ष्यावानन्यत्र । लवणशब्दस्य रुमण्भावः । रुमण्वान्नाम पर्वतः । लवणवानन्यत्र । चर्मणो नलोपाभावो णत्वं च । चर्मण्वती नाम नदी । चर्मवत्यन्यत्र ।

उदन्वानुदधौ च । ८ । २ । १३ ॥

उदकस्य उदन्भावो मतौ उदधौ च संज्ञायां च । उदन्वान्समुद्रः ऋषिश्च ।

राजन्वान् सौराज्ये । ८ । २ । १४ ॥

राजन्वती भूः । राजवानन्यत्र ।

छन्दसीरः । ८ । २ । १५ ॥

इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् ॥ हरिवते हर्यश्वाय गीर्वान् ॥ बहुलमिति वक्तव्यम् ॥ * ॥ नेह सप्तर्षिमन्तम् । पृथीवीमन्तम् ।

अनो नुट् । ८ । २ । १६ ॥

अन्नन्तान्मतोर्नुट् स्यात् छन्दसि । अक्षण्वन्तः । अस्थन्वन्तं यदनस्था । अस्थिदधीत्यत्र छन्दस्यपि दृश्यते इत्यनङ् । वत्वदृष्ट्या नुटोऽसिद्धत्वान्मतोर्वत्वम् । नुटस्तु निर्दिश्यमानत्वाभावादपि न ।

नाद् घस्य । ८ । २ । १७ ॥

नान्तात्परस्य घस्य नुट् छन्दसि । सुपथिन्तरः । दस्युह-

न्तमः ॥ भूरिदावन्नस्तुड् वक्तव्यः ॥ * ॥ भूरिदावत्त राजनः । ईद्रथिनः । रथीतरः । रथीतमः । रथीनां नुडपवाद ईकारो विधीयते स च नलोपे कृते इकारस्य विधेयः यदि तु नलोपापवादो नकारस्य स्थाने विधीयेत तदा तस्यासिद्धत्वादेकादेशो न स्यात् ॥

कृपो रो लः । ८ । २ । १८ ॥

कृप उ इति छेदः । कृपेति लुप्तषष्ठीकम् । तच्चावर्तते । कृपेर्यो रेफस्तस्य लः स्यात् । कृपेर्ऋकारस्यावयवो यो रः रेफसदृशस्तस्य च लकारसदृशः स्यात् ॥ कल्पते । चक्लृपे । अचीक्लृपत् । चलीक्लृप्यते ॥ कृपणादीनां प्रतिषेधो वक्तव्यः ॥ * ॥ कृपणः । कृपाणः । कृपा । कृपीटम्॥ बालमूललघ्वलमङ्गुलीनां वा लो रमापद्यत इति वक्तव्यम् ॥ * ॥ वालः । वारः । मूलम् । मूरम् । लघुः । रघुः । अलम् । अरम् । अङ्गुलिः । अङ्गुरिः । संज्ञाछन्दसोर्वा कपिलकादीनां रस्य लो वक्तव्यः ॥ * ॥ कपिलकाः । कपिरकाः । तिल्पिलिकम् । तिर्पिरिकम् । कल्मषम् । कर्मषम् । लोमानि । रोमाणि । पांसुलम् । पांसुरम् । कल्म । कर्म । शुक्लः । शुक्रः ।

उपसर्गस्यायतौ । ८ । २ । १९ ॥

अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् ॥ प्लायते । पलायते । पल्ययते । निस्दुसोरुत्वस्यासिद्धत्वान्न लत्वम् । निरयते दुरयते । निर्दुरोस्तु निलयते । दुलयते । प्रत्यय इति त्वियो रूपम् ।

ग्रो यङि । ८ । २ । २० ॥

गिरते रेफस्य लत्वं स्याद्यङि । गर्हितं गिरति जेगिल्यते । यङि किम् । गीर्यते ।

अचि विभाषा । ८ । २ । २१ ॥

गिरतेरेफस्य लत्वं वा स्यादजादौ । गिरति । गिलति । निगाल्यते । निगार्यते । व्यवस्थितविभाषेयम् । तेन प्रत्यये गल इति नित्यं गर इति विषे नैव ।

परेश्च घाङ्कयोः । ८ । २ । २२ ॥

परे रेफस्य लो वा स्याद्घशब्दे अङ्कशब्दे च । पलिघः । परिघः । पल्यङ्कः । पर्यङ्कः । इह तरप्तमपौ घ इति कृत्रिमस्य न ग्रहणम् । व्याख्यानात् ॥ योगे चेति वक्तव्यम् ॥ * ॥ परियोगः । पलियोगः ॥ सञीति प्रकृत्य लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि वक्तव्यानि ॥ * ॥ सञिति सनः सकारमारभ्य आ महिङो ङकारेण प्रत्याहारः । गिरौ । गिरः इत्यत्राचि विभाषेति लत्वं न पयो धावतीत्यत्र धिचेति सलोपो न । द्विष्टरां द्वौ वादौ द्विः सुच्प्रत्ययः । परिपूर्णत्वाद्वारद्वयस्य प्रकर्षप्रत्ययः । तदन्तात्किमेत्तिङव्ययेत्याम् प्रत्ययः । अत्र ह्रस्वादङ्गादिति सुचो लोपो न । दृषत्स्थानमित्यत्र झलोझलीति सलोपो न । काष्ठशक्स्थातेत्यत्र स्कोरिति कलोपो न । कुञ्चेत्यत्र चोः कुः झलीति ञकारस्य कुत्वं न । धुर्य इत्यत्र हलि चेति दीर्घो न । एतत्प्रयोजनानामन्यथासिद्धिस्तु भाष्यकैयटयोः स्पष्टा ॥

संयोगान्तस्य लोपः । ८ । २ । २३ ॥

संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् ॥ गोमान् । यवमान् । श्रेयान् । भूयानित्यत्र तु रुत्वं परमप्यसिद्धत्वात्संयोगान्तलोपं न बाधते । जश्त्वे हि नाप्राप्ते तदारभ्यते इति तस्य बाधनं

भवति । संयोगान्तस्य किम् । यशः । पयः ॥ संयोगान्तलोपे संयोगादिलोपे च यणः प्रतिषेधो वाच्यः ॥ * ॥ दध्यत्र । मध्वत्र । वाक्यर्थम् । वास्यर्थम् । न वा झलो लोपात् झलोझलीत्यतो झल्ग्रहणस्येहापकर्षेण षष्ठ्या विपरिणामेन च यणो लोपाभावः । स्कोरित्यत्रापि पञ्चम्यन्तानुवृत्त्या झलः पूर्वयोः स्कोर्लोपविधानाद्यण्पूर्वयोर्लोपाभावः । बहिरङ्गलक्षणत्वाद्वा एकपदाश्रयेन्तरङ्गे लोपे कर्तव्ये पदद्वयाश्रयस्य बहिरङ्गस्य यणोऽसिद्धत्वाल्लोपाभावः ।

रात्सस्य । ८ । २ । २४ ॥

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य ॥ रेफस्य विसर्गः । मातुः । पितुः । नेह । ऊर्जः क्विप् । ऊर्क् । मृजेर्लङि । न्यमार्ट् ।

धि च । ८ । २ । २५ ॥

धादौ प्रत्यये सलोपः स्यात् ॥ एधिताध्वे । आशाध्वम् । अलविध्वम् । अलविढ्वम् । धिचेति सलोपः सिच एवेत्येके । चकाद्धि । चकाधीत्येवेति तु भाष्यम् ।

झलो झलि । ८ । २ । २६ ॥

झलः परस्य सस्य लोपः स्याज्झलि ॥ अवैद्धाम् । अवात्ताम् । वसेः सिचः सलोपस्यासिद्धत्वात्सः स्यार्द्धधातुके इति सस्य तकारः । अभित्त । अच्छित्त । झलः किम् । अमंस्त । झलि किम् । अभित्साताम् ।

ह्रस्वादङ्गात् । ८ । २ । २७ ॥

सिचो लोपः स्याज्झलि ॥ अभृत । अकृत । अकृथाः । ह्रस्वात्किम् । अच्योष्ट । अङ्गात्किम् । अलाविष्टाम् । झलि किम् । अकृषाताम् ।

इट ईटि । ८ । २ । २८ ॥

इटः परस्य सस्य लोपः स्यादीटि परे । अलावीत् । अपावीत् । अदेवीत् । असोवीत् । आतीत् । इटः किम् । अकार्षीत् । ईटि किम् । अलाविष्टाम् ।

स्कोः संयोगाद्योरन्ते च । ८ । २ । २९ ॥

पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात् । भ्रस्जेः । भृट् । भृड् । भृष्टः । भृष्टवान् । मस्जेः । मग्नः । मग्नवान् । तट् । तड् । गोरट् । गोरड् । तष्टः । तष्टवान् । तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु स्कोरिति न प्रवर्तते । णिलोपस्य स्थानिवद्भावात् । पूर्वत्रासिद्धीये न स्थानिवदिति तु न । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात्संयोगान्तलोप एव । तक् । तग् । गोरक् । गोरग् । स्कोरिति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तलोपः । पिपक् । पिपग् । एवं विवक् । विवग् । दिधक् । दिधग् । स्कोः किम् । नर्नर्त्ति । संयोगाद्योः किम् । पयः । शक् । अन्ते किम् । तक्षिता ।

चोः कुः । ८ । २ । ३० ॥

चवर्गस्य कवर्गः स्याज्झलि पदान्ते च ॥ पक्ता । पक्तुम् । त्यक्ता । त्यक्तुम् । वाक् । ऊर्क् । षत्वविधो राजिसाहचर्यात् टुभ्राजृ दीप्ताविति फणादिरेव गृह्यते । न तु राजृ भ्रेजृ भ्राजृ दीप्ताविति । तस्य कुत्वमेव । विभ्राक् । विभ्राग् । विभ्राग्भ्यामित्यादि ॥

हो ढः । ८ । २ । ३१ ॥

हस्य ढः स्याज्झलि पदान्ते च । सोढा । सोढव्यम् । वोढा ।

वोढव्यम् । जश्त्वचर्त्वम् । लिट् । लिड् । विश्ववाट् । तुराषाट् । तुरं सहत इत्यर्थे छन्दसि सह इति ण्विः । लोके तु साहयतेः क्विप् अन्येषामपीति पूर्वपदस्य दीर्घः । सहेः साडः स इति षत्वम् ।

दादेर्धातोर्घः । ८ । २ । ३२ ॥

धातोरित्यावर्तते । तचैकमतिरिच्यमानमुपदेशकालं लक्षयति । उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च । दग्धा । दग्धुम् । काष्ठधक् । उपदेशे किम् । अधोगित्यत्र यथा स्यात् । दामलिहमात्मन इच्छति दामलिह्यति । ततः क्विप् । दामलिट् । अत्र मा भूत् ।

वा द्रुहमुहष्णुहष्णिहाम् । ८ । २ । ३३ ॥

एषां हस्य वा घः स्याज्झलि पदान्ते च । द्रोग्धा । द्रोढा । ध्रुक् । ध्रुट् । मोग्धा । मोढा । मुक् । मुट् । स्नोग्धा । स्नोढा । स्नुक् । स्नुट् । स्नेग्धा । स्नेढा । स्निक् । स्निट् ।

नहो धः । ८ । २ । ३४ ॥

नहो हस्य धः स्याज्झलि पदान्ते च । नद्धा । नद्धुम् । उपानत् । उपानट् ।

आहस्थः । ८ । २ । ३५ ॥

झलि परे । चर्त्वम् । आत्थ । आदेशान्तरकरणं झषस्तथोर्धोऽध इत्यस्य निवृत्त्यर्थम् । झलि किम् । आहथुः । आह । आहतुः ॥ आहुः ॥ हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम् ॥ * ॥ गृभाय जिह्वया मधु । छन्दसि शायजपीति शायच् । गृभ्णामि ते मध्वा जभार ।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ८ । २ । ३६ ॥

व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च । व्रष्टा । व्रष्टुम् । मूलवृट् । भ्रष्टा । भ्रष्टुम् । धानाभृट् । स्रष्टा । स्रष्टुम् । रज्जुसृट् । मार्ष्टा । मार्ष्टुम् । कांस्यपरिमृट् । यष्टा । यष्टुम् । देवेट् । राट् । विभ्राट् । राजभ्राजोः पदान्तार्थं ग्रहणं झलादिराभ्यामिटा व्यवधीयते । केचित्तु राष्टिः भ्राष्टिरिति क्तिन्नन्त-मिच्छन्तीति वृत्तिः । प्रष्टा । प्रष्टुम् । शब्दप्राट् । लिश् । लेष्टा । लेष्टुम् । विश् । वेष्टा । वेष्टुम् । सन्नन्तात्क्विप् । षत्वस्यासिद्धत्वात्संयोगान्तस्य लोपः । व्रश्चेतिषः । जश्त्वचर्त्वे । विविड् । विविट् ॥

एकाचो बशो भष् झषन्तस्य स्ध्वोः । ८ । २ । ३७ ॥

धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे परे पदान्ते च ॥ एकाचो धातोरिति सामानाधिकरण्येनान्वये तु इह न स्यात् ॥ गर्दभमाचष्टे गर्दभयति । ततः क्विप् णिलोपः । गर्धप् । झलीति निवृत्तम् । स्ध्वोर्ग्रहणसामर्थ्यात् । तेनेह न । दुग्धम् । दोग्धा । व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भावः । जश्त्वचर्त्वे । बुध् । भोत्स्यते । अभुत्ध्वम् । भुत् । भुद् । भुद्भ्याम् । भुत्सु । गुहू । घोक्ष्यते । अघूढ्वम् । घुट् । दुहू । धुक्षे । धुग्ध्वे । धुक्ष्व । धुग्ध्वम् । अधोक् । अधुग्ध्वम् । धुक् । धुग् । धुग्भ्याम् । धुक्षु । अजर्घाः । बन्ध । अभान्त्सीत् । अबान्द्धामित्यत्र तु पूर्वत्रासिद्धमिति भष्भावात्पूर्वं झलि सज्लोपः । प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न । प्रत्य-

यलचणं प्रति सिज्लोपस्यासिद्धत्वात् । एकाचः किम् । दामलिट् । वशः किम् । क्रोत्स्यति । झषः किम् । दास्यति । वकारविशिष्टध- कारग्रहणं किम् । दादद्धि । दध धारणे । यङ्लुकि लोटि हुझ- ल्भ्यो हेर्धिः ।

दधस्तथोश्च । ८ । २ । ३८ ॥

द्विरुक्तस्य झषन्तस्य धाञो वशो भष् स्यात्तथयोः स्ध्वोश्च परतः ॥ वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ । वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत् । धत्तः । धत्थः । धत्से । धद्ध्वे । धत्स्व । धद्ध्वम् । झषन्तस्य किम् । दधाति ।

झलां जशोऽन्ते । ८ । २ । ३९ ॥

पदान्ते झलां जशः स्युः । वागत्र । लिडत्र । अग्निचिदत्र । त्रिष्टुबत्र ।

झषस्तथोर्धोऽधः । ८ । २ । ४० ॥

झषः परयोस्तथयोर्धः स्यान्न तु दधातेः । लब्धा । अलब्धाः । दोग्धा । अदुग्धाः । लेढा । अलीढाः । बोद्धा । अबुद्धाः । धत्वे कृते । झलां जश् झशीति जश्त्वम् । अधः किम् । धत्तः । धत्थः ।

षढोः कः सि । ८ । २ । ४१ ॥

षस्य ढस्य च कः स्यात्सकारे परे । यक्ष्यति । अयक्ष्यत् । पिपक्षति । लिह । लेक्ष्यति । अभेक्ष्यत् । लिलिक्षति । सि किम् । पिनष्टि । लेढि ।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः । ८ । २ । ४२ ॥

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यान्निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च॥ शॄ हिंसायाम्। ऋत इत्। रपरः। णत्वम्। शीर्णः। बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह। कृतस्यापत्यं कार्तिः। भिन्नः। छिन्नः। रदाभ्यां किम्। कृतम्। तः किम्। चरितम्। मुदितम्। पूर्वस्य किम्। निष्ठाया एव दकारस्य मा भूत्। भिन्नवद्भ्याम्॥

संयोगादेरातो धातोर्यण्वतः। ८। २। ४३॥

निष्ठातस्य नः स्यात्। द्राणः। ग्लानः। संयोगादेः किम्। यातः। आतः किम्। च्युतः। प्लुतः। धातोः किम्। निर्यातः। यण्वतः किम्। स्नातः॥

ल्वादिभ्यः। ८। २। ४४॥

एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या ग्रहि जीनः॥ ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः॥ *॥ तेन नत्वम्। कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः॥ दुग्वोर्दीर्घश्च॥ *॥ दुगतौ। दूनः। टु दु उपतापे इत्ययं तु न गृह्यते। सानुबन्धकत्वात्। मृदुतया दुतयेति माघः। गूनः। पूञो विनाशे। पूना यवाः विनष्टा इत्यर्थः। पूतमन्यत्॥ सिनोतेर्ग्रासकर्मकर्तृकस्य॥ *॥ सिनो ग्रासः। ग्रासेति किम्। सिता पाशेन सूकरी। कर्मकर्तृकेति किम्। सितो ग्रासो देवदत्तेन।

ओदितश्च। ८। २। ४५॥

भुजो भुग्नः। टुओश्वि गतिवृद्ध्योः। यजादित्वात्सम्प्रसारणम्। तस्य हल इति दीर्घः। उच्छूनः। ओहाक् प्रहीणः॥

दिशाद्यन्तर्गणाः स्वादय ओदितः ॥ * ॥ सूनः । दूनः । ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट् । उड्डीनः ॥

क्षियो दीर्घात् । ८ । २ । ४६ ॥

दीर्घात्क्षियो निष्ठातस्य नः स्यात् । प्रक्षीणः स्वः । क्षीणवान् । निष्ठायामण्यदर्थे इति दीर्घः । दीर्घात्किम् । अक्षितमसि मा मे क्षेष्ठाः । क्षितमिति भावे क्तः । बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह । क्षितस्यापत्यं क्षैतिः ॥

श्योऽस्पर्शे । ८ । २ । ४७ ॥

श्यैङो निष्ठातस्य नः स्यादस्पर्शे । द्रवमूर्तिस्पर्शयोरिति सम्प्रसारणे हल इति दीर्घः । शीनं घृतम् । अस्पर्शे किम् । शीतं जलम् ॥

अञ्चोऽनपादाने । ८ । २ । ४८ ॥

अञ्चो निष्ठातस्य नः स्यान्नत्वपादाने । समक्नः । अनपादाने किम् । उदक्तमुदकं कूपात् । व्यक्तमिति त्वञ्जे रूपम् ॥

दिवोऽविजिगीषायाम् । ८ । २ । ४९ ॥

दिवो निष्ठातस्य नः स्यादविजिगीषायाम् । द्यूनः । क्षीण इत्यर्थः । विजिगीषादौ तु द्यूतम् । विजिगीषया हि तथाव्यापारा: पात्यन्ते इति गम्यते विजिगीषा ॥

निर्वाणोऽवाते । ८ । २ । ५० ॥

अवाते इति छेदः । निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न । निर्वाणोग्निर्मुनिर्वा । वाते तु निर्वातो वातः ।

शुषः कः । ८ । २ । ५१ ॥

वर्तम् । पाणिवर्तम् । हस्तेन वर्तयतीत्यर्थः । हस्तग्राहं गृह्णाति करग्राहम् । पाणिग्राहम् । हस्तेन गृह्णातीत्यर्थः ।

स्वस्नेहनात्र्यात्पुष्पिषः ॥ ४ । ४ । १७७ ॥

स्वार्थात् स्नेहनार्थाच्च करणवाचिनः यथासंख्यं परात्पुषेः पिषेश्च धातोस्तस्मिन्नुपपदे णम्वा भवति । आत्मात्मीयं ज्ञातिर्धनं च स्वार्थः, स्निह्यते येन स स्नेहनार्थः द्रवीकरणार्थः । स्वार्थात्पुषः-स्वपोषं पुष्णाति । आत्मपोषं पुष्णाति । गोपोषं पुष्णाति । महिषपोषं पुष्णाति । महिषीपोषं पुष्णाति । पितृपोषं पुष्णाति । मातृपोषं पुष्णाति । रैपोषं पुष्णाति । धनपोषं पुष्णाति । स्वादिभिः पुष्णातीत्यर्थः । स्नेहनार्थात् पिषः । उदपेषं पिनष्टि । घृतपेषं पिनष्टि । तैलपेषं पिनष्टि । उदकादिभिः पिनष्टीत्यर्थः ।

नाम्नि बन्धः ॥ ४ । ४ । १७८ ॥

बंध इति प्रकृतिर्नामविशेषणाञ्च बन्धः बन्ध्यर्थस्य बंधनस्य यन्नाम तद्विषयात् करणवाचिनः परात् बधेस्तस्मिन्नुपपदे णम्वा भवति । अट्टालिकाबन्धं बद्धः । चंडालिकाबन्धं बद्धः । क्रौंचबन्धं बद्धः । अट्टालिकादीनि बन्धनामधेयानि । तैर्बंधैर्बद्ध इत्यर्थः ।

आधारात् ॥ ४ । ४ । १७९ ॥

आधारवाचिनः पराद्बन्धेः तस्मिन्नुपपदे णम्वा भवति । चक्रबन्धं बद्धः । कूटबन्धं बद्धः । गुप्तिबन्धं बद्धः । चक्रादिषु बद्ध इत्यर्थः ।

कर्तुर्जीवपुरुषान्नशिवहः ॥ ४ । ४ । १८० ॥

कर्तृवाचिनो जीवशब्दात् पुरुषशब्दाच्च यथासंख्यं परान्नशेश्च वहेश्च धातोस्तस्मिन्नुपपदे णम्वा भवति । जीवनाशं

नश्यति । जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति, पुरुषः प्रेष्ये भूत्वा वहतीत्यर्थः । कर्तुरिति किम् ? जीवेन नष्टः । पुरुषं वहति ।

ऊर्ध्वात्पूरशुषः ॥ ४ । ४ । १८१ ॥

ऊर्ध्वशब्दात् कर्तृवाचिनः परात् पूरेः शुषेश्च तस्मिन्धातोरुपपदे णम्वा भवति । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वः पूर्यत इत्यर्थः । ऊर्ध्वशोषं शुष्यति ऊर्ध्वः शुष्यतीत्यर्थः ।

आप्याच्चेवे ॥ ४ । ४ । १८२ ॥

आप्यात्कर्मणः कर्तुश्च पराद्धातोः तस्मिन् धातावुपपदे णम्वा भवति, इवे इवार्थे औपम्ये गम्यमाने । आप्यात्–घृतनिदायं निहितः घृतमिव निहित इत्यर्थः । एवं रत्ननिदायं निहितः । शाकक्लेशं क्लिष्टः । कर्तुः–संभिन्ननाशं नश्यति नास्तिकः । ताविव नश्यतीत्यर्थः । एवं भजकनाशं नश्यति । 'ननाश शत्रुर्गजनाशमाशु" ।

समर्थास्त्यर्थधृषज्ञाशकग्लाघटसहार्हारभलभक्रमे तुम् ॥ ४ । ४ । १८३ ॥

समर्थार्थे ऽस्त्यर्थे धृषादिषु चोपपदे धातोस्तुम् भवति अतदर्थोपपदार्थोऽयमारम्भः । समर्थो भोक्तुम् । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । पारयति भोक्तुम् । अत्र भोजने सामर्थ्यं प्रतीयते । अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् । अत्र संभवमात्रम् । धृषादिषु–धृष्णाति भोक्तुम् । जानाति भोक्तुम् । शक्नोति भोक्तुम् । अत्र प्राविण्यमात्रम् । ग्लायति भोक्तुम् । अत्राशक्तिः । घटते भोक्तुम् । सहते भोक्तुम् । अर्हति भोक्तुम् । अत्र योग्यतामात्रम् । लभते भोक्तुम् । अत्राप्रत्याख्यानमात्रम् । आरभते भोक्तुम् । प्रक्रमते भोक्तुम् । अत्र भुजेरेव आद्यावस्था न क्रियान्तरम्

क्रियायां तदर्थायां वुण् लृट् च ॥ ४ । ४ । १८४ ॥

धातोस्तुम्, वुण्, लृट् च प्रत्यया भवन्ति क्रियायां तदर्थायां यस्माद्धातोस्स तुम् प्रत्ययो भवति तदभिधेयार्थं चेत् क्रियान्तरं गम्यते । कर्तुं व्रजति । हर्तुं व्रजति । भोक्तुम् ददाति । पातुं ददाति पात्रस्थजलम् । भोजको व्रजति । भोजकाः व्रजंति । भोजकं कुलं व्रजति । ययौ श्वश्रूमुपार्चिका करिष्यामीति व्रजति । अर्जयिष्यन्नालिलिङ्ग स्फुरन्ति । क्रियायामिति किम् । भिक्षिष्ये इत्यस्य जटाः । तदर्थायामिति किम् ? धावतस्ते पतिष्यति दंडः । प्रत्ययान्तराणामेते बाधकाः । पाकाय व्रजति । जयाय व्रजति । भूतये तिष्ठति । भोजनाय तिष्ठतीति चतुर्थ्यात्र तादर्थ्यं गम्यते ।

कर्मणोऽण् ॥ ४ । ४ । १८५ ॥

कर्मणः पराद्धातोः क्रियायां तदर्थायां गम्यमानायामण् प्रत्ययो भवति । कुंभकारो व्रजति । गोदायो व्रजति । लण्लृटोः प्राप्तयोर्वचनम् । परत्वाट्टगादीनपि बाधते ।

लेङ् तुमिच्छार्थे तुल्यकर्तृके ॥ ४ । ४ । १८६ ॥

धातोर्लेङ्तुमौ प्रत्ययौ भवतः 'तदर्थायां क्रियायां वर्तमान इच्छार्थे तुल्यकर्तृके उपपदे यस्माद्धातोर्लेङ्तुमावुत्पद्येते तदर्थस्य चेत् कर्ता इच्छार्थस्यापि कर्ता भवति । भुञ्जीयेति इच्छति । भुञ्जीयेति वांच्छति । भोक्तुमिच्छति । भोक्तुं वांच्छति । भोक्तुं वष्टि । भोक्तुमभिलषति । भोक्तुं कामयते । इच्छार्थे इति किम् ? भोजको व्रजति । तुल्यकर्तृक इति किम् ? इच्छति भुक्ताम् भवान् । क्रियायां तदर्थायामिति किम् ? इच्छन् भुङ्क्ते ।

वन्दारुवृन्दपरिघट्टविलोलिताक्ष-
वृन्दारकेश्वरकिरीटतटावकीर्णैः ॥
मन्दारपुष्पनिकरैर्विहितोपहारं
वन्दामहे जिनपतेः पदपद्मयुग्मम् ॥ १ ॥

यो जानाति समं समस्तमनिशं यं सूरयस्संश्रिताः
येनादर्शि विमुक्तिवर्त्म सुधियो यस्मै स्पृहां कुर्वते ।
यस्मात्तत्त्वविनिश्चयोऽप्रतिहतं यस्यैव शास्त्रं जयो
यस्मिन् विस्मयनीयपुण्यमहिमा भूयात् स वः श्रेयसे ॥ २ ॥

सुविवेचितपदरूपा प्रकरणरचनाप्रवेशमुखसुभगा ॥
वाङ्मयमूर्तिस्सौरी कृतिरियमधिवसतु बुधहृदयम् ॥ ३ ॥

गहनं व्याकरणं स्यात् शब्दानुशासनं महागहनम् ॥
लिङ्लुङ्सन्यङ् कष्टं तस्मादपि घेट्परं महाकष्टम् ॥ ४ ॥

अम्भोजनेत्रं हरितोरुगात्रं दयाकलत्रं वरशक्तिपात्रम् ॥
भव्याब्जमित्रं भुवने पवित्रं नाभेयपुत्रं प्रणमामि नित्यम् ॥५॥

मुकुरविमलगण्डं चन्द्रसंकाशतुण्डं
गजकरभुजदण्डं कामदाहाग्निकुण्डम् ॥
विनुतमुनिपषण्डं गोमठेशप्रचण्डं
गुणनिवहकरण्डं नौमि नाभेयपिण्डम् ॥ ६ ॥

———:o:———

श्रीमज्जिनाधीशपदाब्जभृङ्गः कामादिमत्तेभमहामृगेन्द्रः ॥
हेमादिदानेषु महीजधेनुः श्रीचारुकीर्त्यार्यमुनिः स जीयात् ॥७॥

इति शब्दानुशासने चिन्तामणौ वृत्तौ चतुर्थस्याध्यायस्य
चतुर्थः पादः । समाप्तोऽध्यायश्चतुर्थः । शम् ।

समाप्तोऽयं ग्रन्थः ।

भद्रं भूयात् । श्रीः । श्रीः । श्रीः ।

यो वाकलीवाल उपाह्वपन्ना—
लालेति लोकप्रथितः प्रकीर्तिः ।
आबालमभ्यस्तसमस्तजैन—
सिद्धान्तसंसिद्धविशुद्धबोधः ॥ १ ॥

महर्षि सँस्नारकरार्षलुप्त—
प्रायार्यग्रन्थान् वहुशो विशोध्य ।
संस्कारसंस्कारितसंस्कृतार्थो
ज्ञ याच्छतं संस्कृतसंस्कृतार्थैः ॥ २ ॥

श्रीमज्जिनेन्द्रचरणाम्बुजजातमोदः
कामादिहायनविधौ कृतवीर्यकृत्यः ।
स्वर्गापवर्गगममार्गविसूचकश्च
सोऽयं करोतु मम बोधसमृद्धिभूतिम् ॥ ३ ॥

अथाद्य श्रीमज्जगन्नमस्करणीयं प्रातःस्मरणीयं जैनजातिसमुत्पन्नविदुषामविदुषाञ्चानेकविधोपकारकं सामान्यतः खलाखलाखिलभारतीयोपकारकं श्रीगुरुवर्यपन्नालालवाकलीवालचरणसरोजद्वयं प्रणम्य तेषामनेकोपकारकरणकार्यमनुस्मृत्य तद्वशीभूय प्रमोदप्रस्फुटितचेतसा तच्चरणचंचरीकेण मया समाप्यते कर्णाटकलिपितः प्रतिबिंबीकृतस्यास्य शब्दतन्त्रस्यालङ्कृतिरिति ।

विदुषामनुचरः
मुन्नालाल–जैनः

शिवं भूयात्

॥ ओं ॥

श्रीवीतरागाय नमः ।

अथ शाकटायनव्याकरण सूत्रपाठः ।

वन्दारुवृन्दपरिघट्टविलोलिताक्ष-
वृन्दारकेश्वरकिरीटतटावकीर्णैः ।
मन्दारपुष्पनिकरैर्विहितोपहारं
वन्दामहे जिनपतेः पदपद्मयुग्मम् ॥ १ ॥

अइउण् । ऋक् । एओङ् । ऐऔच् । हयवरलञ् । ञमङ-णनम् । जबगडदश् । झभघढधष् । खफछठथट् । चटतव् । कपय् । शषसं अः × क ⅹ प र् । हल् ।

१ सात्मेतेत्
२ उता स्वः
३ तेयान्
४ भाव्योऽग्
५ अप्रयोगीत्
६ स्वस्थानास्यैक्ये
७ आसन्नः
८ संबन्धिनां सम्बन्धे
९ बहुति संख्या
१० बहुगणं भेदे
११ कसमासेऽध्यर्धः
१२ अर्धपूर्वपदो डत्
१३ पौत्रादि वृद्धम्
१४ प्रपौत्राद्यस्त्रीवंश्यज्या-
योभ्रात्रोः सति युवा
१५ सत् सपिण्डेऽधिवयस्स्था-
ने वा
१६ युववृद्धं कुत्सार्चे
१७ नाम दुः
१८ त्यदादिः
१९ यस्याक्ष्वादिरादैच्
२० देश एवैङ् ख्यादौ
२१ प्राग्देशे
२२ क्रियार्थो धातुः
२३ दाधा घ्वब्
२४ प्रादिर्नाप्रत्यये
२५ तस्यागतार्थाधिपर्यर्थोत्स्व-
त्यतिक्रमात्युपसर्गः प्राक्च
२६ ह्वाच्च्यूर्याद्यनुकरणं च ति
२७ कारिकालनदोऽन्तस्सदसत्-
स्स्थत्यादिभूषानुपदेशा-
परिग्रहादरक्षेपे
२८ कणेमनः श्रद्धोच्छेदे
२९ अस्तं पुरोऽव्ययम्
३० गायर्थवदोऽच्छः
३१ तिरोऽन्तर्धौ
३२ कृञो वा

३३ मनस्युरस्युपाजेऽन्वाजे मध्ये पदे निवचने
३४ स्वाम्येऽधिः
३५ साक्षादाद्यच्वि
३६ नित्यं हस्तेपाणौ स्वीकृतौ
३७ जीविकोपनिषदिवे
३८ प्राध्वं बन्धे
३९ तस्वनूङामधणतस्याँक्त्वान्तुन्तिसुङ्मस्स्वाम्स्वरादीन्यव्ययम्
४० घयसख्यद्वन्द्वपतीदुत्
४१ प्रत्ययः कृतोऽषष्ठ्याः
४२ इजाद्यायार्त्तादुतः
४३ घ्याद्यतिङ्कृत्
४४ परः
४५ मिदचोऽन्त्यात्
४६ स्पर्धे
४७ षष्ठ्याः स्थानेऽन्तेऽलः
४८ तस्मादादेः
४९ शिदङिदल्
५० स्थानीवाऽनलाश्रये
५१ परेऽचः प्राचोऽक्विदीर्घयद्व्यासदस्क्लुग्विधौ
५२ श्लुचीगेनत्
५३ टिदादिः
५४ किदन्तः
५५ विशेषणम्
५६ प्राक् पञ्चमी
५७ न सप्तम्यघ्यादिषु
५८ तस्यादेः
५९ प्रत्ययन्यक्ष्यत्प्रकृत्यादेः
६० कृत्मतिकारकस्यापि
६१ तिङा वाक्यम् ।
६२ सुङ्पदम्
६३ नम् क्ये
६४ सिद्धल्यधातोः
६५ नवृत्यन्तः
६६ स्तं मत्वर्थे
६७ मनुर्नभोऽङ्गिरो वति
६८ विरामेऽगिदनाङ्वाद्यणवानुनासिकः
६९ चर्जसः
७० न
७१ एचोऽच्ययवायाव्
७२ यञ्जेवादिक्रः
७३ अस्वे
७४ ह्रस्वो वापदे
७५ ऋत्यकः
७६ ऋश्चोस्साचः ।
७७ दीर्घः
७८ शस्सक्
७९ नन्तः पुंसः
८० ढ्लुच्यणः
८१ सह्विवहोऽस्यौः
८२ इक्येङर्
८३ एजूच्यैच्
८४ प्रस्योढोढ्यूहैषैष्ये
८५ स्वैरस्वैर्यक्षौहिण्याम्
८६ ओमाङि परः
८७ एवेऽनियोगे

८८ वौष्ठौतौ समासे
८९ आर्तृतीयाया ऋते
९० प्रदशनार्णवसनकम्बलवत्सतरस्यर्णौ
९१ ऋत्यारुपसर्गस्य
९२ सुपि वा
९३ तथानिर्णीच्येङ्येङ्
९४ पदान्तेऽत्येङः
९५ गोरोद्वा
९६ अवोऽच्यनक्षे
९७ इन्द्रे
९८ वातायनेऽक्षे
९९ न प्लुतस्यानितौ
१०० गितः
१०१ चादेरचोऽनाङः
१०२ ओतः
१०३ सौ वेतौ
१०४ ऊँ चोञः
१०५ मयोऽचि वोऽसन्
१०६ हलोऽनुनासिकेऽनुनासिकः स्वः
१०७ प्रत्यये
१०८ रीस्योः
१०९ म्नां जय्यपदान्ते
११० शल्यनुस्वारः
१११ मस्मो हलि सौ
११२ हि लय्याम्न
११३ सम्राट्
११४ खय् खयश्शरि वा
११५ शरोऽनु द्वे

११६ यञो मयः
११७ अचो ह्रोऽह्रचः ।
११८ अदीर्घात्
११९ न संयोगे
१२० पुत्रस्यादिपुत्रादिन्याक्रोशे
१२१ अचि
१२२ शरः
१२३ ह्रस्वान् ङमः पदान्ते
१२४ दीर्घाच्छो वा
१२५ प्लुतात्
१२६ अजाङ्माङः
१२७ छाञ्भाजोऽतो लुगितौ
१२८ न द्वयुक्तेः
१२९ तः
१३० छाच्यादौ
१३१ द्वो र्द्व
१३२ हलो यमि य (मां) मो वा
१३३ जरि जरस्स्वे वा
१३४ उदस्स्थास्तम्भः
१३५ चर्
१३६ जषि जश्
१३७ श्चौ श्चू स्त्वोः
१३८ ष्टौ ष्टू
१३९ न शात्
१४० टोः पदान्ते नाम्नगरीनवतेः
१४१ तोष्षि
१४२ लि लः
१४३ जशो हो झष्वा
१४४ शश्छोऽमि
१४५ ङ्णो गक्ड्क् शरि

१४६ ङ्नस्तट् सोऽश्चः ।
१४७ नश्शि जक्
१४८ नृनः पि रोरक्
१४९ कांस्कान् सीसक्
१५० छठथस्यप्रशानः
१५१ पुमः खयि
१५२ समस्सुसिग्लुक् च
१५३ ठयोऽष्याघोभोभगोः
१५४ अच्यस्पष्टश्च
१५५ वानुज्यात्
१५६ रेर्यः
१५७ अतोऽद्धष्युः
१५८ हल्यनञ्समासे लुक्तस्सात्
१५९ तदः पादपूरणे
१६० रोऽह्नोऽव्ययसुब्रूपरात्रिरथन्तरे
१६१ विसर्जनीयस्य
१६२ वाहर्पत्यादिषु
१६३ सश्छठयशरि
१६४ शरि वा
१६५ लुक् खयि परे
१६६ कुपौ ≍क≍पम्
१६७ तिरसस्तेस्सि
१६८ नमस्पुरसः
१६९ चतुर्निर्दुर्बहिराविःप्रादुषाम्
१७० सुचो वा
१७१ इसुसोऽपेक्षायाम्
१७२ नाक्रियैकार्थे
१७३ समासेऽसमस्तस्य
१७४ पदेऽधश्शिरसः
१७५ कृकमिकंसकुशाकर्णीकुंभपात्रेऽस्तोऽनव्ययस्य
१७६ प्रत्यये
१७७ न रन्हः काम्ये
१७८ ह्रस्वात्तुपस्ति
१७९ निसोऽनासेवायाम् तपे
१८० कस्कादिषु

इति शाकटायनीयसूत्रपाठे प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ।

द्वितीय पादः ।

१ नयोऽचो ह्रस्वः
२ पञ्चतोऽनेकतरस्यान्यादेर्दक् स्वमोः
३ अलुग्वा
४ अतोऽम्
५ ङ्लुक्
६ जरसो वा
७ इको लुक्
८ पुमांश्चान्यतोऽच्यापि
९ दध्यस्थिसक्थ्यक्ष्णोऽनङ्
१० नगू सुपि
११ शावचः
१२ जलाम्
१३ ततः प्रागार्यवज्रस्य
१४ अज्क्रोश्शतुः
१५ न नम्
१६ ङौग्योर्वोदश्नः
१७ शपश्यात्
१८ जश्शसश्शि

१९ आङश्चौतो गीः
२० ङितो याट्
२१ टौस्येत्
२२ इदुतो गिग्यौतोऽस्त्रेः
२३ जस्येङ्
२४ ङिरौत्
२५ न्यशादाम्
२६ घेर्ङौरनाटि
२७ नास्त्रीटः
२८ ङ्येङ्
२९ स्त्रिया वाट्
३० स्वोऽपुंसः
३१ वेयुवोऽस्त्रियाः
३२ नामामः
३३ नम् ह्रस्वाट्साटः
३४ रषणां सङ्ख्यानाम्
३५ त्रेस्त्रयः
३६ मोऽणोऽनः
३७ जराया ङसिन्द्रस्याचि
३८ धातोस्तिकारकसमस्तानेकाचोऽतत्संयोगाद्य्व्योः
३९ दृन्पुनः करवर्षाभिर्भुवः
४० प्रत्ययेऽसुधीणः
४१ भ्रूहल्श्नोश्चेयुवौ
४२ स्त्रियाः
३४ वाम्शसि
४४ दोमोऽस्यादसोमाद्गुश्चापिन्यसन्
४५ वाद्रेः
४६ गीबहुष्वेः
४७ न्लुक् सुबाश्रये
४८ श्योऽलुचि
४९ परे
५० षरान्नो णः
५१ श्चुल्टुस्तौ नान्तरे
५२ घि घ्नः
५३ पदेऽनाङ्यतद्धिते
५४ अन्तन्तुम्नादीनाम्
५५ नृतेर्यङः
५६ अभिन्ने
५७ पूर्वपदस्याद्धान्तनम्सुपः
५८ सक्ताचो
५९ क्तो षि
६० क्विजस्मषिपः
६१ शर्नमः
६२ शिचो न यङि
६३ सुजस्स्यसनि
६४ सेधतेर्गतौ
६५ शास्वसिघस्सिकृतस्यासक्सातोऽबहुपदात्
६६ षढः कस्सि
६७ रः पदान्ते विसर्जनीयः
६८ धातोर्वोर्दीर्घोऽयहल्नि घाच्छुकुरोः
६९ स्वोश्च मोनिः
७० अनडुद्द्युदुष्णिग्दिग्द्रुक्स्पृग्दधृक्परिभ्राट्
७१ नग्वा
७२ मंजूरहस्सोऽतिप्यक्तस्त्रन्सुध्वन्सोरिः

७३ भिपि दश्च वा
७४ रः सुप्सि
७५ जलो जश्
७६ बशो भष् झषस्स्वधोश्चै
काचः प्रत्यये
७७ धाञो जलि च
७८ यङोऽन्येषाम्
७९ धेस्तथः
८० अधः
८१ ह्रञो लिलुङां धेः ढः
८२ वेह्ञः
८३ हः
८४ दादेरेधादेर्घः
८५ नि घ्नः
८६ द्रुहमुहस्नुहस्निहो वा
८७ नहो धः
८८ चोः कुः
८९ युज्यञ्चिक्रुञ्चः
९० व्रश्चभ्रस्जसृजमृजयजराज-
भ्राजच्छशः षः
९१ संयोगस्यादिस्कोर्लुक्
९२ पदस्य
९३ रात्सः
९४ ला
९५ नः
९६ मान्तोपान्तञयो मतोर्मो वा
९७ नाम्नि
९८ अष्ठीवच्चक्रीवत्कक्षीवच्चर्म-
ण्वद्रुमण्वत्
९९ अव्यौ चोदन्वान्
१०० राजन्वान् सुराज्ञि
१०१ नोर्म्यादिभ्यः
१०२ ङ्यौस्यृतोऽपदस्यार्
१०३ ङातो डुः
१०४ ख्यत्य उः
१०५ एङो लुक्
१०६ एदे
१०७ हित्यन्त्याजादेः
१०८ नः पथिमथ्यृभुक्षः
१०९ श्यनप्सुत्स्यन्
११० धो नट्
१११ आस्स्यनः
११२ द्यौः
११३ अनडुहो नम्
११४ नगिदचोऽनेधादेः
११५ युञ्जोऽसमासे
११६ पुंसो ङस्
११७ ओत् औ
११८ ङाम् शसः
११९ ऋत्सखीदुशनस्पुरुदंशोऽने-
हसस्सोः
१२० हल्ङयाब्दीर्घाल्लुक्
१२१ वोशनोशनन्नचोभगोभो-
स्स्वमश्चैकामन्त्रणे
१२२ ह्रस्वोऽन्नित्याटः
१२३ द्व्यचोऽम्बार्थस्य
१२४ एदाइः
१२५ ह्रस्वैतो लुचि चारेङ्
१२६ पुत्रेऽर्हे मातुः कचोऽङ्
१२७ वोऽनडुच्चतुरोः

१२८ वाः
१२९ न ङान्लुक्
१३० सखित ऐ च
१३१ क्रोष्टो≍क्रोष्टृ
१३२ वाच्यापि
१३३ तृप्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ-
होतृपोतृप्रशास्तृदीर्घः
१३४ न्यक्
१३५ स्नहतः
१३६ इन्हन्पूषार्यम्णाश्शौ
१३७ सावतश्च
१३८ असोऽनेधादेः
१३९ श्चे
१४० नास्यतिस्त्वतुष्ठः
१४१ नुर्वा
१४२ संख्याविसायादह्नस्याहन् ङौ
१४३ पद्दन्नोमास्हृन्निशसन्यूष-
न्दोषन्यकन्शकन्नुदन्नास-
श्चासुटि
१४४ पादोऽपदस्य यपसुट्च्छि-
ययादौ पद्
१४५ क्वस् उस्
१४६ श्चोऽचः
१४७ उद ई
१४८ श्वयुवन्मघोनां वस्येसुप्युश्
१४९ श्नोऽनोहल्वमात्
१५० ङिग्योर्वा
१५१ आतोऽनाङः ग्लुक्
१५२ डतिष्णां सख्यानां जश्शसः
१५३ अष्ट औश्

१५४ अव्ययस्य
१५५ अव्ययीभावस्य
१५६ नातः
१५७ अमपञ्चम्याः
१५८ तृतीयाया वा
१५९ सप्तम्याः
१६० नद्यृद्धवत्स्य
१६१ परस्परान्योऽन्येतरेतरस्यां
सुपो वा पुंसि
१६२ भ्यत्याः
१६३ वह्वाभि स्म्येत्
१६४ ऐम् भिशोऽद्भशः
१६५ ङसास्येस्स्येनाद्यम्
१६६ सर्वादेङ् यस्येः स्मिन्स्मा-
त्स्मै
१६७ जसश्शिः
११८ नेमार्धप्रथमचरमाल्पक-
तिपयतयस्य वा
१६९ द्वन्द्वे
१७० न सर्वादिः
१७१ पूर्वावरं तृतीयायोगे
१७२ नव पूर्वा वादौ
१७३ तीयं ङिति
१७४ विदिक् च
१७५ ङस्यात्स्यस्य
१७६ सामामः
१७७ युष्मदस्मद्भ्यामाकम्
१७८ ङश्शोभ्यसोऽश्नाभ्यम्
१७९ भ्योऽऽसोऽद्
१८० ङे सुटोऽम्

१८१ दोर्लुक्
१८२ वा
१८३ अमौद्वल्याः
१८४ यौसि यः
१८५ मन्तस्य युवावौ द्वयोः
१८६ त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्
१८७ त्वाहौ सौ
१८८ यूयवयौ जसि
१८९ तुभ्यमह्यौ ङयि
१९० तवममौ ङसि
१९१ पदाद्वाक्यस्य वस्नसौ युविभक्तेः
१९२ वानावौ द्वित्वे
१९३ तेमयावेकत्वे
१९४ त्वामौ द्वितीयायाः
१९५ नेवामन्त्र्य पूर्वम्
१९६ जस्विशेष्यं वामन्त्र्ये
१९७ न
१९८ पादाद्योः
१९९ मनसीक्षार्थैः
२०० चवाऽहहैव योगे
२०१ नित्यमन्वादेशे
२०२ पदात् प्रथमाया वा
२०३ त्यदां द्वितीयाटौस्येनदेतदः
२०४ इमदः
२०५ स्भ्येऽश्
२०६ अकः
२०७ टौस्यनः
२०८ दो मः
२०९ सौ
२१० पुंसीदोऽय्
२११ इय्
२१२ औस्सुलुक् चादसोऽनोः
२१३ वाकोऽस्योः
२१४ इस्मः
२१५ तोष्टनम्
२१६ स्मसौ चात
२१७ किमः कः
२१८ शेऽपेऽद्
२१९ वाष्टन आः
२२० रायः स्मि
२२१ त्रिचतुरः स्त्रियां तिसृचतसृ
२२२ रोऽनपोऽच्यु:
२२३ ङ्यौटि नीचो वा

इति शाकटायनीयसूत्रपाठे प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ।

तृतीय पादः ।

१ क्रोष्टोस्तृ
२ गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ्
३ गोत्रापयवे वृद्धे
४ रूढादिभ्यः
५ देवयज्ञिशुचिवृक्षसत्यमुग्रकण्ठेविद्धाद्वा
६ सूत्याभोज्ये युवतिक्षत्रिये
७ नृदुगिदज्झोऽस्वस्त्रादेर्ङी
८ न ह्रषेऽनुवनः

९ पादो वा
१० कुंभपद्यादौ
११ ऋच्याङ्
१२ मन्नन्बहुव्रीहेर्न च
१३ अजाद्यताम्
१४ टिड्ढाणञ्द्वयसज्दघ्नज्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ख्युनगौरादिभ्यः
१५ यञोषावटात्
१६ यञ्यञलोहितादिशकलान्तकौरव्यासुरिमाण्डूकाङ्कुफट्
१७ वयस्यनन्त्ये
१८ बहुव्रीहेस्संख्यादेर्हायनात्
१९ दाम्नः
२० ऊधनः
२१ अशिशोः
२२ श्वतो वा
२३ नाम्नि
२४ अनाच्छादनाज्जातेः पूर्वपदात् क्तादजातकृतमितप्रतिपन्नात्
२५ पाणिगृहीतीति पत्नी
२६ वाऽस्वाङ्गात्
२७ असहनञ्विद्यमानान्नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठाबहूच्संयोगोपान्त्यात्स्वांगात् समासात्
२८ दीर्घजिह्वात्
२९ पुच्छात्
३० कबरमणिविषशरात्
३१ पक्षाच्चोपमानात्
३२ न नखमुखान्नाम्नि
३३ क्रोडादिभ्यः
३४ करणात् क्रीतात्
३५ क्तादल्पे
३६ द्विगोः
३७ परिमाणादेव लुचोऽविस्ताचितकम्बल्यात्
३८ काण्डादक्षेत्रे
३९ पुरुषात्प्रमाणाद्वा
४० नः पत्यन्तस्य
४१ सपत्न्यादौ
४२ पतिवत्न्यन्तर्वत्न्याविधवागर्भिण्योः
४३ रोहिणरेवतान्नक्षत्रे
४४ नीलात् प्राण्योषध्योः
४५ नाम्नि क्ताच्च वा
४६ केवलमामकभागधेयपापावरसमानार्यकृतसुमङ्गलभेषजात्
४७ कुण्डभाजगोणस्थलनागकुशकासुकक्रटकबरात् पात्रश्राणावपनाकृत्रिमस्थूलायसमैथुनेच्छुश्रोणिकेशवेशे
४८ आर्यक्षत्रियाद्वान्
४९ धवाद्योगादज्येष्ठादिभ्यः
५० पूतक्रत्वग्निवृषाकपिकुसितकुसीदादैङ् च
५१ मनोर्वा ङैच्
५२ मातुलाचार्योपाध्यायादान् च

५३ वरुणेन्द्रमृडभवशर्वरुद्रादान्
५४ सूर्याद्देवतायाम्
५५ आङ्
५६ यवनयवाल्लिपि दुष्टे
५७ हिमारण्यादुरौ
५८ वेदृक्तिनो ङी
५९ गुणादुतोऽचोऽखरोः
६० चन्द्रभागान्नद्याम्
६१ बह्वादेः
६२ शोणश्यैतैतहरितभरतरोहिताद्वर्णात्तो नश्च
६३ क्नोऽसितपलितात्
६४ कालशबलसारङ्गपिशङ्गपिङ्गलकल्माषात्
६५ जातेरस्त्रीयशूद्रात्
६६ पाककर्णपर्णवालान्तात्
६७ पुष्पादसत् काण्डप्रान्तशतैकाञ्चः
६८ फलादमंभस्त्राजिनैकशणपिण्डात्
६९ मूलादनञः
७० नुरितः
७१ ऊरुदितोऽप्राणिनश्चायुरज्ज्वादिभ्यः
७२ ऊरूत्तरपदादौपम्ये
७३ सहसफसहितसंहितलक्ष्मणवामादेः
७४ वाहून्तकद्रु कमण्डलोर्नाम्नि
७५ नारीसखी पङ्गुःश्वश्रूः
७६ यूनस्तित्
७७ ङ्यां बनो रः
७८ लुगतः
७९ मत्स्यतद्धितस्य हलो यः
८० सूर्यागस्त्ययोश्छे च
८१ लुच्यगेणीसूच्योःष्यतः
८२ गोण्या ह्रस्वो मेये
८३ केऽण् ङ्यः
८४ न कचि [८५ वाङ्गः
८६ ङ्च्चापुंसोऽनित्क्या ध्यसुपः
८७ स्वज्ञाजभस्त्राधातुक्यः
८८ द्वेषसूतपुत्रवृन्दारकस्य
८९ वौ वर्तिका
९० स्यायदाद्यतः
९१ नरिकामामिका
९२ तारकावर्णकाज्योंतिषतान्तवे
९३ योगे
९४ जातिर्बहुद्वैकाख्याम्
९५ द्वौ चास्मदोऽविशेषणे
९६ फल्गुनी प्रोष्ठपदस्य नक्षत्रम्
९७ अव्ययात् स्वौजस्
९८ एकद्विबहौ
९९ आमन्त्र्ये
१०० हाधिक्समयानिकषोपर्युपर्यध्यध्यधोऽत्यन्तरान्तरेणतस्पर्यभिसर्वोभयैश्चाप्रधानेऽमौट्शस्
१०१ वीप्स्यलक्षणेत्थंभवनेष्वभिना

१०२ भागिनि च प्रतिपर्यनुभिः
१०३ टार्थेऽनुना
१०४ उत्कृष्टेऽनूपेन
१०५ कर्मणि
१०६ दिवः करणे वा
१०७ कर्म च
१०८ न विनिमेयद्यूतपणम्
१०९ वोपसर्गात्
११० पणठ्यवह्रोः
१११ स्मृत्यर्थदयीशां कर्म
११२ कृञः प्रतियत्ने
११३ रुजोऽज्वरिसंताप्योः कर्तरि भावे
११४ हिंसायां जासनाटक्राथपिषनिप्रहनाम्
११५ आशिषि नाथः
११६ दृश्यभिवाद्योर्णौस्तङि
११७ अकर्मकात्
११८ नित्यकर्मेनभिह्नाद्यर्थशब्दकर्मदृशोऽखाददिक्रन्दशब्दायह्वः
११९ भक्षेर्हिंसायाम्
१२० वहेः प्रवेयम्
१२१ हृक्रोर्वा
१२२ शीङ्स्थासोऽधेराधारः
१२३ वसोऽनूपाध्याङः
१२४ अभिनिविशश्च
१२५ कालाध्वभावदेशं वा कर्म चाकर्मणाम्
१२६ कालाध्वनोऽत्यन्तसंयोगे
१२७ टाभ्यांभिस्सिद्धौ
१२८ हेतुकर्तृकरणेत्थंभूतलक्षणे
१२९ सहार्थेन
१३० यद्भेदैस्तद्वदाख्या
१३१ काले भाद्वाधारे
१३२ प्रसितावबद्धोत्सुकैः
१३३ समो ज्ञोऽस्मृतौ वाप्ये
१३४ दाणाधर्मे तङ् च देये
१३५ ङे भ्यां भ्यस्
१३६ स्यानिवुणः
१३७ क्रुध्द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपो न च कर्म
१३८ क्रुद्द्रुहाञ्चोपसर्गात्
१३९ स्पृहेर्वा
१४० मन्यस्याकाकादिषु यतोऽवज्ञा
१४१ भद्रायुष्यक्षेमसुखार्थहितार्थहितैराशिषि
१४२ शक्तार्थवषड्नमस्स्वस्तिस्वाहास्वधाहितैः
१४३ रुचिक्लृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु
१४४ प्रत्याङः श्रुवाभ्यर्थके
१४५ प्रत्यनोर्गृणाख्यातरि
१३६ राधीक्षौ यद्दैवे
१४७ उत्पातेन ज्ञाप्ये
१४८ श्लाघन्हुङ्स्थाशपां प्रयोज्ये
१४९ गत्यादिभिर्बहुलम्
१५० यदर्थम्
१५१ परिक्रये करणे वा

१५२ ङसिभ्यांभ्यस्स्तोकाल्पक-
तिपयकृच्छ्रादसत्वे
१५३ आराद्र्थैः
१५४ हेतौ गुणेऽस्त्रियाम्
१५५ ऋणे
१५६ अपाये ऽवधौ
१५७ आख्यातर्युपयोगे
१५८ आङा
१५९ वर्ज्येऽपपरिणा
१६० प्रतिनिधिप्रतिदाने प्रतिना
१६१ स्थानिप्यकर्माधारे
१६२ दिक्च्छब्दान्यार्थारादृहि-
रितरैः
१६३ ङसोसाम्
१६४ स्ताता
१६५ करणे ज्ञोऽज्ञाने
१६६ कृत्कामुकस्याखुणल्कण्
खार्थाव्ययैष्यदृणेनः कर्म
कर्त्रोः
१६७ क्तस्य सदाधारे
१६८ वानाकस्य क्तध्यव्हिप्राप्तेः
कर्तरि
१६९ कर्मणि गुणे
१७० न घ्यपः
१७१ क्तेनो ङ्योस्सुप्
१७२ हेतौ कर्मणा
१७३ साधुनिपुणेनार्चायाम्
१७४ स्वेशेऽधिना
१७५ उपेनाधिकिनि
१७६ आधारे
१७७ सुजर्थैः काले वा
१७८ कुशलायुक्तेनासेवायाम्
१७९ स्वामीश्वराधिपतिदाया-
दसाक्षिप्रतिभूप्रसूतैश्च
१८० यद्भावो भावलक्षणम्
१८१ त्रयी त्रयी विभक्तिः
१८२ प्रथमादिः
१८३ षष्ठी चानादरे
१८४ गते स्थानिन्यध्वान्तेनैकः
१८५ सप्तमी
१८६ कारकमध्येऽध्वकाले पञ्च-
मी च
१८७ चेष्टागत्याप्येऽनाक्रान्ते
द्वितीयाचतुर्थ्यौ
१८८ तुल्यार्थैस्तृतीया
१८९ षष्ठी
१९० द्वितीया चैनेनानञ्चेः
१९१ पञ्चमी चर्ते
१९२ पृथग्नाना तृतीया च
१९३ विनेमास्तिस्रः
१९४ सप्तमी चासत्त्वारादर्थात्
१९५ हेतौ हेत्वर्थैः सर्वाः प्रायः

इति शाकटायनीसूत्रपाठे प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ।

चतुर्थः पादः

१ लोऽन्ययुष्मदस्मात्सु तिप्त-
स्झिसिप्थस्थमिब्वस्मः
२ तातांझथासाथांध्वमि-

ल्वह्लिमहिङ्ङिदिच्छीयसं'
क्षणवपस्कन्निविशः
३ ऊह्यसोर्वोपसर्गात्
४ युजोऽजुदः
५ न यज्ञे तत्पात्रे
६ परिव्ययात् क्रियः
७ परावेर्जेः
८ कर्मणोदश्चरः
९ समस्तृतीयया
१० क्रीडोऽकूजे
११ पर्यम्वाङः
१२ शपनाथशिक्षभुजादुपलम्भ'
नाशीर्जिज्ञासात्राणे
१३ हृञो गतिताच्छील्ये
१४ न्यत्सम्माननाचार्यकभृ-
त्युत्सञ्जनज्ञानव्ययविगणने
१५ कर्तृस्थेऽतनावाप्ये
१६ म्रियतेर्लुङ्लिङ्ललेः
१७ क्यषो वा
१८ लोः कृपः
१९ द्युद्भ्यो लुङः
२० वृद्भ्यस्स्स्यात्
२१ क्रमोऽनुपसर्गात्
२२ वृत्तिसर्गतायने
२३ परोपात्
२४ वेः पादविक्षेपे
२५ प्रोपाभ्यां समर्थाभ्याम्
२६ ज्योतिरुद्गतावाङः
२७ नुदाञ्प्रच्छः
२८ गमे प्रतीक्षायाम्
२९ ह्वस्स्पर्धे
३० स्संनिवेः
५१ उपात्
३२ यमोऽविवाहे
३३ स्थः पथिमैत्रीदेवार्चासङ्ग-
ममन्त्रकरणे
३४ लिप्सौ वा
३५ उदोऽनूर्ध्वेहे
३६ संविप्रावात्
३७ स्थेयप्रकाशने
३८ प्रतिज्ञाने
३९ समो गिरात्
४० अवात्
४१ संप्रतेर्ज्ञोऽस्मृतौ
४२ निह्नवे
४३ मनोऽननोः
४४ श्रुवोऽप्रत्याङः
४५ स्मृदृशः
४६ प्राग्वत्
४७ आमः कृञः
४८ न
४९ गन्धनावक्षेपसेवासाहसप्र-
तियत्नप्रकथाव्यये
५० प्रसहनेऽधेः
५१ दीप्तिज्ञानेहाविमत्युपसं-
भाषोपमन्त्रणे वदः
५२ यक्ष्वाचां सहोक्तौ
५३ विप्रलापे वा
५४ कर्मण्यसत्यनोः
५५ ज्ञोपस्थः

५६ समोऽर्तिस्वरतिश्रुदृशिवद्गम्प्रच्छश्च्छ:
५७ वेः कृञः शब्दे चानाशे
५८ यङ्घ्नः स्वेऽङ्गे चाङः
५९ व्युदस्तपः
६० न प्राणिन्यणिञोणिजन्तस्य
६१ अनात्मन्यनाध्याने
६२ भीष्मिल्यां षाकारे
६३ गृधिवञ्च्योर्विप्रलम्भे
६४ मिथ्याकृञोऽभ्यासे
६५ घेट्पाहृ मायमायस्परिमुहरुचिनृतिवद्धस्यचल्यद्यर्थेङ्प्रुद्रुस्त्रुबुधयुधनशजनःफलेशे पदाद्गते तु वा
६६ ञीदिदपवदानुपसर्गश्च:
६७ यमः समुदाङोऽग्रंथे
६८ न पर्याङ्वे रमः
६९ उपात्
७० वाकर्मकात्
७१ व्यादाञोऽपराङ्गे
७२ परानोः कुः
७३ प्रत्यत्यभेः क्षिपः
७४ प्राद्वहः
७५ परेमृषेश्च
७६ व्यतिहृतेऽगतिहिंसाशब्देहृवहश्चापरास्परान्योन्येतरेतरे
७७ कर्मभावे
७८ मङ्लटश्शापेऽतङ्तङ्वच्छत्रानशौ
७९ सङ्गङ्वत्स्यल्लृटो वानितौ
८० लिटः क्वसुकानौ
८१ श्रुविशवस्सदोऽनुवचश्च कर्तरि भूते
८२ अनाश्वान्
८३ दयायास्कास्गुर्विजाद्यनेकाचोऽनृच्छूर्णोराम् कृभ्वस्लिट् चानु
८४ जोगुषसमिन्धो वा
८५ भीह्रीभृहोः श्लुवत्
८६ विदात् कित्
८७ लेटः क्लेट्
८८ झोऽन्तः
८९ द्वयुक्जिक्षपञ्चतोऽत्
९० तङोऽनतः
९१ शीङो रत्
९२ वेत्तेर्वा
९३ ए टित्
९४ वत्यामो गेश्
९५ थासस्से
९६ लोराभ्याङ्गुपौरस्
९७ झेः
९८ लिटस्तझस्यैशिरे
९९ णमेरौशातः
१०० मिपोऽम्
१०१ श्रुतङाणशतुसुस्याशुसस्पणश्चमाः
१०२ विद लटो वा
१०३ शतुः क्वसुः
१०४ ब्रुवस्तिप्पञ्चतो णश्पञ्चद्रुब्रु-

वश्चाहः
१०५ एङ्गितो लुक्
१०६ आद्‌द्विषो झेर्जुस्वा
१०७ सिविदुभ्रोऽभ्वः
१०८ लेलेः
१०९ ङ्घाट्क्यासट्
११० रन्नौक्तेलोः
१११ टीय्
११२ सट् त्थीयां लिङः
११३ तस्थस्थवस्मस्मेस्तान्तंत-
वर्मा लेटश्च
११४ सीम्येर्घ्यु न्याम्
११५ म्वेमादेष्टाप्
११६ एतोऽगैप्
११७ स्वो वाम्
११८ भृशादौ ह्निः
११९ यस्य वा
१२० च्वेस्स्वः
१२१ तङः
१२२ तुह्योताद्वाशिषि
१२३ हि चाप् ।

इति शाकटायनीयसूत्रपाठे
प्रथमस्याध्यायस्य चतुर्थ पादः।
समाप्तोऽध्यायश्च प्रथमः ॥

—:o:—

प्रथमः पादः

१ सुप्सुपा समासो बहुलम्
२ सुज्वार्थे संख्या संख्यया
संख्येये बहुव्रीहिः
३ आसन्नादूराधिकाध्यर्धार्धा
दिङ्‌द्वितीयाद्यन्यार्थे
४ अव्ययम्
५ एकार्थं च
६ मिथोग्रहणे प्रहरणे च सरूपं
युद्धेऽव्ययीभावः ।
७ नदीभिर्नाम्नि
८ संख्यावंश्यैश्च पूर्वपदार्थे
९ पारेमध्येऽन्तष्षष्ठ्या
१० यावदवधारणे
११ बहिः पर्यपाङ् च
१२ लक्षणेनाभिप्रत्याभिमुख्ये
१३ दैर्घ्येऽनुः
१४ समीपे
१५ तिष्ठद्ग्वादयः
१६ नित्य प्रतिनाल्पे
१७ परिणाक्षशलाकासंख्यं
द्युते जये
१८ शब्दप्रथासम्पत्समृद्धिव्यृ-
द्ध्यर्थाभावात्ययासम्प्रति-
सुप्पश्चाद्युगपद्यथासदृक्-
साकल्यान्तेऽव्ययम्
१९ यथाथाः
२० तिदुस्स्वत्याङ्क्त्यस्त
त्पुरुषः
२१ गतादिषु प्रादयः
२२ स्वकृतास्युक्तम्
२३ टा
२४ नञ्
२५ पूर्वापराधरोत्तरमंशिना-

भिन्नेन

२६ समेऽर्धम्

२७ द्वित्रिचतुर्ड्ढा

२८ कालो द्विगौ च मेयैः

२९ स्वयं सामि क्तेन

३० द्वितीया खट्वा क्षेपे

३१ कालः

३२ व्याप्तौ

३३ श्रितादिभिः

३४ प्राप्तापन्नं तया च

३५ ईषद्गुणवचनैः

३६ तृतीया तत्कृतैः

३७ साधनं कृता

३८ पूर्वाद्यूनार्थैः

३९ चतुर्थी प्रकृतिस्वार्थार्था-
दिभिः

४० तयालम्

४१ पञ्चमी भयादिभिः

४२ क्तेनासत्त्वे

४३ षष्ठ्ययत्नात्

४४ याजकादिभिः

४५ पत्तिरथं गणकेन

४६ बुनाजीवे

४७ न कर्तरि

४८ कर्मणि त्रा च

४९ पृतीयायाम्

५० तृप्तार्थाव्ययनिर्धार्यडच्क्त-
त्रानशमतिपूजाधारक्तैः

५१ गुणैरस्वस्थैः

५२ सप्तमी शौण्डादिभिः

५३ नाम्नि

५४ ध्यपावश्यके

५५ तत्राहोरात्रांशाः क्तेन

५६ काकादिभिश्च क्षेपे

५७ पात्रेसमितादयः ।

५८ विशेषणं व्यभिचार्येकार्थं
कर्मधारयश्च

५९ पूर्वकालैकसर्वजरत्पुराणन-
वकेवलम्

६० दिगधिकं संज्ञातद्धितोत्तरपदे

६१ संख्या समभिहारे च द्विगु-
श्चानाम्न्ययम्

६२ निन्द्योऽपापाणकेन

६३ गौणस्सेन

६४ व्याघ्रादिभिर्गौणैस्तदनुक्तौ

६५ पूर्वापरप्रथमचरमजघन्यस-
मानमध्यममध्यमवीरम्

६६ श्रेण्यादिः कृतादिभि-
श्च्वौ

६७ क्तन्नञादिभिन्नैः

५८ नानिटेट्

६९ सन्महत्परमोत्कृष्टं पूजा-
याम्

७० वृन्दारकनागकुञ्जरैः

७१ कतरकतमं जातिप्रश्ने

७२ किं क्षेपे

७३ पोटायुवतिस्तोककतिपय-
गृष्टिधेनुवशावेहद्वष्कयणी-
प्रवक्तृश्रोत्रियाध्यापकधूर्त-
प्रशंसारूढैर्जातिः

७४ चतुष्पाद्गर्भिण्या
७५ खलतिजरत्पलितव-
लिनैर्युवा
७६ छत्रमुल्याख्यमजात्या
७७ वर्णैर्वर्णाः
७८ कुमारः श्रमणादिना
७९ मयूरव्यंसकादयः
८० द्वन्द्वस्सहोक्तौ
८१ समानामेकः
८२ सुप्यसंख्येयः
८३ त्यदादिः
८४ भ्रातृपुत्रास्स्वसृदुहितृभिः
८५ पिता मात्रा वा
८६ श्वशुरः श्वश्र्भ्याम्
८७ वृद्धो यूनानन्यार्थं प्रकृतौ
८८ पुरुषः
८९ स्त्रिया
९० ग्राम्यद्विखुरसंघेऽशिशौ
स्त्रीप्रायः
९१ नपुंसकमन्येनैकं च वा
९२ पुष्यार्थात् पुनर्वसुर्ज्यौतिषि
९३ द्वन्द्वो वा
९४ विरोध्यद्रव्यमभेदे
९५ अश्ववडवपूर्वापराधरोत्तराः
९६ पशुव्यञ्जनानि
९७ तरुतृणधान्यमृगपक्षिब-
ह्वर्थांशः
९८ सेनाङ्गक्षुद्रजन्तु
९९ फलं जातिः
१०० शेषोऽप्राणी

१०१ प्राणितूर्याङ्गम्
१०२ चरणं स्थेणो लुङ्यनुवादे
१०३ नित्यवरावैरे
१०४ पात्र्यशूद्रानपुंसकाध्वर्यु-
क्रत्वधीत्यासन्नविलिङ्गन
दीपूर्देशगवाश्वादि
१०५ न दधिपयआदिः
१०६ सख्याने
१०७ वाऽन्तिके
१०८ सूक्तं पूर्वम्
१०९ राजदन्तादौ
११० विशेषणसर्वादिसंख्यं
बहुव्रीहौ
१११ क्तः
११२ कालाकृतिसुखादिभ्यो वा
११३ प्रहरणात् सप्तमी च
११४ गड्वादिभ्यः
११५ भार्योढादिषु
११६ प्रियः
११७ कडारादयः कर्मधारये
११८ धर्मार्थादिषु द्वन्द्वे
११९ लघुच्यजाद्यल्पाजर्च्यमेकम्
१२० वर्णभ्रात्रनुपूर्वम्
१२१ भत्वैकसंख्या च
१२२ संख्याल्पा समासे
१२३ न्यग्रोध्यतोऽनंशीयोबहु-
व्रीहेर्ह्रस्वः
१२४ अन्तः
१२५ न नञः
१२६ किमः क्षेपे

१२७ प्राक् टात् स्वतेः पूजायाम्
१२८ बहोर्डे
१२९ कप् नाम्नि
१३० ईयसः
१३१ सहात्तुल्ये
१३२ भ्रातुस्स्तुतौ
१३३ नाडीतंत्र्याऽस्स्वाङ्गे
१३४ निष्प्रवाणिः
१३५ इज्युद्धे
१३६ द्विदण्ड्यादिः
१३७ खेऽङ्कक्षात्रितंवालंकर्मालंपुरुषात्
१३८ वाऽन्धोऽदिक्स्त्रियाम्
१३९ ऋक्पूःपथ्यपोऽत्
१४० धुरोऽनक्षस्य
१४१ संख्योदक्पाण्डुकृष्णाद्भूमेः
१४२ उपसर्गादध्वनः
१४३ प्रत्यन्ववात् सामलोम्नः
१४४ प्रतेरुरसस्सप्तम्याः
१४५ समवान्धात्तमसः
१४६ तप्तान्ववाद्रहसः
१४७ ब्रह्महस्तिराजपल्याद्वर्चसः
१४८ अक्ष्णोऽप्राण्यङ्गे
१४९ संकटाभ्याम्
१५० प्रत्यनोरव्ययीभावात्
१५१ शरदादेः
१५२ जराया ङश्च
१५३ अनः
१५४ नपुंसकाद्वा
१५५ गिरिनदीपौर्णमास्याग्रहायणीजयः
१५६ संख्याया नदीगोदावार्योः
१५७ सरजसोपशुनाऽनुगवम्
१५८ जातमहद्वृद्धादुक्षणः कर्मधारयात्
१५९ स्त्रियाः पुंसो द्वन्द्वाच्च
१६० धेन्वनडुहर्ग्यजुषाहोरात्रनक्तंदिवरात्रिंदिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवं
१६१ चुदषहस्समाहारे
१६२ द्विगोरन्होऽट्
१६३ द्वित्रेरायुषः
१६४ अञ्जलेश्चालुचः
१६५ खार्या वा
१६६ अर्धाच्च
१६७ नावः
१६८ गौस्तत्पुरुषात्
१६९ राजन्सखेः
१७० ग्रामकौटात्तक्ष्णः
१७१ राष्ट्राख्यात् ब्रह्मणः
१७२ कुमहतो वा
१७३ शुनोऽतेः
१७४ गौणात्
१७५ अप्राणिनि
१७६ मृगोत्तरपूर्वाच्च सक्थ्नः
१७७ सरोऽनोऽश्मायसो जातिनाम्नोः
१७८ उरसोऽग्रे
१७९ अह्नः

१८० संख्यातादह्नश्च
१८१ संख्याव्ययसर्वांशात्
१८२ पुण्यवर्षादीर्घसंख्यातैका-
च्चाद्रात्रेः
१८३ श्वश्रेयसश्वोवसीयसनि-
श्रेयसपुरुषागोष्ठश्वद्धिस्ता-
वत्रिस्तावाः
१८४ नञव्ययात् संख्याया डः
१८५ संख्याव्ययादंगुलेः
१८६ बहुव्रीहेः काष्ठे टः
१८७ सव्यक्षणस्स्वाङ्गे
१८८ द्वित्रेर्मूर्ध्नो वा
१८९ प्रमाणीसंख्याड्डः
१९० त्रिचतुरोपचतुराचतुरविच'
,, तुरसुचतुरसुप्रातसुश्वसुदि-
,, वैणीपदाजपदप्रोष्ठपदच'
,, तुरस्रशारिकुक्षाः
१९१ प्राधानखीडद्भ्योऽप्
१९२ अन्तर्बहिर्भ्यां लोम्नः
१९३ नञ्बहोर्ऋचो माणवचरणे
१९४ भान्नेतुः
१९५ नाभेर्नाम्नि
१९६ नञ् दुस्सोः सक्थिहलेर्वा
१९७ अस् प्रजायाः
१९८ अल्पाच्च मेधायाः
१९९ धर्मादन् द्विपदात्
२०० सुहरिततृणसोमाज्जम्भात्
२०१ लुब्धेन दक्षिणेर्मा
२०२ जातेश्छन्दस्सामान्यवति
२०३ भृतिप्रत्ययान्मासाद्धः

२०४ सूतपूतिसुरभे गन्धादिद्गुणे
२०५ वाल्पे
२०६ वोपमानात् [पादस्य लुक्
२०७ सुसंख्याद्वाहस्त्यादेः
२०८ वयसि दन्तस्य दतृ
२०९ स्त्रियां नाम्नि
२१० श्यावारोकाद्वा
२११ अग्रान्तशुद्धशुभ्रवृषवराहा-
हिसूषिकात्
२१२ पूर्णाल्लुक्काकुदस्य
२१३ व्युदः
२१४ त्रेः ककुदस्याद्रौ
२१५ अवस्थायाम्
२१६ जायाया जानिः
२१७ धनुर्नाम्नि
२१८ खरखुरान्नस् नासिकायाः
२१९ नसोऽस्थूलाच्च
२२० उपसर्गात्
२२१ वेः खुरग्राः
२२२ सम्प्राज्जानो ज्ञुज्ञौ
२२३ वोर्ध्वात्
२२४ सुहृद्दुर्हृन् मित्रामित्रे
२२५ स्त्रियामूधसो नङ्
२२६ इनः कच्
२२७ उरः प्रभृत्यन्नित्याटः
२२८ नञोऽर्थात्
२२९ शेषात् सिद्धनन्दिनः

इति शाकटायनीय सूत्रपाठे
द्वितीयस्याध्यायस्य
प्रथमः पादः ।

द्वितीय पादः

१ प्रत्ययस्य च सुपश्लुक्
२ नोत्तरपदेऽमत्त्वे
३ खितीच एकाचोऽमः
४ ओजोऽञ्जस्सहोऽम्भस्तपसष्टः
५ इत्यात्मनः
६ मनस आज्ञायिनि
७ नाम्नि
८ ङेर्व्याकरणे
९ हलतस्सप्तम्याः
१० कारे प्राचां हलि
११ मध्यान्ताद्गुरौ
१२ अकामेऽमूर्धमस्तकात् स्वाङ्गात्
१३ वन्धे घञि वा
१४ तत्पुरुषे कृति बहुलम्
१५ ययोनिमतिचरजेऽपः
१६ द्युप्रावृड्वर्षाशरत् कालाज्जे
१७ त्वरवरशरवर्षाद्वा
१८ शयवासिवासेऽकालात्
१९ कालाद् ङतनट् काले
२० नेन् सिद्धस्थे
२१ ब्राह्मणाच्छंसिपुंसानुजजनुषान्धगोषुचरदिवोदासदेवानांप्रियाः
२२ षष्ठ्या आक्रोशे
२३ पुत्रे वा
२४ वाग्दिक्पश्यतो युक्तिदण्डहरे [शुनः
२५ शेफपुच्छलाङ्गूलेषु नाम्नि
२६ गोष्पदं सेवितप्रमाणे
२७ असेवितेऽगोष्पदम्
२८ ऋतां विद्यायोनिसंबंधे
२९ स्वसृपत्योर्वा
३० मातरपितरं द्वन्द्वे वा
३१ आङ्
३२ पुत्रे
३३ इन्द्रासोमादिषु देवतानाम्
३४ षोमवरुणेऽग्नेरीः
३५ नात्यविष्णवन्द्रे
३६ उषासोषसः
३७ दिवो द्यावा
३८ दिवस् पृथिव्या वा
३९ वर्चस्कादिष्ववस्करादयः
४० सर्वादिस्सर्वोऽसुपि पुमान्
४१ मोनिस्त्र्येकार्थयोस्स्त्र्यन्यतोऽनूः
४२ पिति तद्धिते
४३ जातिश्च णयञिय
४४ ढेऽग्निः
४५ गुणस्त्वते
४६ बह्वल्पार्थे शशसि
४७ मृगक्षीरादिष
४८ नाजारैच्तद्धितोऽरक्तावेकारेऽरित्स्वार्थे
४९ इद्धु तद्धितकोपान्त्याख्याः
५० स्वाङ्गेज्जातिश्चामानिनि
५१ प्रियादौ
५२ रूपकल्पङ्गोत्रमतहतचेलब्रुवेह्रस्वश्च वोगितः
५३ ङ्योऽनेकाचः

५४ भागवद्गौरिमतोर्नाम्नि
५५ नित्यादो वा
५६ मांस्पाकमांस्पचने
५७ दगर्थेऽन्यस्याषष्ठीतृतीयस्य
५८ रागोत्सुकास्थितोत्याशा-
स्याशिषि
५९ लकारके
६० नञोऽश
६१ तिङि क्षेपे
६२ एकादन्नाद्गौ
६३ वागोऽप्राणिनि
६४ अशोऽचि नट्
६५ विष्वग्देवसर्वादेर्ङ्द्रिगञ्चि क्वौ
६६ संसहस्य समिसध्रि
६७ तिरसस्तिर्यै
६८ लुग्घयप्यवश्यमः
६९ तुमो मनस्कामे
७० समः
७१ हिततते वा
७२ कृदन्ते वा मम् रात्रेः
७३ सत्यागदास्तोः कारे
७४ भ्राष्ट्राग्न्योरिन्धे
७५ भद्रोष्णयोः करणे
७६ लोकंपृणमध्यंदिनाभ्याश-
मितयथेनंभव्याः
७७ गिलगिलगिलयोरचोऽगि-
लस्य
७८ खित्यरुर्द्विषतश्चानव्य-
यस्य
७९ ह्रस्वः
८० मालेषीकेष्टकस्यान्तस्य च
भारितूलचिते
८१ भ्रुवोऽच्च कुटिकुंसे
८२ वेकोऽनीश्ङीयुव्यञः
८३ ङ्याङो बहुलं नाम्नि
८४ त्वे
८५ शुनो दीर्घात्
८६ वले
८७ आदिजन्ते
८८ घञ्युपसर्गस्य च
८९ काशत्तीकः
९० स्वाचिह्रस्याविष्टाष्टपञ्चभि-
न्नच्छिन्नच्छिद्रस्त्रुवस्वस्तिक-
स्य कर्णे
९१ चितेः कचि
९२ नहिवृतिवृषिव्यधिसहित-
निरुचि क्वौ ति कारकस्य
९३ हविर्युक्तेऽष्ट्नः कपालगवे
९४ नाम्नि
९५ कोटराञ्जनादीनां वनगिरौ
९६ बह्वच्शरादीनां मतयजिन-
रादेः
९७ वहेऽपीत्वादीकः
९८ विश्वस्य नरे
९९ ऋषौ मित्रे
१०० वसुराटोः
१०१ एकादश षोडश षोडन् षोढा
षड्ढा
१०२ द्वाष्टात्रयोऽनशीतौ प्राक्
शतादबहुव्रीहौ

१०३ चत्वारिंशदादौ वा
१०४ महतः करघासविशिष्टे डाः
१०५ ङ्यः
१०६ जातीयैकार्थे
१०७ आ घट्टूग्दृशदृक्षे
१०८ किम्मिदमः कीश्
१०९ सस्समानस्य धर्मादिषु च
११० सब्रह्मचारी
१११ सहस्याकालेऽव्ययीभावे
११२ ग्रन्थान्ताख्याधिकयाद्वृश्ये
११३ वान्यार्थे
११४ नाशिष्यगोवत्सहले
११५ वन्धौ ष्यस्येश्
११६ मातमातृमातृके वा
११७ पुत्रपत्योस्तत्पुरुषे
११८ कोः कदचि
११९ रथवदेषु
१२० कत्रि
१२१ पुरुषे का वा
१२२ अल्पे
१२३ पथ्यक्षयोः
१२४ काकवौ वोष्णे
१२५ नस् नासिकायास्तस् क्षुद्रे
१२६ येऽवर्णे
१२७ हृदयस्य हृद्यासलासे
१२८ लेखे
१२९ पदः पादस्याज्यातिगोपहते
१३० पत् काषि हिमहतिये
१३१ शस्पृचः
१३२ मिश्रशब्दघोषनिष्के वा
१३३ पूर्य एकहल्युदकस्योदः
१३४ मन्थौदनसक्तुबिन्दुवज्रवीवधभारहार गाहे
१३५ धिपेषंवासवाहने
१३६ नाम्न्युत्तरपदस्य च
१३७ प्लुग्वा
१३८ द्व्यन्तरुपसर्गादीदयोऽनात्
१३९ देशेऽनोरूः
१४० दिक्शब्दात्तीरस्य तारो वा
१४१ मातृपितुस्स्वसुष्षः
१४२ उः
१४३ विकुशमि परेष्षलम्
१४४ कपेर्गोत्रे
१४५ गोऽम्बाम्बसव्यापद्वित्रिभूम्यग्निमाञ्ज पुञ्जिशेकुशङ्कुकङ्गुत्रहिर्दिविपरमेष्ठः
१४६ प्रष्ठोऽग्रगामी
१४७ ज्योतिरायुषष्टोमः
१४८ ष्टुच्चाग्नेः
१४९ निदुस्सोः सेधसन्धिसाम्नाम्
१५० भीरुष्ठानादिषु
१५१ निनद्यास्स्नातेः कौशले
१५२ प्रतिष्णातं सूत्रे
१५३ ष्णातं नाम्नि
१५४ विष्टाराभिनिष्टानं छन्दोवर्णे
१५५ वृक्षासनं विष्टरः
१५६ युधिगवेष्ठिरः
१५७ एत्यगः
१५८ भाद्वा

१५९ णोऽसेः
१६० पुगामिश्रकासिध्रकाशारिकोकोटराद्वणम्
१६१ प्राग्रेऽन्तर्निश्शराम्रखदिरकार्ष्यपीयूक्षेक्षुप्लक्षात्
१६२ द्वित्र्यजभ्यो ऽनिरिकादिभ्यो वृक्षौषधादिभ्यो वा
१६३ गिरिनद्यादीनाम्
१६४ पाणं भावकरणे
१६५ देशे
१६६ ग्रामाग्राणीः
१६७ णसः
१६८ अतोऽह्णः
१६९ वयसि चतुस्त्रेहायणः
१७० वाह्याद्वाहणम्
१७१ क्त्वोऽनञः प्यः
१७२ पृषोदरयः

इति शाकटायनीयसूत्रपाठे
द्वियीयस्याध्यास्य
द्वितीयः पादः

तृतीय पादः

१ संभ्रमेऽसकृत्
२ भृशाभीक्ष्ण्याविच्छेदे प्राग् द्विः
३ नानावधारणानुपूर्व्याधिक्ये
४ इतरइतमौ समानां स्त्रीभावे
५ पूर्वप्रथमावन्यतोऽतिशये
६ प्रोपोत्सं पादपूरणे
७ सामीप्येऽधोऽध्युपरि
८ वीप्सायाम्
९ प्लुक् चैकस्यादौ सुपः
१० द्वन्द्वे वा
११ मर्यादोक्तिव्युत्क्रांतियज्ञपात्रप्रयोगरहस्ये
१२ लोकज्ञातेऽत्यन्तसाहचर्यें
१३ आबाधे
१४ रिद्गुणः सदृशे वा
१५ प्रियसुखे चाकृच्छ्रे
१६ वाक्यस्य परिवर्जने
१७ आद्यामन्त्र्यं संमत्यसूयाकोपेऽक्षन्त्यश्च प्लुतः
१८ भर्त्सनेऽन्यतरस्याम्
१९ तिङोऽपेक्षस्याङ्क्षे न
२० क्षियाशोः प्रैषे
२१ ओमः प्रारम्भे
२२ प्रतिश्रवणनिगृह्यानुयोगे
२३ चितीवे
२४ पूर्वस्य विचारे
२५ हे ॅ प्रश्नाख्याने
२६ प्रश्ने च प्रतिपदम्
२७ दूरादामन्त्र्यस्य गुरुवैंकोलन्तः
२८ हेहैष्वेषामेव
२९ भोश्च प्रत्यभिवादे चास्त्रीशूद्रे
३० पूजाविचारप्रश्ने चादिदुत्परा सन्धेयस्यैचः

३१ छघढखफः प्रत्ययस्येयियेयीनायन्
३२ इक् ठः
३३ दो सिसुसुगशश्वदकस्मात्तः कः
३४ वोरकः
३५ लुग्व्योर्वल्कौ
३६ ओदौतोऽवाविय
३७ कयच्यसक्सग्लालसायाम्
३८ वृषाश्वयोर्मैथुने
३९ क्षुत्तृड्गर्धेऽशनायोदन्यधनायम्
४० च्वौ चास्यानव्ययस्येः
४१ यङ्लेङ्कृतिचर्दचो रीदीर्घौ
४२ शिरसोऽच्ये तद्धिते शीर्षन्
४३ केशे वा
४४ शीर्षोऽचि
४५ विन्मतोश्लुङ्णीष्ठेयसि
४६ कन्वाल्पयूनोः
४७ प्रशस्यस्य श्रः
४८ वृद्धस्य च ज्यः
४९ ज्यायान्
५० वर्षः
५१ बाढान्तिकयोस्साधनेदौ
५२ प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृन्दारकस्येम्नि च प्रास्थास्फावर्गर्बंहत्रब्द्राघवृन्दम्
५३ रः पृथुमृदुकृशमृशदृढपरिवृढस्योः
५४ बहोर्णीष्ठे भूय्
५५ भूर्लुक् चैः
५६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्ल्वादेर्ङ्चेकः
५७ अन्त्यादादेः
५८ नैकाचः
५९ दण्डहस्तिनः फे
६० वाशिजिह्नाश्यश्वाथर्वयूनः पिढखठाके
६१ येनोऽत्ये
६२ अणि
६३ गाथिविदथिकेशिपणिगणिसंयोगादेरन्
६४ अनपत्ये
६५ स्नोऽवर्मणः
६६ वाह्यम्
६७ जातौ
६८ औक्षम्
६९ सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वनोऽपदस्य
७० चर्मशुनः कोशसंकोचे
७१ विकारापत्येऽश्महितनाम्नो वा
७२ स्वरादीनाम्
७३ विंशतेस्तेर्डिति
७४ एः
७५ अह्नोऽखादि
७६ षन् हन् धृतराज्ञोऽणि

७७ तैषपौषं भात्
७८ विल्वकां छस्य
७९ हलो यश्चिबश्यानात्याप-त्यस्य
८० राजन्यमनुष्ययोर्नाके
८१ ओर्ढेऽकद्रुवाः
८२ श्रवस्स्वयंभुवः
८३ केकयमित्रयुप्रलयस्येय्यादे-ञ्णिति
८४ आरैचोऽक्वादेः
८५ देविकाशिंशपादीर्घसत्रश्रेय सां तत्प्राम्रिराः
८६ वहीनरस्यैत्
८७ पदेय्वष्टैच्
८८ द्वारादेः
८९ न्यग्रोधस्य प्रकृतेः
९० अस्वाङ्गादेः
९१ श्वादेरौ
९२ इञः
९३ पदस्यानौ वा
९४ प्रौष्ठभद्राज्जाते
९५ अंशादृतोः
९६ सुसर्वार्धाद्राष्ट्रस्य
९७ दिशो मद्रस्य
९८ प्राग्ग्रामाणाम्
९९ संख्याधिकाभ्यां वर्षस्या-भाविनि
१०० मानसंवत्सरस्याशाणकुलि-जस्यानाम्नि
१०१ परिमाणस्यानतोऽर्धाद्वादेः
१०२ प्राद्वाहरणस्य ढे
१०३ ढस्य
१०४ नञश्चेश्वरक्षेत्रज्ञकुशलच-पलनिपुणशुचेः
१०५ जङ्गलधेनुवलजस्य वोत्तर-पदस्य च
१०६ हृद्भगसिन्धोः
१०७ नगरस्य प्राक्तु
१०८ अनुशतिकादीनाम्
१०९ राजपौरुष्यम्
११० देवतादादौ
१११ नेन्द्रवरुणस्यात्
११२ श्रौणहत्यधैवत्यसारवै-क्ष्वाकमैत्रेय हिरण्मयम्
११३ वान्तमान्ततमान्तितोऽन्ति-यान्तिषद्

इति शाकटीयनीयसूत्रपाठे द्वितीयस्याध्यायस्य तृतीयः पादः।

—:o:—

चतुर्थः पादः

१ वाद्यात्
२ गोत्रोत्तरपदाद्गोत्रादिवाजि-ह्वाहरितकात्यात्
३ गोर्योऽचि
४ प्राग् जितादण्
५ धनादेः पत्युः
६ पत्युत्तरपदयमादित्यदि-त्यदितेञ्योऽणपवादे चास्वे

७ वह्निषष्ठीकण् च
८ कल्यग्नेर्ढण्
९ पृथिव्या ञाञ्
१० उत्सादेरञ्
११ वष्कयादसमासे
१२ देवाद्यञ्च
१३ स्थाम्नोऽत्
१४ लोम्नोऽपत्येषु
१५ श्लुग् द्विगोरलुचोऽनप त्येऽज्यादेः
१६ स्त्रीपुंसात् ट्नञ्ञ्स्नञ्वम:
१७ त्वे वा
१८ ङसोऽपत्ये
१९ आद्यात्
२० वृद्धाद्यूनि
२१ अत इञ्
२२ गोत्रे बाह्वादिभ्यः
२३ वर्मणोऽचक्रात्
२४ अजादिभ्यो धेनोः
२५ ब्राह्मणाद्वा
२६ सारूभूरयारूभ्यामितौज्यौदिषाडिवाद्वलिः
२७ सुधातृव्यासवरुटनिषादचण्डालबिम्बस्याकङ् च
२८ पुनर्भूपुत्रदुहितृननान्दृभ्योऽनन्तरेऽञ्
२९ पारशवः
३० विदादेर्वृद्धे ऽनृष्यानन्तर्ये
३१ कुञ्जादेर्ञ्फः
३२ नडादिभ्यः फण्
३३ यञिञः
३४ हरितादेरञः
३५ क्रोष्टशलङ्कोर्लुक्
३६ शरद्वच्छुनकरणाग्निशर्मकृष्णदर्भाद्भृगुवत्सवसिष्ठवृषगणब्राह्मणाग्रायणे
३७ द्रोणपर्वतजीवन्ताद्वा
३८ गर्गादेर्यञ्
३९ मधुबभ्रोर्ब्राह्मणकौशिके
४० कपिबोधादाङ्गिरसे
४१ वतण्डात्
४२ स्त्रियां श्लुक्
४३ अश्वादेः फञ्
४४ शफभरद्वाजादात्रेये
४५ भर्गात्त्रैयात्रैगर्तभारद्वाजे
४६ शिवाद्यृष्यन्धकवृष्णिकुरुभ्योऽपत्येऽण्
४७ विकर्णच्छगलाद्वात्स्यात्रेये
४८ शुङ्गाभ्यां भारद्वाजे
४९ कन्यात्रिवेण्योः कनीनत्रिवणौ च
५० विश्रवसो नङ्रवणौ
५१ संख्यासंभद्रान्मातुर्डुर्
५२ नदीमानुषीनाम्नोऽद्रोः
५३ पीलामण्डूकाद्वा
५४ दितेश्च ढण्
५५ ष्यतः
५६ द्व्यचोऽनद्याः
५७ इतोऽनिञः
५८ शुभ्रादिभ्यः

५९ लक्ष्मणश्यामाद्वासिष्ठे
६० विकर्णकुषीतकात् काश्यपे
६१ भ्रैावेयः
६२ कल्याण्यादेर्डिन् च
६३ कुलटाया वा
६४ क्षुद्राभ्यो द्रण् वा
६५ गोधाया दुष्टे
६६ पण्डजण्डाच्चारण्
६७ चटकादैरण्
६८ चटका
६९ गृष्ट्यादिचतुः पाद्भ्यो ढञ्
७० बाडवेयो वृषे
७१ भ्रातृव्यः
७२ स्वसुश्च छः
७३ मातृपित्रादेर्ढण्ठणौ
७४ रेवत्यादेष्ठण्
७५ स्त्रीवृद्धाद्गर्हे णश्च
७६ सुयाम्नः सौवीरेषु फिञ्
७७ फाण्टाहृतिमिमताण्णश्च
७८ भागवित्तितार्णविन्दवाक-
 शापेयाद्गर्हे ठण् वा
७९ वृषसुयामयमुन्दात् फिञ-
 श्छश्च
८० कुर्वादेर्ण्यः
८१ सम्राजः क्षत्रिये
८२ कारिसेनान्तलक्ष्मणादिञ्च
८३ तिकादेः फिञ्
८४ दगुकोसलकर्मारच्छागवृषा-
 द्युट् च
८५ द्व्यचोऽणः
८६ दोर्वावृद्धात्
८७ पुत्रान्तात्
८८ काकलङ्काबाकिनगारेयका,
 र्कस्यचर्मिवर्मिणाश्च कं च
८९ प्रायोऽदोः फिः
९० कुलात् खः
९१ ढकञौ वासमासे
९२ दुःकुलाड्ढण्
९३ महाकुलादञ्खञ्
९४ श्वशुराद्यः
९५ जातौ राज्ञः
९६ क्षत्राद् घः
९७ मनोर्याण् षक् च
९८ राष्ट्रराज्ञस्सरूपाद्राजाप-
 त्येऽञ् त्रिः
९९ गान्धारिशाल्वेयाभ्याम्
१०० पूरुद्व्यञ्मगधकलिङ्गशूर-
 मसादण् ।
१०१ साल्वांशाश्मककलकूटप्रत्य
 ग्रथादिञ् [दाञ्यः
१०२ नादिद्वित्कुरुकोसलाजा-
१०३ पाण्ड्यः
१०४ शकादिभ्यश्लुक्
१०५ कुन्त्यवन्तेस्स्त्रियाम्
१०६ कुरोर्वा
१०७ ञ्रेरतोऽप्राग्भर्गादेः
१०८ बहुष्वस्त्रियाम्
१०९ यस्कादेर्गोत्रे
११० यञञोऽगोपवनादिश्याप'
 र्णान्तात्

१११ कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च
११२ भृगुकुत्सवशिष्ठगोतमाङ्गिरोऽत्रेः
११३ बह्वचः प्राग्भरतेऽञ्जः
११४ वोपकादेः
११५ तिककितवादौ द्वन्द्वे
११६ तथात्र्यादेः
११७ वान्येन
११८ यञादेर्द्व्येकेषु षष्ठ्यास्तत्पुरुषे
११९ नाणर्थेऽचि
१२० गर्गभार्गविका
१२१ यूनि
१२२ फण्फिञोर्वा
१२३ व्रीञः
१२४ ञिदार्षादणिञोः
१२५ वैलाद्यंविप्रात्
१२६ प्राग्विञः
१२७ न तौल्वल्यादेः
१२८ भिक्षादेश्च समूहे
१२९ क्षुद्रकमालावात्सेनानाम्नि
१३० गोत्रोक्षवत्सोष्ट्राजोरभ्रर्द्धमनुष्यराजन्यराजपुत्रराज्ञोवुञ्
१३१ केदाराण्ण्यश्च
१३२ कवचिहस्त्यचिताच्च ठण्
१३३ धेनोरनञः
१३४ ब्राह्मणमाणववाडवाद्यः
१३५ गणिकाया ण्यः
१३६ केशाद्वा
१३७ चश्वोऽश्वात्
१३८ पार्श्वम्
१३९ पृष्ठ्याहीनौ क्रतौ
१४० चरणाद्धर्मवत्
१४१ गोरथवातात्रकडयोलम्
१४२ पाशादेश्च यः
१४३ ग्रामजनबन्धुगजसहायात्तल्
१४४ श्वखलादिभ्योऽञिन्
१४५ पुरुषात् कृतहितवधविकारे च ढञ्
१४६ विकारे
१४७ प्राण्योषधिवृक्षेभ्योऽवयवे च
१४८ तालाद्धनुषि
१४९ त्रपुजतोष्षक् च
१५० शम्या लक्
१५१ परशव्यस्य यलुक्
१५२ कंशीयाञ्ञ्यः
१५३ हेमार्थान् माने
१५४ द्रोर्वयः
१५५ पयोद्रोर्यः
१५६ एण्या ढञ्
१५७ कौशेयम्
१५८ उष्ट्राद्वुञ्
१५९ वोमोर्णात्
१६० मानात् क्रीतवत्
१६१ हेमादिभ्योऽञ्
१६२ वाऽभक्ष्याच्छादने मयट्
१६३ शराद्येकाचः
१६४ दोरप्राणिनः

१६५ गोव्रीहेश्च कृत्पुरोडाशे
१६६ तिलयवपिष्टाद्दानाम्नि
१६७ पिष्टिकाहैयङ्गवीनम्
१६८ नातोऽफलद्रुवयात्
१६९ बहुलं श्लुक् पुष्पमूले
१७० फले
१७१ प्लक्षादेरण्
१७२ जम्ब्वा वा
१७३ बोद्ध्रध्येत्रोः
१७४ न्यायादिपदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकाट्ठण्
१७५ अकल्पात् सूत्रात्
१७६ अधर्मक्षत्रसंसर्गाङ्गत्रेर्विद्यायाः
१७७ याज्ञिकौक्थिकलौकायतिकानुब्राह्मणी
१७८ शतषष्टेः पथष्टट्
१७९ पदोत्तरपदेभ्यष्ठः
१८० शिक्षामीमांसासामक्रमपदाद्वुच्
१८१ ससर्वादेश्लुक्
१८२ संख्याकात् सूत्रे
१८३ प्रोक्तात्
१८४ वेदेन् ब्राह्मणम्
१८५ मातृपितृभ्रातर्युलङ्व्यम्
१८६ पित्रोर्डामहट्
१८७ दुग्धेऽवेस्सोढदूसमरीसम्
१८८ राष्ट्रेऽनङ्गादिभ्यः
१८९ भौरिक्यैषुकार्यादेर्विधभक्तम्
१९० राजन्यादिभ्यो वुञ्
१९१ वसातेर्वा
१९२ निवासादूरभवाविति देशे नाम्नि
१९३ सोऽत्रास्ति
१९४ तेन निर्वृत्तं च
१९५ नद्यां मतुः
१९६ मध्वादेः
१९७ कुमुदनडवेतसमहिषाड्डित्
१९८ नडशादाड्वलः
१९९ शिखायाः
२०० शिरीषाट्ठकण्
२०१ शर्करायाष्टण्चेकाण् च
२०२ रैन्सेलवुण्येञ्याञ्ढण्फण्फिञ्छक्ठछण्कक्कण् ठठणोऽश्मप्रेक्षातृणकाशारोहणसुपन्थि सुतङ्गमबलाहस्सखिपन्थिकर्णोतृकरनडकृशाश्वर्यवराहकुमुदाश्वत्थादिभ्यः
२०३ साऽस्य पौर्णमासी
२०४ आग्रहायण्यश्वत्थाट्ठण्
२०५ चैत्रीकार्त्तिकीफाल्गुनीश्रावणाद्वा
२०६ देवता
२०७ पैङ्गाक्षिपुत्रादिशुक्राच्छघम्
२०८ शतरुद्रापोनपादपान्नपातस्तृ चातः
२०९ महेन्द्राद्वा
२१० द्यावापृथिवीशुनासीरा-

ग्नीषोममरुत्वद्वास्तोष्पति-
गृहमेधाच्छयौ

२११ वायुषःपितृतोर्यः
२१२ कसोमात्ट्यण्
२१३ महाराजप्रोष्ठपदाट्ठण्
२१४ कालाद्भववत्
२१५ आदेश्च्छन्दसः प्रगाथे
२१६ युद्धेऽर्थयोद्धृभ्यः
२१७ भावघञोऽस्याणः
२१८ श्यैनम्पातातैलम्पाते
२१९ प्रहरणात् क्रीडायां णः
२२० टो रागाद्रक्ते
२२१ लाक्षारोचनाट्ठण्
२२२ शकलकर्दमाद्वा
२२३ नीलपीतकम्
२२४ गुरूदयाद्वाद्युक्तेऽब्दे
२२५ चन्द्रोपेतात् काले
२२६ श्लुग्प्रयुक्ते
२२७ द्वन्द्वाच्छः
२२८ श्रवणाश्वत्थान्नाम्न्यः
२२९ दृष्टे साम्नि
२३० गोत्रादङ्कवत्
२३१ वामदेव्यम्
२३२ जाते चाण् द्विर्डिद्वा
२३३ छन्ने रथे
२३४ पाण्डुकम्बली
२३५ तत्रोद्धृत ममत्रेभ्यः
२३६ स्थण्डिले शेते व्रती
२३७ संस्कृते भक्षे
२३८ शूल्योख्यक्षैरेयदाधिकौ

दश्विवत् कौदश्वितम्
२३९ क्वचित्

इति शाकटायनसूत्रपाठे
द्वितीयस्याध्यायस्य
चतुर्थ पादः ॥

द्वितीयाध्यायः समाप्तः ॥

प्रथमः पादः ।

१ नद्यादिराष्ट्रदूरोत्तराद्ढ
ण्घैत्याहञ्
२ पारावारवारपारेभ्यः खः
३ ग्रामाद्यखञ्
४ कत्र्यादेश्च ढकञ्
५ कुण्ड्याया यलुक् च
६ कुलकुक्षिग्रीवाच्छ्वास्यल-
ङ्कारे
७ दक्षिणापश्चात्पुरसस्त्यण्
८ क्वेहामातस्त्रात्यच्
९ निसो गते
१० वैषमोत्त्वश्श्वसः
११ द्युदक्प्रागपाक् प्रतीचो यः
१२ कन्थायाष्ठण्
१३ वर्णौ वुञ्
१४ वल्ह्युर्दिपर्दिकापिश्या-
ण्फट्
१५ रङ्कोः प्राणिनि वा
१६ रूप्योत्तरपदादरण्याणः
१७ दिगादेरनाम्नः

१८ मद्रादञ्
१९ उदग्ग्रामाद्यकृल्लोम्नः
२० गौष्ठीतैकीगोमतीशूरसेनवाहीकात्
२१ शकलादेर्वृद्धात्
२२ वृजः
२३ न द्व्यचः प्राग्भरतेषु
२४ भवतष्ठणछस्
२५ जनपदराज्ञोऽकूछः
२६ दोश्छः
२७ उष्णादिभ्यः कालात्
२८ व्यादिभ्यष्ठणिणठौ
२९ काश्यादिवाहीकग्रामात्
३० वोशीनरग्रामात्
३१ वृजिमद्राद्देशात्कः
३२ ओष्ठण्
३३ दोरेव प्राचः
३४ ईरोपान्त्याद्वुञ्
३५ प्रस्थपुरवहान्तयोपान्त्यधन्वनः
३६ राष्ट्रेभ्यः
३७ बहुविषयेभ्यः
३८ धूमादिकच्छाग्निवक्त्रवर्तोत्तरपदात्
३९ सौवीरेषु कुलात्
४० समुद्रान्नृनावोः
४१ नगरात्कुत्साद‍ाक्ष्ये
४२ पथ्यध्यायन्यायविहाररत्रिभेऽरण्यात्
४३ गोमये वा
४४ कुरुयुगन्धरात्
४५ साल्वाद्गोयवाग्वपत्तौ
४६ कच्छादेर्नृनृस्थे
४७ कोपान्त्याच्चाण्
४८ पृथिवीमध्यान्निवासान्मध्यमश्चास्य चरणे
४९ छः
५० गहादिगर्त्तोत्तरपदेभ्यः
५१ दोः कन्थापलदनगरग्रामह्रदोत्तरपदकखोपान्त्यात्
५२ कटादेः प्राचः
५३ पर्णकृकणाद्भारद्वाजात्
५४ पर्वतान्नरे
५५ वा
५६ वेणुकादिभ्यच्छण्
५७ युष्मदस्मदोऽञ्खञौ वाकञ्चैकस्मिँस्तवकममकम्
५८ योऽर्धात्
५९ सादेष्ठण्
६० दिगादेस्तौ
६१ ग्रामराष्ट्रस्याण् ठणौ
६२ परावराधमोत्तमादेर्यः
६३ अन्तावोऽधसो मः
६४ समानादिलोकोत्तरपदाद्यात्मादिभ्यष्ठण्
६५ ऊर्ध्वाद्दमदेहान्मकचोर्ध्वस्यैकेषाम्
६६ वर्षाकालेभ्यः
६७ शरदः कर्मणि श्राद्धे
६८ रोगातपे वा

६९ निशाप्रदोषहेमन्तात्
७० लुक्तोऽणि
७१ पुराणम्
७२ श्वसस्तट् च
७३ पूर्वाह्णापराह्णात्तनट्
७४ सायंचिरंप्राह्णे प्रगेऽव्ययात्
७५ चिरपरुत्परारेस्त्नः
७६ भर्तुसन्ध्यादेरण्
७७ संवत्सरात्पर्वफले
७८ प्रावृष एण्यः
७९ एयोऽन्वभिधद्वीपात्
८० पश्चादाद्यन्ताग्रादिमः
८१ मध्यान्मः
८२ उत्कर्षापकर्षयोरः
८३ स्थामाजिनान्ताच्छलुक्
८४ ङेकृतलब्धक्रीतसम्भूते
८५ कुशले
८६ पथोऽकः
८७ कोऽश्मादेः
८८ जाते
८९ प्रावृषष्ठः
९० शरदो वुञ् नाम्नि
९१ सिन्धवपकरात्काणौ
९२ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुच्
९३ पन्थकः
९४ वाश्चामावास्यायाः
९५ अविष्ठाषाढाच्छणश्च
९६ फल्गुन्याष्टः
९७ पुष्यार्थपुनर्वसुहस्तविशाखानुराधाबहुलास्वातेश्च क्
९८ चित्रारेवतीरोहिण्याः स्त्रियाम्
९९ बान्यवत्सशालात्
१०० स्थानान्तगोशालखरशालात्
१०१ सोदर्यसमानोदर्यौ
१०२ कालात्साधुपुष्प्यत्पच्यमाने
१०३ उप्ते
१०४ आश्वयुज्या वुञ्
१०५ ग्रीष्मवसन्ताद्वा
१०६ देय ऋणे
१०७ कालाप्यश्वत्थयवबुसोमाव्यासैषसमसोऽकः
१०८ ग्रीष्मावरसमाद् वुञ्
१०९ संवत्सराग्रहायण्याष्ठश्च
११० रुवति मृगे
१११ जयिनि च
११२ भवे
११३ दिगाद्यङ्गांशाद्यः
११४ मध्याच्चणदिनामकश्च
११५ जिह्वामूलाङ्गुलेश्छः
११६ वर्गान्तात्
११७ यखौ चाशब्दे
११८ दृतिकुक्षिकलशिवस्त्यहेर्ढञ्
११९ आस्तेयम्
१२० ग्रीवाया अण्च
१२१ चतुर्मासान्नाम्नि

१२२ यद्वे ञ्यः
१२३ गम्भीरपञ्चजनबहिर्देवात्
१२४ परिमुखादेरव्ययीभावात्
१२५ पर्यनोर्ग्रामाट्ठञ्
१२६ उपाज्जानुनीविकर्णात्प्राये
१२७ अन्तः पूर्वात्
१२८ ठोन्तः पुराड्ढ् ढौ
१२९ कर्णललाटात्कः
१३० ङसो व्याख्याने च ग्रन्थात्
१३१ ऋग्द्व्यज्जिज्याभ्यष्ठञ्
१३२ ऋषेरध्याये
१३३ बह्वचः प्रायः
१३४ पौरोडाशपुरोडाशाट्ठट्ठौ
१३५ छन्दसो यः
१३६ शिक्षादेश्चाण्
१३७ ङसस्स्वे
१३८ हलशीराट्ठञ्
१३९ समिध आधाने टेन्यण्
१४० आग्नीध्रं गृहे
१४१ रथात्सादेश्च वोढ्ङ्गे
१४२ यः
१४३ वाहनादेरञ्
१४४ वाहनात्
१४५ वाह्यपथ्युपकरणे
१४६ वहेस्तुरिट् च
१४७ द्वन्द्वाद्विवाहे वुच्
१४८ वैरेदेवासुरादिभ्यः
१४९ चरणात् वुञ्
१५० धर्माम्नाये
१५१ छन्दोगौक्थिकयाज्ञिकबव्-
ह्वचनटाञ्ञ्यः
१५२ आथर्वणोऽण्
१५३ शाकलात्सङ्घघोषाङ्कल-
क्षणे वा
१५४ गोत्राद्ञ्यञिञः
१५५ वुञ शिष्यदण्डमाणवे
१५६ रैवतिकादेश्छः
१५७ कौपिञ्जलहास्तिपदादण्
१५८ ङसेरागते
१५९ विद्यायोनिसंबन्धात् वुञ्
१६० पित्र्यं वा
१६१ उष्ठण्
१६२ आयस्थानात्
१६३ शुण्डिकादेरण्
१६४ नृहेतुभ्योमयड्रूप्यौ वा
१६५ गोत्रादङ्कवत्
१६६ प्रभवति
१६७ त्यदादेर्मयट्
१६८ वैडूर्यः
१६९ टः प्रोक्ते
१७० मौदादिभ्यः
१७१ कठादिभ्यश्श्लुग्वेदे
१७२ तित्तिरिवरतन्तुखण्डिको-
खाच्छण्
१७३ छगलिनो णिढन्
१७४ शौनकादिभ्यो णिन्
१७५ पुराणे कल्पे
१७६ काश्यपकौशिकाद्वेदवच्च
१७७ शिलालिपाराशर्यान्नटभि-
क्षु सूत्रे

१७८ कृशाश्वकापिलेयकर्मन्दादिन्
१७९ एकदिशि
१८० तस्
१८१ यश्चोरसः
१८२ उपज्ञाते
१८३ नाम्नि कृते
१८४ कुलालादेर्वुञ्
१८५ छन्दस्योरस्यौरससर्वचर्मीणसार्वचर्मीणाः
१८६ ग्रन्थे
१८७ अमोऽधिकृत्य
१८८ ज्योतिषम्
१८९ द्वन्द्वेन्द्रजननादिभ्यः प्रायश्छः
१९० गच्छति पथिदूते
१९१ अभिनिष्क्रामति द्वारे
१९२ भजति
१९३ महाराजाचित्तादद्देशकालाट्ठण्
१९४ वासुदेवार्जनाद्बुच्
१९५ गोत्रक्षत्रियेभ्यः प्रायो वुञ्
१९६ सरूपाद्द्रूे राष्ट्रवत्सर्वम्
१९७ सोऽनिवासादस्य
१९८ अभिजनात्
१९९ छोऽस्त्राजीवेऽत्रेः
२०० तुदीवर्मत्या ढण्
२०१ शण्डिकसिन्ध्वादिशलातुराण्याञ्छण्

इति शाकटायनीयसूत्रपाठे तृतीयस्याध्यायस्य प्रथमः पादः ॥

—:o:—

द्वितीयः पादः

१ ठण्
२ टोजितजयद्दीव्यत्खनत्सु
३ संस्कृते
४ कोपान्त्यकुलत्थादण्
५ तरति
६ नौद्व्यचष्ठः
७ चरति
८ पर्पादेष्ठट्
९ पदिकः
१० श्वगणाद्वा
११ वेतनादेर्जीवति
१२ वस्नक्रयविक्रयेभ्यष्ठः
१३ छश्चायुधात्
१४ व्रातीनञ्
१५ भस्त्रोत्सङ्गादेष्ठट्ठण् हरति
१६ विवधवीवधात्
१७ अण् कुटिलिकायाः
१८ निर्वृत्तेऽक्षद्यूतादेः
१९ भावादिमः
२० क्त्रिरिमे
२१ याचिताऽपमित्यात्कण्
२२ संसृष्टे
२३ चूर्णलवणमुद्गादिनाण्
२४ ठव्यञ्जनैरुपसिक्ते
२५ ओजस्सहोऽम्भसा वर्तते

२६ तत्प्रत्यनोर्लोमकूलेपात्
२७ परेर्मुखपार्श्वात्
२८ दधाने वृद्धिं गर्ह्ये
२९ कुसीदाट्टट्
३० दशैकादशाट्टश्च
३१ रक्षदुञ्छतोः
३२ मीनमत्स्यपक्षिमृगार्थाद्
घ्नन्ति
३३ परिपन्थं तिष्ठति च
३४ परिपथम्
३५ माथोत्तरपदपदव्याक्रन्दा-
द्धावति
३६ पश्चात्यनुपदात्
३७ परदारादीन्यति
३८ प्रतिपथाट्ठश्च
३९ पदोत्तरपदपदार्थललाम-
प्रतिकण्ठाद्गृह्णति ।
४० धर्माधर्मौ चरति
४१ समूहान्समवेते
४२ परिषदं ण्यः
४३ सेनां वा
४४ सुस्नातादीन्पृच्छति
४५ प्रभूतादिभ्यो ब्रुवति
४६ माशब्दमित्यादिभ्यः
४७ शाब्दिकदार्दरिकलालाटिक
कौक्कुटिकाः
४८ इस्रो धर्म्ये
४९ नराद्युतोऽण्
५० वैशस्त्रवैभाजित्रे
५१ वक्रये
५२ तदस्य पण्यम्
५३ किशरादेष्टट्
५४ शलालोर्वा
५५ शिल्पम्
५६ मड्डुकझर्झराद्वाण्
५७ प्रहरणम्
५८ परश्वधाद्वाण्
५९ शक्तियष्टेष्टीकण्
६० इष्टादिभ्योऽन्येषाम्
६१ दैष्टिकास्तिकनास्तिकाः
६२ शीलम्
६३ छत्रादेरञ्
६४ तूष्णीकः
६५ वृत्तोऽपपाठोऽनुयोगे
६६ बह्वच् पूर्वपदाट्ठः
६७ भक्षोऽस्मै हितम्
६८ नियुक्तं दीयते
६९ भक्तौदनाद्वाण् ठट्
७० श्राणामांसौदनाट्ठः
७१ नवयज्ञादयोऽस्मिन्वर्तन्ते
७२ तत्र नियुक्ते
७३ ठोऽगारान्तात्
७४ अध्यायिन्यदेशकालात्
७५ संस्थानप्रस्तारतदन्तकठिना-
न्तेषु व्यवहरति
७६ निकटादिषु वसति
७७ सतीर्थ्यः
७८ संख्यादेश्चार्हदलुचः
७९ गोदानादीनां ब्रह्मचर्ये
८० चान्द्रायणं च चरति

८१ देवव्रतादीन् डिन्
८२ डुवुश्चाष्टाचत्वारिंशच्चातुर्मास्यं यलुक्च
८३ तुरायणपारायणं यजमानाधीयाने
८४ संशयं प्राप्ते ऽर्थे
८५ क्रोशयोजनाच्छताद्योजनाच्चाभिगमार्हे
८६ तद्यात्येभ्यः
८७ पथष्टट्
८८ नित्यं णः पन्थश्च
८९ शङ्कूत्तराजवारिस्थलजङ्गलकान्तारादिनाहृते च
९० स्थलादिनायमधुकमरिचे
९१ योगादये शक्ते
९२ योग्यकार्मुके
९३ यज्ञानां दक्षिणायाम्
९४ तेषु देये
९५ काले कार्ये च भववत्
९६ व्युष्टादिष्वण्
९७ तेन हस्तयथाकथा चाद्यणम्
९८ संपादिनि
९९ कर्मवेषाद्यः
१०० कालात्परिजय्यलभ्यकार्यसुकरे
१०१ निर्वृत्ते
१०२ तस्मै भृतादिष्टे
१०३ तं भावि भूते च
१०४ षण्मासाण्ण्यठौ
१०५ समायाः खः
१०६ रात्र्यहस्संवत्सराच्च द्विगोर्वा
१०७ वर्षादश्च
१०८ प्राणिनि भूते
१०९ मासाद्वयसि यः
११० खञ्
१११ षण्मासाट्ण्यण्यौ
११२ सोऽस्य ब्रह्मचर्यतद्वतोः
११३ समयात्प्राप्तात्
११४ ऋत्वादिभ्योऽण्
११५ कालाद्यः
११६ दीर्घात्
११७ प्रयोजनम्
११८ एकागाराच्चौरे
११९ चूलादिभ्योऽण्
१२० विशाखाषाढान्मन्थदण्डे
१२१ उत्थापनादेश्छः
१२२ विशिपदिकहिपूरिसमापोऽनात्सपूर्वपदात्
१२३ स्वर्गस्वस्तिवाचनादिभ्यो यश्लुक्
१२४ आकालिकं ठश्चाद्यन्ते
१२५ त्रिंशद्विंशतेड्वुरनाम्न्यार्हात्
१२६ सङ्ख्याडतेश्चाशत्तिष्टेः कः
१२७ अनादेश्शतादतस्मिन्यठौ
१२८ वातोष्ठः
१२९ सहस्रशतमानादण्
१३० कंसार्धाट्टट्
१३१ अर्धात्पलकंसकर्षात्

१३२ कार्षापणात्प्रतिश्चास्य वा
१३३ शूर्पादञ्
१३४ वसनात्
१३५ विंशतिकात्
१३६ द्विगोः खः
१३७ खारीकाकणीभ्यः कच्
१३८ माषपणपादाद्यः
१३९ शताद्वा
१४० शाणात्
१४१ द्वित्रेरण् च
१४२ अलुचो नाम्नि चश्लुक्
१४३ वाणः
१४४ सुवर्णकार्षापणात्
१४५ द्वित्रिबहोर्निष्कबिस्तात्
१४६ मूल्यैः क्रीते
१४७ तस्य वापे
१४८ वातपित्तश्लेष्मसन्निपाता-
च्छमनकोपने
१४९ हेतौ संयोगोत्पाते
१५० व्युज्ब्रह्मवर्चसाद्योऽसंख्या-
परिमाणाश्वादेः
१५१ पुत्राच्छयौ
१५२ पृथिवीसर्वभूमिभ्यामञ्
१५३ ईशे
१५४ ज्ञाते
१५५ लोकसर्वलोकात्
१५६ तदत्रास्मै वा वृद्ध्यायला-
भोपदाशुल्कं देयम्
१५७ डदर्धाट्ठः
१५८ भागाद्यठौ
१५९ वस्नांशभृत्यस्य
१६० मानम्
१६१ संख्यायास्सङ्घसूत्रपाठे
१६२ नाम्नि
१६३ त्रैंशचात्वारिंशं
१६४ पञ्चद्दशद्वर्गे वा
१६५ स्तोमे डट्
१६६ तद्धरद्वहदावहत्सु वंशादे-
र्भारात्
१६७ वस्नद्रव्याट्ठकम्
१६८ पचत्यञ्च द्रोणात्
१६९ संभवदवहरतोश्च
१७० पात्राढकाचितात्खो वा
१७१ द्विगोष्टट् खौ
१७२ श्लुकच कुलिजात्
१७३ अर्हति
१७४ दण्डादियज्ञाद्यघम्
१७५ पात्रात्
१७६ कडङ्गरदक्षिणास्थालीबि-
लाच्छयौ
१७७ शालीनकौपीनात्विंजीनाः
१७८ छेदादेर्नित्यम्
१७९ वैरङ्गिकः
१८० शीर्षच्छेदाद्यो वा
१८१ यः
१८२ वहति रथयासङ्गात्
१८३ धुरो यढण्
१८४ वामाद्यादेः खः
१८५ अश्वैकादेः
१८६ शकटादण्

१८७ हलसीराट्ठण्
१८८ विध्यत्यनन्येन
१८९ धनगणं लब्धा
१९० णोऽन्नात्
१९१ पदमस्मिन्दृश्यम्
१९२ नौविषेण तार्यवध्ये
१९३ न्यायार्थादनपेते
१९४ मदस्य करणे
१९५ वश्यपथ्यवयस्यधेनुष्या-
गार्हपत्यजन्यधर्म्यहृद्यमू-
लयम्
१९६ तत्र साधौ
१९७ पथ्यतिथिवसतिस्वपतेर्ढण्
१९८ भक्ताण्णः
१९९ परिषदो ण्यश्च
२०० सर्वजनात्खञ्च
२०१ प्रतिजनादेः
२०२ कथादेष्ठण्
२०३ देवतान्तात् तदर्थे
२०४ पाद्यार्घ्ये
२०५ ण्योऽतिथेः
२०६ हलस्य सादेश्च कर्षे
२०७ सीतया सङ्गते
२०८ स्थः
२०९ हविरन्नभेदापूपादेर्यो वा
२१० युगाद्योर्यः
२११ शुन्यशून्योदन्यनभ्याः
२१२ कम्बलान्नाम्नि
२१३ तस्मै हितेऽराजाचार्यब्रा-
ह्मणवृष्णः
२१४ रथखलतिलयवमाषवृषब्र-
ह्मप्राणयङ्गाद्यः
२१५ च्छयोऽजावेः
२१६ माणवचरकात्खञ्
२१७ भोगोत्तरपदात्मभ्यां खः
२१८ पञ्चसर्वविश्वाज्जनात्कर्म-
धारयात्
२१९ सर्वमहतष्ठण्
२२० सर्वाण्णो वा
२२१ परिणामिनि तदर्थे
२२२ चर्मण्यञ्
२२३ ऋषभोपानहाञ्ञ्यः
२२४ छदिर्वलेर्ढण्
२२५ परिवारस्य स्यात्
२२६ अत्र च
२२७ तत्

इति शाकटायनीयसूत्रपाठे
तृतीयस्याध्यायस्य
द्वितीयः पादः ॥

तृतीयः पादः ।

१ तस्य हे कृत्ये वत्
२ सुप स्वे
३ तत्र
४ तस्य
५ भावे त्वतल्
६ प्रात्कादगडुलादेः
७ नञ्तत्पूरुषादबुधादेः

८ पृथ्वादेर्वेमन्
९ वर्णदृढादिभ्यष्ट्यण् च
१० पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च
११ सहायाद्वा
१२ वयः प्राणिजातेरञ्
१३ युवादिहायनान्तादण्
१४ लघ्वादेरिकः
१५ हृदयपुरुषादसमासे
१६ सखिवणिग्दूताद्यः
१७ स्तेयार्हन्त्यम्रौत्रम्
१८ कपिज्ञातेर्ढण्
१९ योपान्त्याद्गुरूपोत्तमाद्वुञ्
२० द्वन्द्वचोरादेः
२१ गोत्रचरणाच्छ्लाघात्याकारावाये
२२ होत्राभ्यश्छः
२३ ब्रह्मणस्त्वः
२४ शाकटशाकिनौ क्षेत्रे
२५ धान्येभ्यः खञ्
२६ व्रीहिशालेर्ढण्
२७ यवयवकषष्टिकाद्यः
२८ वाणुमाषात्
२९ भङ्गोमातिलात्
३० रजस्यलाब्वाश्च कटः
३१ गव्येऽह्नाश्वात्खञ्
३२ कुलाज्जल्पे
३३ तुल्ये कस्संज्ञाप्रतिकृत्योः
३४ न नृपूजार्थध्वजचित्रे
३५ जीवनेऽपण्ये
३६ देवपथादिभ्यः
३७ वस्तेर्ढञ्
३८ शिलाया ढश्च
३९ शाखादेर्यः
४० द्रोर्भव्ये
४१ कुशाग्राच्छः
४२ काकतालीयादयः
४३ शर्करादेरण्
४४ एकशालायाष्ठः
४५ गोमयादेश्च ठण्
४६ कर्कलोहिताट्टीकण्च
४७ पील्वादेः कुणः पाके
४८ कर्णादिपक्षाज्जाहति मूले
४९ शीतोष्णातृप्रादसहे आलुः
५० हिमादेलुस्सहे
५१ बलवातादूलः
५२ यथामुखसम्मुखाद्दर्शने खः
५३ सर्वादेःपथाङ्गकर्मपत्रपात्रशरावाद्व्यापिनि
५४ आप्रपदम्
५५ यथाकामानुकामात्यन्तपारावारावारपारान्तगामिनि
५६ ऋनुग्वलम्
५७ अध्वानं यखौ
५८ छश्चाभ्यमित्रम्
५९ परोवरीणपरम्परीणपुत्रपौत्रीणसर्वान्नीनायानयीनानुपदीनागवीनाद्यश्वीनाद्यप्रातीनसमांसमीनसाप्तपदीनम्

६० तदस्य प्रमाणान्मात्रट्
६१ हस्तिपुरुषाद्वाण्
६२ वोर्ध्वं दघ्नड्द्वयसट्
६३ श्लुग्मानात्
६४ द्विगोस्संशये च
६५ मात्रट्
६६ शन्शद्विंशतेः
६७ डिन्
६८ घत्विदंकिमः
६९ एतदो वो घः
७० यत्तदः
७१ किमश्च संख्याया इतिश्च
७२ अवयवात्तयट्
७३ द्वित्रिभ्यां लुग्वा
७४ द्व्यादेर्गुणान्मूल्यक्रये मयट्
७५ अधिकमस्मिन्शतसहस्रे-
तत्संख्यं शतिशद्दशान्तादड्
७६ संख्यापूरणे डट्
७७ घतोरिथट्
७८ बहुगणपूगसङ्घात् तिथट्
८९ षट्कतिकतिपयात् थट्
८० चतुरः
८१ यछौ चश्लुक्च
८२ विंशत्यादेस्तमड् वा
८३ शतादिमासार्धमाससंव-
त्सरात्
८४ षष्ठ्यादेरनादेः
७५ नो मट्
८६ द्वित्रेस्तीयद्रेश्च ऋश्
८७ पूर्वमनेन सादेश्चेन्

८८ इष्टादेः
८९ श्राद्धमद्यभुक्तं ठेनौ
९० क्षेत्रेऽन्यस्मिन्नाश्ये घः
९१ श्रोत्रियो वा छन्दोऽध्यायी
९२ इन्द्रियम्
९३ तेन वित्ते चञ्चुचणौ
९४ डतो ग्रन्थस्य ग्राहके
कश्श्लुक्च
९५ ग्रहणाद्वा
९६ स्यात् गुणात्परिजाते
९७ पार्श्वकायश्शूलिकदा-
ण्डाजिनिकानुपद्यन्वेष्टा
९८ धनहिरण्येऽभिलाषे
९९ स्वाङ्गेषु सक्ते
१०० उदरे ठगाद्यूने
१०१ कर्मठो घटः
१०२ अशं हारिणि
१०३ शीतकोष्णकौ कारिणि
१०४ तन्त्रान्नवोद्धृते
१०५ कमितर्यन्वभ्यभीभ्यः
१०६ विशालविशंकटविकटसङ्क-
टोत्कटप्रकटनिकटा-
वकटावकुटारावटीटाव-
नाटावभ्रटनिबिडनिबि-
रीसचिक्कचिकिनचिपिट
चिल्लपिल्लचुल्लोपत्याका-
धित्यकाः
१०७ तदस्मिन्प्रायोऽन्नं नाम्नि
१९८ कौल्मासीवटकिन्यौ
१०९ ब्राह्मणकोष्णिके

११० कालः प्रयोजनमस्य रोगे
१११ सुख्यः
११२ शृङ्खलकः करभे
११३ उन्मनस्युदुत्सो:
११४ सञ्जातं तारकादिभ्य इतः
११५ गर्भादप्राणिनि
११६ अस्त्यस्मिन्निति मतुः
११७ आयात
११८ वातदन्त बललललाटादूलः
११९ प्राण्यङ्गादातो लः
१२० सिध्मादिरुक् क्षुद्रजन्तोः
१२१ प्रज्ञापर्णोदकफेनाल्लेलौ
१२२ काडाजटाघाटात् क्षेपेः
१२३ वागालाटौ
१२४ ग्मिन्
१२५ मधुक्षविलोमपिच्छादिभ्यो रवलशेलाः
१२६ नोऽङ्गादेः ।
१२७ शाकीपलालीदद्र्वा ह्रस्वश्च
१२८ विष्णुलक्ष्मणौ
१२९ प्रज्ञाश्रद्धार्चावृत्तेर्णः
१३० ज्योत्स्नादिभ्योऽण्
१३१ शिकताशर्करात्
१३२ बलश्च देशे
१३३ द्युद्रोर्मः
१३४ काण्डाण्डभाण्डादीरः
१३५ कच्छ्वा डुरः
१३६ दन्त उन्नतः
१३७ मेधारथाद्रेरः
१३८ कृपाहृदयादालुः
१३९ केशाद्वः
१४० मण्यादिभ्यः
१४१ स्वाङ्गाद्धीनादः
१४२ अभ्रादिस्यः
१४३ शृङ्गादारकः
१४४ फलबर्हाच्चेनः
१४५ मलादीमसश्च
१४६ मरुत्पर्वणस्तः
१४७ वलितुण्डिवटेर्भः
१४८ ऊर्णाहंशुभमो युस्
१४९ कंशमस्तियुस्तुयस्तबभाः
१५० तपस्स्रग्मायामेधासो विन्
१५१ तमिस्रार्णवोर्जस्वलोर्जस्विन्नामयाविन्गोमिन्
१५२ नौशिखादिभ्यां ठेनौ
१५३ व्रीह्याद्यतोऽनेकाचः
१५४ अशिरसोऽशीर्षश्च
१५५ अर्थार्थान्ताद्भावात्
१५६ व्रीहितुन्दादेरिलश्च
१५७ स्वाङ्गाद्विवृद्धात्
१५८ गुणादिभ्यो यः
१५९ रूपात् शस्ताहतात्
१६० गवादेष्ठण्
१६१ निष्कादेश्शतसहस्रात्
१६२ एकादेः कर्मधारयात्
१६३ सर्वादेरिन्
१६४ द्वन्द्वरुग्निन्द्यात् प्राणिस्थादस्वाङ्गात्
१६५ वातातिसारपिशाचात्कुक्च
१६६ वयसि इतः

१६७ सुखादेः
१६८ मालात् क्षेपे
१६९ धर्मशीलवर्णान्तात्
१७० वाहूर्वादेर्बलात्
१७१ मन्मान्नोम्नि
१७२ हस्तदन्तकराज्जातौ
१७३ पुष्करादेर्देशे
१७४ वर्णी ब्रह्मचारी
१७५ सूक्तसाम्नि छः
१७६ श्लुग्वाध्यायानुवाके
१७७ विमुक्तादेरण्
१७८ घोषडादेर्वुच्
१७९ प्रकारो जातीयर्
१८० कोऽण्वादेः
१८१ कृष्णयवजीर्णसुरावदात-
गोमुत्रात्तिलव्रीहिशालय-
हिसुराच्छादने

इति श्रीशाकटायनीयसूत्रपाठे
तृतीयस्याध्यायस्य
तृतीयः पादः

—:o:—

चतुर्थः पादः ।

१ भूतपूर्वे ष्चरट्
२ गोष्ठात्खञ्
३ षष्ठ्या रूप्यष्चरट्
४ व्याश्रये तस्
५ व्याधेः प्रतीकारे
६ पर्यभेस्सर्वोभये
७ आद्यादिभ्यः
८ क्षेपातिग्रहाव्यथे कर्तुस्तृ-
तीयायाः
९ पाऽहीयमानेन
१० पञ्चम्यः प्रतिना
११ अहीयरुहोऽपाये
१२ अद्व्यादिवैपुल्यात्सर्वादि-
किंबहोः त्तस्
१३ इतोऽतः कुतः
१४ भवदायुष्मद्दीर्घायुर्देवानां-
प्रियैकार्थात्
१५ त्रप् च [१६ क्कुत्रात्रेह
१७ सप्तम्याः
१८ किंयत्तत्सर्वैकान्यात्काले दा
१९ सदैतर्हि अधुनेदानींतदा-
नींसद्यः
२० परेद्यव्यद्दि
२१ पूर्वापराधरोत्तरान्यान्यत-
रेतरादेद्युस्
२२ उभयाद्युश्च
२३ परुत्परार्यैषमो वर्षे
२४ अनद्यतने र्हिः
२५ प्रकारे था
२६ कथमित्थमुः
२७ सङ्ख्याया धा
२८ विचाले च
२९ वैकाञ्ज्यमुञ्
३० द्वित्रेर्ध्यमेधौ
३१ तद्वति धण्
३२ वारे कृत्वस्
३३ चतुस्त्रिद्वेस्सुच्

श्रुतिमूलैव स्यादिति चेन्न । असद्वादिनः श्रुतिप्रामाण्यानभ्युपगमात् । उत्पत्तेः पूर्वं कार्यमसत् । अन्यथोत्पत्त्ययोगादित्यादितर्काभासप्रसिद्धस्यासतोऽनुवादसंभवात् । न च प्रत्यक्षविरोधोऽपि तस्येदानीन्तनप्रपञ्चसत्ताविषयतया भिन्नविषयत्वात् । असत्पदस्य शक्तिग्रहाभावेनानुमानात्पूर्वं श्रुतितस्तदवगमासंभवात् । तस्माद् द्रष्टृभेदनिषेधश्रुतिर्न भेदश्रुतिशेषार्था । नापि "नान्योऽतोऽस्ति" इति श्रुतिर्द्रष्टृभेदोपासनार्था । "अन्तर्याम्यक्षरब्राह्मणयोरुपासीत" इत्यादिलिङाद्यश्रवणात् । कल्पकाप्रतीतेश्च । वाक्यस्यानुभूयमानस्वप्रमेयपरत्वे संभवति श्रुतविरुद्धाश्रुतकार्यकल्पनायोगाच्च ।

तत्र तावदसत्प्रसिद्धिः श्रुतिमूलैव स्यादित्येतद् दूषयति-न, असद्वादिन इति । केन तर्हि तस्यासत्प्रसिद्धिः, भिन्नतत्प्रसिद्धिं विना वा कथमनुवाद, इत्यत आह-उत्पत्तेरिति । सृष्टिपूर्वकालीनासत्त्वविषयतर्कस्य सृष्ट्यनन्तरकालीनसत्ताग्राहिप्रत्यक्षेण न विरोधः । भिन्नविषयत्वादित्याह-न चेति । असद्वादिनः श्रुतितः प्रथममसत्प्रतीत्यभावे हेत्वन्तरमाह-असत्पदस्येति । अनुमानात्पूर्वमिति । उक्ततर्काभासात्पूर्वमित्यर्थः । नान्योऽतोऽस्तीतिश्रुतेरभेदानुवादकत्वाभावान्न तद्द्वारा भेदश्रुतिशेषत्वमित्युपसंहरति-तस्मादिति ।

ननु अभेदश्रुतेरननुवादकत्वेऽपि नाभेदपरत्वं भेदश्रुत्यविरुद्धोपासनापरत्वे संभवति तद्विरुद्धार्थपरत्वायोगात्, अभेदोपासनायाश्चारोपिताभेदेनाप्युपपत्तेरिति नेत्याह-नापीति । बृहदारण्यकेऽन्तर्यामिब्राह्मणे "नान्योऽतोऽस्ति द्रष्टा"इत्यादि पठ्यते । अक्षरब्राह्मणे तु "नान्यदतोऽस्ति द्रष्टृ"इत्यादि । उभयत्राप्युपास्तिविधेरश्रवणान्न तत्परतेत्यर्थः । कल्प्यतां तर्हि "पूषा प्रपिष्टभाग" इत्यादाविव विधिरित्याशङ्क्य तत्र विधिविषयाविनाभूतद्रव्यदेवतासंबन्धादेस्तत्कल्पकस्य श्रवणात्, इह तु विध्यविनाभूतस्य कस्य चिदश्रवणान्नैवमित्याह-कल्पकेति । न च भेदश्रुतिविरोध एव तत्कल्पकस् । तस्या निषिध्यमानभेदानुवादेन तदनुकूलत्वाद् विरोधाभावादिति भावः । उपासनाविधिपरत्वे साधकाभावमुक्त्वा बाधकमप्याह-वाक्यस्येति । श्रुतविरुद्धेति । अभेदश्रुतेर्विधिपरत्वे श्रुताभेदे मानान्तरविरुद्धे तात्पर्याभावेन प्रामाण्यायोगात्, विधेश्चान्यथाप्युपपन्नत्वाच्छ्रुताभेदो नास्तीत्येवं तदपलापनिमित्तत्वात्कल्पितविधेः श्रुतविरुद्धत्वमिति द्रष्टव्यम् । अश्रुतकार्यकल्पनायोगादिति । अतिप्रसङ्गादिति भावः ॥

नान्योऽतोऽस्तीत्यादिश्रुतेर्भेदनिषेधपरत्वेऽपि ईश्वरनानात्वस्यैव ततो निषेधान्न जीवेश्वरभेदनिषेध इति चोदयति-अस्तु तर्हीति ।

अस्तु तर्हि इदं वाक्यमीश्वरान्तरनिषेधपरमिति चेन्न। तद्भेदस्याप्रसक्तत्वादनिषेध्यत्वात्। नन्वीश्वर ईश्वरप्रतियोगिकभेदवान् आत्म-

त्वात् जीववद्धितिभ्रमे भेदं निषेधतीति चेन्न । अनुमानस्य धर्मिग्राहकमानेन बाधितस्यानुदयात् । अथ "एष ते आत्माऽन्तर्याम्यमृत" इति प्रसिद्धे धर्मिणि तद्भेदाशङ्कायामियं श्रुतिरिति चेन्न । एष इत्याद्येकवचनेन लाघवानुगृहीतेनैव तद्भेदस्यापि निषिद्धत्वात् । न चान्तर्यामिण एव प्रतिपर्यायं भेदाशङ्कायामियं श्रुतिः । नान्योऽतोऽस्तीत्यतः शब्देनान्तर्यामिमात्रस्यैव भेदावधित्वेनोपस्थितेः । अनन्तर्यामिण एवान्तर्याम्यवधिकभेदाश्रयत्वात् । नाप्यन्तर्यामिवाक्यसामर्थ्यसिद्धाभेदानुवादः । अज्ञातार्थपरत्वे संभवति निरर्थकानुवादकल्पनायोगात् ॥

किमीश्वरानेकत्वस्य प्रत्यक्षतः प्रशक्तिः, उतानुमानात्, श्रुत्या वा ? । नाद्यः । तस्य प्रत्यक्षायोग्यत्वादित्यभिप्रेत्याह-न तद्भेदस्येति । द्वितीयं शङ्कते-नन्विति । किमत्राऽऽनुमानिक ईश्वरः पक्षः, श्रुतिसिद्धो वा । आद्ये धर्मिग्राहकानुमानस्य लाघवादिना तदेकत्वगोचरतया तद्विरोधान्न भेदानुमित्युदय इत्याह-अनुमानस्येति । द्वितीयं शङ्कते-अथेति । अत्रापि धर्मिग्राहकविरोध एव । एष अन्तर्यामीत्याद्येकवचनान्तपदैर्लाघवानुगृहीतैः 'एको देव' इत्यादिवाक्याच्च तदैक्यस्यापि सिद्धत्वादिति दूषयति-न एष इति । तृतीयं दूषयति-न चान्तर्यामिण इति । प्रतिपर्यायमिति । "यः पृथिवीम-

न्तरो यमयति, योऽपोऽन्तरो यमयति" इत्येवमादिरूपेण प्रतिनियम्यं पृथगुपदेशात् तत्तदन्तर्यामिभेदाशङ्कायामित्यर्थः । नान्योऽतोऽस्तीत्यतःशब्देन प्रकृतपरामर्शकेनान्तर्यामित्वमेव निषिध्यमानभेदप्रतियोगितावच्छेदकं प्रतीयते । अन्तर्यामिकनिषेधे तु नैतदुपपद्यते । भेदधर्मिनिष्ठधर्मस्य तत्प्रतियोगितानवच्छेदकत्वात् । अतोऽनन्तर्यामिण एव द्रष्टुरन्तर्यामिप्रतियोगिकभेदोऽत्र निषिध्यत इत्याह-नान्योऽत इति । ननु त्वदुक्तविधया लाघवाद्यनुगृहीतैकवचनान्तशब्दसामर्थ्यसिद्धमन्तर्यामिण्यभेदं नान्योऽतोऽस्तीति श्रुतिरनुवदतीति । तत्राह-नाप्यन्तर्यामीति ।

पुनरप्यनुमानान्तरेणेश्वरभेदप्रसक्तिमाशङ्क्यापवदति-नापीति ।

नापि क्षित्यादिकं द्विकर्तृकम् । कार्यत्वात् । घटवदित्यनुमानात् क्षितिकर्तुरीश्वरस्य भेदप्रसक्तौ तन्निषेधतीति वाच्यम् । ईश्वरप्रसिद्धेः पूर्वं द्विकर्तृकत्वव्याप्तिग्रहायोगात् । घटमात्रस्य जीवद्वयाजन्यत्वात् । तत्प्रसिद्धौ तु धर्मिग्राहकमानविरोधात् । कर्तृजन्यत्वेनैव कार्यत्वस्य व्याप्त्या तथाप्त्यभावाच्च ।

न च क्षित्यादिकमनेककर्तृकम् । विचित्रकार्यत्वात् प्रासादादिवदितीश्वरभेदप्रसक्तिः । क्षित्यादेरनेककर्तृकत्वे तत्कर्तुः सर्वज्ञत्वाद्ययोगेनानीश्वरत्वात् । अस्तु क्षितिकर्तुर्भेदनिषेधप-

रेति चेन्न । अन्तर्यामिण एवातःशब्देन परामर्शात् । क्षित्यादिकर्त्रैक्यस्य सृष्टिवाक्यगतैकवचनेनैव सिद्धत्वाच्च । द्रष्टृश्रुत्यविशेषेणातःशब्दपरामृष्टान्तर्याम्यतिरिक्ते द्रष्टृमात्रे बुद्धिस्थे तदुपरक्तनञा तन्मात्राभावप्रमितेश्च ।

ईश्वरपक्षकानुमानवन्नात्र धर्मिग्राहकमानविरोध इति शङ्कितुरभिमानः । अत्रापीश्वरे सिद्धे घटादौ द्विकर्तृकत्वव्याप्तिग्रहः, उतासिद्धे । चरमं दूषयति-ईश्वरेति । कुलालद्वयजन्यस्य कस्य चिद् घटस्य संभवात् तत्र व्याप्तिग्रह इत्याशङ्क्यैककुलालजन्ये व्यभिचारदर्शनान्न व्याप्तिग्रह इत्यभिप्रेत्याह-घटमात्रेति । आद्ये कल्पे एकेश्वरकर्तृकक्षित्यादिपक्षीकारेण द्विकर्तृकत्वसाधने धर्मिग्राहकमानबाध एवेत्याह-तत्प्रसिद्धाविति । नन्वेककर्तृकघटादेः पक्षतुल्यत्वेन तत्र व्यभिचाराभावाज्जीवद्वयकर्तृकघटादौ व्याप्तिग्रहे सति क्षित्यादावीश्वरप्रसिद्धिं विना द्विकर्तृकत्वानुमानसिद्धिरिति नेत्याह-कर्तृजन्यत्वेनैवेति । तथेति । गौरवेण द्विकर्तृकत्वस्य कार्यत्वाव्यापकत्वादित्यर्थः ।

ननु धूममात्रस्य वह्निमात्रेण व्याप्तावपि सुरभिधूमस्य चन्दनादिवह्निना व्याप्तिवत् कार्यत्वमात्रस्य कर्तृजन्यत्वमात्रेण व्याप्तावपि विचित्रकार्यत्वस्यानेककर्तृकेनैव व्याप्तिरिति तत्राह-न च क्षित्यादिकमिति । तत्र हेतुमाह-क्षित्यादेरिति । प्रासादादावेकैकांशमेव ह्येकैको जानाति । अतस्तमेव करोति । न तु सर्वस्यैकः परिज्ञाता, कर्ता वा । एवं क्षित्यादावपि तत्तत्कर्तृणा-

मेकैकांशे एव ज्ञानक्रियासामर्थ्यमिति नैकैकस्य सर्वज्ञत्वादिसिद्धिः। तथा चानीश्वरत्वारोपं न तद्भेदानुमानेनेश्वरभेदसिद्धिरिति भावः। नन्वत्रेश्वरभेदो न निषिध्यते। किन्तूक्तानुमानप्राप्तक्षितिकर्तृभेद एवेति शङ्कते-अस्त्विति। निषिध्यमानभेदप्रतियोग्युपस्थापकेनातःशब्देन प्रकृतान्तर्यामिण एव परामर्शात् नात्र क्षितिकर्तृतद्भेदोपस्थितिः। अनुपस्थितस्य च निषेधो न प्रत्येतुं शक्य इत्यभिप्रेत्याह-नान्तर्यामिण इति। किं च आत्मैवेदमग्र आसीदेक एवेत्येकशब्दादेव क्षित्यादिकर्त्रैक्यसिद्धेः पुनस्तदभिधानमनर्थकमित्याह-क्षित्यादीति। किं च निषिध्यमानभेदधर्म्युपस्थापकद्रष्टृपदेन सङ्कोचकाभावेन चेतनमात्रोपस्थितत्वात् तन्मात्रस्यान्तर्यामिणो भेदो नञा निषिध्यते, न क्षितिकर्त्तुरेवेत्याह-द्रष्टृश्रुत्येति॥

सङ्कोचकाभावोऽसिद्ध इति शङ्कते। नन्विति।

ननु प्रत्यक्षविरोधात्सामान्यश्रुतिर्द्रष्टृविशेषविषया नियम्यत इति चेन्न। प्रत्यक्षस्य कल्पितभेदविषयत्वेन वास्तवभेदनिषेधश्रुत्यसमानविषयत्वस्यानुपदमेव वक्ष्यमाणत्वात्। किं चास्य परमात्मभेदनिषेधकत्वे नान्योऽतोऽस्ति द्रष्टेत्येतावदेव स्यात्। नान्योऽतोऽस्ति श्रोता मन्ता विज्ञातेति च निरर्थकमसङ्गतं च। परमात्मनो नित्यसर्वज्ञानाश्रयस्य तद्रूपस्य वाऽशरी-

शिणः श्रोत्रादिजन्यज्ञानाश्रयत्वलक्षणश्रोतृत्वा-योगात् ।

"तस्मादनवकाशेयं नान्योऽतोऽस्तीत्यभेदधीः ।
भ्रान्तिप्रतीतजीवेशभेदमेवावबाधते" ॥

ननु भेदोऽपि प्रमाणसिद्धः "सत्य आत्मा, सत्यो जीवः, सत्यं भिदा सत्यं भिदा" इतिश्रुतेरिति चेन्न । प्रसिद्धशाखास्वनवगमात् । अनवकाशभेदापवादश्रुतिविरोधेन तस्याः श्रुतेः स्वार्थपरत्वायोगात् । तच्छेषानुवादत्वात्—सत्य इति प्रतीतस्य भेदस्य तथैवानुवादात् ॥

द्रष्टृविशेषविषयेति । क्षितिकर्तृविषयेत्यर्थः । व्यावहारिकभेदविषयप्रत्यक्षस्य वास्तवतदभावश्रुत्या विरोध एव नास्तीत्याह-न प्रत्यक्षस्येति । पराभिमतार्थे वाक्यशेषस्य वैयर्थ्यमसमवेतार्थत्वं चेत्याह-किं चास्येति । अत्राङ्गत्यसेवाह-परमात्मन इति । तद्रूपस्येति स्वमतेनोक्तम् । सिद्धान्ते तु न वैयर्थ्यम् । जीवधर्मिकभेदस्यैव निषेध इति प्रकटनार्थत्वादिति भावः । पराभिमतान्यथासिद्धिनिराकरणफलमाह-श्लोकेन, तस्मादिति ।

श्रुत्यैव क्रियासमभिहारेण द्वैतसत्यताभिधानात्कथं तन्निषेध इति चोदयति-नन्विति । अस्य श्रुतित्वमेव विप्रतिपन्नमित्याह-नेति । श्रुतित्वेऽप्यस्य प्रबलश्रुतिविरोधान्न भेदे प्रामाण्यमित्याह-अनवकाशेति । अस्य भेदपरत्वाभावेऽर्थान्तरस्यानवगमादानर्थक्यापात

इत्याशङ्क्य भेदानुवादेनाभेदपरत्वमेवैतस्येत्यत आह-तच्छेषेति। निषेधाय भेदानुवादे सत्यपदं किमर्थमित्यत आह-सत्य इतीति। प्रत्यक्षादिना सत्यत्वेन प्रतीत एव भेदः श्रुत्या निषिध्यते। न तु तद्बाधितश्चन्द्रादिभेदोऽपीति द्योतयितुं निषेध्योपस्थापकवाक्ये सत्यपदप्रयोग इति भावः॥

ननु सत्यं भिदेति त्रिकालाबाध्यभेद उच्यते। न चायं प्रत्यक्षगोचर इति कथं तत्सिद्धानुवादकत्वमिति शङ्कते त्रिकालेति।

त्रिकालाबाध्यभेदो न प्रसिद्ध इति चेन्न। प्रत्यक्षस्य भेदविषयस्य श्रुतिसमानप्रामाण्यवादिनस्तव भेदश्रुतेः प्रत्यक्षासिद्धभेदसत्ताऽविषयत्वात्। अन्यथा तव वास्तवभेदप्रत्यक्षाद्युपन्यासव्याघातात्। श्रुतिद्वयविरोधस्यापरिहार्यत्वाच्च। अभेदश्रुतेर्व्यावहारिकाभेदाविषयत्वस्योक्तत्वात।

मास्तु वाऽस्य वाक्यान्तरशेषत्वम्। एतदेव वाक्यमभेदपरमस्तु। तथा हि। सत्य आत्मेत्यादिश्रुति र्न केवलमात्मनस्त्रिकालाबाध्यत्वं सत्यत्वमाह। किं तर्हि जीवत्वमपि वास्तवं नेत्याह-सत्यो जीवः। जीवत्वमिति यावत्। विशिष्टनिषेधस्य विशेष्यबाधेन विशेषणोपसंक्रमात् द्विविधे पदविभागे संभवति बहूभेदश्रुत्यनुरोधेन च वर्णि-

तन्न्यायेन चासत्य इतिच्छेद एवोचितः । अनेन सजातीयो भेदो निराकृतः ॥

अस्मन्मतवच्छ्रुतेः प्रत्यक्षविलक्षणप्रामाण्यस्य त्वयाऽनङ्गीकाराद्भेदश्रुतेः प्रत्यक्षासिद्धविषयत्वं तव मते ऽनुपपन्नमित्याह-न प्रत्यक्षेति । अविषयत्वादिति च्छेदः । वास्तवभेदस्य श्रुत्यैकगम्यत्वं वदतस्तव पूर्वापरवाक्यविरोधश्चेत्याह-अन्यथेति । त्वदीयश्रुतेर्वास्तवभेदपरत्वेऽभेदश्रुत्या फलभेदो दुर्वारः स्यादित्याह-श्रुतिद्वयेति । नन्वभेदश्रुतेरेव व्यावहारिकाभेदविषयत्वेनाविरोधः किन्न स्यादिति, नेत्याह-अभेदेति । एवं तावत्सत्यं भिदेति वाक्यस्य भेदानुवादद्वारा वाक्यान्तरगम्याभेदपरत्वमित्युक्तम् ।

इदानीमभेदश्रुत्यविरोधायेदमेव वाक्यं साक्षादभेदपरतया नेतुं शक्यमित्याह-मास्तु वेति । आकाङ्क्षापूर्वकमुत्तरोत्तरपदान्यवतारयन्नभेदपरत्वमस्य दर्शयतितथा हीति । आत्मन इति । जीवात्मन इत्यर्थः । असत्य इतिच्छेदमभिप्रेत्योत्तरपदमवतारयति-किं तर्हीति । ननु धर्मिवाचकजीवपदस्य कथं धर्ममात्रपरत्वमित्याशङ्क्य जीवस्वरूपस्यासत्यत्वे सत्य आत्मेति । एतद्विरोधान्मोक्षशास्त्रानर्थक्यप्रसङ्गाच्च जीवत्वस्यैव सत्यत्वनिषेध इत्याह-विशिष्टेति । ननु सत्यो जीव इति पदविभागेन जीवत्वमपि सत्यमित्येवार्थः किन्न स्यादिति तत्राह-द्विविध इति । वर्णितन्यायेनेति । शास्त्रविवेकोक्तत्वंपदार्थशोधकन्यायेनेत्यर्थः । सत्यं भिदेत्याद्यवतारयितुं पूर्वभागस्याभिप्रायमाह-अनेनेति । जीव-

त्वस्यासत्यत्वे जीवस्य ब्रह्मणो भेदकाभावात्तद्भेदाभावसिद्धिरिति भावः।

जडं प्रपञ्चस्तद्धर्मिप्रतियोगिकभेदश्चासत्य इति वक्तुमुत्तरसंदर्भ इत्याह-विजातीयेति।

विजातीयभेदं निराकरोति "सत्यं भिदासत्यम्"इति। "पञ्चभूतात्मकं जगत्सत्यं सच्चासच्चाभवत्"इति श्रुतेः "सत्यस्य सत्यम्"इत्यादेश्च तदेव। भिद्यते इति भिदा। असत्यमनिर्वचनीयम्। तस्यैव दार्ढ्याय पुनरुक्तिः। भिदाऽसत्यं भिदेति। काकाक्षिन्यायेनासत्यमित्यस्योभयत्रानुकर्षः। एवं स्मृतिरपि भेदमपवदति–

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणोभेदमसन्तं कः करिष्यति"इति॥

"आत्मेति ह्युपगच्छन्ति ग्राहयन्ति च" इत्यादिसूत्राण्यपि भेदमपवदन्ति।

उक्तार्थाभिधाने सामर्थ्यं दर्शयति-पञ्चेति। मूर्तामूर्तब्राह्मणे पृथिव्यादित्रयं सद् वाय्वाकाशौ सदिति निर्णीतत्वात्सत्यशब्देन पञ्चभूतात्मकं जगदुच्यत इति भावः। तत्र श्रुत्यन्तरसस्वादमाह-सच्चेति। भिदाशब्दः कर्मसाधन इत्याह-तदेवेति। भेद एव भिदेत्युपगमेऽपि सत्यं भिदा चाऽसत्यमित्यर्थो द्रष्टव्यः। उत्तरपदत्रयस्यासत्यपदस्य पूर्वोत्तरभिदापदाभ्यामन्वयेनोक्तासत्यत्वमेवाध्यस्यते इत्याह-तस्यैवेति। एवं परोक्तस्मृ-

तिसूत्रयोरपि प्रेत्यजीवपरभेदस्याविद्यकत्वे विष्णुपुराणवचनमुदाहरति-एवं स्मृतिरिति। विभेदजनकाज्ञाने तत्त्वज्ञानेन निरवशेषं नाशं प्रापिते सति जीवस्य ब्रह्मणः सकाशाद्भेदमत्यन्तमसन्तं पुनः को वा जनयिष्यति। न कोऽपीति स्मृत्यर्थः।

ननु विरुद्धो भेदो यस्य स विभेद इत्यभेद उच्यते। तज्जनकेऽज्ञाने नष्टे पुनरात्मब्रह्मणोरसन्तमभेदं कः करिष्यत्यभेदस्यैवाविद्यकत्वं तदर्थः किन्न स्यादिति चेन्न।

"तद्भावभावमापन्नस्तदाऽसौ परमात्मना।
भवत्यभेदिभेदश्च तस्य ज्ञानकृतो भवेत्" ॥

इत्यव्यवहितपूर्वश्लोके स्पष्टमेव भेदस्याज्ञानकृतत्वं स्वाभेदस्य च तत्त्वज्ञानकालीनस्य श्रवणविरोधात्। एवं "क्षेत्रज्ञं चापि मां विद्धि" "अविभक्तं च भूतेषु विभक्तमिव च स्थितम्" "ज्ञानी त्वात्मैव मे मतम्" "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः" इत्यादिस्मृतिसहस्रविरोधाच्चेति भावः। श्रुतेरभेदपरत्वनिर्णायकसूत्राण्युदाहरति-आत्मेति। जगज्जन्मादिकारणं ब्रह्म किं पराक्त्वेन प्रतिपत्तव्यमुत प्रत्यक्त्वेनेति विषये विरुद्धधर्माध्यासेन प्रत्यक्त्वायोगाद्भेदेनैव प्रतिपत्तव्यमिति पूर्वपक्षं तुशब्देन निरस्याऽऽत्मेत्येव प्रतिपत्तव्यमिति प्रतिज्ञातेऽर्थे हेतुवचनमुपगच्छन्तीत्यादि उद्दालकादयः श्वेतकेतुप्रभृतीन् तत्त्वमसीत्यादिना प्रत्यगात्मतया ब्रह्म ग्राहयेति स्वयमपि त्वं वा अहमस्मीत्यादिना तथाऽनुभवन्ति। यत इति सूत्रार्थः। आदिपदेन अनवस्थितेरिति काशकृत्स्नः, अन्यथा चापि-

दाशकितवादिष्वमधीयत एक इत्यादीनि गृह्यन्ते ॥

अभेदश्रुतेर्निरवकाशत्वेन प्राबल्यमुक्त्वा तत्परत्वेनापि तदाह-एवमिति ।

एवं तत्परत्वादप्यभेदश्रुतिर्बलवती । अभेदस्य मानान्तरागोचरत्वात् । तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात् तत्सर्वमभवदिति ब्रह्मात्मैक्यज्ञानात्सर्वात्मतालक्षणमोक्षफलश्रवणाच्चाभेदश्रुतिः स्वार्थपरा । न च भेदे तात्पर्यमस्ति ।

ननूक्तं द्वासुपर्णेत्यस्या भेदपरत्वमिति चेन्न । तस्याभेदानुवादतन्निषेधमुखेनासंगोदासीनशोधितत्वंपदार्थपरत्वात् । तथा हि । "ब्रह्मैवेदममृतं पुरस्तात्" इति वाक्ये ब्रह्मणः सर्वात्मत्वे निर्दिष्टे तर्हि भोक्त्रभेदाद् ब्रह्मापि भोक्तृ स्यात् । तच्चायुक्तम् । अतो न सर्वात्मत्वमिति शङ्कायामयं मन्त्रः पठ्यते । "यौ द्वौ बिम्बप्रतिबिम्बभूतौ जीवेश्वरावस्मिंश्छरीरे वर्तेते । तयोर्मध्येऽन्यो बुद्धिप्रतिबिम्बभूतस्तदभेदाध्यासात्तद्धर्माभिमानी अतिकर्मफलं भुङ्क्ते अन्यः सन् स एवान्यः सन् बुद्धितादात्म्यरहितः स्वरूपभूतचैतन्यात्मना अनश्नन्नभिचाकशीति । भोगरहितः प्रकाशते । औदासीन्यबोधाभ्यां साक्षिमात्रमित्यर्थः ।

अभेदश्रुतेः स्वार्थपरत्वगमकं लिङ्गमाह । अभे-

दस्येति । एतच्च लिङ्गद्वयमात्मैवेदमग्र आसीत् । सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् । तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म'इत्युपक्रमोपसंहारयोः ब्रह्मेदमग्र आसीदेकमेव आत्मैवेदमग्र आसीदेक एवेत्याद्यभ्यासस्य । तद्यो देवानां प्रत्यबुद्ध्यत स एव तदभवत् । अथ योऽन्यां देवतामुपास्ते ऽन्योऽसावन्योऽहमस्मीति न स वेद । यथा पशुरित्यादिस्तुतिनिन्दार्थवादस्य । स एव इह प्रविष्ट इत्याद्युपपत्तेश्चोपलक्षणमिति द्रष्टव्यम् । भेदश्रुतेर्दौर्बल्ये हेतुमाह-नच भेद-इति ।

भेदेऽप्युपक्रमादेरुक्तत्वात्तात्पर्याभावोऽसिद्ध इति शङ्कते-नन्विति । योगिरहस्यब्राह्मणेनास्या भेदपरतया व्याख्यातत्वान्न भेदे तात्पर्यमित्यभिप्रेत्याह । न तस्या इति । स्वप्रकरणपर्यालोचनयाप्यभेदपरत्वमेवावगम्यत इत्याह-तथा हीति । वाक्य इति । ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्यनेनेति शेषः । मन्त्रस्य प्रथमार्द्धेन मायोपाधिकभेदोऽनूद्यत इत्यभिप्रेत्याह-यौ द्वाविति । तयोरन्य इति । बुद्ध्युपाधिको भेदो ऽनूद्यते इत्याह-तयोर्मध्ये इति । अनश्नन्नन्य इत्यत्रानुपहितात्मनि भेदानुवादेन भोगो निषिध्यते इत्याह अन्य इति ।

एवं सार्वात्म्यश्रुत्यपेक्षितभोगनिषेधार्थं भेदस्यानूद्यमानत्वात्तदनुवादवैयर्थ्यं चोद्यमप्यपास्तमित्यभिप्रेत्याह-अनश्नन्निति ।

अनश्नन्निति च भोक्तृत्वस्य निषेधः । तत्र च जीवस्य स्वरूपेण भोगनिषेधेऽहमनुभववि-

रोधपरिहाराय स एवान्तःकरणेन कल्पिततादात्म्यात् भुङ्क्त इति न भोक्तृत्वस्य चैतन्यसामानाधिकरण्यधीविरोध इति भेदानुवादपूर्वकं तस्य तद्दर्शयतीति अन्यशेषोऽयमनुवादः। अथ वा जीवानुवादपूर्वकं केवलचैतन्यात्मनो भोक्तृत्वाभावे दर्शिते अभोक्तृजीवस्येश्वरभेदे प्रमाणाभावान्नास्ति जीवेशभेद इति तन्निषेधायैव चायमनुवादः । तथा चाहमनुभवसिद्धं जीवस्य न स्वरूपं, किं त्वाविद्यकम् । जीवस्वरूपं तु तद्विलक्षणमशनायादिधर्मरहितं चैतन्यमात्रमिति न ब्रह्मणः सर्वात्मत्वविरोध इति तात्पर्यम् ।

एतेन संसारानाधारचैतन्यस्य ब्रह्माभेदे न विवादः । आत्मनो ऽभोक्तृत्वे बन्धमोक्षयोर्वैयधिकरण्यं चेति परास्तम् । ब्रह्मस्वरूपेण नित्यमुक्तस्यात्मन एव बुद्धितादात्म्येन संसारित्वात्। न चात्र निषेधायानुवादे लिङ्गाभावः। तयोरिति तच्छब्दस्योपस्थितपरामर्शित्वात् । तेन यच्छब्दस्याप्यनुमातुं शक्यत्वात् । अनश्नन्निति निषेधाच्च ।

एतेनास्य निषेधशेषानुवादत्वे सत्त्वादिवाक्यमप्यसद्वा इदमग्र आसीदिति निषेधशेषानुवादः स्यादिति परास्तम् । ब्रह्मविषयसत्त्वादि-

वाक्यस्य प्रपंचासत्त्वविषयवाक्यस्य च भिन्नविषयतया शेषशेषिभावायोगात् । सत्यादिवाक्यप्रमेयस्य त्रिविधपरिच्छेदरहितत्रिकालाबाध्यसत्त्वस्यान्यतोऽप्रसिद्धेश्च ॥

एवमपि तयोरन्यः पिप्पलं स्वाद्वत्तीत्येतद् व्यर्थमित्याशङ्क्याहंकारानात्मवादे चोक्तं तदुपयोगं पुनः स्मारयति-तत्र च जीवस्येति । तस्य वस्तुतो भोगरहितजीवस्योपहितरूपेण भोगं दर्शयतीति भेदानुवादो भोगनिषेधशेष एवेत्यर्थः । भेदनिषेधायैव भेदानुवाद इति पक्षान्तरमाह-अथ वेति । अस्मिन्नपि पक्षे उपक्रान्तब्रह्मसर्वात्मत्वेनापेक्षितमेव तेन समर्थत इत्याह-तया चेति ।

जीवस्याभोक्तृत्वे यद्बाधकमुक्तं तदप्यपास्तमित्याह-एतेनेति । एतच्छब्दार्थमाह-ब्रह्मेति । आरोपितसंसाराश्रयस्यैव वस्तुतोऽशनायाद्यतीतस्वरूपेण ब्रह्माभेदाभिधानात् तस्यैव मुक्त्यन्वयित्वाच्च नोक्तदोष इति भावः । यत्तन्नेत्यादिनिषेधज्ञापकं नास्तीति तत्राह-न चात्रेति । नञोऽपि श्रवणमस्तीत्याह-अनश्नन्निति ।

परोक्तप्रतिबन्दीमपि वक्ष्यमाणहेतुना दूषयति । एतेनेति । असद्वा इति वाक्येन पूर्वसृष्टिपूर्वकाले प्रपञ्चसत्ताया निषिध्यमानत्वात्सत्त्वादिवाक्यस्य च ब्रह्मसत्ताभिधायकस्य तदनुवादकत्वाभावेन तन्निषेधशेषत्वायोगादित्याह-ब्रह्मविषयेति । यदप्युक्तम् । सर्वप्रत्ययवेद्यत्वाद् ब्रह्मसत्तायाः सत्त्वादिवाक्यमनुवादक-

मिति तदप्ययुक्तमित्याह–सत्त्वादीति ।

असद्वा इदमिति वाक्यस्य सत्तानिषेधकत्वमभ्यु-पेत्येदमुक्तम् । इदानीं तदेव नेत्याह । असद्वेति ।

असद्वा इदमित्यस्यापि सृष्टिपूर्वं जगद-नभिव्यक्तनामरूपमव्याकृतब्रह्मात्मकमित्यर्थपर-त्वाच्च । अन्यथा "ततो वै सदजायत" इत्युत्तर-वाक्यविरोधात् । असतः सदुत्पत्त्यनुपपत्तेः कथ-मसतः सज्जायेतेति श्रुत्यन्तरे तस्य निषिद्धत्वाच्च । त्वन्मते च तयोर्मध्य एकोऽश्नातीत्युक्ते देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्त्या तदितरेण दर्शननि-षेधवदर्थादीश्वरे तन्निषेधसिद्धेस्तदुक्तिवैयर्थ्यात् । अनुवादस्य च सत्यां गतावन्याय्यत्वात् । तद्वै-यर्थ्याच्च ।

न च प्रत्यक्षादिप्रामाण्यनिश्चयार्थं तदि-ति वाच्यम् । तस्यापि वेदवत्स्वत एव तत्सिद्धेः । परतः प्रामाण्येऽपि घटादिप्रत्यक्षवद् व्यवहार-काले बाधाभावादेव तत्सिद्धेः । न च प्रत्यक्षस्य वेदबोधितार्थविषयतया तात्त्विकप्रामाण्यनिश्च-यानुवाद इति वाच्यम् । भेदस्य स्वार्थपरानेक-श्रुतिनिषेधात् । अतत्पराभिः श्रुतिभिरनुवादेऽपि रुद्ररोदनाद्यनुमानस्येव प्रत्यक्षस्यापि तदसंभवात् । तस्मान्न भेदश्रुतिर्भेदपरा ।

भेदाः समानविषयाइत्युपलब्धं तद्वदिन्द्रियेषु समानविषयत्वं स्यात्। दृष्टा तु घ्राणादेर्गन्धादिषु व्यवस्थेति नानाप्रकृतिकत्वम्। तथा च नानाजात्युपादानानीन्द्रियाणि। द्रव्यत्वे सति-प्रतिनियतविषयत्वात्। यद्यद्द्रव्यत्वे सति प्रतिनियतविषयं तत्तन्नजात्युपादानं दृष्टम्। यथा व्यजनानिलप्रदीपकस्तुरिकादेस्तथा चैतानि द्रव्यत्वे सति प्रतिनियतविषयाणि। तस्मान्न, जात्युपादानानीति। तथाहि—ज्ञानशब्देष्वेकजात्युपादानत्वं प्रतिनियतविषयत्वं चेति व्यभिचारः। तदर्थं द्रव्यत्वे सतीति विशेषणम्। न चास्य पक्षधर्मत्वादिकम्। अतोऽप्रमाणत्वमिति प्रसङ्गात्। यथाभौतिकत्वेऽनुमानमिन्द्रियत्वादिति। अत्र भूतादभिनिर्वृत्तं भौतिकं तत्प्रतिषेधेन च कारणान्तरप्रभवत्वं विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वादिति साध्यविकलो दृष्टान्तस्तथा च मनसि भौतिकत्वम्। नाप्यभौतिकत्वमिति। अथ भूतादुत्पत्तिप्रतिषेधेन नित्यत्वम्। तत्राप्यभ्युपगमव्याघातो मनस्यपि नित्यत्वानभ्युपगमात्। इन्द्रियत्वं चोक्तविशेषणस्यापरोक्षज्ञानजनकत्वेन भूतादुत्पत्तिप्रतिषेधेनेत्यन्यथासिद्धम्। निर्मूलं चेन्द्रियाणामहङ्कारप्रभवत्वम्। तत्सद्भावे प्रमाणसंभवात्। तथाहि—प्रमाणसद्भावे सत्येषा प्रक्रिया तस्य चासत्वं वक्ष्यमाणमिति। येषां वा संसारमण्डलव्यापीनीन्द्रियाणि तेषामशेषविषयग्रहणप्रसङ्गः। अथादृष्टवशान्नियतदेशावृत्तिर्व्यज्यत इति चेत्। अत्र वृत्तीनां तादात्म्येन किंचिदुक्तं स्यात्। व्यतिरके तु तदेवेन्द्रियमिति संज्ञामात्रमेव। अथ नियतविषयावबोधान्यथानुपपत्त्या तदाकारतैवेन्द्रियस्य परिनिश्चीयते। तन्न। अन्यथानुपलम्भात्। तथाहि—। नियतार्थसंनिकर्षेऽप्युपलम्भो घटत एव। न च व्यापित्वं परस्याभीष्ट-

तरमिति नेह प्रत्यन्यतइति विप्रतिपत्तौ: प्रतीत्याह–। जीवांशात्कर्मनिर्मुक्तादिति । जीवप्रदेश एव कर्मक्षयोपशमत्वादिन्द्रियं नान्यत् । तथाहि–किं चक्षुराद्येव रूपादि जानाति किं वा प्रकाशयति? । प्रथमपक्षे एकस्मिन्नपि शरीरे पञ्चात्मानः प्राप्नुवन्ति । अहंकारभूतानामचेनत्वात्तत्प्रकृतेरिन्द्रियस्य कथं द्रष्टृत्वमिति । अथ प्रकाशयति, किं न तमसि बिडालादेर्भूयस्तेजः प्रकाशयत्वेवं किं न मनुष्यस्य । स्वल्पत्वात् तेजस इति चेत् । बहूनामेकत्र दृष्टिपाते किन्न प्रकाशयति ?। अपि च तमः किं तेजोभावः, किं वा वस्त्वन्तरमिति । अभावस्य नायनरश्म्यावारकत्वायोगात् । वस्त्वन्तरमपि रूपमेव रूपस्यावरणम् । अन्यथा वाय्वादेरप्यावारकत्वं स्यात् । ततस्तमसा रूपवता चक्षूरश्मीनां संयोगे तमोदर्शनमासज्येत । कृष्णरूपं दृश्यत इति चेत् । न, तथाविधदर्शनस्य भिन्नाक्षेपिभावात् । तन्नेन्द्रियं भौतिकं किंत्वात्मा चेन्द्रियम्–तदुक्तम्–लब्ध्युपयोगौ भावेन्द्रियाण्यधितिष्ठत इति । एतदुक्तं भवति । अनुपहतचक्षुरादिदेशेष्वेवात्मनः कर्मक्षयोपशमस्तेनास्थगितगवाक्षतुल्यानि चक्षुरादीन्युपकरणानि । आत्मनो ज्ञानोत्पत्तौ कर्मणो वैचित्र्यात्यथात्मनोऽव्यापित्वान्मुक्तात्ममनःसंयोगजं प्रत्यक्षं किं नोपपद्यते । यच्चभौतिकत्वसिद्धौ शाखाचन्द्रमसोः स्फुटतस्यापि युगपत्प्रतिभासस्य भ्रान्तत्वमाशुकारित्वादुक्तं तदीश्वरज्ञानस्यापि युगपदनेकार्थग्राहिणो भ्रान्तत्वमापादयति । न च तत्क्रमवत् । अशेषाग्रहप्रसङ्गात् । एकत्रैवानन्तपर्याये क्षीणत्वात् । यच्च विषयमप्राप्य विकासित्वं चक्षुषस्तत्साधनधर्ममनुकरोति, तदेवं फल्गुप्रायं परोदितमुपेक्षितमिति । लैङ्गिकवदैन्द्रियत्वव्यपदेशः । तेन द्रव्येन्द्रियेण विना यत्प्रत्यक्षं तदनिन्द्रियम् । तत्र ग्रन्थकारस-

तभेदान् दर्शयन्नाह—। स्मृत्यूहादिकमित्यादि ।

ज्ञानमिन्द्रियजं ज्ञानं विनेन्द्रियमनिन्द्रियम् ।
स्मृत्यूहादिकमित्येके प्रातिभं च तथा परे ॥
स्वप्नविज्ञानमित्यन्ये स्वसंवेदनममेधतः ।

स्मृतिश्चवितर्कलक्षणा । आदिग्रहणादवायस्तद्रूपमनिन्द्रियम् । एकेऽनन्तवीर्यादयः । प्रतिभया स्वोमे भ्राताआगमिष्यत्येवं रूपया निर्मिते प्रातिभं वा परे टीकाकृतः । स्वप्नविज्ञानं यदस्पष्टमुत्पद्यते तद-न्येऽनन्तकीर्त्यादयः । स्वसंवेदनमेव नोऽस्माकमिति । एवं मन्यते वार्तिककारः अथादिभां भाविन एव ज्ञानस्य प्रामाण्यमुचितं न स्मृतेः । अर्थमन्तरेणापि तस्याभावात्प्रत्यक्षादेस्त्वव्यभिचारनिमित्ताभिधानात्कस्यचिद् व्यभिचारेऽपि न दोषः । नन्वेवं स्मृतेरव्यभिचारनिमित्तमस्ति । अमूढस्मृतेस्तु पूर्वप्रत्यक्षफलत्वान्न पृथक्प्रमाणयम् । ऊहस्तु संशयविशेष एव कुतस्तत्प्रमाणयं स्यात् । अवायस्तु प्रत्यक्षानुमानफलत्वेन न ताभ्यां प्रमाणान्तरमिति । काकतालीयसंवादयोरपि प्रातिभस्वप्रविज्ञानयोः प्रमाणत्वेन किञ्चिन्न प्रमाणं स्यात् । तस्मात् स्वप्नस्य ज्ञानात्मनो वेदनमेव प्रमाणमिति । मानसं तु मनोभावान्निरस्तम् । अथ मनोभावे योग्येऽपि विषये कथं युगपद्ज्ञानानुत्पत्तिः । उक्तमेतत् । उपयोग अभिमुख्यमिति । तद्यत्रात्मनस्तन्न भवति तत्रानुत्पत्तिरिति । आभिमुख्ये तु युगपदपि । अथ भ्रान्तासौ । नैतदस्ति । एवं हि सौगतस्य क्षणिकत्वे सान्त एव भासप्रसङ्गदूषणं सुदूरं निरस्तं स्यात् । तदुक्तम्—

पञ्चभिर्व्यवधानेऽपि भात्यव्यवहिते च या ।
सादध्वंसिनोऽर्थस्य नैरन्तर्यं न वेत्ति किम् ॥

तस्मादात्मैव मनो नान्यदिति । तदेवाह—।

मनःसंज्ञस्य जीवस्य ज्ञानावृत्तिसमक्षयौ ।
यतश्चित्तात्ततो ज्ञानं यौगपद्यं न दुष्यतीति ॥

मन इति संज्ञा यस्य स एव मन इत्यर्थः । तस्य ज्ञानावरणक्षयोपशमौ यतः चित्रौ ततो युगपज्ज्ञानमिति । योगजं व्याख्यातुमाह जिनस्येत्यादि ।

जिनस्यांशेषु सर्वेषु कर्मणः प्रक्रिये क्रमत् ।

रागादिजयाज्जिनस्तस्यासंख्येयात्मप्रदेशेषु ज्ञानावरणीयस्य प्रकर्षेणावधिः । मनः पर्यायप्रत्यक्षापेक्षया क्षये निमित्तसप्तमी । तस्मान्निमित्ताद्यनुपयोगः । सर्वत्राभिमुख्यलक्षणः आत्मस्वभावो दिनकरस्येव प्रकाशस्वभावता न पुनः पश्यामीत्यस्मदादेरिव मनः संकल्पो मनोभावात् । तस्मादुपयोगादक्रम युगपज्ज्ञानदर्शनमित्येकवद्भाव एकत्वख्यापनार्थकमेव-सामान्यविशेषेषु योगिज्ञानं नान्येषामिति । समनस्कत्वादतो नारामस्य जुरावंदोनष्ठिनुवनुगा । एवं रूपस्य वधस्त्यागः । सिद्धसेनाकस्येत्यर्थः । स्तस्याजिनविषयत्वात् इति । केवलप्रत्ययं सिद्धान्तेऽतिशयाख्यापनार्थम् । केवलिनोऽपि युगपदुपयोगद्वयं नास्ति, यदि मनः स्यादित्यर्थः । एवं संख्यालक्षणविप्रतिपत्तिं निराकृत्य सामान्येन विषयविप्रतिपत्तिं निराकर्तुमाह । तत्रेत्यादि ॥

तत्रेन्द्रियजमध्यक्षमेकांशव्यवसायकम् ।
वेदनं च परोक्षं च योगजन्तु तदन्यथा ॥

तेषु प्रमाणेषु इन्द्रियजं एकांशेन साकल्येन न त्वेकेनैव । तथा स्वसंवेदनपि । एतदुक्तं भवति । अनन्तधर्माध्यासितं-

वस्तु न योगिप्रत्यक्षवदिन्द्रियजप्रत्यक्षं निश्चापयति । अत एव तद्व्यवहारप्रत्यक्षम् । योगजं तु साकल्येन निश्चापयति । तेन निश्चयप्रत्यक्षमिति । इदानीं विशेषेण विषयविप्रतिपत्तिं निराकर्तुमाह—द्रव्यपर्यायेत्यादि ।

द्रव्यपर्यायसामान्यविशेषास्तस्य गोचराः ।
अविस्पष्टास्त एव स्युरनध्यक्षस्य गोचराः ॥

तल्लक्षणस्य वक्ष्यमाणत्वात्तस्य प्रत्यक्षस्य विषय इति संक्षेपार्थमिहैव परोक्षस्य विषयविप्रतिपत्तिं निराकुर्वन्नाह—। अविस्पष्टा इति । अनिदन्तयावभासमाना द्रव्यपर्यायसामान्यविशेषाः परोक्षस्य विषया इति । ननु बाह्यार्थाभावात् कथंद्रव्यादिनां विषयवत्प्रत्यक्षादिः । अत्रोच्यते । कथमर्थाभावः? । तत्साधकप्रमाणाभावादिति चेत् । विशदतरदर्शनमेव तत्साधकं प्रमाणम् । स्वप्नदर्शनवदपारमार्थिकमिति चेत् । ननु किमिदमपारमार्थिकत्वम् । अर्थशून्यत्वमिति चेत् । इतरेतराश्रयत्वम्—तथाहि—। अर्थशून्यत्वेऽपारमार्थिकत्वमपारमार्थिकत्वेऽर्थशून्यत्वमिति । येन चार्थो न दृष्टः, स कथं ब्रूयादर्थो नास्तीति । परप्रसिद्ध्येति चेन्न । परप्रसिद्धेरप्रमाणत्वात्। प्रमाणत्वे वा कथं तन्निषेधइति । अपि चानुभूयमानस्यापि स्वप्नदृष्टान्तेन यद्यर्थस्याभावो ज्ञानस्याप्यभावः स्यात् । स्वप्नानुभूतस्य चार्थस्यासत्यत्वं किमप्रतिभासमानत्वात्, किं वार्थक्रियावैकल्यादिति ? । न तावदाद्यः पक्षः । तदानीं तस्यानुभूयमानत्वादुपलब्धिः सत्येति वाभ्युपगमः । अथार्थक्रियावैकल्यात् तर्ह्यर्थक्रियाकारी जाग्रद्दशायामर्थः सत्यः स्यात् । विसंवादादिति चेत् । कोऽयं विसंवादः ? । ज्ञानान्तरेणाग्रहणमिति चेत् । तर्हि जाग्रद्दशायां तदस्तीति सत्यता स्यात् । बाधि-

तत्वमिति चेत् । किमिदं बाधितत्वम्? । नेदमिति प्रत्ययोत्पत्तिरिति चेत् । जाग्रत्प्रत्ययेषु तदभावात् सत्यतास्तु । न हि सत्यस्तंभप्रत्ययेषु कदाचिद्बाधकोत्पत्तिरस्ति। अथ स्वप्नप्रत्ययेष्वप्यर्थक्रियाकारित्वं संवादाबाधितत्वमस्ति । न च सत्यतोपगतार्थवादिना तेन। न तत्सत्यत्वे निबन्धनमिति । नैतदस्ति । सर्वोपि भ्रान्तिनिबन्धना । यथा मरीचिकासु जलभ्रान्तिः । तथो च स्वप्नप्रत्यये सत्यर्थक्रियानुभवपूर्वकं स्मरणमात्रकमेव न तु तत्र किञ्चिदर्थक्रियादि । अन्यथा जाग्रदननुभूतस्य किं न कस्यचिदर्थस्य तत्रोपलम्भो भवति। अपि चार्थनिषेधः किं प्रमाणेन क्रियते, किं वाऽप्रमाणेन?। प्रमाणेन कथं तन्निषेधः? । प्रमाणमपि तन्निषेधकं वाविनाशकत्वेन, किं वा विपरीतार्थोपस्थापकत्वेन, किं वा ग्राहकत्वेनेति? । प्रथमपक्षे सिद्धोऽर्थः । न ह्यसिद्धस्य विनाशः संभवति । द्वितीयेऽपि पक्षे अथोऽर्थस्य बाधक इति कथं नार्थसिद्धिः । अग्राहकं तु संदेहकारि भवतु कथं तन्निषेधकं दृश्यस्य। कथं नेति चेत् । ननु पूर्वदृष्टस्यैकज्ञानसंसर्गिण्युपलभ्यमाने आरोपाद्दृश्यत्वम् । नचायमत्यन्तादृष्टस्य प्रकारः संभवति। ज्ञानात्मन्युलभ्यमानेऽदृष्टस्यापि तादात्म्येन निषेध इति चेद्भवतु ज्ञानात्मनो न भिन्नस्य । अथ भिन्नस्यानुपलम्भान्निषेधः । तत्किमयं नीलाद्याकारोऽनुभूयते न वेति? । अथास्त्ययमाकारः किं तु ज्ञानात्मनैव । जडस्य प्रकाशायोगात् । तदेवाह—। न जडस्येत्यादि ॥

न जडस्यावभासोऽस्ति भेदाभेदविकल्पनात् ।
न भिन्नविषयं ज्ञानं शून्यंवा यदि बाततः ॥

प्रकाशस्य भेदे जडस्य किमायातम् । अभेदे जडमेव न

स्यात् तेन न भिन्नविषयं ज्ञानं किं त्वात्मविषयमेव । न ह्यभिन्नप्रकाशका: सत्तां दधाना: स्तम्भादयो जडा भवितुं युक्ता: । अथ कोऽयं प्रकाश: ? । किं ज्ञानमथ ज्ञानविषयता ? । प्रथमपक्षे स्यादिदम् । द्वितीये तु कथमर्थस्य ज्ञानता? । न हि प्रदीपेन प्रकाश्यमाना: स्तम्भादय: प्रदीपा भवन्ति । अथ तेऽपि प्रकाशस्वभावास्तदानीमेवोत्पद्यन्ते। अन्यथाऽन्धकारेऽपि प्रकाश्येरन् । अस्ति तावदन्धकारेऽपि स्तम्भादि: । प्रकाशपर्यायता तु प्रदीपादुत्पद्यते तथार्थस्य प्रकाशपर्यायता ज्ञानाद्भवतु कथमर्थाभाव: । अथ पूर्वमर्थास्तित्वे किं प्रमाणम् ? । निषेधे किं प्रमाणम् । तर्ह्यस्तु संशय: । नैतदस्ति । यत: किमेकमेव ज्ञानं क्षणस्थायि तेन पूर्वापरयो: कालयोरर्थसत्तां न प्रतिपद्यते किं वा अनेकानि परस्परकर्मतां न प्रतिपद्यन्ते । ? सर्वेषां वर्त्तमाननिष्ठत्वात् । तेन विदन्ति प्रथमपेक्षणादूर्द्धं न किञ्चिदनुभूयते । तथासत् । मरणपर्यायत्तमनुभवस्य बाधितस्योत्पत्तेः । द्वितीयेऽपि ज्ञानानां परस्परानुगमेऽप्यात्मना देशकालाकारविपर्ययस्यार्थस्यानुभूयमानत्वात् । एतेन सहोपलम्भनियमो निरस्त: । सादरे इव सहशब्दस्यैकत्ववाचित्वाद्विज्ञानार्थयोश्च भेदस्य प्रतिपादितत्वादिति । अथ सर्वे प्रत्यया निरालम्बना: । प्रत्ययत्वात् । स्वप्नप्रत्ययवत् । इत्यर्थाभावस्तर्हि आत्मवेदनमपि प्रत्यय: सोऽपि निरालम्बन: स्यात् । इष्यत एवेति चेत् । तदेवाह—। शून्यं वा यदि वा तत: । प्रतिभासमानत्वादिति । तदसत् । यत: ज्ञानशून्यवादिनोऽनुमानं किं गृहीतव्याप्तिकमुदेति, किं वागृहीतव्याप्तिकम् ? । अगृहितव्याप्तिकं कथमनुमानम् ? । व्याप्तिग्रहणं च न भेदेनैव । इतरेतराश्रयत्वप्रसङ्गात् । ज्ञानान्तरेण चेत् । कथमद्वैतं शून्यं वा । तन्न

कश्चित्साधनमर्थं निरासे ज्ञानशून्यवादिनः । तदेवाह—। ज्ञानशून्यवत इत्यादि ।

ज्ञानशून्यवतो नास्ति निरासेऽर्थस्य साधनम् ।
संवित्तिसिद्धप्रतिक्षेपे कथं स्याज्ज्ञव्यवस्थितिः ॥

अनुभवसिद्धस्य चार्थक्रियाकारिणः सकलजन्तुसाधारणस्यार्थस्य निषेधज्ञानशून्ययोरपि कथं स्याद् व्यवस्थितिरिति । तदेवाह । संवित्तिसिद्धस्येत्यादि ॥ अथायमर्थः, किमवयविरूपः, किंवा परमाणुस्वरूप इति ? । तत्रावयविनो भवद्भिरेव निरस्तत्वात् परमाणूनामप्रतिभासनान्न बाह्योऽयमाकारः किन्तु ज्ञानाकारवत्तथा प्रतिभातीति । ननु ज्ञानाकारेऽप्येष प्रसङ्गो दुर्निवारः । तथाहि-तद्देशत्वान्नीलानीलत्वादिके विरोधः चित्रद्वैतेऽपि समानः । न च ज्ञानं परमाणुमात्रं चकास्ति । अथ यथा बाह्यस्यैकावयवावरणेऽपि अवयवान्तरप्रतिभासलक्षणो विरोधः नैवं ज्ञानाकारस्य । माभूदयं, नीलानीलादिकः केन निवार्यते । यथा चायमर्थस्तथा सविकल्पकसिद्धौ प्रतिपादयिष्यतीति । अत्र बहु वक्तव्यं तच्च नोच्यते ग्रन्थविस्तारभयादिति । तदेवं बाह्यमर्थं व्यवस्थाप्येदानीं द्रव्यादीनां लक्षणमाह—पर्यवस्यन्तीत्यादि ।

पर्यवस्यन्ति पर्याया द्रव्यं द्रवति सर्वदा ।
सदृशः परिणामे यस्तत्सामान्यं द्विधा स्थितम् ॥

पर्यवस्यन्ति क्षणिकत्वाद्व्यावर्त्तन्त इति पर्यायाः । पर्याया इत्युपलक्षणं चैतत्सहभाविनां गुणानां रूपादीनामिति । द्रवन्ति गच्छन्ति तांस्तान्पर्यायान् परिणामनित्यत्वादिति । द्रव्यमिति । परपरिकल्पितं सामान्यं पूर्वमेव निरस्तमिदानीं स्वा-

भिमतं सामान्यं व्यवस्थापयन्नाह। सदृशः परिणाम इत्यादि। इह भावानां सदृशपरिणतिः सामान्यं समानाकारसामान्यमिति न्यायात्। अन्यथा स्वरूपसामान्यमन्तरेणान्यसामान्ययोगेऽपि समानरूपताकारस्यैव नोपपद्यते। यदि वा समानानामपि सामान्ययोगात समानरूपता भवति, किं न महिषाश्वयोः। पराभ्युपगतस्य सामान्यस्य तत्रापि भावात्। विजातीयत्वान्नेति चेत्। इतरेतराश्रयत्वम्। तथाहि—विजातीयत्वे सामान्यायोगः, सामान्यायोगे च विजातीयत्वमिति। अपि च सामान्येनासमानानां यदि समानरूपता जन्यते न स्वकारणादेव सा तेषामसमन्यतः।

तत्पश्चादपि कुर्वत्याशिशवो लघवः परम्॥

तस्माद्वस्तुस्वरूपमेव समानपरिणामं सामान्यं नान्यत्। नाप्यवस्तु। तस्य निषेत्स्यमानत्वादिति। तच्चोर्ध्वतारूपं तिर्यग्रूपं तदेवाह—द्विविधेति। एवं सामान्यलक्षणमभिधायेदानीं विशेषस्वरूपमाह—। विपरीत इति।

विपरीतो विशेषस्तु तान् युगपद्व्यवस्यति।
तेन तत्कल्पनाज्ज्ञानं न तु शब्दार्थयोजनात्॥

साधारणाद्विपरीतः सकलसजातीयविजातीयेभ्यो व्यावृत्तोऽसाधारणवस्तुस्वभावो विशेष इति। इदानीं विषयद्वारेणैव सविकल्पकसिद्धिमाह। तान् युगपदिति। युगपदेककालं द्रव्यादीन् व्यवस्यति निश्चीयते यतः तेन तत्प्रत्यक्षं कल्पनाज्ञानं सविकल्पकमित्यर्थः। नन्वभिलापसंसर्गयोग्यप्रतिभासाप्रतीतिः कल्पना। तथाहि—कल्पना योजना सा च न वस्तुनो रूपं निरंशत्वाद्वस्तुनः किं तु शब्दनिर्मिता। अत एव जात्यादियोजनाऽपि शब्दयोजनानिराकरणादेव निराक्रियते।

ततो न तावद्द्रव्यादिकं किंचिदस्ति। भवतु वा तथापि घटपटवदप्रभासमानं न स्वग्राहिणि कल्पनात्वमारोपयति । पारतन्त्र्येण प्रतिभासमानं कथं नेति चेत् । किमिदंपारतन्त्र्यम् ?। विशेषणविशेष्यभाव इति चेत् । नैतदस्ति। न हि तात्था नीलादिवद्विशेषणादि किञ्चिदस्ति। विशेष्यस्यापि विशेषणत्वेन दर्शनात् । किं विशेषणविशेष्ययोः किमेकज्ञानावभासित्वमुतानेकज्ञानावभासित्वमिति ?। तत्रैकज्ञानावभासित्वेन ज्ञायते किञ्चिद्विशेषणं किञ्चिद्विशेष्यमिति । न ह्यनयो रूपरिनामास्ति। प्रधानोपसर्जनत्वमिति चेत्। किमिदं प्रधान्यादि ?। उपकार्योपकारकत्वमिति चेत् । न, जन्यजनकभावादन्य उपकार्यादिभावः । न च कार्यकारणभावः समानकालयोरिति । आधाराधेयभाव इति चेत् । न, तस्य पूर्वमेव निषेधात् । न ह्युपर्यभावेन स्थितपदार्थद्वयव्यतिरिक्तः कश्चिदाधराधेय भावः । न च तथा प्रतिभासे किञ्चित्पारतन्त्र्यमिति । भिन्नज्ञानावभासित्वे का नाम कल्पना ?। अथ भिन्नदर्शनेन विशेषणविशेष्येऽनुभूय पश्चात्स्मरणं तयोस्तद्भावे प्रत्येति तदेतदिष्यत एव। शब्दोल्लेखिज्ञानं वस्तु योजयति न तु तथा वस्तुरूपमिति। अथशब्दयोजितं वस्तु भविष्यतीति । तन्न। नह्यर्थे शब्दाः सन्ति तदात्मानो वेत्याशङ्क्याह—। न तु शब्दार्थयोजनादिति । शब्दश्चार्थश्च तयोर्योजना न संभवति । तत्र ह्यनवस्थां प्रतिपादयन्तीति । तथाहि—नास्मृतेन वाचकशब्देनार्थो योज्यते शब्दस्यापि स्मरणं तद्वाचकशब्दस्मृतेः, तस्यापि स्ववाचकशब्दस्मृतेरित्यनवस्था । न च कल्पनाज्ञानकारणेष्विति वाच्यम् । आकारवादे प्रतिषेधात्। तस्माद्वस्त्वेव स्थूलं सावयवमनुभूयमानं केवलानामणूनामननुभवात् प्रत्यक्षं कल्पनायुक्तमव-

स्थापयति किमत्रान्येन प्रमाणेनेति । तदेवाह । निरंशेत्यादि ।

निरंशपरिभाणूनाभाभासिस्थौल्यवेदने ।
प्रत्यक्षं कल्पनायुक्तं प्रत्यक्षेणैव सिद्धयति ॥

ननु किमिदं स्थौल्यम्? । किं परमाण्वात्मकं किंवा परमाणुजन्यमिति? । न तावत्परमाण्वात्मकम् । तद्धि पूर्वापरादिग्भेदमुपलभ्यते । न चैकस्य परमाणोरसावस्ति । बहूनां भविष्यतीति चेत् । नैतदस्ति । न हि निरंशमणोः कश्चित् परमाणुःपूर्वः कश्चित्पश्चिमः उत्तरो दक्षिणो वा संभवति । तथाहि—यस्यावधिरूपस्यांशस्य प्रत्यासन्नः एकः परमाणुः पूर्वो दृष्टस्तस्यैवावधिरूपस्यापरोऽपि प्रत्यासन्नः । ततस्तदवधिरूपया प्रत्यासत्त्या यद्येकः पूर्वः अपरोऽपि पूर्वः स्यात् । एवं शेषेष्वपि वाच्यम् । तन्न परमाण्वात्मकं स्थौल्यमिति । नापि परमाणुजन्यम् । यतः परमाणुभिः किं सयुक्तैरुतासंयुक्तैरिति? तत्र यदि संयुक्तैस्तदा पिंडः स्यादणुमात्रकः । तथाहि—परमाण्वन्तरेण संयोगः किमेकदेशन किं वा सर्वात्मनेति? । तत्र न तावत् प्रथमपक्षः । अनिर्देशत्वात्परमाणूनाम् । द्वितीयपक्षे तु सर्वपरमाणूनामेकस्मिन् परमाणौ प्रवेशः स्यादिति । अथासंयुक्तायोग्यदेशव्यवस्थिताः स्थौल्यं जनयन्ति, प्रतिभासं जनयन्ति । तत्र साधकस्याप्रतिपादनाद्दूरं प्रतिभासधर्मः । अस्ति हि कश्चिद्धर्मो नीलत्वादिलक्षणः कश्चित्प्रतिभासधर्मः यो बहुषु प्रतिभासमानेषु प्रतिभाति । यथा केशकलापद्धति । तस्मान्न स्थौल्यं वस्तु यत्सावयवं प्रतिप्रतीयेतेति । एतदेवाह । नासंयुक्तैरित्यादि ।

नासंयुक्तैर्न संयुक्तैर्निरंशो क्रियते महत् ।
अयोगे प्रतिभासोऽपि संयोगेऽप्यणुमात्रकम् ॥

कोऽयं प्रतिभासधर्मः? । किं वस्तु किं वाऽ वस्तु ? । यदि वस्तु तदाऽवयविदूषणम् । अथावस्तुतदा कथ मभ्रान्तिः ? । प्रत्यक्षं प्रचयावभासि । नैतदस्ति । यतो न किंचित्स्थौल्यं परमाणुभ्यो ऽन्यत् किन्तु विततदेशाः परमाणवस्तथा प्रतिभासन्त इति । कथं नान्तरावभास इति चेत् । किमिदमन्तरम् ? । किमाकाशं किं वा विजातीयाणवः, किं वा रूपभेदो, देशभेदो, वेति?। तत्राकाशविजातीयपरमाणुप्रतिभासाभावो न दोषाय । नहि रसपरमाणवप्रतिभासश्चाक्षुषोऽतीन्द्रियाकाशप्रतिभासो वा दोषमावहति भिन्नरूपता तु प्रतिभासतएव । अन्यथो परमाणु मात्रप्रतिभासः स्यात् । देशोऽपि न स्वरूपादन्यः सोऽपि स्वरूपेणैव व्याख्यातः । अन्यथा भिन्नस्वरूपपरमाणवप्रतिभासे न किंचित्प्रतिभासते । अन्धमूकं जगत् स्यादित्येतदेवाह । भिन्नदेशस्वरूपाणामित्यादि ।

भिन्नदेशस्वरूपाणामणूनां संग्रहे सति ।
तत्स्थौल्यं यदि कल्पेत नाभासे न किञ्चन ॥

इह किं स्थौल्यमात्रं प्रतिभाति किं वा स्थौल्यविशेष इति? । तत्र यदि स्थौल्यमात्रं तदा नीलार्थी पीतेऽपि प्रवर्त्तेत । यद्वा न कुत्रचिदपि । शेषानवधारणात् । अथ विशेषः स नीलपरमाणुप्रतिभासे सति नीलस्येदं न पीतस्येति प्रतिभासेत् । तेषां चाभिन्नस्वरूपणां प्रतिभासताभ्युपगमे तेषां स्थौल्यमपि न प्रतिभासेत । नचैवम् । अतः परमाणव एव विततदेशास्तथावभानान्यत् किंचिदिति यत्प्रत्यक्षे कल्पनात्वमादधीतेत्याशङ्क्याह—। नैतदस्तीति ॥

नैतदस्ति यतो नास्ति स्थौल्यमेकान्ततस्ततः ।

भिन्नमस्ति समानं तु रूपमंशेन केनचित् ॥

यत्प्रत्यपादि परमाणवः प्रतिभान्तीति एतन्नास्ति । न हि शपथशतैरपि निरंशाः परमाणवः प्रत्यक्षे सति भान्तीति कश्चित् प्रत्येति । तदभावादनुमानमपि यत्स्थूलं तत्सूक्ष्मपूर्वकमिति न तत्संसाधयति । नापि स्थौल्यं परमाणुभ्यो भिन्नम् । न हि परमाणवो भिन्नाः । स्थौल्यं भिन्नं किंचिदाभाति । एतदेवाहयत इत्यादि । किं तर्हि अस्तीत्याह—अस्तीत्यादि । समानमित्येकपरिणामपरिणतं रूपमिति । द्रव्यमिति । न तु तस्यामवस्थायां केचिदणवः सन्ति । नन्वेवं द्रव्यमेव स्यादित्याशङ्क्याह—। केन चिदिति । एतदुक्तं भवति तत्कथं न प्रत्यक्षं सविकल्पमिति । पुनरपि विशेषमभिधातुं परमाशङ्कते । अथास्त्वित्यादि ।

अथास्तु युगपद्भासो द्रव्यपर्याययोःस्फुटः ।
तथापि कल्पना नैषा शब्दोल्लेखविवर्जिता ॥

उक्तमेतत् । घटपटवदेकज्ञानोवभासित्वेऽपि शब्दोल्लेखरहिता नेयं कल्पनेति । उक्तमेतन्न पुनर्युक्तमित्याह—चकास्ति इत्यादि ।

चकास्ति योजितं यत्र सोपाधिकमनेकधा ।
वस्तुतत्कल्पनाज्ञानं निरंशाप्रतिभासने ॥

यत्र ज्ञाने योजितं वस्तु प्रतिभाति । कथं योजितमित्याह—। सोपाधिकमिति । सहउपाधिना वर्त्तते सोपाधिकम् । ननु विशेषणविशेष्यभावस्य निराकरणात्कथमेतदित्याह—। अनेकधेति । वत्रुरश्वत्वादिना । न ह्यनुभवसिद्धं युक्तिशतेनापि निराक्रियते तज्ज्ञानं सविकल्पकम् । विपर्यये बाधमाह—। निरंशा-

प्रतिभासन इति । निरंशस्य परमाणोरप्रतिभासने सतीत्यर्थः । तस्मात्प्रथमाक्षसंनिपात एव दीर्घह्रस्ववर्तुलादिवस्तु प्रत्यक्षे प्रतिभातीति तेन तत्सविकल्पकमिति स्थितम् । एवं तिर्यक्सामान्यमवस्थाप्येदानीमूर्ध्वतासामान्यमवस्थापयितुमाह—। भेदज्ञानादित्यादि ।

भेदज्ञानात्प्रतीयन्ते यथा भेदाः परिस्फुटम् ।
तथैवाभेदविज्ञानादभेदस्य व्यवस्थितिः ॥

तथाहि—यद्यथा प्रतिभाति तत्तथा सद्व्यवहृतिमवतरति । यथा कुवलयं नीलरूपतया विराजते तेनैव रूपेणास्ति । क्षणपरिगतेनैव च रूपेण सकलाः पदार्थमात्राः प्रतिभान्ति । न पूर्वापरकालपरिगतेनात्मनेति स्वभावहेतुः प्रत्यक्षसिद्धे व्यवहारप्रवर्त्तनफल इति । तथा यत्सत्तत्सर्वं क्षणिकमित्यादयः भेदज्ञानाद्यथा भेदपर्यायाः क्षणिकाः प्रतीयन्ते तथाऽभेदज्ञानादनुगताकारादभेदस्य द्रव्यस्य व्यवस्थितिरिति । अथेदमनुगतं ज्ञानं निर्विषयत्वादप्रमाणम् । तथाहि—

किं दृष्टे प्रत्यभिज्ञानमुतस्विन्मध्यवर्त्तिनि ।
किंवा दृष्टिपथं प्राप्ते प्रमाणं वस्तुनोष्यिते ॥
तत्र पूर्वोत्तराध्यक्षे क्षये पूर्वोत्तरग्रहे क्षमे ।
मध्येनेन्द्रियवृत्तिः स्यात्कथं तत्र प्रवर्त्तते ॥
न चावस्थात्रयव्यापि किञ्चिदेकं प्रतीयते ।
प्रत्यक्षेण तथाभावे जन्ममृत्युगतिर्भवेत् ॥
किञ्च किं दृष्टतां वेत्ति किं वा कालादियोगिताम् ।
दृष्टत्वं दृश्यमानत्वं किमेतेन प्रपद्यते ॥
किं वा भेदेन पूर्वस्मिन्स इत्ययमिति ।
षास्यात्सोऽयंनेति मतिर्भवेत् ॥

द्वितीयेऽपि यदा सोऽयं द्वयं भाति विरोधवत् ।
सामानाधिकरण्यं हि विरूद्धज्ञानयोः कुतः ॥
अथ प्रत्यभिभेदेऽपि प्रतिभास्यं न भिद्यते ।
स्वतन्त्रं प्रतिभास्यं स्यात् ज्ञानमात्रं तदा भवेत् ॥
अथाक्रद्यभया भाति यदा वस्तु पुरःस्थितम् ।
तदैकत्वग्रहोऽध्यक्षे कथं नास्ति विपश्चिताम् ॥
अत्र यद्रूपता केयं किं पूर्वस्य प्रकाशनम् ।
किंवा तत्तुल्यरूपस्य यदि वा सान्तराग्रहः ॥
तत्र पूर्वग्रहे न स्याद्वर्त्तमानग्रहः सदा ।
पूर्वपूर्वग्रहे वा स्यात् जन्मादिप्रतिभासनम् ॥
यदि तत्तुल्यता भाति भिन्नमेव प्रसाध्यति ।
अन्तराग्रहणं त्वाशुकारित्वादुल्मुकेन किम् ॥
पूर्वकालादियोगित्वे यद्यध्यक्षं न युक्तिमत् ।
पूर्वकालाद्यभावे हि तद्विशिष्टग्रहः कथम् ॥
भावे तु पूर्वकालादेर्वर्तमानत्वमापतेत् ।
यथा च न नित्यत्वं स्याद्वर्तमानग्रहे सति ॥
अथ स्मृत्युपनीतेन न तस्य विशेषणम् ।
स्मरणेनोपनीतं हि न वस्त्वध्यक्षगोचरः ।
न हि नीलोत्पलं ज्ञानं गन्धे स्मृत्युपढौकते ॥
वर्त्तते जानुचित् तस्मान्न तत्कालविशिष्टता ।
सविल्पकमध्यक्षं प्रत्यभिज्ञा न चेद्भवेत् ॥
अक्षान्नियमतो न स्यादिति चेत्तन्न युक्तिमत् ।
पूर्वकालविशिष्टेन सदृशेऽर्थे ऽवलोकिते ॥
सहचारितया ज्ञानं स्मार्तं चन्दनगन्धवत् ।
तथाहि चान्दने गन्धे रूपेण सहचारिणि ॥

रूपदृष्टः स्मृतिर्यद्वत्तद्वत्पूर्वविशेषणे।
दृश्यमानार्थतुल्येन वस्तुना सहचारि यत्॥
पूर्वकालादितत्स्मृतं वर्त्तमानविशेषणम्।
ततिस्थतं स्मरणाध्यक्षात्कल्पनाज्ञानमीदृशम्॥
यत्स एवायमित्यस्य नापूर्वार्थग्रहस्थितिः।
निश्चितत्वं दृढ़त्वं वा सविकल्पकतापि या॥
दृढ़त्वमप्यनाशित्वं किं वा बाध्यत्वमुच्यते।
सर्वासां क्षणिकत्वेन नानाशित्वं हि संविदाम्॥
अबाध्यतापि नैवास्ति यस्मादग्रे गदिष्यते॥
अनुमानादृते नान्यत्कल्पनाज्ञानमिष्यते।
प्रमाणं प्रत्यभिज्ञाया नच लिङ्गमिहास्तिवः॥
प्रत्यभिज्ञायमानत्वे यदि लिङ्गमतोच्यते।
तस्याप्यध्यक्षतो व्याप्तिर्नैकत्वेन सह क्वचित्॥
यद्यनुमानतो व्याप्तिरनवस्था पतेत्तव।
न ताभ्यां मानमस्त्यन्यत् यस्माद्व्याप्तिग्रहो भवेत्॥
कल्पनापोढमध्यक्षं निर्विकल्पकसिद्धितः।
ज्ञातव्यं प्रत्यभिज्ञातो नाध्यक्षं कल्पना युता॥
नाक्रमात् क्रमिणाभावो नाप्यपेक्षाविशेषणः।
क्रमोद्भवा सती सा तु स्वयमेकत्वबाधिका॥
तेनाबाध्यत्वमप्यस्या नानुमानाच्च बाधनात्॥
न वानयापि बाध्यत्वादनुमानमबाधकम्।
अप्रमाण्येन युक्तायाः कुतो बाधकता स्थितिः॥
अप्रामाण्याच्च नैवास्याः अनुमानं प्रमेष्यते।
अन्योन्याश्रयदोषोऽपि तेन नास्ति विपश्चिताम्॥
स्वसाध्यप्रतिबन्धाद्धि प्रमाणमनुमेष्यते।

तिक्रान्तानि तव चान्येषां च भूतानां तानि गतानि जन्मानि सर्वाण्यहं वेद वेद्मि न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति श्रवणादप्रतिहतविज्ञानशक्तित्वादतीतानागतवर्तमानार्थं सर्वं विजानामीत्यर्थः । तर्ह्यावयोर्विशेषः क इत्यत आह नेति । त्वं तु तानि जन्मानि न वेत्थ पापपुण्यरागद्वेषादिदोषैस्तिरोभूतज्ञानशक्तित्वान्न किंचिज्ज्ञानासीत्यर्थ इत्येवमिदं द्वयमन्यैर्व्याख्यातम् ॥ ५ ॥

ननु कर्मणा जायते जन्तुः कर्मणैव प्रलीयत इति स्मरणाज्जन्मादिहेतो पुण्यपापादेरभावात्तवेश्वरस्य स्वतन्त्रस्य कथं जन्मादिरित्याकाङ्क्षायां माययैव मम जन्मादयो न तु लोकवत्कर्मणेति बोधयितुमाह—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

अजइति । कदाचित्कथञ्चित्कुतश्चिन्न जायत इत्यजः न तस्य कश्चिज्जनिता न चाधिप इतिश्रवणाज्जन्महेतोरुपादानादेरभावाज्जन्मरहित एवास्मि एवमजः सन्नपि तथाऽव्ययात्मा निरवयवत्वेन विनाशकारणसामग्रीसम्बन्धायोगादव्ययः नाशनक्रियाया अविषय आत्मा स्वभावो यस्य सोऽव्ययात्मा नित्य एवास्मि न क्वाचिदपि षड्विकारवानित्यर्थः । अजो नित्य इति श्रुतेः । अजोऽव्ययात्मेति विशेषणद्वयं तदन्तरालविकारासंभवद्योतनार्थम् आद्यन्तयोरभावे तदन्तरालावस्थाकल्पनायोगात् । ननु तव कर्मनिमित्तकजन्माभावेऽपीश्वरनियमात्स्यादेवेत्यत आह भूतानामिति । ब्रह्मादीनामन्येषाञ्च भूतानामहमेवेश्वरो नियन्ता स्वसन्निधिमात्रेण एष सर्वेश्वर इतिश्रुतेः । न तु ममान्योऽस्ति नियन्ता न चाधिप इतिश्रुतेरतोऽहं न कस्यापि च नियोगविषयः एवमजोऽप्यव्ययात्मापीश्वरोऽपि च सन्नहं निर्विकार एव परमात्मा प्रकृतिं प्रकर्षेण कृतिः सृष्ट्यादिक्रिया यस्याः सकाशात्सा मम प्रकृतिस्त्रिगुणात्मिका दैवी माया मायान्तु प्रकृतिं विद्यादिति श्रुतेः तां प्रकृतिं स्वां स्वकीयां कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इतिश्रुतेः स्वस्योपाधिभूतामव्यक्तसंज्ञिकां मूलप्रकृतिमधिष्ठाय तस्यां तत्कार्ये चाऽहं ममेति भावनां कृत्वा योऽहमजत्वादिलक्षणः सोऽहं सम्भवाम्यात्ममायया आत्माधीना मायाऽऽत्ममाया तया सम्भवामि स्वेच्छाविर्भूतशुद्धसत्वात्मकमूर्तिमान्भवामि । तदुक्तम्—

सतो हि मायया जन्म जायते न तु तत्वतः ।

असतो मायया जन्म तत्त्वतो न हि युज्यते ॥
वंध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते ॥

इति । यद्वा भानोः प्रभावद्वन्हेर्दग्धृत्वशक्तिवदात्मनो ममाभिन्ना माया-ऽऽत्ममाया न तु मद्व्यतिरिक्ता देवात्मशक्तिं स्वगुणैर्निगूढामितिश्रुतेः । अन्यथा त्वद्वैतहानिरेकमेवाद्वितीयमितिश्रुतिविरोधश्च स्यादतो वन्हेर्दहनशक्तिवदभिन्नैव सा प्रकृतिशब्दिता माया तयैवाहं जन्मवान्न तु वस्तुतस्तथात्वं निष्कलं निष्क्रियमिति न जायते म्रियते वा विपश्चिदिति च श्रुतेर्विरोधापत्तेस्ततो माययैवाहं देवादिषु संभवामीत्यर्थः एवं तत्पदार्थस्येश्वरस्य जन्मादेर्मायिकत्वं बोधितं त्वंपदार्थस्य जीवस्यापि तदभिन्नत्वाज्जन्मकर्माद्याविद्यकमेवेति सूचितं भवति ।

अन्ये तु इत्थं योजयन्ति । तथाहि नन्वीश्वरस्य तव सर्वज्ञत्वादतीतानेकजन्मज्ञानसम्भवेप्यतीतानेकजन्मवत्वं न सम्भवति तन्निमित्तधर्माधर्मासम्भवाज्जन्ममात्रस्यैवायुक्तत्वादिति चेन्न स्वधर्माद्यधीनजन्माभावेपि स्वमायया जन्मसम्भवादित्याह अजोपीति । अजोऽपि धर्माधर्माधीनापूर्वदेहेन्द्रियादिसंबन्धरूपजन्मरहितोऽपि सन् पूर्वगृहीतदेहेन्द्रियादिवियोगो व्ययस्तद्रहित आत्मा स्वरूपं यस्य सः । यद्वाऽव्ययात्माऽक्षीणज्ञानशक्तिस्वभावस्तादृशोपि सन् भूतानां भवनधर्माणां सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानामीश्वरोपीशनशीलोऽपि सन्निति जन्महेतुधर्माधर्मादि वारयति । कथं तर्हि देहग्रहणमित्यत्रोत्तरमाह प्रकृतिं स्वामधिष्ठाय सम्भवामि प्रकृतिं मायाख्यां विचित्रानेकशक्तिमघटमानघटनापटीयसीं त्रिगुणात्मिकां स्वां स्वोपाधिभूतां न तु स्वरूपभूतां मदधीनां न तु स्वतन्त्रां सर्वजनव्यामोहहेतुभूतामधिष्ठाय स्वाभासेन वशीकृत्य सम्भवामि तत्परिणामविशेषैरेव देहवानिव जात इव च भवामि न तु जीवानामिव कर्माधीनो मम भौतिको देहः किन्तु अनादिमायैव मदुपाधिभूता यावत्कालस्थायित्वेन च नित्या जगत्कारणत्वापादिका मदिच्छयैव प्रवर्तमाना विशुद्धसत्वरूपेण मम मूर्तिः आकाशशरीरं ब्रह्मेति श्रुतेः आकाशोऽत्राव्याकृतं आकाश एव तदोतं च प्रोतं चेत्यादौ तथा दर्शनात् तद्विशिष्टस्य च ममाव्ययत्वमीश्वरत्वं चोपपन्नम् अतोऽनेन नित्येनैव देहेन विवस्वन्तं च त्वां च प्रतीमं योगमुपदिष्टवानहमित्युपपन्नम् । तर्हि भौतिकविग्रहाभावात्तद्धर्ममनुष्यत्वादिप्रतीतिः कथमिति चेत्तत्राह आत्ममाययेति । मन्माययैव मयि मनुष्यत्वादिप्रतीतिर्लोकानुग्रहाय न तु वस्तुवृत्त्येतिभावः ।

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि ॥

इति मोक्षधर्मोक्तेः सर्वभूतगुणैर्युक्तं कारणोपाधिं मां चर्म्मचक्षुषा द्रष्टुं नार्हसीत्यर्थः । एतेनास्मदादेरिव तवापि जन्मादिविषये वस्तुत्वाभिमानः स्यादिति निरस्तम् । सर्वदैवानावृतस्वरूपविज्ञानवत्वान्मम लोकस्य त्वावृतस्वरूपज्ञानवत्वाज्जन्मादिविषये तदभिमानः सम्भवति । उक्तं च भाष्यकारैः 'स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिस्सदा सम्पन्नस्त्रिगुणात्मिकां वैष्णवीं मायां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वँल्लक्ष्यते स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया' इति' । तद्व्याख्यातृभिश्चोक्तं स्वेच्छाविनिर्मितेन मायामयेन दिव्येन रूपेण सम्बभूवेति । नित्यो यः कारणोपाधिर्मायाख्यो नेकशक्तिमान् स एव भगवद्देह इत्याचार्यमतम् । अपरे तु परमेश्वरे देहदेहिभावो नास्ति किन्तु य एव नित्यो विभुः सच्चिदानन्दघनः परिपूर्णो निर्गुणः परमात्मा स एव तद्विग्रहो नान्यः कश्चिद्भूतभौतिको मायिको वेत्याहुः । तन्मते योजनात्वेवं वस्तुगत्या जन्मविनाशरहितः सर्वभासकस्सर्वकारणमायाधिष्ठानत्वेन सर्वभूतेश्वरोऽपि सन्नहं प्रकृतिं स्वभावं सच्चिदानन्दघनैकरसं, मायां निवारयति स्वामिति निजस्वरूपमित्यर्थः स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सन्संभवामि देहदेहिभावं विनैव देहिवद्व्यवहरामीत्यर्थः । कथं तर्ह्यदेहे सच्चिदानन्दघने देहत्वप्रतीतिरतआह आत्ममाययेति । निर्गुणे शुद्धे सच्चिदानन्दरसघने मयि भगवति वासुदेवे देहदेहिभावशून्ये तद्रूपेण प्रतीतिर्मायामात्रमित्यर्थः ॥ ६ ॥

एवं सर्वज्ञः सर्वेश्वरोऽशरीरी कदा किमर्थं वा देहवानिव जात इव प्रतीयसे त्वामित्यत्राह—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥ ७ ॥

यदेति । हे भारत हि यस्माद्यदा यदा धर्मस्य वेदविहितस्याभ्युदयनिःश्रेयससाधनस्य प्रवृत्तिनिवृत्तिलक्षणस्य ग्लानिर्हानिर्विघ्नकारिभिर्निर्विशेषविच्छित्तिर्भवति । न केवलधर्महानिर्भगवतो मायाविग्रहस्य ग्रहणे हेतुरपि वधर्मप्रवृत्तिरपीत्याह । अभ्युत्थानमिति । यदा अधर्मस्य वेदनिषिद्धस्याने-

कदुःखसाधनस्य धर्मविरोधिनोऽभ्युत्थानमुद्भवस्तदातदा आत्मानं देहं मायामयं धर्माधर्मयोस्तद्वतां चानुग्रहनिग्रहयोग्यं सृजाम्यहं देहवान्भवामीत्यर्थः । भरतवंशोद्भवत्वेन धर्महानिं कर्तुमयोग्योसीति वा त्वमपि धर्मसंस्थापनार्थाय भरतवंशेऽवतीर्णोसीति वा सम्बोधनाशयः ॥ ७ ॥

अवतारप्रयोजनमाह—

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

परित्राणायेति । धर्महान्या हीयमानानां साधूनां वेदमार्गनिष्ठानां परितः सर्वतो रक्षणाय तथाऽधर्मवृद्ध्या वर्द्धमानानां दुष्कृतां पापकारिणां वेदमार्गविरोधिनां विनाशाय च । यथा साधूनां रक्षणमसाधूनां निग्रहश्च ममावतारस्य फलं तथा फलान्तरमप्यस्तीत्याह धर्मसंस्थापनार्थाय तदर्थं सम्भवामि प्रादुर्भवामि प्रतियुगं तथा च वसुदेवगृहेऽवतीर्णेन श्रीकृष्णेन गीताद्युपदेशेन धर्मस्थापनं पाण्डवादिपरिपालनेन साधुपरित्राणं कंसादिमारणेन दुष्कृतां विनाश इति प्रयोजनत्रयं सम्पादितम् एवं च यथासंभवं कदाचिदेकस्मै कदाचिद्द्वाभ्यां कदाचित्सर्वस्मै प्रयोजनाय भगवदवतरणमिति ध्येयम् ।

उक्तमर्थं स्पष्टयति परित्राणायेति । प्राणात्ययेऽपि ये स्वधर्मं न त्यजन्ति त एव साधवस्तेषां स्वधर्मैकशरणानां परित्राणाय तेषां प्रार्थनां विनैवेहपरलोकयोर्विच्छित्तिर्यथा न स्यात्तथा रक्षणं परित्राणं तस्मै एतेन साधुभिरीश्वर एवास्माकं त्रातेति धैर्येण स्वधर्मे स्थातव्यमिति सूचितम्। किंच दुष्कृतां ये तु कायवाङ्मनोभिस्त्रिभिरपि करणैः शास्त्रनिषिद्धमेव कुर्वन्ति नान्यं ते दुष्कृतो जगद्दूषणास्तेषां समूलविनाशाय च धर्मसंस्थापनाय च धर्मस्य सतामभ्युदयनिःश्रेयसहेतोरधर्मन्यक्कारपूर्वकं सर्वैराधिकारिभिर्नियमेन यथाशास्त्रमनुष्ठापनमेव संस्थापनं तस्मै युगे युगे कृतयुगादौ भूयो भूयः सम्भवामि स्वमायया स्वयमेवावतरामीत्यर्थः साधुपरिपालनमसाधुविनाशनं धर्मसंस्थापनं चैतत्त्रितयमेव भगवदवतारस्य प्रयोजनमिति सूचितम् । यज्ञादिधर्मेण संरक्षितेन देवा वर्द्धन्ते वृष्टयश्च ताभिरन्नमन्नेन प्राणिनः सर्वे जीवंत्यतो धर्मसंरक्षणमात्रेण जगत्सर्वं रक्षितमेव भवतीतिभाव इत्यन्ये ॥ ८ ॥

ईश्वरस्य जन्म मायामयं न वास्तवं तस्यैव च जगत्परिपालनं कर्म नान्यस्येति जानतः श्रेयोऽवाप्तिं दर्शयति—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

जन्मेति । हेऽर्जुन मे मम नित्यसिद्धेश्वरस्य जन्म मायिकं लीलयानुकरणं कर्म च धर्मस्थापनेन जगत्परिपालनं दिव्यमप्राकृतमन्यैः कर्तुमशक्यमीश्वरस्यैवासाधारणं एवमजोपि सन्नित्यादिना प्रतिपादितं यो वेत्ति तत्त्वतः मनुष्यत्वभ्रान्त्या कर्माधीनगर्भवासादिरूपमेव तज्जन्म स्वभोगार्थमेव तत्कर्मेति भ्रमं परमार्थतः शुद्धसच्चिदानन्दरूपत्त्वज्ञानेन निराकृत्याजस्यापि मायया जन्मानुकरणमकर्तुरपि परानुग्रहाय कर्मानुकरणमित्येव यो वेत्ति स आत्मनोपि तत्त्वस्य तदैक्येन स्फुरणाद्देहं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति किन्तु मामेव सच्चिदानन्दघनं परं ब्रह्मैति प्राप्नोति संसारान्मुच्यते इत्यर्थः । मम जन्मकर्मतत्वज्ञानशोधितस्त्वंपदार्थस्तत्पदार्थाभेदं लब्ध्वा मुच्यत इति स्वच्छार्थकेनार्जुनपदेन सूचितम् ।

अन्ये तु दुष्टानां च निग्रहानुग्रहार्थं धर्मसंस्थापनार्थं च विवस्वदादिभ्यो योगोपदेशाय च मायया सम्भावितानि यानि शरीराणि तैर्यानिकर्माणि च कृतानि तान्येतानि च सर्वाणि वस्तुतो ब्रह्ममात्रमेवेति यो विजानाति स मुक्तिं गच्छतीत्याह जन्मेति । इतरानपेक्षया स्वात्मनि स्वयमेव स्वप्रकाशेन दीप्यते प्रकाशते इति दिव्यं निर्विशेषचिदेकरसं परं ब्रह्म तस्मिन् दिवि परे ब्रह्मणि पूर्णानन्दैकघनेऽद्वितीये सर्वाधिष्ठाने प्रतीता या प्रकृतिर्यच्च प्राकृतं मे जन्म शरीरं यच्च तत्कृतं कर्म तदेतत्सर्वं तत्वतोऽध्यात्मदृष्ट्या परिशील्य दिव्यं दिविति क्विबन्तं रूपं तथाच दिवो ब्रह्मणः स्वरूपं दिव्यं चैतन्यं तन्मात्रमेवेत्येवं यो वेत्ति साक्षाद्विजानाति स सर्वस्य ब्रह्ममात्रत्वदर्शी विद्वानिमं विद्वद्देहं त्यक्त्वा पुनर्जन्म नैति न तु पुनर्जायते किन्तु मामेति सच्चिदानन्दैकरसं मां ब्रह्मैव प्राप्नोति विदेहमुक्तिं गच्छतीत्यर्थ इत्याहुः ॥ ९ ॥

मामेतीत्युक्तं स्वस्य सर्वमुक्तप्राप्यतया पुरुषार्थत्वं दर्शयन्नस्य मोक्षमार्गस्याधुनिकत्वशङ्कां वारयति—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीतेति। राग इदं मे भूयादित्याकारोऽन्तःकरणवृत्तिविशेषः विषयत्यागे तन्नाशे च कथं मे जीवनं स्यादित्याकारस्तद्वृत्तिविशेषः त्रासो भयं विषयप्राप्तौ विघ्नकर्तृषु ताडनाक्रोशनादिकर्तृषु च तदनिष्टप्रवृत्तिहेतुः देहकम्पमनस्तापादिव्यङ्ग्यश्चित्तवृत्तिविशेषः क्रोधः, तत्तत्फलतृष्णा रागो विषयत्यागेन ज्ञानमार्गे कथं जीवितव्यमिति त्रासो भयं विषयोच्छेदकोऽयं ज्ञानमार्गः कथं हितः स्यादिति द्वेषः क्रोध इत्यन्ये। वीता विगता विवेकेन गता रागभयक्रोधाः येभ्यस्ते वीतरागभयक्रोधाः शुद्धसत्वाः अतएव मन्मयाः मां परमानन्दघनं तत्पदार्थं प्रत्यक्साक्षित्वंपदार्थाभेदेनापरोक्षीकृतवन्तः अभेदज्ञानेनैव-कर्मसमुच्चयं वारयति मामेव परमेश्वरमुपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः। अतएव ज्ञानतपसा पूताः ज्ञानमेव तपस्तेन ज्ञानतपसा परमशुद्धिहेतुनाऽन्यतपोनपेक्षेण पूताः शुद्धा निरस्ताज्ञानतत्कार्यमला जीवन्मुक्ताः सन्तो बहवोऽनेके मद्भावं मद्रूपं शुद्धसच्चिदानन्दघनं विदेहकैवल्यमागताः अज्ञानमात्रापनयेन प्राप्ताइत्यर्थः। मन्मया मदेकचित्ताः मामुपश्रिता एकान्तभक्त्या मामीश्वरं शरणं गताः सन्तः मत्प्रसादलभ्यं यदात्मज्ञानं च तपश्च तत्परिपाकहेतुः स्वधर्मस्तयोर्द्वैकवद्भावः तेन पूताः शुद्धा मद्भावं सायुज्यं प्राप्ता; यद्वा ज्ञानमेव तपः सर्वकर्मक्षयहेतुत्वात् तेन पूता जीवन्मुक्ताः सन्तो मद्भावं मद्विषयं भावं रत्याख्यं प्रेमाणमागता इत्यन्ये।

अन्ये तु सर्वं ब्रह्मेवेति सर्वस्य ब्रह्ममात्रत्वदर्शनयोगेन प्राञ्चो बहवो मुक्ता इति योगः प्रोक्तः पुरातन इति यदुक्तं योगस्य प्राक्तनत्वं तत्प्रतिपादयति वीतेति। कथमेतावतैव त्वत्प्राप्तिः स्यादत आह वीतेति वा। भोग्येषूपकारिषु च राग आध्यात्मिकाद्युपद्रवेभ्यो भयं स्वस्यापकारिषु क्रोधस्ते रागभयक्रोधाः वीता तीव्रमुमुक्षया सदसद्विवेकवैराग्याभ्यां विशिष्य निर्गता येषां ते वीतरागभयक्रोधाः ज्ञानतपसा ब्रह्मैवाहमिति साक्षाद्ब्रह्मण्येवाप्रतिबद्धमात्मतत्ववेदनं यत्तज्ज्ञानं तदेव तपः मुमुक्षोर्यतेः कर्तव्यं मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तप इति स्मृतेस्तेन ज्ञानतपसा पूताः सम्यग्विनष्टानात्मस्वभावत्वेन शुद्ध आत्मा मनो येषां ते शुद्धात्मानो वामदेवादयो मुमुक्षवः स्वयं सर्वदा मामुपाश्रिताः मामपूर्वमनपरमनन्तरमबाह्यमद्वितीयं परं ब्रह्मैवोपाश्रिता उपश्रयणं नाम सर्वं ब्रह्मैवेति बहिरन्तः सर्वत्र प्रत्यग्दृष्ट्या मदेकत्वदर्शनं तदेव कुर्वन्तः सन्तो मन्मया मदात्मना पूर्ण

भूत्वा देहपातानन्तरं मद्भावं ब्रह्मात्मनावस्थानलक्षणमागता विदेहमुक्तिं प्राप्ता इत्यर्थ इत्याहुः ॥ १० ॥

ननु सर्वे प्राणिनः सुधाब्धाविव त्वय्येवाद्वितीये परे ब्रह्मणि तिष्ठन्ति त्वदावासस्य सर्वसमत्वे केभ्याश्चिदेव मुक्तिं प्रयच्छसि न तु सर्वेभ्यः कस्तवायं पक्षपातइत्याशङ्कायां न सुधाब्धिवासस्य सर्वसमत्वेऽपि पीतसुधानामेवामरत्वं न त्वितरेषां यथा तथैव मय्यवस्थानस्य सर्वसमत्वेऽपि मामकं परं भावं ये भजन्ति तेषामेव विमुक्तिर्न त्वपरं भावं भजतां कामिनामिति तं यथायथोपासते तथैव भवन्तीत्येतच्छ्रुत्यर्थमनुसृत्याह—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

ये यथेति ।

द्वे रूपे वासुदेवस्य व्यक्तं चाव्यक्तमेव च ।
अव्यक्तं ब्रह्मणो रूपं व्यक्तमेतच्चराचरम् ॥

इतिस्मृतेरव्यक्तं निर्विशेषं परं ब्रह्म व्यक्तं तु मायोपाधिकमपरं ब्रह्म सकार्यमेवं व्यवस्थितं मत्तत्वं शास्त्राचार्योपदेशसंस्कृतस्वस्वप्रज्ञानुरूपेण तत्तद्विशाय परब्रह्मविदांऽवाप्यतत्तत्फलार्थिनो ये जना मामेवं द्वेधा व्यवस्थितं परमात्मानं यथा प्रपद्यन्ते ज्ञानयोगेन वा कर्मयोगेन वाऽप्यन्यथा वा येन प्रकारेणोपासते तान् तत्तत्साधननिष्ठानुपासकान् तथैव यस्मिन्यस्मिन् तत्वे परिनिष्ठिता भवन्ति तत्तद्रूपेणैव प्रत्यक्षीभूय भजाम्यनुगृह्णामि तत्तद्वस्तूपासनानुरूपफलेन योजयामीत्यर्थः। यादृशी भावना यस्य सिद्धिर्भवति तादृशीति नियमात्स्वस्वप्रज्ञाबलेन परिगृहीतवस्तूपासनानुरूपेणैव तेषां फलं सिध्यति नान्यथाऽतो मम न कश्चित्पक्षपात इति भावः। एवं ज्ञानकर्मयोगफलप्रदाने समभावेन मयि स्थिते सत्यपि शास्त्रार्थज्ञास्तदनुसारिणो ये मनुष्या ब्राह्मणादयो मुमुक्षवस्ते सर्वे ममेश्वरस्याभिमतं श्रुतिस्मृतिविहितं वर्त्म मार्गमेवानुवर्तन्ते यद्वा ममेश्वरस्य कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्ते विशिष्य कर्मैव कुर्वन्तीत्यर्थः ॥ ११ ॥

ननु मोक्षस्य सन्निकृष्टकारणं प्रकृष्टं सर्वश्रुतिप्रसिद्धं ज्ञानयोगमुत्सृज्य पण्डिता अपि किं कर्ममार्गमनुतिष्ठन्तीत्याकाङ्क्षायां ज्ञानयोगस्य चित्तशुद्ध्यैकलभ्यत्वात्तदसिद्धौ सर्वं कर्म सन्न्यस्य ज्ञानयोगे प्रवृत्तस्य ज्ञाननिष्ठासम्भवात्तदसिद्धौ मोक्षासिद्धिस्तेन ज्ञानकर्मफलयोरुभयोरपि भ्रंशः

स्यात्ततो मोक्षस्यादिमं कारणं चित्तशुद्धिरेव सम्पादनीयेति विचक्षणाः कर्मैव कुर्वन्तीत्याशयेनाह—

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

काङ्क्षन्त इति । इहास्मिन् लोके देवता इन्द्राग्न्यादिदेवांस्तत्प्रसादसिद्धये यजन्ते आज्यादिहविषा एधयन्तः पण्डिताः कर्मणां श्रद्धाभक्तिभ्यां नियमेनानुष्ठितानां श्रौतादीनामनुष्ठानेन लब्धां सत्वशुद्धिलक्षणां सिद्धिं काङ्क्षन्तो मम वर्त्मानुवर्तन्ते इति पूर्वेणान्वयः । ननु हठादियोगैरपि धीशुद्धेः सम्पादयितुं शक्यत्वात्किं कर्मणेत्याशङ्कायां न तेषां दुःसाध्यत्वात्कृतैरपि तैश्चित्तशुद्धिसिद्धेर्बहुकालभाव्यत्वाच्चावश्यं मुमुक्षुणा कर्मैव कर्तव्यमित्याशयेनाह क्षिप्रमिति । हि यस्मात्कारणान्मानुषे लोके कर्मभूमौ कर्मजा वैदिककर्मानुष्ठाननिष्पन्ना सिद्धिश्चित्तशुद्धिलक्षणा क्षिप्रं शीघ्रमेव भवति यज्ञैराराधितानां देवानां प्रसादाच्छीघ्रमेव मनः प्रसीदतीत्यर्थः ।

अन्ये तु इदं द्वयमित्थं योजयन्ति । तथाहि ननु पूर्वोक्तविशेषणविशिष्टेभ्य एव मोक्षं प्रयच्छसि चेत् न त्वन्येभ्यस्तद्रहितेभ्यः सकामेभ्यस्तर्हि तव वैषम्यादिहेतुरागादिमत्वादनीश्वरत्वापत्तिरित्याशङ्कां ये मुमुक्षवस्तेभ्यो ज्ञानसम्पादनद्वारा मोक्षं प्रयच्छामि फलान्तरार्थिभ्यस्तु तदुपायानुष्ठापनेन तदेव ददामीति न मम रागद्वेषाविति परिहरति य इति । ये आर्ता अर्थार्थिनो जिज्ञासवो ज्ञानिनश्च यथा येन प्रकारेण आर्तिनिवृत्त्यर्थतयाऽर्थार्थतया ज्ञानार्थतया मोक्षार्थतया च मामीश्वरं सर्वफलदातारं प्रपद्यन्ते भजन्ति तानहं तथैव तदपेक्षितफलदानेन च भजाम्यनुगृह्णामि तत्रार्तानार्तिहरणेनार्थार्थिनोऽर्थदानेन जिज्ञासून् ज्ञानदानेन ज्ञानिनो मोक्षदानेन चानुगृह्णामि न त्वन्यकामायान्यद्ददामीत्यर्थः । ननु तथापि स्वभक्तानामेव फलं ददासि न त्वन्यदेवभक्तानामिति तव वैषम्यं स्यादेवेति नेत्याह ममेति । नन्विन्द्रादीनपि बहवो भजन्त्येव तेऽपि तेभ्यो भक्तेभ्यस्तत्तत्फलं ददत्येव कुतस्त्वमेव भजनीयस्त्वमेव च फलदातेत्याशङ्क्याह ममेति वा । हे पार्थ मनुष्याः कर्माधिकारिणः सर्वप्रकारेण इन्द्राद्यनुवर्तनेनापि मम सर्वात्मनो वासुदेवस्य वर्त्म भजनमार्गं कर्मज्ञानलक्षणमनुवर्तन्ते तथाच तत्तद्देवतात्मनाऽहमेवावस्थितःसन्भजनीयोऽहमेव च तत्तद्देवताभक्तेभ्यस्तत्तत्फलं ददामि न त्वन्यः कश्चित्फलदातेत्यर्थः । इन्द्रं मित्रं वरुणमग्निमाहुरित्यादिमान्त्रवर्णात् फलमतउपपत्तेरिति न्यायाच्च ॥११ ॥

इत्यनुपातेन प्राप्तैः सावयवैः सौरमासैः ३२ । १६ । ५ । १४ । ३१ । चान्द्र-मासैर्वा ३३ । १६ । ५ । १४ । ३१ । (अतोऽधोऽवयवज्ञानार्थं भाज्यहरौ $=\frac{११९}{५३२११}$) एकश्चान्द्रोऽधिकमासः । यद्वा अनुपातेनैकचान्द्रमासे सौरदिनानि २९ । ६ । १९ । सौरमासे सौरदिनानि ३० । अनयोरन्तरेण पूर्वानुपातरीत्या चान्द्रमाससौरदिनेभ्यो लब्धं तदेव सौरसावनचान्द्रसावनाभ्यामेतदानयनं गोले मध्यमवासनायामाचार्यैरेव स्पष्टमुक्तम् । तत्रैव सविशेषं व्याख्यास्यामः । अत एव कल्पाधिकमासैः कल्पसौरमासाः कल्पचान्द्रमासा वा तदैकाधिकमासेन क इत्यनुपातेनापि तदेवेत्यतिस्पष्टम् ॥

उक्तं च वशिष्ठसिद्धान्ते ।

"द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतत्यधिकमासकः"-इति ॥

एतज्ज्ञानं चाहर्गणानयनेऽधिशेषं क्रमोपचितं यद्दिने पूर्वाधिशेषाद्धीनं शून्यं वा तदा पूर्वमासः षष्टिदिनात्मकश्चान्द्र इष्टतिथ्यन्तावधिरिति ।

तथा च ब्रह्मसिद्धान्ते ।

"षण्मासान्ताधिशेषं स्याच्चतुर्युगाधिमासतः ।
हीनं स षष्टिदिवसो मासः प्रायः शुभार्धभाक्"-इति ॥
"अधिशेषात् फलं पूर्वं यद्युगाधिकमासकैः ।
दिनषष्ट्यात्मको मासः षण्मासात् पुरः स्वकः"-इति ॥

अधिमासस्येष्टकाले गतैष्यदिनाद्यानयनं त्वधिशेषमहर्गणानयनज्ञातं गतार्थमेष्यार्थं चाधिशेषोनकल्पसौरदिनमानम् । कल्पाधिमासैः कल्पसौरदिनानि तदा कल्पसौरहृततद्रूपाधिशेषतुल्याधिमासेन कानीत्यनुपातेन कल्पसौरदिनयोर्गुणहरयोर्नाशात् । कल्पाधिमासभक्तं फलेन सौरदिनेष्टकालादधिमासस्य पूर्वं पश्चाच्चान्तः । अत एवैष्यपरिज्ञानम् ।

"महायुगार्कमासाधिशेषयोरन्तरात् फलम् ।
यद्युगाधिकमासेन सैकशेषाद्दिनादिकम् ॥
तावन्मासो वर्त्तमानो दिनषष्ठ्यात्मकः स तु ।"

इति ब्रह्मसिद्धान्ते उक्तमिति सुगमम् । एवमधिमासपातचिह्नं ज्ञात्वाऽधिमासपातमध्यमकालासन्नपूर्वापरमासयोश्चान्द्राहर्गणे साध्यमाने चान्द्राहर्गणयोः षष्टिदिनात्मकमन्तरं भवतीति सिद्धम् । तथा च मासक्रमेण प्रत्येकसिद्धानीतचान्द्राहर्गणयोर्यन्मासीययोरन्तरं षष्टिदिनात्मकं भवति यदैव तदैव तन्मासाभ्यन्तरे मध्यममानेन त्रिंशद्दिनात्मकश्चान्द्रोऽधिमासः । यदा नान्तरं तत्तुल्यं तदा नाधिमास इति । तज्ज्ञानं यथा एकोनपञ्चाशद्युतपञ्चदशशतशके १५४९ आश्विनशुक्लनवम्यां ब्रह्मतुल्यादहर्गणः १६२३६७ । कार्त्तिकशुक्लनवम्यामहर्गणः १६२४२७ । अत्राधिमासो मध्यममासे मध्यममानेन पतितः । एतत्प्रवृत्तिनिवृत्तिकालावुक्तदिशा ज्ञेयौ ।

नन्वयम्—

"सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावने तु तदा माने दिनषट्कं न पूर्यते ॥
दिनरात्राश्च ते रामप्रोक्ताः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ॥
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ॥
स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितः" ।

इति विष्णुधर्मोत्तरवचनेन निषिद्धोऽप्यधिमासस्त्रिंशच्चान्द्रदिनात्मकोऽपीष्टकालानुरोधेन सत्त्वाद्गौणश्चान्द्रो न युक्त इष्टतिथ्यवधिकमासस्यानुक्तत्वात् । शास्त्रे दर्शान्तपूर्णिमान्तमासयोरुक्तत्वात् । तदेकतराभिप्रायेणाधिमासो युक्तः । अन्यथा मेषसंक्रान्त्यादिमीनान्तभोगकाले

सौरवर्षे त्रयोदशचान्द्रमाससम्भवेनाधिकमाससमर्थनं भवदुक्तं व्याहन्येतेति चेत् उच्यते । यत्पूर्णिमान्तश्चित्रानक्षत्रेण युज्यते स चैत्रो मासः । एवं विशाखाज्येष्ठापूर्वाषाढाश्रवणपूर्वाभाद्रपदाश्विनीकृत्तिकामृगपुष्यमघापूर्वाफाल्गुनीयुक्तपूर्णिमान्तमासः शुक्लादिः कृष्णादिर्वा विशाखादिसंज्ञः । अत्र क्वचिच्चित्रादिप्रत्यासन्नत्वात्यनुराधादियोगेऽपि चैत्रवैशाखादिसंज्ञा न विरुध्यते ।

"द्वे द्वे चित्रादितारायां परिपूर्णेन्दुसङ्गमे ।
मासाश्चैत्रादिका ज्ञेयास्त्रिकैः षष्ठान्त्यसप्तमाः" ॥

इति संकर्षणकाण्डोक्तेः । तत्र ज्योतिःशास्त्रे शुक्लादिदर्शान्ता एव चैत्रादिमासा उक्ताः ।

सृष्ट्यादिकाले प्रथमं शुक्लपक्षोत्पत्तिः । अत एव "रवीन्द्वोर्युतेः"-इत्यादिना दर्शान्ता एवोक्ताः ।

"इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः ।
अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ" ॥

इति हारीतवचनाच्च । तत एतन्मासाभिप्रायेणैव प्रतिपादिताधिमासस्य पर्यवसानात् । तथा हि कल्पादौ सौराश्चान्द्राश्च मासाः प्रवृत्ताः । ततस्त्रिंशच्चान्द्रदिनैर्दर्शान्तश्चान्द्रमासान्तरूपः । सौरमासान्तस्तु तत एवैभिश्चान्द्रदिनैः ३०।५५।१९।२२।३० वृषसंक्रमणरूपो जात इति । द्वितीयचान्द्रमासादित एतच्चान्द्रात्मकदिनादिना-० ।५५।१९।२२।३० वृषसङ्क्रान्तिर्जाता । अत एव "दर्शायतः सङ्क्रमकालतः प्राक्" अधिशेषमेकमासोत्पन्नमिदमेव ०।५५।१९।२२ । ३० । ततो मिथुनसङ्क्रान्तिस्तृतीयचान्द्रमासादितः पूर्वोक्तैर्द्विगुणैश्चान्द्रदिनै-१ । ५० । ३८ । ४५ र्भवति । एवं त्रयोदशचान्द्रमासादिरूपद्वितीयचान्द्रवर्षादिर्द्वितीयसौरवर्षादेरेभिश्चान्द्रदिनैर्जातः ११ । ३ । ५२ । ३० । तथा तृतीयचान्द्रवर्षादेस्तृतीयसौरवर्षादेरेभिश्चान्द्रदिनैः २२ । ७ । ४५ । तथा च तद्वर्षे सौरे प्रथमदर्शा-

न्ताद्वृषसङ्क्रमणमेभिश्चान्द्रैः २३ । ३ । ४ । २२ । ३० । द्वितीयादिद-र्शान्तान्मिथुनादिमकरान्तं सङ्क्रान्तयश्च । मिथुनार्कः २३ । ५८ । २३ । ४५ । कर्कार्कः २४ । ५३ । ४३ । ७ । ३० । सिंहार्कः २५ । ४९ । २ । ३० कन्यार्कः २६ । ४४ । २१ । ५२ । ३० । तुलार्कः २७ । ३९ । ४१ । १५ । वृश्चिकार्कः २८ । ३५ । ० । ३७ । ३० । धनुरर्कः २९ । ३० । २० । मकरार्कः ३० । १५ । ३९ । २२ । ३० । अत्र धनुःसङ्क्रान्तिरमावास्यायां गतघटिकासु ३० । २० । ततोऽमावास्यान्तान्मकरसङ्क्रान्तिस्त्रिंशच्चान्द्रदिनाधिकैरिति द्वितीयामावास्यान्ताद्गतघटिकासु १५ । ३९ । २२। ३० । मकरसङ्क्रान्तिर्जातेति सिद्धम् । एवं यत्र कल्यादित एतन्मकरसंक्रान्तिकालपर्यन्तं सौरमासास्त्रयस्त्रिंशत् । चान्द्रमासास्तु चतुस्त्रिंशत् सावयवाः ३४।०।२५ ३९।२२।३०। अत्र चान्द्रे सौरापेक्षया एकश्चान्द्रो मासः । एतच्चान्द्रदिनादिकं च ० । २५ । ३९ । २२ । ३० अधिकम् । तथा चास्मिन् सौरवर्षे द्वादशमासात्मके त्रयोदशचान्द्रमासान्ता जाताः । अत्र तृतीयचान्द्रवर्षेऽपि पूर्ववर्षरीत्योक्तलक्षणं चैत्रादिमासा मेषादिसंक्रान्तियुक्ताः क्रमेण जाताः परं धनुर्मकरसंक्रान्त्यन्तर्गतचान्द्रमासि संक्रान्त्यभावात् तच्चान्द्रमासस्याधिकत्वं तद्वर्षे । अत एवं

"मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिर्द्वित्वेऽधिमासोऽन्त्यः ॥"

इति ब्रह्मसिद्धान्ते मासलक्षणानि प्रतिपादितानि । अत्र यस्मिँश्चान्द्रमासि शुक्लादिदर्शान्तरूपे मेषादिसंक्रमणसंबन्धेन (चैत्रादिद्वादशान्यतरसंज्ञाव्यवहार्यत्वम्) एकराशिस्थे सूर्ये दर्शान्तद्वयसमाप्तिस्तदाऽन्त्यामावास्यान्तावधिश्चान्द्रमासोऽधिमासो न तत्पूर्वदर्शान्तावसानक इत्यर्थः । एवमिष्टसौरवर्षादौ चान्द्री शुद्धिः सार्धसप्तपलाधिकषट्पञ्चाशद्घटीयुताष्टादशदिनेभ्योऽधिका शुद्धिस्तदा तद्वर्षेऽप्युक्तरीत्याऽसंक्रान्तिमासो भवति । एतत्पूर्वपतितचैत्राधिकानगताधिमास एव व्यवहारार्थे

शुक्लादिदर्शान्तचान्द्रमासरूपेण परिणमति । अनुपातावगताधिमासान्तकालेऽधिशेषाभावेनाग्रेऽसंक्रान्तिमासान्तेऽधिशेषस्य संभवात् । अत एव तस्य प्राधान्याभावादनिषिद्धत्वम् । एतदुक्ताधिमाससंभवकालज्ञानार्थं नियतमानेनोक्तासंक्रान्तिमासात् पूर्वं तस्यावश्यं पतनात् ।

अत एव च—

"मलं वदन्ति कालस्य मासं कालविदोऽधिकम्" ।

इति गृह्यपरिशिष्टवचनेन पूर्वप्रतिपादिताधिमासस्य मलत्वोक्तावपि

"असंक्रान्तो हि यो मासः कदाचित् तिथिवृद्धितः ।
कालान्तरात् समायाति स नपुंसक इष्यते ।"

इति वचने नपुंसकत्वेन मलत्वाङ्गीकाराच्च क्षतिः ।

"चान्द्रो मासो ह्यसंक्रान्तो मलमासः प्रकीर्तितः ।"

इति ब्रह्मसिद्धान्तोक्तेश्च । एतन्नपुंसकत्वं तु पुरुषस्य सूर्यस्याभावात् ।

तथा च ब्रह्मसिद्धान्ते ।

"अरुणः सूर्यो भानुस्तपनश्चण्डो रविर्गभस्तिश्च ।
अर्यमहिरण्यरेतोदिवाकरा मित्रविष्णू च ॥
एते द्वादश सूर्या माघाद्युदयन्ति मासेषु ।
निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः ॥
मासेषु द्वादशादित्यास्तपन्ते हि यथाक्रमम् ।
नपुंसकेऽधिके मासि मण्डलं तपते रवेः"—इति ॥

मलिम्लुचत्वं तु—

"वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत् ।
नैर्ऋतैर्यातुधानाद्यैः समाक्रान्तो विनाशकैः ॥
मलिम्लुचैः समाक्रान्तं सूर्यसंक्रान्तिवर्जितम् ।
मलिम्लुचं विजानीयात् सर्वकर्मसु गर्हितम्"-इति शातातपोक्तेः ॥

नन्वयं चान्द्रोऽधिमासो मध्यममानेन प्रतिपादितोऽपि न युक्तः । मध्यममानस्य वस्तुतोऽसत्त्वेनासत्त्वेन च काल्पनिकत्वात् । स्पष्टमानस्य वस्तुतः सत्त्वात् तदभिप्रायेणाधिमासस्य युक्तत्वादिति चेदुच्यते । स्पष्टमानेनासंक्रान्तिरूपाधिमासज्ञानार्थमेवासत्त्वतया मध्यममानेन तस्य निरूपणात् तथा च मध्यममानाभिप्रायिकोऽधिमास एव वस्तुभूतस्पष्टमानेन परिणमति । अत एव स्फुट इति मूलोक्तेन मध्याधिमासनिरासो व्यक्त एव । तथा च स्पष्टचान्द्रमासे स्पष्टमेषादिसंक्रमणसंबन्धेन चैत्राद्यन्यतराभिधेयत्वाद्यन्मासि न संक्रान्तिः स एवाधिकः संज्ञाभावात् । संज्ञायां संक्रान्तिसंबन्धस्य हेतुत्वात् । अत एव स्पष्टमानस्यानियतत्वेन न्यूनाधिकसंभवाद्यदा कदाचित् स्पष्टचान्द्रमासि संक्रान्तिद्वयं तच्चान्द्रमासस्य संज्ञाद्वयमर्थात् सिद्धम् । अतस्तत्रैकमासस्यापलापेन क्षयत्वं युक्तम् । स त्वसंक्रान्तिमासो यदा स्पष्टचान्द्रमासमावनात् सौरमाससावनमधिकं भवति तदैव। अथैतदर्थं गतिकलाभिरेकं सावनदिनं तदैकराशिकलाभिः किमिति गत्यन्तरकलाभिरेकं सावनं दिनं लभ्यते तदा भगणांशकलाभिः २१६०० किमित्यनुपाताभ्यां स्पष्टगतेर्वैलक्षण्येन सौरचान्द्रमाससावनयोर्ज्ञानासंभवात् प्रकारान्तरेण तज्ज्ञानमुच्यते । तत्रादौ सौरसावनज्ञानार्थं स्पष्टमेषादिद्वादशसंक्रान्तिकालेषु स्पष्टसूर्याणां सहजज्ञानात् तेभ्यः "स्फुटग्रहम्"—इत्यादिस्पष्टाधिकारोक्तविलोमविधिना तत्काल एव मध्यार्काः साध्याः । ततस्तेषु द्वयोर्द्वयोः प्रत्येकं सूर्ययोरन्तरम् । तदंशाः कार्याः । एभ्यः कल्पसौरदिनैः कल्पसौरसावनानि तदैतैः कानीत्यनुपातेन प्रत्येकसंक्रान्त्यन्तररूपसावनदिनानि स्पष्टसौरमासो भवति । एतानि यत्र गतेः परमाल्पत्वं तत्र बहूनि यत्र परमत्वं तत्राल्पानीति सुबोधम् । यथा वर्त्तमानकाले स्वल्पान्तरेणाङ्गीकृताष्टाद्रिभागमितसूर्यमन्दोच्चद्वादशमध्यार्काः संक्रान्तिकालीनाः ।

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कू	मि
११	०	१	३	४	५	६	७	८	८	९	१०
२७	२८	२९	०	१	२	२	४	०	२९	२८	२७
५१	३०	१८	२८	२९	५	८	३९	४१	३१	३०	५२
२८	२०	८	२१	४५	४८	३२	४०	५२	३९	१५	१२

एभ्यः सावनानि संक्रान्त्यन्तररूपाणि। एतन्निबन्धनश्लोकाश्च ।

"त्रिंशत् पञ्चशरा देवा मेषेऽर्के दिवसादिकम् ।
वृषे धराग्नयः सिद्धाः षट्शरा मिथुने क्रमात् ॥
धराग्नयः सप्तरामा रुद्राः कर्के धराग्नयः ।
गजाश्विनोऽब्धरामाश्च सिंहे भूवह्नयो द्वयम् ॥
द्विशराश्च स्त्रियां त्रिंशद्गोऽश्विनः श्रुतयस्तुले ।
गोऽश्विनोऽद्रिशराः पक्षा गोऽश्विनो भानि गोग्नयः ।
कौर्प्ये धनुषि गोदस्रास्तिथयो वह्नयो मृगे ।
गोऽश्विनोऽब्धियमाः कुम्भे गोदस्रा गोब्धयस्तथा ॥
रामाब्धयो झषे त्रिंशद्रामदस्रा धराग्नयः ॥"

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
३०	३१	३१	३१	३२	३०	२९	२९	२९	२९	२९	३०
१५	२४	३७	२८	२	२९	५७	२७	१५	२४	४९	२३
३३	५६	३२	३५	५२	४	२	३९	३	०	४३	३१

अथ स्पष्टचान्द्रमाससावनार्थं मासान्तग्रहणसंभूतमासगणः कार्यः । ततः कल्पचान्द्रमासैः कल्पचन्द्रसूर्यतत्केन्द्रभगणास्तदेष्टमासगणे के इत्यनुपातेन गतभगणाँस्त्यक्त्वा राश्यादिकौ सूर्यचन्द्रौ मध्यमौ तत्केन्द्रे अपि ग्राह्ये । केन्द्राभ्यां यथोक्तप्रकारानीतफलसंस्कारद्वारा स्पष्टौ सूर्यचन्द्रौ मध्यममासान्ते साध्यौ । ततस्तयोरन्तरमंशाद्यं ग्राह्यम् । तस्मात् कल्पसूर्यचन्द्रभगणान्तररूपचान्द्रमासैर्भगणांशगुणैः सूर्यभगणांशा लभ्यन्ते तदाऽनेनांशाद्येन के इत्यनुपातेनानीतांशाद्येन फलेन मध्यमसूर्यः स्पष्टसूर्यात्

स्पष्टचन्द्रोऽधिकश्चेद्धीन ऊनश्चेद्युतः स स्पष्टचान्द्रमासान्ते मध्यमसूर्यो भवति। एवं प्रतिमासान्तं मध्यार्काः साध्यास्तेभ्यः सौरसावनरीत्या स्पष्टं-चान्द्रमाससावनदिवसाधिक्यं दर्शान्तयोर्मध्यस्थं साध्यं तत् तु नैकरूपम् । चन्द्रोच्चस्य प्रतिदिनं भिन्नत्वात् । परन्तु दशपलाधिकैकादशघटिकाधिकत्रिंशद्दिनानधिकं भवति । ननु प्रतिवर्षं सौरमाससावनादिनेभ्यश्चान्द्रमाससावनदिनानामवश्यमेकदा न्यूनत्वसंभवात् कथं नाधिमासः पततीति चेन्न । सौरारम्भसमाप्तिरूपसंक्रमद्वयकालान्तररूपसावनदिनेषु दर्शान्तावधिचान्द्रसावनदिनानां तन्न्यूनानां वर्त्तमानत्वमिति विवक्षणात् । एतत् तु यत्संक्रान्तौ चान्द्रमधिशेषं वर्षान्तःपात्यधिकं तदूनत्रिंशद्दिनमिताधिकस्पष्टशुद्धा स्पष्टाधिमासपातस्तत्संक्रान्त्यवधिकालेनाधिमकाले इति सुबोधम् । तत्र वर्षान्तःपातिचान्द्राधिशेषस्य संक्रान्तिकालीनस्य ज्ञानम् । यद्वर्षे चान्द्राधिशेषमधिकं ११ । ३ । ५२ । ३० । तत्सौरवर्षाधिकसावनदिना-५ । १५ । ३० । २२ । ३० वमदिन-५ । ४८ । २२ । ७ । ३० योगेन भवति । सावनावमयोगे चान्द्रत्वात् । अतो मेषादिसंक्रान्तौ यत् स्पष्टसौरसावनं तस्य त्रिंशतश्चान्तरं त्रिशद्दिनेभ्योऽधिके स्पष्टसावने धनाख्यं तन्न्यूने ऋणाख्यम् । तेषां प्रतिसंक्रमणं यथोक्तं प्रत्येकं योगोऽधिकसावनदिनानि भवन्ति । एषामेकवर्षीयावमदिनद्वादशांशेन ०।२९।१।५०।३७।३०। प्रतिसंक्रमणमेकादिगुणेन योजितेन चान्द्रं स्वस्वसंक्रान्तौ भवति । यथेदृशमन्दोच्चे २ । १८ संक्रान्तौ चान्द्रदिनाधिकम् । अत्र वृश्चिकसंक्रान्त्य-

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कु	मी
११	१	३	५	७	८	९	१०	१०	९	९	१०
३	२४	१८	२५	२२	५४	५२	१८	१५	५९	५२	११
५२	३५	३३	६	४३	३७	४३	४७	२८	३३	३४	१९

धिदिनस्याधिकत्वात् संप्रति त्रयोदशपलाधिकैकचत्वारिंशद्घटीयुतैकोनविंशतिदिनाधिकस्पष्टशुद्धा मेषसंक्रान्तिवृश्चिकसंक्रान्त्यन्तरकाले

केनोपनिषद ।

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः
प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति
चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥

TRANSLATION.

By whose will directed does the mind work, bd whom led does the First Prāṇa move, according to whose wish do men utter words, who is that divine being who employs the eye and the ear in their respective functions? (The answer is—Brahma.) (*1*).

COMMENTARY.

All actions whether of the nature of मनन or of प्राणन or of वचन or of दर्शन or श्रवण are the outcome of the working of one Energy. Every action is the manifestation of that one Energy which is Divine Energy—the S'akti corresponding to Brahma. The Vedantin might object, Brahma is *nirguṇa*, so he cannot have action. It is true; still we cannot but admit the existence of some manifester of energy, Prāṇa or Kālī or Māya or by whatever name you call it. But as you cannot differentiate between *dharma* and *dharmin*—as you cannot say milk has no relation with the qualities that go to the connotation of the 'term milk'—you cannot therefore say that Brahma is different from S'akti; they are rather two different aspects of the same thing: when we consider that object in its *nirguna* aspect we call it Brahma and when we consider it, as consider we must, in its *saguṇa* aspect, we call it S'akti by whose energy all actions (मनन, प्राणन etc) are performed. If we remember this fact, we won't find any inconsistency between the descriptions of *Saguṇa* Brahma and *Nirguṇa* Brahma. (1).

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचꣳ स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्यधीराः प्रेत्यास्माल्लोकादमृताभवन्ति ॥ २ ॥

TRANSLATION.

Because He is the real organ behind the organs of hearing thinking, speaking, breathing and seeing, (knowing Him as such) the wise people being liberated after death become Immortal (i.e. become one with Brahma).(2).

COMMENTARY.

It is from Brahma that our organs of action derive their very reality. Hence whatever work we think we do is realy done by Brahma. If we can realise this we shall cease to have any 'attachment'(आसक्ति in the technical sense) in our actions; we shall perform our duties as sacred trusts imposed on us by the Lord, the fruits of which go to Him (श्रीकृष्णार्पणमस्तु). If a man performs actions thus looking upon himself as only an instrument ("निमित्तमात्रं भव सव्यसाचिन्"), he attains complete non-attachment which leads him on to right knowledge, which latter to मोक्ष. (2).

न तत्रचक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि ॥ इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥

TRANSLATION.

The eye does not go there (i. e, He cannot be seen), speech does not reach Him (i.e., one cannot say in words what He is like), nor does mind enter into Him, still how can He (Who is an 'immaterial' being) guide the movements of this gross, material world, is more than what I can understand, nor can I understand whether He is knowable or unknowable. But we have heard this from the sages of old who have explained That to us. (3).

COMMENTARY.

Brahma is अवाङ्मनसगोचरम् for I have never seen Him, nor been able to say what He is like, nor have I ever realised Him in my mind. Also He is the source of all Energy, for my human mind which is accustomed to resolve everything into unity cannot but think of Brahma as the only source of all activities. Also, the sages who have explained the nature of Brahma to us have asserted that He is both अवाङ्मनसगोचरम् and the source of all Energy. So, we cannot but accept both these facts. Still there seems to be an undeniable inconsistency between the two natures. Now, our problem is how to explain away this apparent inconsistency, which done, we shall surely attain right knowledge. This is a problem of vital importance the solution of which is not given here. The whole science of Hindu religion—Rāja-yoga—is meant for answering this question. The answer offered by that science is shortly this :—

The Soul *is* अवाङ्मनसगोचरम् but can be realised by विशोधितमन : The साधक by constantly meditating on Him (through भक्ति, ज्ञान, or योग) comes by a प्रेममय or चिन्मय body, when he can see Him with a supersensuous faculty, realise Him in a purified mind and express what He is like in words that no ordinary men can hear. Brahma therefore is knowable but not with the unrefined faculties of the ordinary man. Furthermore, there is no real gulf between spirit and matter, they so often inter-mingle into one another that one can never hold that they are diametrically opposed to one another. Hence the apparent inconsistency referred to is thoroughly explained away. But this the साधक is to realise himself.

NOTE :—विदितादथो अविदितादधि = different from known (n. here meaning 'knowable') or from unknown (n. here meaning 'unknowable') i. e., unknowable or knowable. The soul is spoken of as unknowable because He is अवाङ्मनसगोचरम् and as knowable because the sages must have known Him or else they could not have described Him.

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ४ ॥

TRANSLATION.

He who is Himself unexpressed by words but is the cause of their expression, verily know Him to be Brahma and not this (Saguṇa God) whom people do worship. (4)

COMMENTARY.

This and the following four mantras all express the same idea that Brahma is altogether beyond the pale of the *guṇas* by virtue of which one can be seen or described or worshipped. As it is, the *nirguṇa* Brahma can only be realised with the supersensuous faculty and is beyond worship. Of course Brahma can be worshipped when the "qualities" are attributed to him. But this worship leads only to the purification of the mind and not to salvation. Salvation is possible only when the *nirguṇa* Brahma is realised in a purified mind. Thus *Saguṇa* worship is a stage and is not the end. (4).

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥

TRANSLATION

He who cannot be realised with the mind but by whose power, they say, mind is what it is, verily know Him to be Brahma and not this (*saguṇa God*) *whom people do worship.* (5)

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥

TRANSLATION

He whom man sees not with his eyes, but by whose power eyes see, verily know Him to be Brahma and not this (Saguṇa God) whom men do worship. (6)

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥

TRANSLATION.

He whom man hears not with his ears, but by whose power ears do hear, verily know Him to be Brahma and not this (saguṇa god) whom people do worship. (7)

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥

TRANSLATION

He whom man cannot attain with his forward-going energy, but by whom that Energy is created, verily know Him to be Brahma and not this (Saguṇa God) whom people do worskip. (8)

॥ इति प्रथमः खण्डः ॥

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ
ब्रह्मणो रूपं यदस्य त्वं यदस्य च देवेष्वथ नु
मीमांस्यमेव ते मन्ये विदितम् ॥ ९ ॥

TRANSLATION.

If you think you know Brahma well, you really know very little of His nature; ask yourself how much you know of what relation you hold to Him and what portion of Him is in the gods (and you will be convinced of your ignorance). (9).

COMMENTARY.

Brahma is by His very nature something hard to know. So a man can rarely say without being guilty of untruth that he knows Brahma well. Apart from that, there is a great amount of vanity hidden under the statement "I know Him (who is so difficult to know) well" and vanity and knowledge cannot live together. On the other hand the humility that finds expression in the statement "I know Him not" leads on to right knowledge. Moreever, a man who does really know Brahma cannot speak out. For one can explain a thing which is like others. Brahma is matchless and cannot therefore be likened to anything else, *i.e.*, explained. The experience of Brahma has nothing

in common with a man's past experiences of a phenomenal character; so he cannot express the former in terms of the latter; and unless something is expressed in terms of the phenomenal world, nobody will understand him. Knowing Brahma is quite unlike knowing other things. Hence a real knower of Brahma cannot say "I know Him well", all that he can say is "I cannot say what Brahma is like." (9)

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेदच ॥ १० ॥

TRANSLATION.

I do not think I know Him well, nor do I know that I do not know Him; he of us who says he knows Brahma well, he really knows Him not, and he who says, "I know Him not" does really know Him. (10).

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञात विजानतां विज्ञातमविजानताम् ॥ ११ ॥

TRANSLATION.

He who says he has not realised Brahma in his mind has really so realised Him; and he who says he has realised Him in his mind knows Him not. Those that say they know Him, to them He is unknown and He is known to those that say they know Him not. (11)

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ १२ ॥

TRANSLATION.

The sādhaka meditates on Immortality, gets right knowledge about It and finally attains It: his own exertions secure for him strength which leading him to Knowledge takes him to Immortality. (12).

COMMENTARY

We can never reach Him by making speeches. What is needed is meditation. By constantly meditating on Him, we shall be able to secure mental concentration. This concentration is very difficult to attain, for the mind cannot naturally like to be fixed on one object. But if we try again and again, all these natural difficulties will finally be overcome and mental concentration will be accomplished. This done, our mind won't stray aside and we shall be able to realise the *chaitanya* (knowledge) in us; then we shall know what is to be secured, *i, e.,* knowledge and Realisation will crown our efforts. (12)

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ १३ ॥

TRANSLATION.

If a man can secure Knowledge in this very life, it is good for him but if he cannot secure knowledge in this very life, much harm is in store for him. The knowing people observe the same soul in all beings and after death become Immortal. (13).

COMMENTARY

A man might say, "Well, I have many 'lives' at my disposal; what is the hurry of realising Brahma in this very life?" The answer is, we have many 'lives' at our disposal to be sure, but who can say that untoward circumstances won't deter us in our future 'lives'? Perhaps we may be born amidst surroundings that will never remind us of even the necessity of Realisation. So, if we are to attain knowledge, we must do it, now or never. इह does not mean only 'in this life.' We cannot afford to defer the work till some years hence. We must begin our exertions in this very life, we must begin them today, nay, this very moment. Then only can we be sure of the result. (13)

॥ इति द्वितीयः खण्डः ॥

॥ तृतीयः खण्डः ॥

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ २४ ॥

TRANSLATION.

Brahma conquered (the demons) for the gods, who were glorified by His victory. They thought, " This victory belongs to us, this glory pertains to us." (14)

COMMENTARY

With this mantra is introduced a beautiful allegory which describes how nobody can obtain Spiritual knowledge so long as he has a very high opinion of himself. The story is this,—Once, the gods obtained a victory over the demons. Not knowing that this victory rightly belonged to Brahma, they attributed it to their own powers. Brahma understood this and came before them disguised as a *yakṣa*. The gods could not understand who he was. Agni went to him and was asked by him who he was; he promptly replied, " I am Agni ". Being further questioned what was his strength he replied, he could burn everything into ashes. At that the *yakṣa* placed a bit of straw before him and ordered him to burn it. Agni in spite of all his efforts failed to burn it and being ashamed of himself returned to the assembly of the other gods. Then Vāyu was sent to learn the identity of the *yakṣa*. He too fared like Agni; for after he had told the *yakṣa* that he could blow away everything, the *yakṣa* placed before him a bit of straw which he could not blow away. He too had to return discomfited. Then was sent Indra, the Lord of the gods. As soon as he approached, the *yakṣa* vanished and Indra found Umā, S'iva's consort, in his place. This Umā informed him that the *yakṣa* whose identity had perplexed them so long was none other than Brahma to whom the victory properly belonged.

The real meaning of the story is as follows :—

[1]पादातेन सुयुक्तेन बलेन महता वृतम् ॥ ८ ॥
सोऽभिवाद्य महात्मानं पितरं देववर्च्चसम् ।
कृताञ्जलिरुवाचेदमनुज्ञा दीयतामिति ॥ ९ ॥
तं पिता मूर्ध्न्युपाघ्राय परिष्वज्य च पीडितम् ।
सिंहखेलगतिं [2]वीक्ष्य इदं भरतमब्रवीत् ॥ १० ॥
गच्छ सौम्य शिवेन त्वं मातामहगृहं प्रति ।
सन्देशं शृणु मे वत्स त्वञ्च कुर्य्याः समाहितः ॥ ११ ॥
इतो मातामह[3]गृहं शत्रुघ्नसहितो व्रज ।
[4]शत्रुघ्नोऽप्यनुरक्तस्त्वां भक्तिमां[5]श्च विशेषतः ॥१२॥
तवापि च प्रियतरः [5]प्राणैरपि परन्तपः ।
आत्मवत् स त्वया भ्राता द्रष्टव्यो रक्ष्य एव च ॥१३॥
गुणपाशशतैर्बद्धस्त्वया हृदि परन्तप ।
न जहाति यथा पुत्र शत्रुघ्नस्त्वां तथा कुरु ॥ १४ ॥
[7]यथा प्रकृतयश्चान्ये गुणैस्ते रघुनन्दन ।
अनुरज्यन्त्यशेषेण सर्वथा त्वं तथा कुरु ॥ १५ ॥
मातुलश्चाप्ययं पुत्र शुश्रूष्योऽहमिव त्वया ।
आर्यकश्चापि मन्येथाः पूज्यं [8]त्वं देववत् सदा ॥१६॥

---

here. 1. G. 8. पदात्यश्वप्रयुक्तेन &c., P. has पदातेन प्रयुक्तेन &c. 2. G. 10. वाक्यमुवाच जनसंसदि ॥ P. is worm-eaten here. 3. G. 12. कुलं &c. 4. G. 12. शत्रुघ्नोह्यनु &c. 5. G. 12. यथाप्यनुव्रतः ॥ 6. G. 13. प्राणेभ्योऽपि &c. 7. This SL. is wanting in G., P. is worm-eaten here. 8. G. 15. देवतवत् सदा ॥

विनीतः शीलवांश्चैव भवेः पुत्रानहंकृतः ।
ब्राह्मणान् श्रुतवृत्ताढ्यान् सेवेथा[1]स्त्वं प्रयत्नवान् ॥१७॥
[2]प्रश्नाद्यैतान् प्रयत्नेन पृच्छेस्त्वं हितमात्मनः ।
[3]तच्चैवामृतवद् ग्राह्यं त्वया तेषां हितं वचः ॥ १८ ॥
ब्राह्मणा हि महात्मानः श्रियो मूलं[4]शुभस्य च ।
स्युश्च ते सर्वकार्य्येषु [5]सहाया ब्रह्मवादिनः ॥ १९ ॥
देवाः पुत्र[6]भवार्थाय प्रजानां विबुधोत्तमैः ।
[7]प्रेषिता मानुषं लोकं भूमिदेवा द्विजातयः ॥ २० ॥
तेषां सकाशाद्वेदां[8]स्तु धर्म्मशास्त्रं [9]तपोऽव्ययम् ।
नीतिशास्त्रं च विपुलं धनुर्वेदञ्च धारय ॥ २१ ॥
अश्वपृष्ठे रथे नागे व्यायामं कुरु नित्यशः ।
[10]गान्धर्वस्य च विज्ञाने युक्तो भवितुमर्हसि ॥ २२ ॥
[11]नानाशिल्पकलाज्ञश्च [12]भवेथास्त्वं परन्तप ।
तृणमप्यासितं तात वृथैव न हितं तव ॥ २३ ॥
कुशला[13]वादिनो दूता नित्यं प्रेष्याश्च ते मम ।

1. G. 16. यच्च &c., P. is worm-eaten here. 2. G. 17. प्रश्नाद्य चैतान् यत्नेन &c. P. is worm-eaten. 3. G. 17. तच्चाप्यमृत &c., P. is worm-eaten. 4. G. 18. भवस्य च । 5. G. 18. ब्राह्मणा &c. 6. G. 19. भवार्थे हि &c. 7. P. आश्रिता मानुषं &c. 8. G. 20. यच्च &c. 9. G. 20. तथाव्ययं; P. is worm-eaten here. 10. G. 21. गन्धर्वविद्यासु तथा पारगो भव पुत्रक ॥ 11. P. अन्येष्वपि च शिल्पेषु यत्नः कार्यः सदा त्वया । 12. G. 22. भवेरपि &c. 13. G. 23.

ह्लादितं हि मनो मे स्यात् कुशलश्रवणात्तव ॥ २४ ॥
एवमुक्त्वा [1]दशरथो भरतं साश्रुलोचनः ।
बाष्पगद्गदया वाचा गच्छ पुत्रेत्यभाषत ॥ २५ ॥
[2]आपृच्छ्यैवं स पितरं रामञ्चामिततेजसम् ।
मातॄ[3]श्चैव प्रणम्यादौ शत्रुघ्नसहितो ययौ ॥ २६ ॥
[4]बलेन महता वीरश्चतुरंगेन संवृतः ।
तथाभिगम्यमानश्च सर्वैः पुरनिवासिभिः ॥ २७ ॥
भ्रातृस्नेहाच्च रामेण लक्ष्मणेन च [5]धीमता ।
[6]गत्वा गव्यूतिमात्रं च रामेणानुगतस्ततः ॥ २८ ॥
अवरुह्य स्वकाद्यानाद् भरतः कैकयीसुतः ।
शत्रुघ्नसहितः पादौ रामस्य शिरसा ययौ ॥ २९ ॥
तौ पादयोर्निपतितौ शत्रुघ्न[7]सहिताबुभौ ।
दोर्भ्यामुत्थाप्य रामोऽपि परिष्वज्येदमब्रवीत् ॥ ३० ॥
कैकयीमातरिह मां स्मरेथाः सहलक्ष्मणम् ।
शत्रुघ्नसहितं च त्वां [8]स्मरिष्ये सहलक्ष्मणः ॥ ३१ ॥

वेदिनो &c. 1. G. 24. स नृपतिर्भरतं &c. 2. For this SL. B. 18-19. आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणं ॥ मातॄश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ । 3. G. 25. श्चाभि &c., P. is worm-eaten. 4. For this, and the following 18 Slokas of our text, B. 19-20. युधाजित् प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ॥ स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह । 5. G. 27. वीर्यवान् ॥ 6. G. 27. गत्वा पुरस्कृतो धीमांस्ततो गव्यूतिमात्रकं । 7. G. 29. भरताबुभौ, P. has सहिताबुभौ with भरताबुभौ, as a correction on the margin. 8. G. 30. स्मरिष्यामि सलक्ष्मणः ॥

इत्युक्तो भरतो रामं प्रणिपत्याभिवाद्य च ।
लक्ष्मणं च परिष्वज्य शत्रुघ्नसहितो ययौ ॥ ३२ ॥
[1]आगम्यमानो बहुभिः सुहृद्भिः प्रियकारिभिः ।
अनुरक्तैस्तथा चान्यैरपरित्यागिभिः प्रियैः ॥ ३३ ॥
[2]निवर्त्याशु जनानन्यांस्ततः शीघ्रतरं ययौ ।
श्रीमन्मातामहपुरं द्रष्टुं त्वरितमानसः ॥ ३४ ॥
सुहृद्भिः स महामार्गे [3]विहरन् प्रियवादिभिः ।
अहोभि[4]श्च गतैः कैश्चिदश्रान्तबलवाहनः ॥ ३५ ॥
वनानि सरितः शैलानतीत्य सुमनोरमान् ।
आससाद पुरं राज्ञो रम्यं राजगृहं विभुः ॥ ३६ ॥
अभ्याशस्थस्ततो राज्ञे दूतं मातामहाय सः ।
[5]प्रेरयामास भरतः प्राप्तोऽस्मीत्याप्तकारिणम् ॥३७॥
श्रुत्वा [6]दूतस्य वचनं स राजा भृशहर्षितः ।
प्रवेशयामास पुरं भरतं परमार्च्चितम् ॥ ३८ ॥
[7]कदलीवृक्षसंकीर्णं पुष्पोत्करविभूषितम् ।
राजमार्गं कारयित्वा जलेन सुसमुक्षितम् ॥ ३९ ॥
विन्यस्तपूर्णकलसं [8]पुष्पमालाविभूषितम् ।

---

1. G. 33. अनुगम्यमानो &c. 2. G 33. निवर्त्य तु जनान् मान्यां स्ततः &c., P. निवृत्याशु जनान् मान्यांस्ततः &c 3. G. 34. व्याहरन् &c., P. is worm-eaten. 4. G. 34. गंणितैः &c. 5. G. 36. प्रेषयामास &c. 6. G. 37. च दूतवचनं स &c., P. is worm-eaten. 7. G. 38. आहार्यसिकताकीर्णं &c., 8. G. 39. वनमाला &c.

समुच्छ्रितपताकं च धूपगन्धादिवासितम् ॥ ४० ॥
ततः प्रवेशयामासुर्भरतं पुरवासिनः ।
सर्वतूर्यस्वनै[1]श्चात्र वाद्यमानैश्च नन्दितम् ॥ ४१ ॥
वेश्याभिर्वारमुख्याभिर्वाद्यानुगतसुस्वराम् ।
नृत्यन्तीभिः पुरस्तात्तु पुरं तत् प्रविवेश सः ॥ ४२ ॥
वृद्धं मातामहं तत्र ददर्शाभिननन्द च ।
राज्ञा तेन परिष्वक्तः पृष्टश्चानामयं ततः ॥ ४३ ॥
प्रविश्यान्तःपुरं तत्र प्राशमद्राजयोषितः ।
श्रीमद्राजगृहं प्राप्य तद्वृद्धजनसंकुलम् ॥ ४४ ॥
स वै मातामहगृहे सर्वकामैः सुपूजितः ।
उवास सुसुखं तत्र भरतः श्रीमतां वरः ॥ ४५ ॥
[2]गते तु भरते रामो लक्ष्मणेन सहायवान् ।
पितरं पूजयामास भक्त्या[3]तं देववत्सदा ॥ ४६ ॥
[4]श्रुत्वा हि पितुराज्ञां स कृत्वा चैव सदोद्यतः ।
पौराणामपि कार्याणि चकार तदनन्तरम् ॥ ४७ ॥
[5]मातॄणां मातृकार्याणि चकार स महायशाः ।
गुरूणां चैव सर्वेषां गुरुकार्याणि यत्नवान् ॥ ४८ ॥

1. G. 40. श्चारात् &c., P. is worm-eaten. 2. For this SL. B. 20-21. गते च भरते रामो लक्ष्मणश्च महाबलः ॥ पितरं देवसंकाशं पूजयामासतुस्तदा । 3. G. 45. देवतवत् सदा ॥ P. is worm-eaten. 4. For this SL. B. 21-22. पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ॥ चकार रामः सर्वाणि प्रियाणि च हितानि च । 5. For this SL. B. 22-23. मातृभ्यो मातृकार्याणि कृत्वा

[1]तस्य चाप्यभवत् प्रीतः स राजा गुरवस्तथा ।
शीलवृत्तेन रामस्य सर्वे च पुरवासिनः ॥ ४९ ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते
भरतमातामहगृहगमनम् ॥

परमयंत्रितः ॥ गुरूणां गुरुकार्याणि काले कालेऽन्ववैक्षत । 1. For this SL, B.23-24 एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥ रामस्य शीलवृत्तेन सर्वे विषयवासिनः । After this SL. B. 24-29, reads : तेषामतियशा लोके रामः सत्यपराक्रमः ॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः । रामश्च सीतया सार्धं विजहार बहूनृतून् ॥ मनस्वी तद्गतमना(a)स्तस्या हृदि समर्पितः । प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥ गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो(b)भिवर्धते । तस्याश्चभर्त्ता द्विगुणं हृदये परिवर्त्तते ॥ अंतर्गतमपि व्यक्तमाख्याति हृदयं हृदा । तस्य भूयो विशेषेण मैथिली जनकात्मजा । देवताभिः समा रूपे सीता श्रीरिव रूपिणी ॥

तया स राजर्षिसुतोभिकामया समेयिवानुत्तमराजकन्यया ।
अतीव रामः शुशुभे मुदान्वितो विभुः श्रिया विष्णुरिवामरेश्वरः ॥

(*a*) S. नित्यं हृदि समर्चितः । (*b*) V. and S. have विवर्धते ।

These Slokas agree in meaning with the last few Slokas of the preceding chapter in our text. They end the chapter and in fact, the Vāla Kāṇḍa in B.

LXXXI.

कदाचिद्भरतः [1]श्रीमांस्तत्र मातामहं नृपम् ।
[2]प्रातरुत्थाय वचनमभिवा[3]द्यैनमब्रवीत् ॥ १ ॥
आचार्याननुपसेवेयं प्रदिष्टान् [4]भवता हितान् ।
धर्म्मार्थज्ञानकुशला[5]न्नानाशास्त्रविदस्तथा ॥ २ ॥
इष्वस्त्रकुशलांश्चैव नीतिशास्त्रविशारदान् ।
हस्त्यश्वरथयानेषु तथैव परिनिष्ठितान् ॥ ३ ॥
गन्धर्वविद्याकुशलान्नानाशिल्पविदस्तथा ।
[6]स्मृतिशास्त्रविदश्चान्यान् वेदवेदाङ्गपारगान् ॥ ४ ॥
उपसेवितुमिच्छामि [7]श्रेयोर्थं दृढमात्मनः ।
भवतानुमतो राजन् [8]प्रादेष्टुं तान् समार्हसि ॥ ५ ॥
श्रुत्वैव नृपतिर्वाक्यं कैकेयो भरतस्य सः ।
व्यादिदेश प्रहृष्टात्मा तस्याचार्यान् विपश्चितः॥६॥
तानुपास्य[9]प्रयत्नेन भरतः कैकयीसुतः ।
वेदवेदाङ्गशास्त्राणां ग्रहणे तत्परोऽभवत् ॥ ७ ॥
निवेद्य शिष्यमात्मानं गुरूणां [10]विधिना ततः ।
जग्राह वेदवेदाङ्गशास्त्राणि गुणवृद्धये ॥ ८ ॥

1. G. LXXX. 1. श्रीमान् वृद्धं माता &c. 2. G. I. अभिवाद्य महात्मानमिदं वचनमब्रवीत् । but P agress with our text. 3. P. द्यैदम &c. 4. G. 2. भवता &c., but P. has भवतो &c. 5. G. 2. लेख्यसंख्याविदस्तथा । P. has, नानाशिल्पविदस्तथा । 6. G. 4. तथान्यान् वेदवेदाङ्गन्यायशास्त्रार्थपारगान् । but P. agress with our text. 7. G. 5. श्रेयोर्थी &c. 8. G. 5. प्रदेष्टुं &c. 9. G. 7. च यत्नेन &c. 10 G. 8. विनयान्वितः ।

आनुपूर्व्या हि शास्त्राणामागमे भृशमुद्यतः ।
विद्यानां च स शिल्पानां शत्रुघ्नसहितस्तदा ॥ ९॥
जगाम स महातेजा नानाचार्यपरम्पराम् ।
शिक्षमाणः प्रयत्नेन विनयाचारयन्त्रितः ॥ १० ॥
दानमानपुरस्कारैराचार्यान् प्रत्यपूजयत् ।
शुश्रूषापरमो भूत्वा विनयं परमाप सः ॥ ११ ॥
ज्ञानाभ्यासरतस्यैवं भरतस्य महात्मनः ।
जगाम सुमहान् कालो वसतस्तत्र धीमतः ॥ १२ ॥
विविधेषु यदा निष्ठां ज्ञानेषूपजगाम सः ।
तदास्य बुद्धिः संजज्ञे तत्त्वार्थाधिगमे पुनः ॥ १३ ॥
विद्याशीलवयोज्ञानवृद्धेभ्यो विदितात्मनः ।
अन्येभ्यश्चापि तत्त्वार्थविद्भ्यश्च संनिकर्षतः ॥ १४ ॥
यो यो वेत्ति हि तत्त्वार्थं छिन्नधर्म्मार्थसंशयः ।
धर्मकामार्थमोक्षाणां सिषेवे तं तमेव हि ॥ १५ ॥
नानाज्ञानकथाभिर्हि रेमे स विजहार च ।
भरतो ज्ञानतत्त्वार्थवेदने सततोद्यतः ॥ १६ ॥
स यदा ज्ञानविज्ञानविनयेषु कृतागमम् ।
आत्मानं भरतो मेने छिन्नधर्म्मार्थ[2] संशयम् ॥ १७ ॥
तदा[3] तु बुद्धिः संजज्ञे दूतं[4] संप्रेषितुं पितुः ।

1. G. 14. वेदिभ्यः सं &c. 2. G. 17 संशयः । 3. G. 18. स्य &c.
4. G. 18. प्रेषयितुं &c.

निष्ठातस्येत्येव । शुष्कः ॥

पचो वः । ८ । २ । ५२ ॥

पक्वः ।

क्षायो मः । ८ । २ । ५३ ॥

क्षामः ।

प्रस्त्योऽन्यतरस्याम् । ८ । २ । ५४ ॥

निष्ठातस्य मो वा स्यात् । प्रस्तीमः । प्रस्तीतः । प्रेति किम् । स्त्यानः ॥

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः । ८ । २ । ५५ ॥

ञिफला । फुल्लः । निष्ठातस्य लत्वं निपात्यते । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् । क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः । तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । क्षीबो मत्तः । कृशस्तनुः । उल्लाघो नीरोगः । अनुपसर्गात्किम् । प्रफुल्तः । तिचेत्युत्वम् । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति फुल्ल विकसने पचाद्यच् । कथं परिकृश इति । परिशब्दोयं क्रियान्तरयोगात्कृशिम्प्रत्यनुपसर्ग एव । परिगतः कृशः परिकृश इति । यद्यपि फुल्लादयः पचाद्यचि इगुपधलक्षणे च के सिध्यन्ति । तथापि सूत्रं तु फुल्तादिनिवृत्त्यर्थम् । फुल्लवानिति रूपस्य निष्ठा च द्व्यजनादिकार्यस्य च सिध्यर्थम् ॥ उत्फुल्लसंफुल्लयोरुपसंख्यानम् ॥

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । ८ । २ । ५६ ॥

एभ्यो निष्ठातस्य नो वा ॥ नुन्नः । नुत्तः । विद विचारणे रौधादिक एव गृह्यते । उन्दिना परेण साहचर्यात् । विन्नः । वित्तः । वेत्तेस्तु विदितः । विद्यतेर्विन्नः । उन्दी उन्नः । उत्तः । त्राणः । त्रातः । घ्राणः । घ्रातः । ह्रीणः । ह्रीतः ॥

न ध्याख्यापॄमूर्छिमदाम् । ८ । २ । ५७ ॥

एभ्यो निष्ठातस्य नत्वं न । ध्यातः । ख्यातः । पूर्तः । मुर्छा । राल्लोपः । मूर्तः । मदी । मत्तः ॥

वित्तो भोगप्रत्यययोः । ८ । २ । ५८ ॥

विन्दतेर्निष्ठातस्य निपातोऽयं भोग्ये प्रतीते चार्थे । वित्तं धनम् । वित्तः पुरुषः । अनयोः किम् । विन्नः । विभाषागमहनेति क्सो वेट्कत्वादिह नेट् ॥

भित्तं शकलम् । ८ । २ । ५९ ॥

भिन्नमन्यत् ।

ऋणमाधमर्ण्ये । ८ । २ । ६० ॥

ऋधातोः क्ते तकारस्य नत्वं निपात्यते आधमर्ण्ये व्यवहारे ॥ ऋतमन्यत् ।

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि । ८ । २ । ६१ ॥

सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठायां नत्वाभावो निपात्यते । न सत्तमञ्जसा । निषत्तमस्य चरतः । असन्नं निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तं । एतन्निपातनसामर्थ्याद्भाषायां नञ्पूर्वे नुदविदोन्द-

चेति विकल्पो नेत्याहुः। प्रतूर्नमिति त्वरतेः। तुर्वीत्यस्य वा। सूर्तमिति सृ इत्यस्य। उत्वं च। गूर्तमिति गुरी इत्यस्य॥

क्विन्प्रत्ययस्य कुः। ८। २। ६२॥

क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते॥ प्राङ्। प्रत्यङ्। युङ्। क्रुङ्। तादृक्। तादृग्। घृतस्पृक्। घृतस्पृग्। कुत्वस्यासिद्धत्वाद् व्रश्चेति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। षत्वापवादत्वात्कुत्वेन खकार इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते। न तु गः। जश्त्वं प्रति कुत्वस्यासिद्धत्वात्। यद्यपि कुत्वं जश्त्वस्याप्यपवादस्तथापि शस्थानिकजश्त्वस्यैव न तु खस्थानिकस्यापि। दिगादिभ्यो यदिति निर्देशान्नासिद्धत्वमिति वा बोध्यम्। कुः क्विन्यत इति न्यासेन दृष्ट इत्यध्याहारेण च बहुव्रीहिफले सिद्धे प्रत्ययग्रहणेनान्यपदार्थांशे वीप्सागर्भबहुव्रीहिणा लब्धं तादृशादिक्विन्नन्तविषयं लक्षणमचरितार्थमिति तयोर्भाव इत्याहुः॥ क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम्। स्पृक्। स्पृग्। षडगकाः प्राग्वत्। विश्वसृड्। देवेड् इत्यादौ तु यथा कुत्वं न भवति तथा पदादिसूत्रे प्रपञ्चितम्।

नशेर्वा। ८। २। ६३॥

नशेः कवर्गोऽन्तादेशो वा स्यात्पदान्ते॥ नक्। नग्। नट्। नड्। नग्भ्यां नड्भ्यामित्यादि।

मो नो धातोः। ८। २। ६४॥

धातोर्मस्य नः स्यात्पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न।

प्रशाम्यतीति प्रशान् । प्रतान् । प्रदान् । प्रशान्भ्यामित्यादि । अनुनासिकस्य क्वीति दीर्घः । मः किम् । भिद् । छिद् । धातोः किम् । इदम् । किम् । पदस्य किम् । प्रशामौ । प्रशामः ॥

म्वोश्च । ८ । २ । ६५ ॥

मान्तस्य धातोर्नकारादेशः स्यान्मकारे वकारे च परे । णत्वम् । चक्रण्वहे । चक्रण्महे । दिवादेः परस्मैपदिनः । चक्रण्व । चक्रण्म । जङ्गन्मि । जङ्गन्वः । जङ्गन्मः । अपदान्तार्थ आरम्भः ॥

ससजुषो रुः । ८ । २ । ६६ ॥

पदान्तस्य सस्य सजुष्शब्द च रुः स्यात् । जश्त्वापवादः । यशः । पयः । अग्निः । वायुः । सह जुषते इति सजूः । परमसजूः । सजूर्भ्याम् । रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजुषोरिति रुत्वम् । पिपठीः । चिकीः ॥

अवयाः श्वेतवाः पुरोडाश्च । ८ । २ । ६७ ॥

एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते । चादुक्थशाः ।

अहन् । ८ । २ । ६८ ॥

अहन्नित्यस्य रुः स्यात्पदान्ते । अहोभ्याम् । अहोभिः ।

रोऽसुपि । ८ । २ । ६९ ॥

अन्हो रेफादेशः स्यान्न तु सुपि । रोरपवादः । अहरहः । अहर्गणः । अहर्भाति । असुपि किम् । अहोभ्याम् । अत्राहन्निति रुत्वम् ॥ रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् ॥ * ॥ अहोरूपम् । गतमहो रात्रिरेषा । एकदेशविकृतस्यानन्यत्वादहोरात्रः । अहो रथ-

न्तरम् ॥ अहरादीनां पत्यादिषु वा रेफो विसर्गापवादः ॥ * ॥ अहर्पतिः । गीर्पतिः । धूर्पतिः । पक्षे विसर्गोपध्मानीयौ । इह अहः अहोभ्यामित्यादौ रुत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते अहन्नित्यावर्त्य नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः । तदन्तस्यापि रुत्वरत्वे । दीर्घाण्यहानि यस्मिन्निदाघे स दीर्घाहा निदाघः । इह हल्ङ्यादिलोपे कृते प्रत्ययलक्षणेनासुपीति निषेधाद्रुत्वाभावे रुः । तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः । संबुद्धौ तु हे दीर्घाहो निदाघ ।

अम्नरूधरवरित्युभयथा छन्दसि । ८ । २ । ७० ॥

रुर्वा रेफो वा । अम्न एव । अम्नरेव । अम्नस्शब्द ईषदर्थे । ऊधएव । ऊधरेव । अव एव । अवरेव । अवो रक्षणं छन्दसि भाषायां च ॥ प्रचेतसो राजन्युपसंख्यानम् ॥ * ॥ प्रचेता राजन् । प्रचेतो राजन् ॥

भुवश्च महाव्याहृतेः । ८ । २ । ७१ ॥

रुर्वा रेफो वा छन्दसि । भुव इति । भुवरिति । महाव्याहृतेः किम् । भुवो विश्वेषु सवनेषु । भवतेश्छन्दसि । लुङ् लङ् लिट इति वर्तमाने लङ् सिप् शप् अगुणश्छान्दसः । तत एवाडभावः । भुवस् इत्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः ।

वसुस्रंसुध्वंस्वनडुहां दः । ८ । २ । ७२ ॥

वसुः प्रत्ययः । तेन तदन्तं ग्राह्यम् । ससजुषोरिति सूत्रात्सेत्यनुवर्तते । तच्च वसोरेव विशेषणम् । न तु स्रंसुध्वंसोरव्यभिचारात् । नाप्यनडुहः । असम्भवात् । सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते । विद्वद्भ्याम् । विद्वद्भिः । पपिवद्भ्याम् । पपिवद्भिः । सान्तेति किम् । विद्वान् । पपिवान् । नाप्राप्तस्य रुत्वस्या-

यमपवादो न तु प्राप्ताप्राप्तस्य संयोगान्तलोपस्य । उखास्रत् । पर्णध्वत् । उखास्रद्भ्याम् । पर्णध्वद्भ्याम् । अनडुद्भ्याम् । अनडुत्सु । स्वनडुत् । हो ढ इति ढत्वस्यापवादः । इह तु नुम्विधिसामर्थ्याद्रुत्वं न । अनड्वान् । हे अनड्वन् । पदान्ते किम् । स्रस्तम् । ध्वस्तम् ।

तिप्यनस्तेः । ८ । २ । ७३ ॥

पदान्तस्य सस्य दः स्यात्तिपि नत्वस्तेः । अचकात् । अचकाद् । अशात् । तिपि किम् । चकास्तेः क्विपि चकाः । अनस्तेः किम् । सलिलं सर्वमा इदम् । आ इति लङि तिप्यस्तेरूपम् । बहुलं छन्दसीति ईडन ।

सिपि धातोरुर्वा । ८ । २ । ७४ ॥

पदान्तस्य सस्य रुः स्याद्वा । जश्त्वेन पक्षे दः । अचकाः । अचकात् । अशाः । अशात् । धातुग्रहणं रुग्रहणं चोत्तरार्थम् ।

दश्च । ८ । २ । ७५ ॥

धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा । भिद् । अवेः । अवेत् । अभिनः । अभिनत् । जश्त्वस्यासिद्धत्वाभावादिहापि । अरुणः । अरुणत् ।

र्वोरुपधाया दीर्घ इकः । ८ । २ । ७६ ॥

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्पदान्ते । गीः । धूः । पूः । आशीः । वग्रहणमुत्तरार्थम् । उपधायाः किम् । अविभर्भवान् । अभ्यासेकारस्य मा भूत् । इकः किम् । तवैव भकारा-

कारस्य मा भूत्। धातोः किम्। अग्निः। वायुः। पदस्य किम्। गिरौ गिरः

हलि च। ८। २। ७७॥

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। आस्तीर्णम्। दीव्यति। सीव्यति। गिरमिच्छति गीर्यति। धातोरित्येव। नेह। चतुर इच्छति चतुर्यति। दिवमिच्छति दिव्यति। इह पुरमिच्छति पुर्यतीति माधवोक्तं प्रत्युदाहरणं तच्चिन्त्यम्। पुर्गिरोः साम्यात्। दीव्यतीति दीर्घस्तु प्राचः प्रामादिक एव। इकः किम्। स्मर्यते भव्यम्। अपदान्तार्थोऽयमारम्भः।

उपधायां च। ८। २। ७८॥

धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्॥ ऊर्दते। कूर्दते। हूर्छति। मूर्छिता। तूर्विता। हलि किम्। चिरिणोति। जिरिणोति। इह कस्मान्न भवति। रीरियतुः। रिर्युः। वीगत्यादिषु विव्यतुः। विव्युः। यणादेशस्य स्थानिवद्भावादसिद्धत्वाद्वा। बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारौ न भवतः। चतुर्यिता दिव्यितेत्यत्र तु असुपीत्यनुवर्त्य सुपः परो यो हल् तत्परयोः र्वोर्दीर्घो न भवतीत्यर्थान्न दीर्घः। बहिरङ्गलक्षणत्वादतो लोपस्य धातोरुपधाभूतौ रेफवकारौ न भवत इति वा। उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति क्रियोर्गिर्योरित्यादिषु हलि चेति न दीर्घः॥

न भकुर्छुराम्। ८। २। ७९॥

भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्॥ धुरं वहति

धुर्यः । कुर्वन्ति । कुर्यात् । छुर्यात् । कुर् शब्दे । कूर्यात् । अत्र तु नभकुर्छुरामिति निषेधो न करोतेरेव तत्र ग्रहणादित्याहुः ।

अदसोऽसेर्दादु दो मः । ८ । २ । ८० ॥

अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च । उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः । आन्तरतम्याद्ध्रस्वव्यञ्जनयो ह्रस्वो दीर्घस्य दीर्घः ॥

एत ईद्बहुवचने । ८ । २ । ८१ ॥

अदसो दात्परस्यैत ईत्स्याद्दस्य च मो बहूर्थोक्तौ । पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चान्मुत्वमीत्वे । अमू । अमी । अमुम् । अमू । अमून् । मुत्वे कृते घिसंज्ञायां नाभावः । अमुना । अमूभ्याम् । अमीभिः । अमुष्मै । अमूभ्याम् । अमीभ्यः । अमुष्मात् । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु । स्त्रियां तु त्यदाद्यत्वं टाप् । अमूम् । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूषु । क्लीबे तु अमू । अमूनि । शेषं पुंवत् । असेः किम् । अदः इच्छति अदस्यति । अदोऽत्र । अदः । दात्किम् । अमुया । अमुयोः । अलोन्त्यस्य मा भूत् । बहूर्थोक्ताविति किम् । अमी इत्यत्रापि यथा स्यात् । पारिभाषिकबहुवचनग्रहणे तु अमीभ्य इत्यादावेव स्यात् । अमुमञ्चतीति विग्रहे अदस् अञ्च इतिस्थिते विष्वग्देवयोरित्यद्र्यादेशे अदद्रि अञ्च् इति स्थिते यणि मुत्वम् । अमुमुयङ् । अमुमुयञ्चौ अमुमुयञ्चः । अमुमुयञ्चम् । अमुमुयञ्चौ । अमुमुईचः । अमु-

मुईचा । अमुमुयभ्यामित्यादि । मुत्वस्यासिद्धत्वान्न यण् । अन्त्य-बाधेऽन्त्यसदेशस्येति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते अदमुयङ् । अः सेः सकारस्य स्थाने यस्य स असिरिति व्याख्यानात् त्यदाद्यत्वविषये एव मुत्वं नान्यत्रेति पक्षे अदद्यङ् । अद-द्र्यञ्चौ । उक्तं च ॥

अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ॥ इति ।

वाक्यस्य टेः प्लुत उदात्तः । ८ । २ । ८२ ॥

इत्यधिकृत्य ।

प्रत्यभिवादेऽशूद्रे । ८ । २ । ८३ ॥

अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् । अभिवादये देवदत्तोऽहम् । भो आयुष्मानेधि देवदत्ता ३ । स्त्रियां न । अभिवादये गार्ग्यहम् । भो आयुष्मती भव गार्गि । नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह आयुष्मानेधि ॥ भोराजन्यविशां वेति वाच्यम् ॥ * ॥ आयुष्मानेधि भोः ३ । आयुष्मानेधीन्द्रवर्म३न् । आयुष्मानेधीन्द्रपालिता३ ।

दूराद्धूते च । ८ । २ । ८४ ॥

दूरात्सम्बोधने वाक्यस्य टेः प्लुतः स्यात् । सक्तून् पिब देवदत्ता३ ।

हैहेप्रयोगे हैहयोः । ८ । २ । ८५ ॥

एतयोः प्रयोगे दूराद्धूते यत्र तत्र हैहयोरेव प्लुतः स्यात् । है३ राम । राम है३ ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । ८ । २ । ८६ ॥

दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात् । दे३वदत्त । देवदा३त्त । देवदत्त३ । गुरोः किम् । वकाराद-कारस्य मा भूत् । अनृतः किम् । कृष्णा३ । एकैकग्रहणं पर्याया-र्थम् । इह प्राचामिति योगो विभज्यते । तेन सर्वः प्लुतो विकल्प्यते ।

ओमभ्यादाने । ८ । २ । ८७ ॥

ओम्शब्दस्य प्लुतः स्यादारम्भे । ओं३म् । अग्निमीले पुरो-हितम् । अभ्यादाने किम् । ओमित्येकाक्षरम् ।

ये यज्ञकर्मणि । ८ । २ । ८८ ॥

ये३ यजामहे । यज्ञेति किम् । ये यजामहे इति पञ्चाक्षर-मिति स्वाध्यायकाले मा भूत् । ये यजामहे इत्यत्रैवायं प्लुत इष्यते । नेह ये देवासो दिव्येका दशस्थेति ।

प्रणवष्टेः । ८ । २ । ८९ ॥

त्रिमात्र ओकार ओङ्कारो वा प्रणव इति भाष्यादौ स्पष्टम् । यज्ञकर्मणि टेः प्रणव आदेशः स्यात् । अपां रेतांसि जिन्वतो३ । देवान् जिगाति सुम्नयो३ । टेः किम् । हलन्ते अन्त्यस्य मा भूत् । अन्यथा वाक्यस्य टेरिति टिग्रहणानुवृत्तावपि अलोन्त्यस्येति वच-नाट्टेर्योन्त्यो हल् तस्यौकारः स्यात् । प्लुतत्वेन प्रणवस्य व्यभिचा-राभावादविशेषणात्सञ्ज्ञया च विधानेऽच्परिभाषोपस्थानात् । अथा-प्युपरञ्जकतया प्लुतेन विशेषणसम्भवादच्परिभाषोपस्थित्या टिनाज्वि-शेष्यते तथापि टेर्योच् तस्य स्यान्न तु सर्वस्य टेः । ओङ्कारस्त्वभ्भ-ल्समुदायत्वात् प्लुतो न भवतीति सर्वस्य टेर्वाक्यस्य टेरित्यधिकारा-

त्सिध्यति। केचित्तु टिस्थानिकस्यैवौकारस्य प्लुतसंज्ञाविधानाट्टिग्रहणमनर्थकमिति प्रतिपन्नाः॥

याज्यान्तः। ८। २। ९०॥

याज्या नाम ये याज्याकाण्डे पठ्यन्ते मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि। जिह्वामग्ने च कृषे हव्यवाहां३। अन्तः किम्। याज्यानां ऋचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात्। सर्वान्तस्य चेष्यते॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः। ८। २। ९१॥

एषामादेः प्लुतो यज्ञकर्मणि। अग्नये अनुब्रू३हि। अग्नये गोमयानि प्रे३ष्य। अस्तु श्रौ३षट्। सोमस्याग्ने वीही वौ३षट्। अग्निमा३वह। आवह देवान् यजमानेत्यादौ तु न प्लुतः। छन्दसि सर्वविधीनां वैकल्पिकत्वात्॥

अग्नीत्प्रेषणे परस्य। ८। २। ९२॥

अग्नीधः प्रेषणे आदेः प्लुतः स्यात् तस्मात्परस्य च। ओ३श्रा३वय। ओ३श्रा३वय। अत्रैवायं प्लुत इष्यते। नेह। अग्नीदग्नीन्विहर इह तु उद्धरा३ उद्धर। अभिहरा३ अभिहरेति छान्दसः प्लुतव्यत्ययः। चापले द्विर्वचनम्। यज्ञकर्मणीत्येव। आश्रावय।

विभाषा पृष्टप्रतिवचने हेः। ८। २। ९३॥

प्लुतः। अकार्षीः कटम्। अकार्षं हि३। अकार्षं हि। पृष्टेति किम्। कटं करिष्यति हि। हेः किम्। करोमि ननु॥

निगृह्यानुयोगे च। ८। २। ९४॥

अत्र यद्वाक्यं तस्य टेः प्लुतो वा । अद्यामावास्येत्यात्था३ । अद्यामावास्येत्येवं वादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते ।

आम्रेडितं भर्त्सने । ८ । २ । ९५ ॥

दस्यो दस्यो३ घातयिष्यामि त्वाम् । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । तस्यैकैकस्येत्यनुवृत्त्या पर्यायलाभः । चौरा३ चौर । चौर चौरा३ । वाक्यादेरामन्त्रितस्येति द्वित्वं वाक्यस्य टेरित्यधिकारेऽप्यत्रानन्त्यस्य भवति । वाक्यादेरेव पदस्य भर्त्सने द्वित्वविधानात् ॥

अङ्गयुक्तं तिङाकाङ्क्षम् । ८ । २ । ९६ ॥

अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म । तिङ् किम् । अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षं किम् । अङ्ग पच । नैतत्परमाकाङ्क्षति । भर्त्सने इत्येव । अङ्गाधीष्व भक्तं तव दास्यामि ॥

विचार्यमाणानां । ८ । २ । ९७ ॥

वाक्यानां टेः प्लुतः । होतव्यं दीक्षितस्य गृहा३इ । न होतव्या३ मिति । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तु तत्वपरीक्षणं विचारः ॥

पूर्वं तु भाषायाम् । ८ । २ । ९८ ॥

विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नू३ रज्जुर्नु । प्रयोगापेक्षं पूर्वत्वम् । इह भाषाग्रहणात्पूर्वयोगः छन्दसीति ज्ञायते ।

प्रतिश्रवणे च । ८ । २ । ९९ ॥

वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । गां मे देहि भोः । हन्त ते ददामी३ । नित्यः शब्दो भवितुमर्हती३ । दत्त किमात्था३ ।

अनुदात्तं प्रश्नान्ताभिपूजितयोः । ८ । २ । १०० ॥

अनुदात्तः प्लुतः स्यात् ॥ दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तमात्रमनेन विधीयते । अग्निभूता३इ । पटा३ उ । अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः । शोभनः खल्वसि माणवका३ ।

चिदिति चोपमार्थे प्रयुज्यमाने । ८ । २ । १०१ ॥

वाक्यस्य टेरनुदात्तः प्लुतः । अग्निर्चिद्भाया३ त् । अग्निरिव भायात् । उपमार्थे किम् । कथञ्चिदाहुः । प्रयुज्यमाने किम् । अग्निर्माणवको भायात् ।

उपरिस्विदासीदिति च । ८ । २ । १०२ ॥

टेः प्लुतोऽनुदात्तः स्यात् । उपरिस्विदासी३ त् । अधः स्विदासी३दित्यत्र तु विचार्यमाणानामित्युदात्तः प्लुतः ॥

स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु । ८ । २ । १०३ ॥

स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । असूया । अभिरूपका३ अभिरूपक रिक्तं ते आभिरूप्यम् । संमतौ अभिरूपका३ अभिरूपक शोभनोसि । कोपे । अविनीतका३ अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सने । शाक्तीका३ शाक्तीक रिक्ता ते शक्तिः । अयमपि प्लुतो विकल्पेनेष्यते ॥

क्रियाशीःप्रैषेषु तिङाकाङ्क्षम्। ८। २। १०४॥

आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात्। आचारभेदे। स्वयं ह रथेन यातीऽ३ उपाध्यायं पदातिं गमयति। प्रार्थनायाम्। पुत्रांश्च लप्सीष्ठाऽ३ः धनं च तात। व्यापारणे। कटं कुरुऽ३ ग्रामं गच्छ। आकाङ्क्षं किम्। दीर्घायुरस्तु। अग्नीदग्नीन्विहर।

अनन्त्यस्यापि प्रश्नाख्यानयोः। ८। २। १०५॥

अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुतः एतयोः। अगमाऽ३ः पूर्वाऽ३न् ग्रामाऽ३न्। अग्निभूताऽ३इ। सर्वपदानामयम्। तत्रान्त्यस्य तु अनुदात्तं प्रश्नान्ताभिपूजितयोरिति अनुदात्तोऽपि पक्षे भवतीति वृत्तिः। यद्यपि तत्र विकल्पो न श्रुतस्तथाप्यपिशब्देनान्त्यस्यापि अनेन स्वरितप्लुतविधानात्पाक्षिकत्वं फलति। द्वन्द्वेन सह निर्देशादपिशब्दस्य प्रश्नेऽपि तात्पर्यम्। आख्याने। अगमाऽ३ पूर्वाऽ३न् ग्रामाऽ३न् भोऽ३ः।

प्लुतावैच इदुतौ। ८। २। १०६॥

दूराद्धूतादिषु प्लुतौ विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते॥ ऐ३ तिकायन। औ३ पगव। चतुर्मात्रावत्र ऐचौ सम्पद्येते।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ। ८। २। १०७

अप्रगृह्यस्य एचो अदूराद्धूते प्लुतविषये पूर्वस्यार्द्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्द्धस्य इकारोकारौ स्तः॥ प्रश्नान्ताभिपूजित विचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव॥ *॥ प्रश्नान्ते। अगमाऽ३ः

पूर्वा३न् ग्रामा३न् । अग्निभूता३ इ । अभिपूजिते । भद्रं करोषि पटा३ उ । विचार्यमाणे । होतव्यं दीक्षितस्य गृहा३इ । प्रत्यभिवादे । आयुष्मानेधि अग्निभूता३इ । याज्यान्ते । स्तोमैर्विधेमाग्नया३इ । परिगणनं किम् । विष्णुभूते३ विष्णुभूते घातयिष्यामि त्वाम् । परिगणने सत्यदूराद्धूते इति न वक्तव्यम् । पदान्तग्रहणं तु कर्तव्यम् । इह मा भूत् । भद्रं करोषि गौ३रिति । अप्रगृह्यस्य किम् । शोभने माले३ ॥ आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः ॥ * ॥ अग्ना३इ पत्नी वः ।

तयोर्य्वावचि संहितायाम् । ८ । २ । १०८ ॥

इदुतोर्यकारवकारौ स्तः अचि संहितायाम् । अग्ना३ याशा पटा३वाशा । अग्ना३यिन्द्रम् । पटा३वुदकम् । अचि किम् । अग्ना ३इ । संहितायां किम् । अग्ना३इ इन्द्रम् । संहितायामित्यध्याय परिसमाप्तेरधिकारः । इदुतोरसिद्धत्वादयमारम्भः । सवर्णदीर्घत्वस्य शाकलस्य वा निवृत्त्यर्थम् । यत्रयोरपवादत्वात् यवयोरसिद्धत्वादुदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्यस्य बाधनार्थं वा ॥

इति श्रीव्याकरणदीपिकायां वृत्तौ अष्टमस्याध्यायस्य द्वितीयः पादः ॥

अष्टमाध्यायस्य तृतीयः पादः ।

मतुवसो रु संबुद्धौ छन्दसि । ८ । ३ । १ ॥

रु इत्यविभक्तिको निर्देशः । पदस्येति वर्तते । मत्वन्तस्य वस्वन्तस्य च पदस्य रुः स्यात् । अलोन्त्यपरिभाषया नकारस्य । इन्द्र मरुत्व इह पाहि सोमम् । हरि वो मेदिनं त्वा । मीढ्वस्तोकाय तनयाय । मतुवसोः किम् । ब्रह्मन् स्तोष्यामि । संबुद्धौ किम् । य एवं विद्वान्सोऽग्निमाधत्ते । छन्दसि किम् । हे गोमन् । हे पपिवन् ॥ वन उपसंख्यानम् ॥ * ॥ क्वनिब्वनिपोः सामान्येन ग्रहणम् । अनुबन्धस्येहानिर्देशात् । यस्त्वायन्तं वसुना प्रातरित्वः प्रातरेतीत्यन्येभ्योपि दृश्यन्त इति इणः क्वनिप् । विभाषा भवद्भगवदघवतामोच्चावस्य । एषामन्त्यस्य रुः स्यादवस्य चोकारः छन्दसि भाषायां च । हे भोः । हे भवन् । हे भगोः । हे भगवन् । हे अघोः । हे अघवन् । कथं भो ब्राह्मणाः । भो ब्राह्मणि । अव्ययमेव भोः शब्दः ।

अत्रानुनासिकः पूर्वस्य तु वा । ८ । ३ । २ ॥

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् । सँस्कर्ता ।

आतोऽटि नित्यम् । ८ । ३ । ३ ॥

अटिपरतः रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः । महाँ इन्द्रः । तैत्तिरीयास्तु अनुस्वारमधीयते । तच्च छान्दसो व्यत्यय इति प्राञ्चः । एवं च सूत्रस्य फलं चिन्त्यम् ॥

अनुनासिकात्परोऽनुस्वारः । ८ । ३ । ४ ॥

अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात् । सँस्स्कर्ता । संस्स्कर्ता ।

समः सुटि । ८ । ३ । ५ ॥

समो रुः स्यात्सुटि । अलोन्त्यस्य । खरवसानयोर्विसर्जनीयः । विसर्जनीयस्य स इत्यस्यापवादेन वाशरीति पाक्षिके विसर्गे प्राप्ते । संपुंकानां सो वक्तव्यः ॥ * ॥ संस्कर्ता । संस्कर्ता । समो वा लोपमेके इति भाष्यम् । लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयम् । द्विसकारं तूक्तमेव । तत्रानचिचेति सकारद्वित्वपक्षे त्रिसकारमपि रूपद्वयम् । अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्यानेनानुस्वारस्याप्यच्त्वात् । अनुनासिकवतां चयाणां शरः खय इति कद्वित्वे षट् । अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश । एषामष्टादशानां तकारद्वित्वे वचनान्तरेण पुनर्द्वित्वे च एकतं द्वितं त्रितमिति चतुष्पञ्चाशत् । अणोऽनुनासिकत्वेऽष्टोत्तरशतम् ॥

पुमः खय्यम्परे । ८ । ३ । ६ ॥

अम्परे खयि पुम्शब्दस्य रुः स्यात् । व्युत्पत्तिपक्षेऽप्रत्ययस्येति षत्वपर्युदासात् ॅकॅपयोः प्राप्तौ । अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ । संपुंकानामिति सः । पुँस्कोकिलः । पुंस्कोकिलः । पुँस्पुत्रः । पुंस्पुत्रः । अम्परे किम् । पुंक्षीरम् । खयि किम् । पुंदासः ॥ ख्याञादेशे न ॥ * ॥ पुंख्यानम् ।

नश्छव्यप्रशान् । ८ । ३ । ७ ॥

अम्परे छवि नकारान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य । विसर्गः । सत्वश्चुत्वे । शार्ङिँश्छिन्धि । शार्ङ्गिंश्छिन्धि । चक्रिँस्त्रायस्व । चक्रिंस्त्रायस्व । पदस्येति किम् । हन्ति । अम्परे किम् । सन्त्सरुः । खड्गमुष्टिः । अप्रशान् किम् । प्रशान् तनोति ।

उभयथर्क्षु । ८ । ३ । ८ ॥

अम्परे छवि नकारान्तस्य पदस्य रुर्वा ऋग्विषये । पशूँस्ताँश्चक्रे ।

दीर्घादटि समानपादे । ८ । ३ । ९ ॥

दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नकाराटौ एकपादस्थौ स्याताम् । देवाँ अच्छासुमना । महाँ इन्द्रो यमोजसा । उभयथेत्यनुवृत्तेर्नेह । आदित्यान्याचिषामहे ।

नॄन्पे । ८ । ३ । १० ॥

नॄनित्यस्य रुः स्याद्वा पकारे परे । रुत्वपक्षे विसर्गोपध्मानीयौ । नॄँ ᳶपाहि । नॄँः पाहि । नॄं ᳶपाहि । नॄंः पाहि । नॄन्पाहि ।

स्वतवान्पायौ । ८ । ३ । ११ ॥

रुर्वा । भुवस्तस्य स्वतवाँः पायुरग्ने ।

कानाम्रेडिते । ८ । ३ । १२ ॥

कान्नकारस्य रुः स्यादाम्रेडिते परे । संपुङ्कानामिति सः । यद्वा कस्कादित्वात्सः । काँस्कान् । कांस्कान् ॥

ढो ढे लोपः । ८ । ३ । १३ ॥

ढस्य लोपः स्यात् ढे परे । लीढम् । गूढम् । यद्यपि पदाधिकारस्तथापि तस्यासम्भवादपदान्तस्य ढस्य लोपः । ष्टुत्वस्याश्र-

यात्सिद्धत्वम्। श्वलिड् ढौकते इत्यत्र जश्त्वे कृते कार्यो नास्तीति लोपाभावः। न च लोपो जश्त्वापवादः। लीढादेर्विषयस्य सत्त्वात्। साक्षाज्जश्त्वरूपविधिशास्त्रबाधापेक्षया असिद्धत्वमात्रबाधस्य न्याय्यत्वात्।

रो रि। ८। ३। १४॥

रेफस्य रेफे परे लोपः स्यात्। पुना रमते। हरी रम्यः। शम्भू राजते। पदस्येति विशेषणषष्ठी। न तु स्थानषष्ठी। तेनेहापि भवति। जर्गृधेर्लङ्। अजर्घाः। पास्पर्धेरपास्पाः॥

खरवसानयोर्विसर्जनीयः। ८। ३। १५॥

खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते। रामष्टीकते। वृक्षः। खरवसानयोः किम्। अग्निर्नयति। नार्कुटादौ वृद्धेर्बहिरङ्गासिद्धत्वान्न विसर्गः। उपार्छति। प्रार्छतीत्यादावुपसर्गात्तिधाताविति वृद्धिरूपैकादेशस्यान्तवद्भावेन पदान्तस्य तु न विसर्गः। उभयथर्क्षु कर्तरि चर्षिदेवतयोरित्यादिनिर्देशात्॥

रोः सुपि। ८। ३। १६॥

सप्तमीबहुवचने परे रोरेव विसर्जनीयो नान्यस्य रेफस्य। पयःसु। सुपीःषु। पिपठीःषु। नेह। चतुर्षु। गीर्षु। पुर्षु।

भोभगोअघोअपूर्वस्य योऽशि। ८। ३। १७॥

एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। भोस् भगोस् अघोस् इति सकारान्ता निपाताः। तेषां रुत्वे यत्वे च कृते व्योर्लघुप्रयत्नतर इति लघुप्रयत्नाभावपक्षे ओतो गार्ग्यस्येति यलोपः।

भो अच्युत । भगो अत्र । अघो अत्र । हलि तु हलिसर्वेषामिति लघुप्रयत्नस्यापि लोपो वक्ष्यते । अवर्णपूर्वस्य । क आस्ते । कयास्ते । देवा इह । देवायिह । लघुप्रयत्नाभावपक्षे लोपः शाकल्यस्येति विकल्पेन लोपः । हलि तु हलिसर्वेषामित्यनेन सर्वदा । भोभगो अघोअपूर्वस्य किम् । अग्निरत्र । अशि किम् । देवाः सन्ति । यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते । तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात् । न ह्ययमल्विधिः । रोरिति समुदायरूपाश्रयणात् । रोः किम् । प्रातरत्र ।

व्योर्लघुप्रयत्नतरः शाकटायनस्य । ८ । ३ । १८ ॥

पदान्तयोर्यकारवकारयोर्लघूच्चारणौ वयौ वाऽस्तोऽशि परे । यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघूच्चारणः । भोयत्र । भो अत्र । कयास्ते । क आस्ते । सतस्मायाचष्टे । सतस्मा आचष्टे । द्वावत्र । द्वा अत्र । असावादित्यः । असाआदित्यः । यकारसाहचर्याद्वकारो धात्वनवयव एव गृह्यते । तेनेह न । स्मृतोवच्चुत ।

लोपः शाकल्यस्य । ८ । ३ । १९ ॥

ओकारान्तेष्वोतो गार्ग्यस्येति अस्य बाधकम् । अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे ॥ क आस्ते । कयास्ते । द्वा अत्र । द्वावत्र । अवर्णेति किम् । गौर्यत्र । पदान्तयोः किम् । हरये । अशि किम् । वृक्षं वेतीति वृक्षवीः । क्विप् । तमाचष्टे इति ण्यन्तात्क्विप् । वृक्षव् करोति ।

ओतो गार्ग्यस्य । ८ । ३ । २० ॥

ओकारात्परस्य पदान्तस्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः

स्यात्। गार्ग्यग्रहणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे भोयच्युत। पदान्तस्य किम्। तोयम्। वकारस्तु धात्वनवयवो न सम्भवति॥

उञि च पदे। ८। ३। २१॥

भो इत्यादि पूर्वस्य पूर्वेण सिद्धम्। अत्रापि गार्ग्यग्रहणानुवृत्त्या अलघुप्रयत्नस्यैव लोपः। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपः स्यात्पदे उञि। स उ एकाग्निः। असा उ एकाग्निः। पदे किम्। तन्त्रे उतं तन्त्रयुतम्। वेञः सम्प्रसारणे रूपम्। यदि तु प्रतिपदोक्तो निपात उञिति गृहीष्यते तर्ह्युत्तरार्थं पदग्रहणम्।

हलि सर्वेषाम्। ८। ३। २२॥

भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मीः। भो विद्वद्वृन्द। भगो नमस्ते। अघो याहि। देवा नम्याः। देवा यान्ति। हलि किम्। देवायिह। वकारस्तु नानुवर्तते। भोभगोअघोपूर्वस्यासम्भवात्। अपूर्वस्तु यद्यपि सम्भवति वृक्षव् करोतीति। तथापि तत्र लोपाप्रसङ्गः। अशीत्यनुवर्त्य अशा हलो विशेषणात्। वृक्षव् हसतीत्यादि तु अनभिधानादसाध्वित्याहुः। गव्यमित्यत्र तु पदान्तत्वं नास्ति। गव्यूतिरित्यत्र वकारप्रश्लेषान्न वलोप इत्युक्तम्।

मोऽनुस्वारः। ८। ३। २३॥

मान्तस्य पदस्यानुस्वारः स्याद्धलि। अलोन्त्यस्य। हरिं वन्दे। पदस्येति किम्। गम्यते॥

नश्चापदान्तस्य झलि । ८ । ३ । २४ ॥

नस्य मस्य चापदान्तस्य झल्यनुस्वारः स्यात् । यशांसि । आक्रंस्यते । झलि किम् । मन्यते ।

मो राजि समः क्वौ । ८ । ३ । २५ ॥

क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ॥ सम्राट् ॥

हे मपरे वा । ८ । ३ । २६ ॥

मपरे हकारे परे मस्य म एव स्याद्वा । ह्मल ह्वल सञ्चलने । किम्ह्मलयति । किंह्मलयति । मोनोधातोरिति नत्वमपि बाध्यते । प्रशाम् ह्मलयति । प्रशान् ह्मलयति ॥ यवलपरे यवला वेति वक्तव्यम् ॥ * ॥ कियँह्यः । किंह्यः । किवँ ह्वलयति । किंह्वलयति । किलँ ह्लादयति । किंह्लादयति ।

नपरे नः । ८ । ३ । २७ ॥

नपरे हकारे परे मस्य नः स्याद्वा ॥ किन्न्हुते । किंन्हुते ॥

ङ्णोः कुक् टुक् शरि । ८ । ३ । २८ ॥

ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि । कुक्टुकोरसिद्धत्वाज्जश्त्वं न । चयो द्वितीया इति पक्षे द्वितीयः । प्राङ्क्षष्ठः । प्राङ्ख्षष्ठः । प्राङ्षष्ठः । सुगण्ट्षष्ठः । सुगण्ठ्षष्ठः । सुगण्षष्ठः ॥

डः सि धुट् । ८ । ३ । २९ ॥

डात्परस्य सस्य धुड् वा स्यात् । षट्त्सन्तः । षट्सन्तः ।

नश्च । ८ । ३ । ३० ॥

नकारान्तात्परस्य सस्य धुड् वा स्यात् । सन्त्सः । सन्सः ।

शि तुक् । ८ । ३ । ३१ ॥

शीति सप्तमी पूर्वेण कृतार्थाया न इति पञ्चम्याः षष्ठीं प्रकल्पयति । नस्य पदान्तस्य शे परे तुग्वा स्यात् । शश्छोऽटीति छत्वविकल्पः । पक्षे झरोझरीति चलोपः । सञ्छम्भुः । सञ्च्छम्भुः सञ्शम्भुः । सञ्शम्भुः ॥

जछौ जचछा जचशा जशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

ननु प्रकृतौ धुडेवास्तु । किन्तुका । मैवं शश्छोऽटीत्यस्य हि पदान्ताज्झयः परस्य शस्य छ इत्यर्थ आकरे स्थितः । एवं च धुटः परादित्वात्सञ्च्छम्भुरित्यत्र छो न स्यात् । विपूर्वाद्रपेर्णादिके शप्रत्यये मध्वश्चोतन्त्यभितो विरप्शमित्यादौ यथा । अतः पूर्वान्तस्तुक् कृतः । नन्वेवं कुर्वञ्शेते इत्यत्र पदान्तस्येति णत्वनिषेधो न स्यादिति चेन्न कार्यकालपक्षे बहिरङ्गत्वेन तुकोऽसिद्धत्वात् । यथोद्देशपक्षे तु स्तोःश्चुनेति योगो विभज्यते । नेत्यनुवर्तते ण इति च । स्तोःश्चुना योगे णत्वं न स्यात् । नकारार्थमिदं सकारग्रहणं वर्गग्रहणं चोत्तरार्थम् । ततश्चुरिति पूर्वमनुवर्तते । णत्वप्रतिषेधे श्चुत्वमाश्रयात्सिद्धम् ॥

ङमो ह्रस्वादचि ङमुण् नित्यम् । ८ । ३ । ३२ ॥

ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात् ॥ प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः । ङमः

किम् । किमास्ते । ह्रस्वात्किम् । प्राङास्ते । ङमन्तं यत्पदमिति किम् । अनिति । अचि किम् । पचन् करोति । परमदण्डिनेत्यत्र तु उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादुत्तरस्य पदत्वाभावादुञि च पदे इत्यतः पदे इत्यनुवर्त्याजादेः पदस्येति व्याख्यानाद्वा न ङमुट् ॥

मय उञो वो वा । ८ । ३ । ३३ ॥

मयः परस्य उञो वो वा स्यादचि । किम्वुक्तम् । वस्यासिद्धत्वान्नानुस्वारः । किमु उक्तम् ॥

विसर्जनीयस्य सः । ८ । ३ । ३४ ॥

स्वरवसानयोरित्यतो मयडुञ्ल्पुत्या खरीत्यनुवर्त्तते । खरि विसर्जनीयस्य सः स्यात् । विष्णुस्त्राता ।

शर्परे विसर्जनीयः । ३ । ३५ ॥

शर्परे खरि विसर्जनीयस्य विसर्जनीयो नन्वन्यत् । कः त्सरुः । घनाघनः क्षोभणः । इह यथायथं सत्वं जिह्वामूलीयश्च न ॥

वा शरि । ८ । ३ । ३६ ॥

शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात् । हरिः शेते । हरिश्शेते ॥ खर्परे शरि वा विसर्गलोपो वक्तव्यः ॥ * ॥ रामस्थाता । रामःस्थाता । रामस्स्थाता । हरिस्फुरति । पक्षे विसर्गे सत्वे च चैरूप्यम् ।

कुप्वोः ≍क≍पौ च । ८ । ३ । ३७ ॥

३४ सकृत्
३५ बहोर्धासन्ने
३६ दिशो दिग्देशकाले तृतीयायुजः
३७ परावरात् स्तात्
३८ दक्षिणोत्तराच्चातस्
३९ अधराच्चात्
४० पश्चोऽपरस्य दिगादेश्चाति
४१ वोत्तरपदेऽर्धे
४२ पुरः पुरस्तादर्वोऽवस्तादधोऽधस्तादुपर्युपरिष्टात्
४३ दक्षिणाद्वा पञ्चम्याः
४४ आहि दूरे
४५ उत्तरात्
४६ एनोऽदूरे
४७ शलुगञ्चेः
४८ तीयशम्बबीजात्कृषौ कृञाडाच्
४९ सङ्ख्यादेर्गुणात्
५० सपत्रनिष्पत्रादतिपीडने
५१ भद्रभद्रान्मुण्डने
५२ प्रियसुखादानुकूल्ये
५३ दुःखनिष्कुलशूलसमयसत्यात्प्रातिकूल्यनिष्कोषपापयापनाशपथे
५४ अनेकाचोऽव्यक्तानुकरणात्कृभ्वस्तिभ्यां द्विश्च
५५ कर्मकर्तृभ्यां प्रागतत्तत्वे च्विः
५६ चेतोमनोरहोरजोऽरुश्चक्षुषो लुक् च्वौ
५७ च्विसोर्बहुलं
५८ ईग्घलः
५९ व्याप्तौ सात्
६० जातेस्सम्पदा च
६१ तत्राधीने
६२ देये त्रा च
६३ देवादिभ्यः सप्तमीद्वितीयात्
६४ बहुल्पार्थात्कारकाच्छसीष्टानिष्टे
६५ सङ्ख्यैकाद्वीप्सायाम्
६६ सङ्ख्यादेः पादादिभ्यो दानदण्डे च वुचलुक्च
६७ प्रकृते मयट्
६८ अस्मिन्
६९ तयोस्समूहवच्च बहुषु
७० निन्द्ये पाशप्
७१ तिङश्च प्रकृष्टे तमप्
७२ द्वयोर्विभज्ये च तरप्
७३ तौ ङः
७४ अव्ययैत्किंतिङोऽसत्वे तयोर्डाम्
७५ गुणाङ्गाद्वेष्ठेयसू
७६ प्रशस्ते रूपप्
७७ ईषदसमाप्ते ऽङादेः कल्पब्देश्यब्देशीयर्
७८ सुपः प्राग्बहुर्वा
७९ न ङादेः कपोऽच्छिन्नादिभ्यः
८० अनत्यन्ते
८१ प्राक्कात्कप्

८२ तिङ्सर्वादेरक्षवन्त्यात्पूर्वोऽक्
८३ युष्मदस्मदोस्सुपोऽसोभि
८४ को दिश्चाव्ययस्य
८५ तूष्णीकाम्
८६ कुत्सिताल्पाज्ञाते
८७ अनुकम्पातन्नीत्यो:
८८ बह्वचो नृनाम्नोऽजातेष्ठः घेला वा
८९ वुजधौ चोपादेः
९० उकोऽचो लुक्प्रकृत्या च
९१ श्लुच्युत्तरपदस्य पकन्
९२ श्लुकचाजिनात्
९३ अषडेकाच्पूर्वपदस्याचि
९४ द्वितीयादचः
९५ तेनैचः
९६ शेवलसुपरिविशालवरुणार्यमादेस्तृतीयात
९७ क्वचित्तुर्यात्
९८ पूर्वपदस्य वा
९९ ह्रस्वे
१०० कुटीशुण्डाद्रः
१०१ शम्या रुरौ
१०२ कुतुपः
१०३ कासूगोण्याः ष्टरट्
१०४ वत्सोक्षर्षभाश्वाद् ह्रासे
१०५ यत्तत्किमन्याद्द्वयोर्निर्धार्ये डतरः
१०६ वैकात्
१०७ बहूनां प्रश्ने डतमश्च
१०८ एकात्
१०९ काद् डादेश्चानत्यन्ते
११० न सामि वचने
१११ लोहितान्मणौ कः
११२ रक्तानित्यवर्णयोः कालाच्च
११३ शीतोष्णाद्दृतौ
११४ लूनविहानात्पशौ
११५ तनुपुत्राणुस्नातबृहतीशून्यात्सूत्रकृत्रिमनिपुणसनाम्नवेदाच्छादनरिक्ते
११६ कुमारीक्रीडनेयोऽव्यादिभ्यः
११७ तीयाट्टीकण्विद्यायाम्
११८ ओऽष्टमाद्भागे
११९ षष्ठात्
१२० माने कश्च
१२१ एकादाकिंश्चासहाये
१२२ तिलात्पिञ्जपेजौ निष्फले
१२३ मृदस्तिकः
१२४ सस्नौ प्रशस्ते
१२५ बहुलङ्कतोर्द्धयसङ्मात्रट्
१२६ वर्णात्कारः
१२७ भेषजातिहोत्रादेर्वेभ्यष्ट्यण्ठलल्
१२८ नामरूपभागाद्धेयः
१२९ मर्तादिभ्यो यः
१३० नवात्तनतनखञ्च नू च
१३१ प्रात्पुराणे
१३२ प्रज्ञादिभ्योऽण्
१३३ कृष्णौषधिश्रोत्रान्मृगभेषजशरीरे

१३४ कर्मणस्सन्दिष्टे
१३५ वाचष्ठण्
१३६ विनयादिभ्यः
१३७ औपयिकम्
१३८ अनुगादिनः
१३९ अजिनोऽण्
१४० विसारिणो मत्स्ये
१४१ त्रिञ्योऽमुख्यकात्पूगात्
१४२ व्रातञ्फादस्त्रियाम्
१४३ शस्त्रजीविसघाद् ञ्यड् वा
१४४ वाहीकेष्वब्राह्मणराज-
न्येभ्यः
१४५ दामनीयौधेयपर्श्वादिवृका-
च्छाजण् टेन्यण्
१४६ श्रीशमीशिखाशालोर्णाम-
त्स्वभिजिद्विदभृतो गोत्रेणो
यञ्

इति श्रीशाकटायनीयसूत्रपाठे
तृतीयस्याध्यायस्य
चतुर्थः पादः

—:o:—

समाप्तश्च तृतीयाध्यायः

प्रथमः पादः ।

१ गुपौधूविच्छिपनपणेरायः
२ कमृतेर्णिङीयङ्
३ नित्याश्शपि
४ कित्तिजगुपेर्भिषज्यादिक्षमा-
निन्द्ये सन्
५ शान्दान्मान्बधान्निशाना-
र्जवजिज्ञासावैरूप्य ईचैः
६ धातोः कण्ड्वादेर्यक्
७ चुरादिभ्यो णिच्
८ युजादेर्वा
९ भुवेः प्राप्ताविणिः
१० अत्याद्येकाज्हलादिभ्योऽ
रुचिशुभिभ्यां भृशाभी-
क्ष्ण्ये यङ्
११ गृलुपसद्दहजप्जभचर्दशगत्य
र्थाभ्यां गर्ह्ये कुटिलयोः
१२ अलुग्बहुलम्
१३ अचि
१४ नोऽतः
१५ प्रयुजयाप्याणिणञ्वा
१६ कर्म्येककर्तृकात्मन्नतत्सनः
१७ सुपः कर्तुः काम्यः
१८ क्यच्चामाव्ययात्
१९ गौणादाधाराच्चाचरि
२० कर्तुः क्विप्
२१ गल्भक्लीबहोढान्ङित्
२२ ष्क्यङ्
२३ तद्वत्योजसः
२४ सो वा लुक्च

२५ अप्सरसः
२६ भृशादेश्च्वौ स्तः
२७ निद्रादिड्डाज्भ्यो धर्मणि क्यष्
२८ णिज्बहुलं कृञादिषु
२९ श्वेताश्वाश्वतरगालोडिताह्वारकस्याश्वतरेतकलुक्च
३० हलिकल्योरः
३१ सत्यार्थवेदस्याः
३२ निरस्यङ्गेभ्यः कर्मणो णिङ्
३३ पुच्छभाण्डादस्ममाचौः
३४ चीवरात्परिधार्ज्योः
३५ सत्रकक्षकष्टकृच्छ्रगहनात्पापेचिकीर्षौ क्यङ्
३६ वाष्पोष्मफेनादुद्वमि
३७ सुखादेर्भुजि
३८ शब्दादेः कृञि वा
३९ रोमन्थादुच्चर्वणे
४० नमोवरिवस्तपसः क्यच्
४१ चित्रङ्गो विस्मये
४२ ह्रस्वस्य तक् पिति किति
४३ द्विर्धातुः श्लुव्लिड्डे प्रत्यये प्राक्त्वयचः
४४ आद्येकाच्
४५ सन्यङश्च
४६ सुपः
४७ नाद्यच्
४८ ततः
४९ नवन्द्रा वलि
५० द्विरेकेषाम्
५१ यकस्तृतीयः
५२ ईर्ष्यः
५३ सन्वा
५४ चरिचलपतिवदोऽचि
५५ घनाघनपटूपटम्
५६ चिक्लिदचक्नसदाश्वत्साह्वन्मीढवत्
५७ सीर्धीप्ज्ञीप् सन्यूधाऽज्ञपेर्न च
५८ धिप्सधीप् दन्भः
५९ वौन्मुचोऽनाप्येऽचः
६० सुनीभारभलभश्रक्पतपदाभिस्
६१ राधेर्वधे
६२ लिटीडप्येत्
६३ त्रप्फलिभजत्रफट्कृज्ह्वादिदद्विशभिकृतस्यातोऽन्तर्हलोः
६४ फणादिजॄत्रस्भ्रमथमां वा
६५ श्रन्थग्रन्थोर्लुक्च
६६ दन्भः
६७ ये वा
६८ घोर्हि
६९ देर्लिटीगिः
७० पिबस्येङे
७१ ह्निघ्नोऽङे कुः पूर्वात्
७२ जेर्लिट्सनि
७३ चेर्वा
७४ सन्जेष्टिषच्वणि
७५ न स्विदिस्वदिसह्यणिस्तोः
७६ पूर्वस्यास्वेऽचीयुण्योः

७७ आरजभ्रज्झषः
७८ द्युतेरिः
७९ खरश्चर्
८० ष्ठिवेष्टोवा
८१ लुक्खयि
८२ हलोऽनादेः
८३ अच्यावां
८४ कुहोश्चुः
८५ यङोऽकुवतेः
८६ ऐङमिदाहाकोः
८७ वन्चस्रन्सध्वन्सभ्रन्शक-
स्पत्पद्स्कन्दान्तीम्
८८ अतोऽनुनासिकस्य मम्
८९ जठझभदहदशभञ्जपसाम्
९० चर्फलाम्
९१ ति चातोर्युत्
९२ रीमृत्वताम् ।
९३ रम् रिम् च श्लुचि
९४ निजामेत्
९५ पॄभृहाङ्माङामित्
९६ सन्यतः
९७ ओः पुयञ्ज्ये
९८ श्रुस्रुद्रुप्रुप्लुच्योर्वा
९९ स्वपेर्णावुः
१०० सन्वल्लघौ ङेऽनग्लुचि
१०१ लघोदीर्घोऽनजादेः
१०२ स्मॄदत्वरत्वर्ॄदप्रथस्पशोऽत्
१०३ वेष्टि चेष्टो वा
१०४ गणश्चेः
१०५ लिख्यादादेरतः
१०६ नकचाश्न्वृदाद्यनेकहलः
१०७ भूव्यथोऽदित्
१०८ छ्ग्यजत्साचेोऽर्याज्यम्
१०९ न वः
११० वा
१११ च्ये च
११२ ज्यः
११३ व्यः
११४ परेर्वा
११५ शव्यादिस्वब्वचः किति
११६ वशिव्यचिव्यधिज्याग्रह्विव्र-
श्चिप्रच्छिभ्रज्जां क्ङिति
११७ स्वापेर्ङे
११८ वशो न यङि
११९ स्वब्व्यास्यमः
१२० चायः की
१२१ द्व्युक्तौ ह्वः
१२२ णौ सन्ङे
१२३ श्वेर्वा
१२४ लिड्यङि
१२५ न
१२६ प्यायः
१२७ क्तयोरनुपसर्गस्य
१२८ आङोऽन्धूधसोः
१२९ स्फायः
१३० स्त्यः प्रपूर्वस्य
१३१ द्रवमूर्तौ श्यः
१३२ प्रतेः
१३३ वाभ्यवपूर्वस्य
१३४ शृतं पक्के हविः क्षीरे

१३५ दीर्घोऽचोऽवः
१३६ क्विजलिक्ङित्यनुनासिके
१३७ सनि
१३८ हृघ्नः
१३९ तनो वा
१४० क्रमस्त्वि
१४१ शूच्छोऽनुनासिके च
१४२ त्वज्वंसंव्यविस्त्रिवोऽवश्च
१४३ राल्लुक्
१४४ गाङ्कुटां ङिद्वदञ्णि
१४५ इटि विजः
१४६ वोर्णोः
१४७ श्लयठलौ
१४८ क्विद्वङ्क्लिटीन्घेश्चासंयोगात्
१४९ स्वञ्जेर्वा
१५० नश्जस्ति त्वि न्युपान्त्ये
१५१ थफवञ्चिलुञ्च्यृतितृषिमृषिकृश इट
१५२ यौ हलादेरलस्संस्त्वोः
१५३ उति शपः क्तयोर्भावारम्भे
१५४ शीङ्डीङ्पूङ्स्विद्मिदिक्ष्विदृषो म
१५५ मृषः क्षान्तौ
१५६ त्वि
१५७ स्कन्दस्यन्दः
१५८ मृड्मृद्गुधकुषक्लिश्वद्धसः
१५९ रुद्विन्मुषग्रहिस्वप्प्रच्छां सनि च
१६० सीकः
१६१ हलि
१६२ सिलौ तङि
१६३ उः
१६४ गमो वा
१६५ यमस्सौ विवाहे
१६६ गन्धने
१६७ म्नः
१६८ घुस्थोरि च
१६९ अन्त्योपान्त्यतोमिर्
१७० पुवाद्रुर्
१७१ क्तेऽनिट्चजः कुर्घिति:
१७२ वाक्यार्घनिदोवघदार्घनाम्नि
१७३ उद्गादयः
१७४ न गतौ वन्चः
१७५ याजादयो यज्ञाङ्गे
१७६ ध्यण्यावश्यके
१७७ निप्राद्युजः शक्ति
१७८ भुजोऽद्यौ
१७९ त्यजयजः
१८० एचोऽश्याः
१८१ व्योऽलिटि
१८२ स्फुरस्फुलोर्घञि
१८३ अभ्यपगुरो वा
१८४ डीङस्सनि
१८५ प्याक् ङि
१८६ मिञ्मीञोरखाचि
१८७ लीङ्लिनात्योर्वा
१८८ पूजाप्रलम्भाभिभवे णौ
१८९ क्रोङ्जेः
१९० सिध्यतेरज्ञाने

१९१ प्रयोक्तुस्स्मङः
१९२ बिभेतेर्भीष् च
१९३ चिस्फुरोर्वा
१९४ वेतेः प्रजने
१९५ लीलोर्नग्लुकौ स्नेहद्रवे
१९६ रुहः पः
१९७ क्थादिपातिस्फायोऽल-
ग्वम्
१९८ प्रीञ्धूञोर्नक्
१९९ वाशद्योर्विधूननागत्योर्जक्तौ
२०० वेव्यापाहॄाशाच्छःसो युक्
२०१ ह्रीव्लीरीक्नूयीक्ष्माय्यर्त्या
तां पुक्
२०२ घटादिकगेवनूजनैङ्जृष्कन-
सूरञ्जयमोऽकमिचस्यस्यप-
परिस्खद उपान्त्यस्याचोऽ-
णञ्जौ तु दीर्घो वा
२०३ शमोऽदर्शने
२०४ यमोऽपरिवेषे णिचि च
२०५ मारणतोषणनिशाने ज्ञश्च
२०६ चहश्शाठ्ये
२०७ वानुपसर्गाज्ज्वलह्वलह्मल-
वनूवमनमग्लास्नाम्
२०८ खचि
२०९ छदेर्मन्क्तौ
२१० घेऽद्व्याद्युपसर्गस्य
२११ ङेऽशास्वरनाश्यृदितः
२१२ भ्राजभासभाषदीपपीड्मील्
जीवकणरणश्रण् वरलुटां वा
२१३ उरृत्
२१४ जिघ्रतेरिः
२१५ तिष्ठतेः
२१६ ऊद्दुषो णौ
२१७ चित्ते वा
२१८ लुङ्लिटि भुवः
२१९ गोहोऽचि
२२० गम्हन्जन्खन्घसोऽनङच-
चिलुक्क्ङति
२२१ हलो नोऽनचोञ्च्युदितः
२२२ लङ्गिकम्प्योरुपतापाङ्गवि-
कृत्योः
२२३ भञ्जेर्जौ वा
२२४ दन्शसन्जस्वञ्शपि
२२५ रञ्जः
२२६ णौ मृगरमणे
२२७ घञि भावकरणे
२२८ स्यदो जवे
२२९ प्रश्रथहिमश्रथैधावोदौद्म-
दशनम्
३३० ञिणत्यस्याः
२३१ जागुर्ञिणे
२३२ मृजुः
२३३ आर्वोचि
२३४ विश्रमो घञि
२३५ नोद्यमोपरमः
२३६ मजन्वधोऽयंरनंगंवंकंचमः
कुञ्जौ
२३७ आतो यम्
२३८ हनो नस्तोऽञिणे
२३९ हो घः

२४० शासः क्ङित्यङ्हलोत्
२४१ क्वौ
२४२ आङः
२४३ क्तिन्यपचायः
२४४ ह्लादेऽक्तिः
२४५ ऋल्वादेः क्तक्तिनां नोऽप्रः
२४६ क्तयोर्द्रश्यौदित्सूयत्यादेर्दे-
स्य चामन्मूर्च्छः
२४७ इलो यञ आतोऽध्याख्यः
२४८ घादित्यञ्जे र्नाशाजिगीषा-
पादाने
२४९ सेः कर्मकर्तरि ग्रासे
२५० निर्वाणोऽवाते
२५१ दुग्वोर्दीर्घश्च
२५२ क्षेरघ्ये
२५३ दैन्याक्रोशे वा
२५४ ह्रीत्राद्राघ्रोन्दनुद्विन्तेः
२५५ प्रस्त्यो मः
२५६ क्षः
२५७ शुष्पचः क्रम्
२५८ अनुपसर्गाः क्षीबोल्लाघकृश-
परिकृशफुल्लोत्फुल्लसम्फुल्लाः
२५९ भित्तं शकलम्
२६० वित्तं धनप्रतीतम्
२६१ हन्मन्यरंगनं वनतितनादे-
र्लुग्जलि
२६२ ष्ये
२६३ मो वा
२६४ गमादीनां क्वौ
२६५ न क्तौ दीर्घश्च
२६६ वन्यनुनासिकस्याः
२६७ जन्सन्खनाम्
२६८ सनि
२६९ ये वा
२७० तनो यकि
२७१ सनस्तौ क्तौ

इति शाकटायनीयसूत्रपाठे
चतुर्थस्याध्यायस्य
प्रथमः पादः ॥

द्वितीयः पादः ।

१ हृणोऽचीकश्श्लेले यञ्
२ वेकः
३ एश्शीङः
४ श्यय्
५ उपसर्गादुदूहः
६ त्येतेरित्
७ श्वयत्यस्वतोऽङ्यथगु-
म्फम्
८ नशो वेम्
९ ऋद्दृशोऽर्
१० आगुः किति
११ शृद्रुप्रां लिटय् वा
१२ स्कृच्छ्तः
१३ हल्भ्यामृदर्तैः
१४ यङ्यक्क्याशे
१५ रिः
१६ जुस्पकयेङर्
१७ अङ्क्लुग्घेतौ
१८ ह्रस्वस्य हलः

१९ ह्रयुकोर्नोचि ल्यप्तौ
२० भूस्वोऽङ्क्:
२१ हल्योरैत्
२२ वोर्णोः
२३ अज्योत्
२४ तृणेह्र
२५ ब्रुव इट्
२६ यङ्तुरुस्तोर्बहुलम्
२७ स्स्तेस्सोऽलः
२८ अदोऽट्
२९ ईट् चाजदरुद्भयः
३० वल इट्
३१ ईशीङ्भ्यां स्ध्वे
३२ जल्होर्हौ धिः
३३ शाध्येधिजहि
३४ अभ्रष्यतः
३५ ह्व्यः
३६ आतोऽपः
३७ श्लुगुषि
३८ जेः
३९ अतो हः
४० असंयोगादोः
४१ म्वि लुग्वा
४२ कुर्यि च
४३ अतश्शि चोत्
४४ मगाने
४५ आसीनः
४६ नमस्त्योर्लुक्
४७ श्नाज्क्षेरातः
४८ हल्यघोरीः
४९ इद्दरिद्रः
५० श्यो वा
५१ ह्राकः
५२ आ च हौ
५३ यि लुक्
५४ कस्स्याचि
५५ दुहदिहलिहगुहस्तङि
तुवि श्लुग्वा
५६ ओतश्श्ये
५७ यम्गमिषोश्शि च्छः
५८ पाघ्राध्मास्थाम्नादाण्दृश्य-
र्तिश्रौतिधिन्वुकृण्वुशदसदः
पिबजिघ्रधमतिष्ठ मनयच्छ-
पश्य र्च्छश्वधिकृशीयसीदम्
५९ सर्तेर्धौ वेगे
६० ज्ञाजनो जाः
६१ एर्ध्मिदोऽकः
६२ ष्वां ह्रस्वः
६३ शमां दीर्घोऽष्टानाम्
६४ ष्ठिवक्लम्वाचमः
६५ क्रमोऽतङाने
६६ सावारेचः
६७ हलाम्
६८ वद्व्रज्ल्लोऽतः
६९ वोर्णुञ्हलादेर्लघोरिटि
७० न क्षण्श्वसि श्विजाग्रेदि-
न्मह्यश्च
७१ घूञ्ज्ञुस्तुभ्य इट्
७२ यरनमातां सश्च
७३ घुपाभूस्थैतेश्श्लुक

७४ प्राघेट्शाच्छासो वा
७५ तन्भ्यस्यास्ते
७६ जलहृस्वाल्लुकसस्तौ
७७ ईटीट:
७८ धि वा
७९ तासस्त्योस्त्रि
८० एति हः
८१ तस्सि लयशिल
८२ ष्याह्:
८३ डीङो यिक्कङित्यचि
८४ इटिं चातो लुक्
८५ हल्भ्यां लिङयेद्वा
८६ घुमास्थागापाह्वाकसः
८७ ईहल्यप्ये
८८ ये
८९ घ्राध्मोर्यङि
९० घ्नोघ्नी हिंसायाम्
९१ अस्तिब्रुवोर्भूवचौ
९२ चक्षः ख्शाञ् वाचि
९३ लिटि वा
९४ शो यः
९५ भ्रस्जन्नोऽर्
९६ लुङि लुग्दरिद्रः
९७ अस्मन्वुगरवने
९८ हलो यः
९९ क्यो वा
१०० अतः
१०१ णेरिक्तानिङामाल्वन्तेत्
न्वाय्ये
१०२ दान्तशान्तपूर्णदस्तस्पष्ट,
च्छन्नज्ञप्तावा
१०३ लघोर्हलः प्येऽय्
१०४ वाप्नोः
१०५ ध मेङः
१०६ क्षेरी:
१०७ क्षय्यजय्यौ शक्तौ
१०८ क्रय्यः क्रयार्थे
१०९ दोसोमास्थां क्ति
११० शोव्रते
१११ छश्च वा
११२ दद्धोर्द:
११३ श्नोऽच उपसर्गात्
११४ प्राद्द्वाजस्ते वारम्भे
११५ निविस्वन्वात्
११६ धाञो हि:
११७ ह्वाकस्त्वि
११८ जग्धद: प्ये च
११९ घस्लृज्घस्लुङ् सनि
१२० लिटि वा
१२१ वेर्वय्
१२२ घ्नो वधस्तङि लुङि
१२३ लिङि च
१२४ गैत्योः
१२५ णौ गमज्ञाने
१२६ सनीङश्च
१२७ गाङ् लिटि
१२८ लुङ्लृङ्णौ सन्ङे वा
१२९ वलनेऽचो वि
१३० अक्षयब्घञ्चि
१३१ लङ्लुङ्लृङ्यमाङाट्

१३२ आरैजाद्यचः
१३३ यसः
१३४ वलादेरिडक्षुणादेः
१३५ तेर्ग्रहादिभ्यः
१३६ ग्रह एकाचोऽलिटीटः
१३७ ऋद्वुर्वालतङ्सेः
१३८ हलभ्यां चोस्सट् तङ् सेः
१३९ राधाद्योरिङ्ञः
१४० अञ्जोऽसेः
१४१ निष्कुषः
१४२ क्तयोः
१४३ नडीयशठ्यै दिद्धे टोऽपतः
१४४ अर्दस्सन्निवेः
१४५ अविदूरेऽभेः
१४६ शसिकषः प्रगल्भे
१४७ कषः कृच्छ्रगहने
१४८ घुषोऽविशब्दे
१४९ दृढ स्स्थूलवलिनोः
१५० क्षुब्धस्वान्तध्वान्तपरिवृढ,
लग्नम्लिष्टविरिब्धफाण्ट,
मन्थमनस्तमः प्रभुसक्ता
स्पष्टस्वरानायासभृशे
१५१ आदितः
१५२ भावारम्भे वा
१५३ शकेः कर्मणि
१५४ हृषेर्लोमविस्मयप्रतिघाते
१५५ जप्तश्वस्तापचितम्
१५६ वमरुष्यमत्वरसंघुषास्वनः
१५७ जॄव्रश्चास्त्व
१५८ क्त्वक्तां क्षुधवसः
१५९ लुभ्यञ्चेर्विमोहार्चे
१६० पूङ्क्लिशो वा
१६१ त्व्यूदितः
१६२ सहलुभेच्छरुषरिषस्ति
१६३ भ्रस्जृधदम्भतन्सन्पतिश्र‘
पिश्रियूर्णुभरस्वृद्रि‘
वृतस्सान
१६४ क्राद्यृपूङ्स्म्यञ्जसः
१६५ न किदाद्युग्रहगुहः
१६६ ऋद्धनस्स्ये
१६७ क्रस्यैकाचघसः
१६८ गम्हन्विद्दृशिवशो वा
१६९ कृत्तृन्नृच्चृच्छृदस्स्यसौ
१७० गमः
१७१ अतङः
१७२ न वृद्भ्यः
१७३ गंस्नोरसुप्तज्ञाने
१७४ क्रमः
१७५ तुः
१७६ शक्प्रच्छिविन्द्विद्यहन्वसि-
घस्यचोऽश्विश्रिशीङ्डीङ्-
रुषट् को द्रुवृतः
१७७ सुरिविविपवाचः
१७८ स्वस्मस्स्तुयुयविनित्यसु
रुभाज्जः
१७९ रभमस्वान्नजः
१८० अक्षुतुस्कन्मिच्छिखिश-
पसहाद्द्वः
१८१ वन्नाशायुवुकुशुरुक्षुठ्याद्वः
१८२ आवलिलुक्षिक्षुस्तृस्वतिश-

तात्परः

१८३ यरलाद्धः

१८४ रयनगान्मः

१८५ दन्दृल्लिविस्पृमृदिरुक्षुरेश्शः

१८६ शिशुद्धित्विक्रुपिवितुदोष्षः

१८७ वनमिदुरूदिस्लिदाद् हः

१८८ स्विद्म्न्सिधिश्लिषिपुष-
श्श्यात्

१८९ क्नित्युक्ङ्यूणुं ञः

१९० नित्यानिट्नासोऽत्वद्दस्त्रं
जुदृशस्थे वावृठ्यात्तेः

१९१ ऋतः

१९२ कृञोऽसः

१९३ सृभृवृस्तुद्रुस्रुस्त्रोश्च लिटि

१९४ सृज्दृशोऽम् जल्यकि

१९५ दृप्तृप्स्पृक्षिस्पृश्मृशो वा

१९६ नश्मस्जसोर्नम्

१९७ उदितः

१९८ लिपादितृफहफगुफोमशुं
भश्शे

१९९ जभोऽचि

२०० रधः

२०१ नेट्यलिटि

२०२ रभः

२०३ लभः

२०४ ययाङः

२०५ स्तुतावुपात्

२०६ ञ्यमि वा

२०७ घञखे चोपसर्गात्

२०८ सुदुर्भ्यं

२०९ क्रीङ्तन्यवस्यादेलुं ग्बहुलम्

२१० घाञ्नस्यपेः

२११ संपर्युपात्कृञस्सड्भूषसं
मवाये

२१२ उपाद्विकारप्रतियत्नवाक्या
ध्याहारे

२१३ किरतेर्लवने

२१४ प्रतेश्च वधे

२१५ चतुष्पद्यपाद्धर्षात्

२१६ विशुनि भक्षाश्रयाय

२१७ वौ विष्किरो वा

२१८ प्रात्तुम्पर्गवि

२१९ प्रादुपश्चाच्चयस्तेष्षः

२२० सूङ्सूक्षोस्तुस्तुभोऽटयप्यद्वे

२२१ स्यासेनिसेधसिचसञ्जां
द्वयटि

२२२ स्तम्भोऽङ्प्रतिस्तब्धनि.
स्तब्धे

२२३ अवाच्चालम्बनाविदूर्यौ क्षुं

२२४ वेश्च स्वनोऽशने

२२५ सदोऽप्रनेलौं त्वादेः

२२६ स्वञ्जेश्च

२२७ परिनिवेस्सेवः

२२८ सयसिते

२२९ सट्स्तुस्वञ्जां वा त्वटि

२३० सीवूसहोऽङ्केऽसोः

२३१ स्यन्दतेर्वाभ्यनेऽश्चाप्रा
णिनि

२३२ वेस्स्कन्देोऽक्तयोः

२३३ परे

२३४ स्फुरस्फुलोर्निर्निः
२३५ वेः
२३६ स्कम्भः
२३७ निर्दुस्सुवेस्समसूतिस्व पोऽवः
२३८ हिनुमीनानिर्णोऽदुरोऽन्तरश्च णः
२३९ शः
२४० नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्साति वपतिवहतिशाम्यतिचिनोति देग्धौ
२४१ शेषेऽषान्तकखपाठे वा
२४२ परेरनितेः
२४३ अन्ते च
२४४ द्वयोः
२४५ घ्नः
२४६ म्वि वा
२४७ न देशेऽन्तरोऽयनघ्नः
२४८ निसनिक्षनिन्दः कृति वा
२४९ अषोऽचोऽन्ताभूपूङ्कंगंप्याप्यिवेपः
२५० नमीजादेरेव
२५१ इणिलिजुपान्त्याद्वा
२५२ निर्विण्णः
२५३ रो लोऽयौ
२५४ निःप्रतेर्वा
२५५ परेर्घाङ्कयोगे
२५६ ह्रश्चाऽएडादीनाम्
२५७ ग्रोऽचि
२५८ यङि
२५९ गरगलं विषप्राण्यङ्गे
२६० कृपोऽकृपीटादिषु
२६१ आदेरष्णोऽक्वङ्कष्ट्याष्ठीवस्नम्

इति शाकटायनीयसूत्रपाठे
चतुर्थस्याध्यायस्य
द्वितीयः पादः

तृतीयः पादः

१ तास्स्यौ लुलोः
२ सिलुङि
३ दूपादेर्धासृपः
४ श्लिकश्शलोऽदृशः क्सो नेट् चेत्
५ श्लिषः
६ नानालिंगने
७ कंश्रिद्रुस्रुणेङः कर्तरि
८ धेट्श्वेर्वा
९ स्तम्भूम्रुचूम्लुचूग्रुचूग्लुचूग्लुञ्चूश्विजृभ्याऽङ्
१० ॠदितोऽतङि
११ सर्तिशास्तिलिद्युत्पुष्यादेः
१२ वक्त्यसूख्यातेः
१३ लिप्सिजुह्वाऽर्तेः
१४ तङि वा
१५ दीप्पूर्जन्वुधतायप्यायस्ते ञिः
१६ पदः

१७ कर्मभावे
१८ हन्दूशिग्रहज्भयस्त्रिसतास्स्य-
सटां जिहुवा
१९ श्लेले यक्
२० कर्तरि शप्
२१ ह्वादादेश्श्लुब् लुक्
२२ दिवादेश्श्यः
२३ भ्राशभ्लाशभ्रमिक्रमित्रसि-
त्रुटिलषो वा
२४ यसोऽनुपसर्गात्
२५ समः
२६ अक्षश्श्नुः
२७ तक्षस्तनूकृतौ
२८ स्वादेः
२९ स्तम्भूस्तुम्भूस्कम्भूस्कुम्भू-
स्कोश्श्ना च
३० क्र्यादेः
३१ हलश्श्नो हावानः
३२ तुदुभ्यश्शः
३३ कृञ्तनादेरुः
३४ रुधां नं म्लुक् च
३५ कर्मण्यस्नुवादीनां कर्मवञ्चि
३६ तपस्तपसि
३७ सृजश्श्राद्धे
३८ करणे क्वचित्
३९ कुषिरजश्श्यान्न वा
४० दयज्दुहः
४१ रुधः
४२ तपोऽनुतापे च
४३ णिश्रिस्नुतङ् कर्मणः
४४ भूषार्थसन्दुहादीनां च
ञियक्
४५ कृञोऽतुन्त्वाम्
४६ घुरकेलिमकृष्टपच्यं कर्मणि
४७ सङ्गतेऽजर्यम्
४८ रुच्याव्यथ्यौ
४९ भूगेयौ वा
५० प्रत्रूपस्थोऽनीयः
५१ जनाप्लवापतो घ्यण्
५२ श्लिषशीङ्स्थाजृषास्वसज-
न्रुहारम्भात् क्तः
५३ गत्यकर्मण्याधारे च
५४ आदौ
५५ साप्यानाप्यात्क्तघ्यपखा-
र्थाः कर्मभावे
५६ भीमादयोऽपादाने
५७ सम्प्रदानाच्चान्यत्रोणादयः
५८ कृद्बहुलम्
५९ प्राक्क्त्रि प्राप्तौऽसमः
६० घ्यण्
६१ पाणिसमवात् सृजः
६२ ओरावश्यके
६३ वाधारेऽमावास्या
६४ कुण्डपाय्यसञ्चाय्यराज-
सूयाः क्रतौ
६५ पाय्यधाय्यसान्नाय्यनि-
काय्यप्रणाय्यानाय्यं माना-
र्घविनिवासासंमत्यनित्ये
६६ अग्नौ परिचाय्योपचाय्य-
समूह्यचित्याः

६७ तव्यानीयरौ
६८ यच्चत्तकिशक्शसियत्स-
ह्रियजोऽय्वासुत्रपरल्लपा-
पत्रपडिपद्भवसुर्यः
६९ गद्मद्यमोऽनुपसर्गात्
७० चरः
७१ आङोऽगुरौ
७२ पण्योपसृत्रवद्यदाह्वियर्तु-
मन्युपेयागर्हे
७३ स्वामिवैश्येऽर्ते
७४ वदस्सुपः क्यप् च
७५ हत्या भूयं भावे
७६ अग्निचित्या
७७ खेयमृषोद्यम्
७८ कुप्याज्यभिद्योद्ध्यसिध्य-
युग्यं नाम्नि
७९ शास्वृदृजुषस्त्वेत्यदुपा-
न्त्यादनृच्क्लृप्चृतः
८० जिविपून्यो हलिमुञ्ज-
कल्के
८१ ग्रहः पदास्वैरिबाह्यापक्षे
८२ भृञोऽनाम्नि
८३ समो वा
८४ कृमृज्वृषशंसगुहदुहजयः
८५ ण्वुतृच् लिहादिभ्यश्च
८६ नन्द्यादिभ्योऽनः
८७ ग्रहादिभ्यो णिन्
८८ नेर्वपशुशाविशरक्षः
८९ नञो याचृव्यासंव्याहृव्रजव-
दवसः ।

९० अचोऽचित्ते
९१ रुधराधोऽपात्
९२ हन्च परिभ्वः
९३ वेश्शीङ्षिञो देशे
९४ ज्ञाकृदृप्रीगुपान्त्यात्कः
९५ उपसर्गादातोऽनिक्
९६ पाघ्राध्माधेड्दृशः शः
९७ धारिपारिवेद्युदेजिचेति-
सातिमाहिलिम्पविन्दोऽ-
नुपसर्गात्
९८ धुन्यो णः
९९ सहादिग्रहाद्वा
१०० श्यात्तन्व्यधास्रुसंस्र्व-
सावहृतीणश्वसः
१०१ नृतखन्रञ्जो वुट् शिल्पिनि
१०२ पाणिघट् नाडघट्
१०३ गस्थकः
१०४ टनण्
१०५ हो व्रीहिकाले
१०६ प्रुसृल्वस्साधौ वुच्
१०७ आशिषि वुन्
१०८ नाम्नि क्तिः
१०९ कर्मणोऽण्
११० शीलिकामिभक्ष्याचरीक्षि-
क्षमो णः
१११ गेऽनुपसर्गाट्टक्
११२ सुराशीध्वोः पिबात्
११३ आतोऽह्वावामोऽङ्
११४ दाज्ञः प्र्
११५ संख्यः

११६ आशिषि घ्नः
११७ क्लेशतमसोऽपे
११८ शीर्षकुमाराणिन्
११९ अमनुष्ये टक्
१२० जायापतेर्लक्षणे
१२१ हस्तिकवाटाच्छक्तौ
१२२ राजघः
१२३ अर्होऽः
१२४ शक्तिलाङ्गलाङ्कुशयष्टितोमरघनुर्घटाद्ग्रहः
१२५ सूत्राद्धारणे
१२६ हृञो वयोऽनुद्यमे
१२७ आङि शीले
१२८ दृतिनाथात्पशाविः
१२९ फलेग्रह्यात्मंभरिकुक्षिंभरि
१३० शकृत्स्तम्बाद्वत्सव्रीहौ कृञः
१३१ किंयत्तद्बहोरः
१३२ दिवाविभानिशाप्रभाभास्करान्तानन्तादिनान्दीलिपिलिबिबलिचित्रक्षेत्रजंघाबाहूहर्धनुर्भक्तसंख्याट्टः
१३३ हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदात्
१३४ भृतौ कर्मणः
१३५ क्षेमप्रियमद्रात्खाण्
१३६ मेघर्तेः खच्
१३७ भयात्
१३८ प्रियवशाद्वदः
१३९ द्विषत्परात्तस्तापेः
१४० मितनखपरिमाणात्पचः
१४१ करीषाभ्रकूलात्कषः
१४२ सर्वात्सहश्च
१४३ भृतॄवृधारिजिदमितपश्च नाम्नि
१४४ वाचंयमो व्रती
१४५ मन्याणिन्
१४६ कर्तुश्शखः
१४७ एजेः
१४८ शुनस्तनाद्धेटः
१४९ नाडीमुष्टिघटीखरीनासिकावालद्ध्मश्च
१५० पाणेः
१५१ कूलादुदि रुजवहः
१५२ वहाभ्राल्लिहः
१५३ विध्वरुस्तिलात्तुदः
१५४ शर्धललाटवातद्रहाक्तपाजः
१५५ पुरंदरभगंदरेरंमदोग्रंपश्यासूर्यंपश्यः
१५६ सुभगाढ्यस्थूलपलितलग्नान्धप्रियन्सुपोऽच्वेश्चौ खस्नुखञ् भवः
१५७ कृञः करने खनट्
१५८ भावे चाशितंभवः
१५९ गमः खड्डाः
१६० विहायसो विहश्च
१६१ उरगः
१६२ सुगदुर्गमाधारे
१६३ निर्गो देशे

१६४ नाम्न्यश्शमः
१६५ पार्श्वादिभ्यश्शीङः
१६६ उत्तानादिभ्यः कर्तुः
१६७ आधारात्
१६८ भिक्षासेनादायाच्च चरष्टः
१६९ पुरोऽग्रतोऽग्रेस्सर्तैः
१७० पूर्वात्कर्तुः
१७१ स्थः कः
१७२ दुहो घश्च
१७३ शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपास्सुखाहरालस्यहस्तिसूचकाः
१७४ मूलविभुजादयः
१७५ विरम्भजः
१७६ स्पृशोऽनुदकात् क्विप्
१७७ अदोऽनन्नात्
१७८ क्रव्यात्क्रव्यादावामपक्वादौ
१७९ मन्वन्क्वनिविच्च दृश्यते
१८० त्यदाद्यन्यसमानाद्गौणाद् दृशेराप्येक्विष्कट्क्साः
१८१ कर्तुर्णिन्
१८२ शीलेऽजातेः
१८३ व्रताभीक्ष्ण्ये
१८४ साधौ
१८५ ब्रह्मवादी
१८६ ठ्यमेर्भुवो भूते
१८७ करणाद्यजः
१८८ हन्विक्रयः कर्मणः कुत्स्ये
१८९ घ्नो णिन्
१९० ब्रह्मभ्रूणवृत्रात्क्विप्
१९१ सुकर्मपापमंत्रपुण्यात्कृञः
१९२ सोमात्सुञः
१९३ अग्नेश्चेः
१९४ कर्मण्यग्न्यर्थे
१९५ दृशः क्वनिप्
१९६ राजसहात्कृञ्युधिभ्याम्
१९७ जनोऽनौ डः
१९८ सप्तम्याः
१९९ अजातेः पञ्चम्याः
२०० क्वचित्
२०१ जुषोऽतृ
२०२ सुयजो ङ्वनिप्
२०३ भस्मादयः
२०४ क्तक्तवतू
२०५ लुङ्
२०६ रात्रौ वसोऽन्त्ययामास्वापेऽद्य
२०७ अनद्यतने लङ्
२०८ ख्याते दृश्ये
२०९ स्मृत्यर्थेऽयदि लृट्
२१० साकाङ्क्षे वा
२११ अत्यन्तापह्नवे लिट्
२१२ परोक्षे
२१३ हशश्वत्पञ्चाब्दयन्तःप्रच्छ्ये लङ् च
२१४ पुरि लुङ् वा
२१५ स्मे च लट्
२१६ ननौ प्रष्टोक्तौ
२१७ सति
२१८ पूङ्यजश्शानः

२१९ वयश्शक्तिशीले
२२० धारीङ्शशत्रकृच्छ्रे
२२१ सुञ्द्विषार्हस्सत्र्यरिप्रशस्ये
२२२ तृ साधुधर्मशीलेषु
२२३ भूवृतूवृधूभ्राजसहचररुचा-
पत्रपालङ्कृञ्निराकृञ्प्रज-
नोत्पचोत्पदोन्मदादिष्णुः
२२४ भजेस्स्नुक्
२२५ ग्लास्थस्स्नुः
२२६ गृधिधृषिक्षिप्त्रसः क्नुः
२२७ सन्भिक्षाशंस्विन्दिच्छादुः
२२८ शृवन्दादारुः
२२९ सद्दाशधेट्सेरुः
२३० निद्रातन्द्राश्रद्धास्पृहिगृहि-
पतिशीङ्दयादालुः
२३१ सहिवहिचलिपापतो
यङ्कः
२३२ दधिसस्निचक्रिजज्ञिनेमिः
२३३ भूवृषस्थाशृहन्कंगमादुकण्
२३४ लषपत्पदः
२३५ क्रुद्भूषार्थसृगृधज्वल्
शुचशुभश्चानः
२३६ रुचलार्थादकर्मकात्
२३७ हलाद्यन्ताञ्ङिदिलिः
२३८ न दीक्षदीप्सूद्विङ्घः
२३९ द्रमुक्रमो यङः
२४० यज्वद्दृशजपादूकः
२४१ जागुः
२४२ शमष्टकदुषद्विषद्रुहदुहयुज-
त्यजरञ्जभजाभ्याहनाऽनुरु-
धो घिनञ्
२४३ आङः क्रीड्यस्यस्मुषः
२४४ समः पृचृसृजज्वरोऽकर्म-
कात्
२४५ वौ विचकषकत्थस्रम्भलस
२४६ लपोऽपे च
२४७ चरोऽतौ च
२४८ लप्सृद्रुमथवद्वसः प्रे
२४९ परेस्सृवद्दहमुहः।
२५० देवो णेश्च
२५१ क्षिपरटः
२५२ वादेश्च वुञ्
२५३ निन्दहिंसक्लिशखादविना-
शिव्याभाषासूयात्
२५४ उपसर्गादेव देविक्रुशः
२५५ कुट्टिलुण्टवृङ्जल्पभि-
क्षादाकट्
२५६ दृक्षीण्वमज्यव्यथाभ्यम्परि-
भूविश्रेरिन्
२५७ प्रात्सूजोः
२५८ मरक्सृद्घसः
२५९ भञ्जभासमिदो घुरः
२६० वेत्तिच्छिद्भिदः कित्
२६१ सर्तीण्नशजेष्ट्वरप्
२६२ गत्वरः
२६३ नम्कम्यजस्कम्पस्मिहिंस-
दीपो रः
२६४ स्वप्तृषिधृषो नज्
२६५ भ्यः क्रुकुकक्लुकाः
२६६ स्थेशभासपिसकसो वरः

२६७ यायावरश्च
२६८ संविप्राद्भुवोऽनाक्न्युट्
२६९ मितद्र्वादयः
२७० इन्द्रः ण्वो दैवते
२७१ स्वञ्जषौ करणे
२७२ लूधूसूखनमहचरतेः
२७३ ण्ययो द्रोघनः
२७४ स्तम्बाद् घ्नश्च
२७५ बह्वपरिघम्
२७६ ण्वो हलक्रोडमुखेष्ट्
२७७ दाब्नीशस्युयुजस्तुसिचिसहस्तु-
तुद्मिहनहदंशपतः
२७८ धात्री
२७९ मतिपूजार्थजीच्छीलयादि-
भ्यः क्तः
२८० उणादयः
२८१ गम्यादिर्वर्त्स्यति
२८२ लृट्
२८३ परिदेवनानद्यतने लुट्
२८४ पुरायावतोर्लट्
२८५ कदाकर्ह्योर्वा
२८६ किंवृत्ते ऽर्थित्वे
२८७ अर्घ्यसिद्धौ
२८८ लेटि हेतौ
२८९ लेङ् चोर्ध्वंमौहूर्तिके

इति शाकटायनीयसूत्रपाठे-
चतुर्थस्याध्यायस्य
तृतीयः पादः

---

१ पद्रुजो घञ्
२ स्पृशिस्थिरव्याधिमत्स्यबले
३ अकर्तरि
४ इङः
५ ओ वायुवर्णनिवृत्ते
६ पूल्वनीरोर्निरभ्यवोपसर्गे
७ भूश्यदोऽच्
८ नौ णश्चादः
९ स्वनहसक्वणपठो वा
१० यमस्मनिव्युये
११ क्वणो वैणे
१२ घोः किः
१३ आप्यादाधारे
१४ स्वृगम्वशवृरण्दृग्रहोऽच्
१५ समुद्धनः पशौ
१६ सर्तिग्लहपणः प्रजनाक्षेपस्वे
१७ प्रमदसंमदौ हर्षे
१८ देशेऽन्तर्घनान्तर्घणौ
१९ प्रघणप्रघाणौ कोष्ठकांशे
२० घनोद्घनापघनोपघ्ननिघोद्घ-
संघा मूर्त्यत्याधानाङ्गाप्स-
न्ननिमितप्रशस्तमणः
२१ ह्वो वश्चोश्विन्यभ्युपे
२२ आङि युद्धे
२३ निपानमाहावः
२४ भावेऽनुपसर्गात्
२५ मदृव्यधजपः
२६ क्वणयमूहस्वनृयो वा
२७ आङि रुप्लोः
२८ ग्रहोऽवे वर्षे

२९ प्रेयुग्यतुलासूत्रे
३० वुर्वस्त्रे
३१ उदिनीश्रिञः
३२ पूद्रुयौतेर्घञ्
३३ ग्रहः
३४ समि मुष्टौ
३५ युद्रुदोः
३६ स्तार्यज्ञे
३७ परौ ग्रहः
३८ न्यवे शापे
३९ लिप्सायां प्रे
४० द्रुस्तुस्त्रोः
४१ स्त्रोऽयज्ञे
४२ वौ प्रथनेऽशब्दे
४३ क्षुश्रोः
४४ व्युपेशीङः क्रमे
४५ हस्तादेयेऽस्तेयेऽनुदश्चेः
४६ चित्युपसमाधानावासदेहे कश्चादेः
४७ संघेऽनुपरौ
४८ माने
४९ न्युदि ग्रः
५० क्रो धान्ये
५१ नीवुः
५२ इणोऽभ्रेषे
५३ परौ क्रमे
५४ द्यूते न्यः
५५ न्वोऽवज्ञाने वा
५६ स्यादिभ्यः कः
५७ टुङ्वितोऽथुक्त्री
५८ यजयतप्रच्छस्वप्रक्षो नः
५९ विच्छेर्नङ्
६० व्याप्तौ भावेऽनाञिन्
६१ स्त्रियां क्तिन्
६२ लाभादिभ्यः
६३ स्त्रिष्यजतोः करणे
६४ गापापचो भावे
६५ स्यो वा
६६ व्यतिहारे ञः
६७ ग्युक्षः
६८ व्रजयजः क्यप्
६९ नाम्नि सृजः
७० समजनिषदनिपद्मन्विदीण्घञ् शीङः
७१ कृञश्शक्तिन्चः
७२ सम्पदादिभ्यः क्तिन् क्विप्
७३ यूतिजूतिसातिहेतिकीर्त्यटाट्यामृगयेच्छायाञ्चकृपाः
७४ ग्लाज्याहो निः
७५ णिवेत्यासश्रन्थघट्टवन्दोऽनः
७६ इषोऽनिच्छायाम्
७७ परेर्वा
७८ सृचरो यः
७९ जागुरश्च
८० प्रत्ययात्
८१ गुरोर्हलः
८२ षिचिन्तिपूजिकथिकुंभिचचर्यन्तर्घोऽङ्
८३ उपसर्गादातः
८४ भिदादयः क्वचित्

८५ संज्ञाभावे णवुः
८६ प्रश्नाख्याने वेञ्
८७ पर्यायोत्पत्त्यर्हणे णवुः
८८ नञोऽनिश्शापे
८९ नञभावे क्तोऽभ्यादिभ्यः
९० करणाधारे चानट्
९१ पुंनाम्नि घः प्रायः
९२ गोचरसंचरकषनिकषखलभगवहव्रजव्यजापणनिगमम् ।
९३ हलो घञ्
९४ तॄस्त्रोऽवात्
९५ समश्च हृञः
९६ जारदाराध्यायन्यायोद्यावानायाधारावायाः
९७ उदङ्कोऽजले
९८ खनोऽडहरेकेकबकाश्च
९९ दुस्स्वीषतः कृच्छ्राकृच्छ्रे खः
१०० च्वौ कर्त्राप्याद्भूकृञः
१०१ आतोऽनः
१०२ शास्युधिदृशिधृषिमृषः
१०३ आशंस्ये सद्भूतवत्
१०४ क्षिप्राशंसार्थे लृङ् लेङ्
१०५ आद्येऽवासन्नाविच्छिदयोः
१०६ वत्स्यर्त्यनहोरात्रेऽवोऽवधौ
१०७ काले परे वा
१०८ लेङ्निमित्तेऽवृत्तौ भूते च लृङ्
१०९ वा शेषात्
११० गर्हेऽपिजात्वोर्लट्
१११ कथमि लेङ् च वा
११२ किंवृत्ते लेङ्लृटौ
११३ अमर्षश्रद्धेऽन्यत्रापि
११४ किंकिलास्त्यर्थयोर्लृट्
११५ यद्यदियदाजातौ लेङ्
११६ गर्हे च यच्चयत्रे
११७ चित्रे
११८ लृट् शेषेऽयदौ
११९ वाढेऽप्युते लेङ्
१२० संभाव्येऽलमर्थात्
१२१ धातूक्तौ वायदि
१२२ सतीच्छार्थात्
१२३ वत्स्यति फलकारणे
१२४ कामाविष्कारेऽकच्चिति
१२५ इच्छार्थे लेङ् लेट्
१२६ विधिनिमन्त्रणामंत्रणाधीष्टसंप्रश्नप्रार्थने
१२७ प्रैषानुज्ञावसरे लेट् घ्यप्
१२८ लेङ् चोर्ध्वंमुहूर्तात्
१२९ लेट् स्मे
१३० अधीष्टे
१३१ कालवेलासमयावसरे तुम्वा
१३२ लेङ् यदि
१३३ तृघ्यप् चार्हे
१३४ णिन्घ्यपावश्यकाधमर्ण्ये
१३५ शक्तौ लेङ् घ्यप्
१३६ लिङ् लेडाशिषि
१३७ माङि लुङ्
१३८ लङ् च स्मेन
१३९ भृशाभीक्ष्ण्ये लेट् तस्मिं-

स्तथार्थे
१४० प्रचये वा सामान्यार्थे
१४१ निषेधेऽलङ्खलौ क्त्वा
१४२ परावरे
१४३ व्यतिहारे मेङस्तुल्यकर्तृके
१४४ प्राक्काले
१४५ पूर्वाग्रे प्रथमाभीक्ष्ण्ये खमुञ्
१४६ अन्यथैवंकथमित्थमः कृञोऽनर्थकात्
१४७ यथातथादीर्ष्याप्रत्युक्तौ
१४८ आप्यादाक्रोशे
१४९ स्वादोश्च्वेः
१५० विद्दृशिभ्यः कार्त्स्न्ये णम्
१५१ यावता जीववेदात्
१५२ चर्मोदरात्पूरेः
१५३ वृष्टीयत्त्वेऽस्यो लुग्वा
१५४ चेलार्थात् क्रोपेः
१५५ तृतीययोपदंशः
१५६ हिंसार्थात्तुल्याप्यात्
१५७ तत्सप्तम्योपात्पोड्रुधकृषः
१५८ प्रमाणसमासत्त्योः
१५९ तूर्णेऽपादानेन
१६० द्वितीयया
१६१ स्वांगेनाध्रुवावाच्येन
१६२ विशिपतिपदिस्कन्दाद्वीप्साभीक्ष्ण्ये
१६३ तृष्यसः काले नाम्नि
१६४ ग्रहादिशो नाम्ना
१६५ कृञोऽव्ययेनानिष्टोक्तौ णम्क्त्वौ
१६६ तिरश्चापवर्गे
१६७ भुवोऽनूचानुलोम्ये
१६८ तूष्णीमा
१६९ स्वाङ्गतसा कृश्वः
१७० वौ धाण् विनानाना
१७१ शुष्कचूर्णरूक्षादाप्यात्पिषस्तस्मिन् णम्
१७२ कृञ्ग्रहोऽकृतजीवात्
१७३ निमूलात् कषः
१७४ समूलाद् घ्नश्च
१७५ करणात्
१७६ हस्तार्थाद्वृतुवर्तिग्रहः
१७७ स्वस्नेहनार्थात्पुषिपषः
१७८ नाम्नि वंधः
१७९ आधारात्
१८० कर्तुर्जीवपुरुषान्नशिवहः
१८१ ऊर्ध्वात् पूरशुषः
१८२ आप्यच्वेः
१८३ समर्थास्त्यर्थधृषज्ञाशकग्लाघटसहार्हारभलभक्रमे तुम्
१८४ क्रियायां तदर्थायां वुण् लृट् च
१८५ कर्मणोऽण्
१८६ लेङ्तुमिच्छार्थे तुल्यकर्तृके

इति श्री श्रुतकेवलिदेशीयाचार्यस्य शाकटायनकृतौ शब्दानुशासने चतुर्थस्याऽध्यायस्य चतुर्थः पादः ॥

समाप्तोऽध्यायश्च चतुर्थः ॥

गणनेयं सूत्राणामनुष्टुभामर्धसप्तमशतीह ।
त्रीणि सहस्राणि शते द्वे षट्त्रिंशच्च योगानाम् ॥
संज्ञानियमनिषेधाधिकारनित्यापवादविधिपरिभाषाः ।
अतिदेशविकल्पाविति गतयः शब्दानुशासने सूत्राणाम् ॥

शाकटायनीयसूत्रपाठस्समाप्तः

ओम् शांतिः शांतिः ।

॥ ॐ ॥

ओनमः सिद्धेभ्यः ।

शाकटायनगणपाठः ।

डाच्चव्यूर्याद्यनुकरणं च ति ॥ १ । १ । २६ ॥

जरी वररी अंगीकरणे विस्तारे च । पांपी विध्वंस् माधुर्ये च । ताली आताली वर्णे । धूसो कांतौ । शकला शंस कला ध्वंसकला श्रंसकला आलंघि (ञ्चि) केवासी, शेवाली, पर्पाली, मस्मसा, मसमसा, मसमस्ना एते हिंसायाम् । गुडु गुधा पीडायाम् । सजूः सहार्थे । फलू, फली, श्राक्ली, क्लिक्ली, विकारे । श्रौषट्, वौषट्, वषट्, स्वाहा, स्वधा दाने श्रत् श्रद्धाने । प्रादुस्, आविस् प्रकाश्ये एते ऊर्यादयः ।

साक्षादाद्यच्वि ॥ १ । १ । ३५ ॥

साक्षात्, मिथ्या, चिन्ता, भद्रा, रोचना, अमा, आस्था, प्राजर्या, प्रजुरा, जिजरा, जिजरुहा, संसर्या, अर्थे, अग्नौ, वशे, एकपने, प्रहसने, विसहने, । अर्थे इत्यादयः सप्तमीप्रतिरूपकः । लवणं, उष्णं, शीतं, उदकं, आर्द्रकं, लवणादीनामिह तिसंज्ञासन्नियोगे मकारान्तत्वं निपात्यते । नमस्, प्रादुस्, आविस् इति साक्षादादिः ।

तस्वन्ङामधणतस्यांक्त्वातुं तिसुङ्प्तस्वाभस्वरा-दीन्तव्ययम् ॥ १ । १ ॥ ३८ ॥

तस् वत् ङाम् इतयेतदंतानि धणवर्जितस्यातानि आम् क्त्वा अम् तुम् इत्येतदंतानि तिसंज्ञकानि सुङ्सप्रतिरूपकाणि स्वरादीनि च शब्दरूपाणि अव्ययसंज्ञानि भवन्ति ।

तस् "एकदिशि तम्" ऐलुमालतो विद्योतते । वत्-मुनिवद्वृत्तं साधुवदाचरितम् । क्षत्रियवद्युध्यते । डां—उच्चैस्तराम् । उच्चैस्तमाम् । अधण् तसि—त्रिपृष्ठतः । अश्वग्रीवतः । सर्वतः । सर्वत्र । बहुशः । अल्पशः । आम्—दयांचक्रे । क्त्वा-हृत्वा । कृत्वा । अम्—पूर्वं भोजम् । अग्रेभोजम् स्वादुंकारं, सपन्नं कारम् । कन्यादर्शं वरयति । यावज्जीवमदात् । तुम्—कर्तुम् । हर्तुम् । धर्तुम् । स्वप्तुम् तिः—अधः कृत्य । प्रहृत्य । निहित्य । प्रकृत्य । सुडाभम्—दात्रायाम्, मात्रायाम्, अस्ति, स्वस्ति, अस्मि, स्यात्, प्रस्वाभः—यथा, तथा, कथं, कुतः । स्वरादिः-स्वस्तिष्ठति, स्वः पश्यति, अत्युच्चैसम् इत्यत्र उच्चैर्यस्तमतिक्रान्तस्तस्य पूर्वपदार्थस्य सुब्विति न श्लुक् ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

तसादि ग्रहणं किम्? एकः, द्वौ, बहवः, षट्, सप्त, अष्टौ, आपो वर्षाः । पचतिरूपम् । पचतोरूपम् । पचतिकल्पम् । पचतस्कल्पम् । स्वर् अन्तर् प्रातर् पुनर् सर् तर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् पृथक् ह्यस् श्वस् दिवा सायं चिरं ईषत् मनाक् जोषम् ज्योषम् तूष्णीम् वहिस् अवस् निकषा समया मृषा स्वयं नक्तम् इद्धा सामि वता सनं नाना विना अन्यत् क्षमा उपांशु विहायसा दोषा मुधा मिथ्या पुरा मिथो मिथु मिथं प्रायस् मुहुस् प्रवाहु आर्यं अलम् अभीक्ष्णम् साधम् मनस् हिरुक् प्रशान् च वाहा अह एव एवं मानं शश्वत् नित्यम् सूपत् कूपत् कूबित् नेत् चेत् कच्चित् यत्र नह हन्त माकिस् नकिम् माङ् नञ् यावत् त्वावत् स्वावत् त्वै न्वै वै रै श्रौषट् वषट् स्वाहा स्वधा ओम् हिम्

खलु किल अधस् अथ स्म अ इ उ ऋ ॠ ऌ ॡ ए ऐ ओ औ आदह आतंक यावत् तावत् किम् यत् यद् तद् धिक् हे है पाट् प्याट् अहो उताहो अतो अन्धो मा नु ननु हि तु नु इति इव चन घु वत आम् शप् कूकम् शुकम् सुकम् नुकम् नहिकं सत्यं ऋतं अद्धा नो हि नचेत् जातु अव अड अथ अहाह स्विद् बाह्या दिष्ट्या पशु पट् सह अनुषक् अङ्ग युत् ताजक् अरे अये अवे वद् वेद् वाद् हुम् चुम् कित् नमो क्षेम् किं सिं प्र परा अप सम् अनु अव निस् दुस् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप इति स्वरादयः आकृतिगणाः।

कस्कादिषु।१।१॥१८०॥

कस्कः, कौतस्कुतः, भ्रातुष्पुत्रः, शुनस्कर्णः सद्यस्कालः, मस्काण्डः, अयस्कान्तः, अयस्पिंडः, सर्पिष्कुण्डिका, धनुष्कपालं, बर्हिष्पात्रम्, यजुष्पात्रम् इति कस्कादिराकृतिगणः।

अंतक्षुभ्नादीनाम्।१।२॥५४॥

क्षुभ्ना तृप्नु आचार्यानी आचार्यभोगीन युवन् अहन् पक्वन् वन मन सर्वनाम नट नधन नद नृत्त नदी निवेश निवास अग्नि अनूप नन्दिन् नन्दन् नर्तन् गहन नदन। इति क्षुभ्नादिराकृतिगणः।

सर्वादेङ्यस्येः स्मिन्स्मात्स्मै।१।२॥१६६॥

सर्व विश्व उभ उभयट् अन्य अन्यतर इतर डतर त्व त्वत् नेम समं सर्वार्थे। पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोरपुरि। त्यद् तद् यद् अदस् इदम् एतद् एक द्वि युष्मद् अस्मद् भवतु किम् इति सर्वादिः।

रूढादिभ्यः । १ । ३ ॥ ४ ॥

रूढ, क्रोढ, आढ, व्यढ, अपिशल, अपरीक्षित, भूरीकं, भूलीकं, कपिष्ठल, शालाकल, शालासुधात्री' चोपयत्, चेटयत्, शिक्यत्, शीतयत् इति रूढादयः । बहुवचनादाकृतिगणोऽयम् ।

कुंभपद्यादौ । १ । ३ ॥ १० ॥

कुम्भपद, कलशपद, द्रोणीपद, सूचिपद, जालपद, एकपद, अष्टापद, शतपद, शीतिपद, सूत्रपद, सूत्रशीतिपद, मुनिपद, दासीपद गोधापद, सूकरपद, सुपद, विपद, निष्पद, अर्धपद, कुणिपद, कृष्णपद, शकृत्पद, इति कुम्भादिः ।

टिड्ढणञ्ञ्गौरादिभ्यः । १ । ३ ॥ १४ ॥

गौर । मत्स्य । मनुष्य । ऋष्य, हय, गवय, मुकय, शृङ्ग, शृङ्ग, घट, पट, द्रुण, द्रोण, हरीकरण, वटर, नकण, आमलक, कुवल, वदर, बिम्ब, तर्कार, शर्कर, सालद, शष्कुरड, गडुज, सुशव, पारदश, आनन्द, आढक, स्पाट, शष्कुल, सूर्य, सूत्र, सूष, यूष, मूषा, वन्तालका, सल्लक, मालत, धातक, वेतस्, वृस, अतस्, उमा, भङ्ग, मह, मठ, देह, लवण, मेद, सौधर्म, अयस्थूण, भौलिङ्गी, आलम्बी, आलर्क, औदाहमानी, भौरिकी, भौलिकी, आरट, कटेट, नाट, मूलाट, अधिकार, सुन्दर, मन्दर, मण्डल, पट, पिण्ड, नूर्द, सूर्द, गूर्द, पाण्ड, लोहाण्ड, कदर, कदल, तरुण, तलुन, अनडुही, अनड्वाही, आग्रहायणी, पृथिवी, विकल, विष्कल, आश्मरथ्या, काव्य, वैश्य, एहि, पर्येहि, अराल, चद, पिद, चण्ड, नद, भष, प्लव, चर, गर, तर, चोर, गहा, सूद, देव, पिप्पल, कोशातक, शम, हरीतक, करीर, इति गौरादिराकृतिगणः ।

क्रोडादिभ्यः । १ । ३ ॥ ३३ ॥

क्रोड, खुर, गोख, उख, पाल, सफ, गुड, इति क्रोडादिः। बहुवचनादाकृतिगणोऽयम्—तेन सुभगा, सुकरा ।

सपत्न्यादौ । १ । ३ ॥ ४१ ॥

सपत्न, समान, एक, वीर, पिण्ड, पुत्र, भ्रातृ इति सपत्न्यादिः ।

बह्वादेः । १ । ३ ॥ ६१ ॥

बहु, पद्धति, चण्ड, अराल, उपाध्याय, कमल, कृपण, विशाल, विशंकट, विकट, भरुज, कल्याण, उदार, पुराण इति बह्वादिः ।

अथ द्वितीयाध्यायः ।

तिष्ठद्ग्वादयः । २ । १ ॥ १५ ॥

तिष्ठद्गु वहद्गु आयतीगवं एते काले वर्तन्ते । खलेयवम्, खरेबुसम्, लूनयवम्, लूयमानयवम्, पूतयवम्, पूतमानयवम्, संहृतबुसम्, एते प्रथमान्ता काले देशे चेत्येके । समभूमि, समंभूमि, समपदाति, समंपदाति समयत्नम्, समानतीर्थम्, समानंतीरम्, अधोनाभम्, सुषमम्, विषमम्, निष्षमम्, दुष्षमम्, अपरसमम्, आयातिसमम्, पुण्यसमम्, पापसमम्, एकान्तम्, प्राह्णम्, संप्रति, असंप्रति, इज्–दंडादंडि, मुसलामुसलि, द्विदंडि, द्विमुसलि, इति तिष्ठद्ग्वादिः ।

पूर्वाद्यूनार्थैः । २ । १ ॥ ३८ ॥

पूर्व, अवर, सदृश, सम, विकल, निपुण, मिश्र, श्लक्ष्ण इति पूर्वादयः । आकृतिगणोऽयं पाठः तेन–धान्येनार्थः धा-

न्यार्थः । हिरण्यार्थः धान्यार्थी आत्मनापञ्चमः आत्मना षष्ठः एकेन द्रुव्यत्वादित्यादि सिद्धं भवति ।

चतुर्थी प्रकृतिस्वार्थार्थादिभिः । २ । १ ॥ ३८ ॥

अर्थ, बलि, सुख, हित, रक्षित, इत्यर्थादयः । आकृतिगणोऽयम् । तेन अश्वेभ्यो माषः अश्वमाषः शश्रूश्वमरवासभवनसुरं (?)हस्तिविदेत्यादि सिद्धं भवति !

याजकादिभिः । २ । १ ॥ ४४ ॥

याजक, पूजक, परिचारक, परिवेषक, स्नापक, अध्यापक उच्छादक, वर्तक, उद्वर्तक, होतृ, भर्तृ इति याजकादिः । आकृतिगणोऽयम् । तेन तत्प्रयोजको हेतुश्चेति सिद्धम् ।

सप्तमी शौण्डादिभिः । २ । १ ॥ ५२ ॥

शौण्ड धूर्त कितव सव्याल सव्य आयस व्यान सवीण अन्तर् अजिन पटु पण्डित कुशल चपल निपुण इति शौण्डादिराकृतिगणः । तेन कांपिल्यसिद्धः, आतपशुष्कः । स्थालिपक्वः । चक्रबन्ध इत्यादि सिद्धं भवति ।

पात्रेसमितादयः । २ । १ ॥ ५७ ॥

पात्रेसमिताः । पात्रेबहुलाः । अत्र पात्र एव समिता नान्यत्र, कार्ये इत्यवधारणात् क्षेपः । उदुम्बरमशकः । उदुम्बरकृमिः कूपकच्छपः । अवरकच्छपः कूपमंडूकः कुम्भमण्डूकः उदपानमंडूकः नगरकाकः आखनिकवकः अत्रोपमया क्षेपः । मातरिपुरुषः, अत्र प्रतिषिद्धसेवनेन । पिण्डीशूरः । गेहेमेही । गेहेनर्ती । गेहेनर्दी । गेहेविचिती । गेहेऽवचिती । गेहेव्यालः । गर्भेदृप्तः । गर्भेक्षीरः । गर्भेदूरः । गोष्ठेशूरः । गोष्ठेक्ष्वेरी । गोष्ठेविजिती । गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेटिरिटिरि । कर्णेचुरुचुरुः । अत्र निरीहतया क्षेपः इति पात्रेसमितादयः । आकृतिगणोऽयम्

व्याघ्रादिभिर्गौणैस्तदनुक्तौ । २ । १ ॥ ६४ ॥

व्याघ्र, सिंह, वृषभ, महिष, चन्दन, वृक वराह, हस्ति, कुञ्जर रुरु पुण्डरीक कुञ्जा पलाशिका इति व्याघ्रादिः । बहुवचनादाकृतिगणोऽयम् । तेन—वाग्वज्रः । मुखपद्मम् । पाणिपल्लवम् । करकिसलयम् पार्थिवचन्द्रः वानरश्चेत्यादि सिद्धं भवति ।

श्रेण्यादिः कृतादिभिश्च्वौ । २ । १ ॥ ६६ ॥

श्रेणि, ऊर, पूग, कुटुम, राशि, विचय, विशिय, निधन, कृपण, इन्द्र, देव, मुण्ड, भूत, श्रमण, वदान्य, अध्यापक, ब्राह्मण, क्षत्रिय पटु पंडित, कुशल, चपल, निपुण, इति श्रेण्यादिः। कृत, मत, मित, भूत, उप्त, समाज्ञात, समाम्नात, समाख्यात, संभावित, अवधारित, अवकल्पित, निराकृत उत्कृत, उपाकृत, अपकृत इति कृतादिः । बहुवचनादाकृतिगणोऽयम् । तेन—श्रेण्यास्थिताः ! श्रेण्याभूताः । श्रेण्यवबद्धाः इति सिद्धं भवति ।

कुमारः श्रमणादिना । २ । १ ॥ ७ ॥

श्रमणा, प्रव्रजिता, तापसी, कुलटा, गर्भिणी, बन्धकी दासी, अध्यापक, अभिरूपक, मृदु, पटु, पण्डित, कुशल, चपल, निपुण इति श्रमणादिः ।

मयूरव्यंसकादयः । २ । १ ॥ ७८ ॥

मयूरव्यंसकादयस्तत्पुरुषसमासा निपात्यंते व्यसकोमयूरः मयूरव्यंसकः विस्पष्टो विलिप्तो वा अंशो अस्येति व्यंसः । तत्तुल्यो व्यंसकः । व्यंसयति छलतीति वा व्यंसकः। एवं छात्रव्यंसकः । कुम्भः कंभोजः कंभाजमुंडः यवनमुडः । अत्र विशेष्यं पूर्वं । एहि ईड इति यस्मिन् कर्मणि वर्तते तदेहीडं ,

एहीयवं वर्तते । एहि वाणिजेति यस्यां सा एहिवाणिजा । अपेहिवाणिजा । प्रेहिवाणिजा । अपेहिद्वितीया । अपेहिप्रपूसा । अपेहि प्रकसं दूरमिति यस्यां सा अपेहिप्रकसा । एमि स्वागतमिति यस्यां सा एमिस्वागता । प्रोह कटमिति यस्यां सा प्रोहिकटा । प्रोहकपर्दा । उद्धमचूला । आहरचेला । आहरवसना । आहरवितता । भिन्नलवणा । पचलवणा । च्यन्तस्येति भावप्रधानाः समासाः । कृंधि विक्षिणोहीति यस्यां सा कृंधिविक्षिणा । उद्धरावसृजा । उद्धरोत्सृजा । उद्धमविरमा । उद्धपनिवसा । उत्पतनिपता । उत्पचनिपचा । आख्यातमाख्यातेन क्रियासातत्य इति क्रियासातत्ये समासः । असासत्यार्थमेषां पाठः । उदक् अवाक् उच्चावचं । उच्चैश्च नीचैश्च उच्चनीचं । आचितं चोपचितं च आचोपचं । आचितं च पराचितं च आचपराचं । निश्चितं च प्रचितं च निश्चप्रचं । न किंचन अकिंचनं । स्नाताकालकः । पीत्वास्थिरकः । भुक्त्वासुहितः । प्रोष्यपापीयान् । उत्पत्यपाकला । निपत्यरोहिणी । आ परकालक्रियाभावेऽपि क्त्वा निपात्यते । निषण्णा श्यामाजात निषस्श्यामा । अद्यपंचमी । इहपंचमी । अद्यद्वितीया । इहैकपद्यं हि कर्मणा बहुलमाभीक्ष्ये कर्तारं चाभिदधाति । बहिचैाडमित्याभीक्ष्ण्यमाह । जहिजोडः । उज्जहिजोडा उज्जहिस्तंबः । बहुलवचनान्नभवति—पचौदनं । आख्यातमाख्यातेन क्रियासातत्ये अश्नीतपिबतेति सततं वर्तते इति अश्नीतपिबता । अश्नीतपचता । पचतभृज्जता । खादतमोदता खादाचामा । आहरनिवपा । आवपनिष्कषा । पचप्रकला वर्तते । गतप्रत्यागतादयः गतं च तत् प्रत्यागतं च तत् गतप्रत्यागतं । यातानुयातं । महान् क्रयः अल्पा क्रयिकावयवः क्रयः क्रयिकावयवः क्रयिका । क्रयश्चासौ क्रयिका च

क्रयाक्रयिका समुदायः । एवं घटाघटिका । फलाफलिका । मानामानिका । अत्र व्यवस्थिते पूर्वोत्तरपदः समासः । शाकपार्थिवादयः शाकपार्थिवः । कुतपवासः सौश्रुतः कुतपसौश्रुतः । अजापययस्तौल्वलिः । अजातौल्वलिः । यष्टिप्रचारणो मौद्गल्यः यष्टिमौद्गल्यः घृताधानो राढिः घृतरूढिः । ओदनपाणिनिः । दध्युपसिक्त ओदनः दध्योदनः घृतोदनः । गुडसंमिश्रा धानाः गुडधानाः । गुडपृथुकाः । अश्वयुक्तो रथः अश्वरथः । दधिपूर्णो घटः दधिघटः । अत्र शाकपार्थिवादिषूत्तरपदलोपः । वृत्तौ शाकादिः शाकभोज्यादौ तत्परे वर्तते । इति विशेषणसमास इत्यपरे । यदि ह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धं । बहुवचनादाकृतिगणोऽयं तेन विस्पष्टं पटुः । विस्पष्टपटुः । पुना राजा पुनराजः । पुनर्गवः । पादाभ्यां ह्रियतेपादहारकइतिः । गले चोप्यत इति गलेचोपकः । इत्यादि विरहितलक्षणस्तत्पुरुषः शिष्टैः प्रयुज्यमानो मयूरव्यंसकादिरिति साधुर्मंतव्यः । निपतानादेव मयूरव्यंसकादीनां परमा मयूरव्यंसक इतिपदांतरेण समासो न भवति ।

समेऽर्धम् । २ । १ ॥ २६ ॥

अर्धच, गोमय, कषाय, कार्षापण, कुपत, कुसप, मान, कूर्च, मठ, सहस्र, सकल, नीड, कपाट, गूथ, शंख, यूथ, ध्वज, पद्मकबंध, गृह, सरक, कंस, दिवस, यूष, अन्धकार, दंड कमंडलु, मंड, द्वीप, भूत, द्यूत, चक्र, धर्म, कर्मन्, मोदक, सतमान, यान, नख, नखर, चरण, पुच्छ, दाडिम, हिम, रजत सक्तु, पिधान, सार, पात्र, घृत, सैंधव, औषध, आढक, चषक, द्रोण, खलीन, पात्रीव, षष्टिक, वारवाण, वारबाण, प्रोथ, कपित्थ (शुष्क), शाल, शील, शुक्र, (शुल्क) सीधु,

कवच, रेणु, ऋण, कपट, सीकर, मुसल, सुवर्ण, वर्ण, पूर्व, चमस, कर्ष, आकाश, अष्टापद, मंगल, निधन, निर्यास, जृंभ, वृत्त, पुस्त, वुस्त, क्ष्वेडित, शृंग, निगड, मूलक, (मूल) मधु, सूल, स्थूल, शराव, नाल, वप्र, विमान, मुख प्रगीव, शूल, वज्र, कटक, कंटक (कर्पट), शिखर, कल्क, वल्कल, नटमक, नाटमस्तक, वलय, कुसुम, तृण, पंक कुंडल, किरीट, कुमुद, अर्बुद, अंकुश तिमिर, आश्राय, भूषण, इक्कस, मुकुल, हस्वास, वसंत, तटाक, तडाग, पिटक, बिटंक, विडंग, पिण्याक, माष, कोष (श), फलक, दिन, दैवत, पिनाक, समर, स्थाणु, अनीक, उपवास, साक, कर्पास, विशाल, चषाल, चखाल, खंड, दर, विपट, रण, वल, मक, मृणाल, हस्त, आर्द्र, हल, सूत्र, ताण्डव, गाण्डीव, मण्डप, पटह, सौध, योध, पार्श्व, शरीर, फल, छल, पुर, पुरा, राष्ट्र, अंबर, बिम्ब, कुट्टिम, मण्डल, कुक्कुट, कुडय, ककुद, खण्डल, तोमर, तोरण, मञ्चक, पञ्चक, पुंख, मध्य, वाल, छाल, वाल्मीक, वर्ष, वस्त्र, वसु, देह, उद्यान, उद्योग, स्नेह, स्तेन, स्तन, स्वर, संगम, निष्क, क्षेम, शूक, क्षत्र, पवित्र, यौवन, कलह, मालक, पालक, मूषिक, मण्डल, वल्कल, कुज, कुञ्ज, लोहित, विहार, विषाण, भवन, अरण्य, पुलिन, दृढ, आसन, ऐरावत, शूर्पतीर्थ, लोमन्, (लोमश) लोह, दण्डक, तमाल, दारु, प्रतिसर, शपथ, धनुस्, वर्चस्क, तण्डक, प्रवाल, ओदन, तंडुल, अपराह्ण, शकट, अत्यर्धचादिः ।

प. त्र्यशूद्रानपुंसकाध्वर्युक्रत्वधित्यासन्नविलिङ्गनदीपूर्देशगवाश्वादि । २ । १ ॥ १०४ ॥

गवाश्वम्, गवाविकम्, गवैडकम्, अजाविकम्-अजैडकम्, कुब्जकिरातम्, पुत्रपौत्रम्, स्त्रीकुमारम्, श्वच

खडालम्, दासीमाणवकम्, शाटीपटीकम्, शाटीप्रच्छदम्, शाटीपट्टिकम्, उष्ट्रखरम्, उष्ट्रशशम्, मूत्रशकृत्, मूत्रपुरीषम् यकृन्मेदः, मांसशोणितम्, दर्भशरम् दर्भपूतीकम्, अर्जुनशिरीषम्, अर्जुनशिरीषकम्, तृणोलपम्, दासीदासम्, कुटीकटम्, भागवतीभागवतम्, एते गवादयः ।

राजदन्तादौ । २ । १ ॥ १०८ ॥

धर्मादिषु द्वन्द्वे । २ । १ ॥ ११४ ॥

राजदन्तः, अग्रवणम्, लिप्तवासितम्, नग्नमुषितम्, सिक्तसम्मृष्टम् । अवाक्लिन्नपक्वम्, मृष्टलुञ्चितम्, अर्पितोप्तम्, उप्तगाढम्, उलूखलमुसलम्, दृषदुपलम्, तण्डुलकिण्वम्, आरग्वायनबन्धकी, चित्ररथवाह्लीकम्, अवन्त्यश्मकम्, विष्वक्सेनार्जुनौ, शूद्रार्यम्, स्नातकराजानौ, अक्षिभ्रुवम्, दारगवम् । अर्थधर्मौ, धर्मार्थौ, अर्थशब्दौ, शब्दार्थौ अर्थकामौ, कामार्थौ, वैकारिमतम्, गोजवाजम्, गोपालधानीं पूलासम्, पूलासककरण्डम्, स्थूलपूलासम्, उशीरबीजम्, सिञ्जास्थम्, चित्रास्वाती, भार्यापती, दम्पती, जम्पती, जायापती, पुत्रपती, शिरोबीजम्, शिरोजानु, केशश्मश्रू, शिरोबीजम्, सर्पिर्मधुनी, मधुसर्पिषी, आद्यन्तौ, अन्तादी, गुणवृद्धी, वृद्धिगुणौ, आकृतिगणोऽयम् ।

भार्योढादिषु । २ । १ ॥ ११५ ॥

भार्योढः ऊढभार्यः अर्थगतः गतार्थः अग्न्याहितः आहिताग्निः पुत्रजातः जातपुत्रः श्मश्रुजातः जातश्मश्रुः शीर्षच्छिन्नः छिन्नशीर्षः तैलपीतः पीततैलः घृतपीतः पीतघृतः भार्योढादिराकृतिगणः तेन सिद्धं पीतदधिः ।

कडारादयः कर्मधारये । २ । १ ॥ ११६ ॥

कहार गडुल खञ्ज खोड काण कुण्ठ खलति गोर वृद्ध भिक्षुक पिङ्ग पिङ्गुल (पिङ्गल) तड तनु (जठर) बधिर मठर कञ्ज वर्बर कहारादिराकृतिगणः । बहुवचनमस्याकृतिगणतां द्योतयति ।

द्विदण्ड्यादि । २ । १ ॥ १३६ ॥

द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाह उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदि प्रोष्टपदि आढ्यपदि सपदि निकुच्यकार्णि संहतपुच्छि अन्तेवासिं इति द्विदंड्यादिः ।

शरदादेः । २ । १ ॥ १५१ ॥

शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विद् सद् दिश् दृश् चेतस् चतुर् त्यद् तद् यद् कियत् इति शरदादिः अत्र जयन्तपाठो नित्यार्थः ।

सस्समानस्य धर्मादिषु च । २ । १ ॥ १०८ ॥

धर्म पक्ष गंध देश कर जातीय ज्योतिस् जनपद रात्रि नाभि नाम गोत्रं रूप स्थान वर्ण वयस् वचन वंधु इति धर्मादयः । बहुवचनादाकृतिगणोऽयम् ।

सुसंख्याच्चाहस्त्यादेः पादस्य लुक् । २ । १ ॥ २०७ ॥

हस्तिन्, अश्व, कुद्दाल, काशित, कुरुत, कटोल, कटोलक, कटोल, कंटोलक, गंडोल, गंडोलक, महिला, दासी, गणिका, कुसूल, अज, जाल कपोत !

उरः प्रभृत्यृन्नित्याटः । २ । १ ॥ २२७ ॥

उरस्, सर्पिस्, उपानह्, पुमान्, अनड्वान् अयः, नौ, लक्ष्मी, दधि, मधु, शाली, अनर्थ, इत्युरः प्रभृतयः ।

वर्चस्कादिष्ववस्कादयः । २ । २ ॥ ३८ ॥

अवस्कर, अपस्कर, कुस्तुम्बुरु, अपरस्पर, आस्पद, आश्चर्य, प्रतिष्कश, प्रस्कण्व, हरिश्चंद्र, मस्कर मस्करी, कास्तीर, अस्तुरं, कारस्कर, पारस्कर, कारस्कर, रथस्या निष्कुरं किष्कु किष्किंधः किष्किंधा आस्कंध तस्कर वृहस्पति वनस्पति प्रायश्चित्य प्रायश्चित्तिः परश्शतादि भ्रातुष्पुत्र कौतस्कुत शुनष्कर्ण सद्यस्काल सद्यस्की कांस्कान सर्पिष्कुंडिकाधनुष्कपाल अयस्कांत नमस्कांड मेदस्पिंड भास्कर अहस्कर यजुष्पात्र बर्हिष्पल इत्यवस्करादयः ।

सर्वादिः सर्वा सुपि पुमान् । २ । २ ॥ ४० ॥

सर्वप्रियः, भवत्पुत्रः, एकक्षीरं, एकरूप्यं, एकमयं, तथा, यथा, तदा, तर्हि, सर्वतस्यति, भवत्कास्यति, एककास्यति, सर्वकभार्यः, विश्वकभार्यः, सर्वप्रियः, सर्वमनोज्ञः इति सर्वादिः ।

मृगक्षीरादिषु । २ । २ ॥ ४१ ॥

मृगक्षीर, मृगशाव, मृगपद, कर्कटांड, मयूरांड, काकांड, काकशाव, इति मृगक्षीरादयः प्रयोगतोऽनुसर्तव्याः । मृगक्षीरादिषु स्त्रीपूर्वपदं विवक्षितत्वात् सिद्धं वाचनिके तु पुंभावे एकान्तेन स्त्रीशब्दस्य निवर्तितत्वात् यत्रापि विशिष्टलिङ्गशब्दसंबन्धित्वेनार्थित्वं तत्रापि विवृत्तिः प्राप्नोति ।

भीरुष्ठानादिषु ॥ २ । २ । १५० ॥

भीरुष्ठान अंगुलिषंग सर्वपरमेष्ठिन् दुष्ठु सुष्ठु अपष्ठु गौरिसक्थ प्रतिष्णिका नौषेचिका दुन्दुभिषेचण अविहित लक्षणो दृश्यमानः षिर्भीरुष्ठानादिषु दृष्टव्यः ।

पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेणस् ॥ २ । २ । १६० ॥

कोटर मिश्रक सिध्रक पुरग शारिक सारिक इति कोटरादिः ।

द्व्यज्भ्योऽनिरिकादिभ्यो वृक्षौषधिभ्यो वा ॥२।२।१६२॥

इरिकावन तिमिरवन शमिरवन इरिवन कर्मारवन इतीकादिराकृतिगणः ॥

गिरिनद्यादीनाम् ॥ २ । २ । १६३ ॥

गिरिनदी गिरिनख गिरिनद्ध गिरिनितव चक्रनदी वक्रनितंब चक्रनितंब तूर्यमान माषोन आर्यायन आर्गयन गिरिनद्यादिराकृतिगणः ।

पृषोदरादयः ॥ २ । २ । १७२ ॥

पृषोदर, पृषोत्थान वलाहक जीमूत श्मशान उलूखल पिशाच वृती मयूर कपित्थ दधित्थ मुसल उलूक अश्वथ कुंकर दिवौकस आशीविष वलीवर्द महिष मनीषा विडाल मृणाल शृगाल दूदास दूणश दूदंख दूढ्यपुरोडाश वडवा शकंधु कर्कंधु कुलटा अवटः इति पृषोदरादयो यथाशिष्टोपदेशमनुगन्तव्याः॥

वहूचूशरादीनां मत्यनजिरादेः ॥ २ । २ । ८६ ॥

शर, अहि, कपि, मणि, मुनि, शुचि, वार्द्ध, वेट इति शरादिराकृतिगणोऽयम् । तेन वातावती शोभावतीत्यादि सिद्धम् । अजिर, खदिर, स्थविर, खवुर, पुलिन, कारंडव, चक्रवाक इत्यजरादिराकृतिगणः ॥

विल्वकां छस्य ॥ १ । ३ । ७८ ॥

विल्व, व्रीहि, मुद्ग, काण्ड, मसूर, गोधूम, इक्षु, वेणु, गवेधुका, कर्पासी, पाटली, कर्कंधु, कुटीर, वैतसक, कपोतकीया, कुञ्चकीयां, तक्षकीया ॥

द्वारादेः ॥ २ । ३ । ८८ ॥

द्वार, स्व, स्वर, व्यल्कश, स्वस्ति, स्वर, श्वन्, स्वकृत, स्वाम, मृदु, स्वन् इति द्वारादिः ॥

ञः स्वांगादेः ॥ २ । ३ । ८० ॥

स्वाङ्ग, व्यंङ, व्यद, स्वागत, स्वध्वर, स्वपति, व्यवहार, इति स्वांगादिः ॥

अनुशतिकादीनाम् ॥ २ । ३ । १०८ ॥

अनुशतिक, अनुहोड, असंवरण, अगार, वेणु, असिहत्या, अस्यहत्या, अस्यहेति वध्योग पुष्करसद् अनुहत् कुरुकत कुरुपंचाल उदयशुद्ध इहलोक परलोक सर्वलोक, सर्वपुरुष सर्वभूमि प्रयोग परस्त्री सूत्रनट् इत्यनुशतिकादयः । बहुवचनादाकृतिगणोऽयम् । अभिगममर्हन्त्याभिगमिका गुणाः । अधिदेवे भवं आधिदेविकं दुःखम् । आधिभौतिकम् । चतस्र एव विद्याश्चातुर्वैद्यमित्यादि सिद्धं भवति ।

धनादेः पत्युः ॥ २ । ४ । ५ ॥

धन अश्व शत गण क्षेत्र कुल गृह पशु सभा धन्वन् राष्ट्र धान्य प्राण इति धनादिः ॥

उत्सादेरञ् ॥ २ । ४ । १० ॥

उत्स, उदपान, विकर, विनद, महानद, महानस, हाप्रपाण, तरुण, तलुन, धेनु, पंक्ति, जगती, त्रिष्टुभ्, अनुष्टुभ्, जनपद, भरत, उशीनर, ग्रीष्म, पीलु, कुण, वृषदंश, भल्लकीय, रथन्तर, मध्यंदिन, वृहत्, महत्, महिमन्, सत्वत्, कुरु, पंचाल, इन्द्रावसान, उष्णिह् ककुभ्, सुवर्ण इत्युत्सादिः ॥

गोत्रे बाह्वादिभ्यः ॥ २ । ४ । २२ ॥

बाहु, उपबाकु, निबाकु, चाटाकु, उपबिंदु, वालुा, वालाका, वृकका, मूषिका, भगला, अगहा, दुवका, सुग्वी-

मित्रा, पुष्करसद्, अनुरहत, उदञ्, शिरस्, लोमन्, देवशर्मन्, अग्निशर्मन्, कुनामन्, सुनामन्, पंचन्, सप्तन्, अष्टन्, स्वधावत, माषशराविन्, क्षेमवृत्तिन्, शृ-खलसादि, खरसादिन्, नगरमर्दिन्, प्रकारमर्दिन्, अजीगर्तु, कृष्ण, युधिष्ठिर, अर्जुन सांपिगद, प्रद्युम्न, राम, संकर्षण, मध्यंदिन, सत्यक, इति बाह्वादयः । आकृतिगणोऽयं तेन सश्ठ्युरपत्यं साश्विः । जंघाया: जांघिः । संवेगिनः सांवेगिः विदस्य वैदिरित्यपि सिद्ध भवति ।

विदादेर्वृद्धेऽनृष्यान्तर्ये २ । ४ । ३ ॥ ३० ॥

विद, उर्व, कश्यप, कुशिक भरद्वाज, उपमन्यु, किलात, केदर्भ, विश्वानर, ऋषिषेण, ऋतभाग, स्दाकु, पृदाकु, हर्यश्व, पियक, अयस्तम्भ, कूचवार, शरद्वत, शुनक, धेनु, गोपवन, शिग्रु, विंदु, ताजव अश्वावतान, श्यामाक, श्यामान, श्यापर्ण, हरित, किंदास, वस्यस्क, अर्कलूष, वद्योग, वृष्णुवृद्ध, प्रतिबोध, थीतर, गविष्ठिर, निषाद, मधुर, अर्कजूष, शवर, अलस, किंदर्भ, कन्दर्प, शुनक्, भोगक भाजन, शमिक, श्यावलि, मठर, मृडाकु, स्पाकु, मृदु, पुनर्भु, पुत्र, दुहितृ, ननान्दृ, परस्त्री परशुं च इति विदादिः । मधुरशब्दस्य गोपवनादौ चैकेषां पाठोऽश्लुगर्थः परे हरितादेरञ इति फणार्थः । माठराद्युद्धित्यपि केचित् पठन्ति—माठर्यः ।

कुञ्जादेर्ञ्फः । २ । ४ ॥ ३१ ॥

कुञ्ज, व्रध्न, शङ्ख, भस्मन् गण, लोमन्, शठ शाक, शुण्डा शुभ, विपाश, स्कन्द, स्कम्भ इति कुञ्जादिः ।

नडादिभ्यः फण् । २ । ४ ॥ ३१ ॥

नड, चर, वर, वक, मुञ्ज, इतिक, इतिश, उपक, एक,

लमक, शलङ्कु, कलङ्कु, सटपल, वाजप्य, तिक, प्राण, नर, नर
सायक, दास, मित्र, द्वीप, पिंगर, पिङ्गल, किङ्कर, किङ्कल,
कातर, कातल, काश्यप, कुश्यप, काप्य, काल्य, काठ्य, अज,
मनुष्य, अमुष्य, अमुष्न, कृष्णारणौ, ब्राह्मणवाशिष्टे, अमित्र,
लिगु, चित्र, कुमार, क्रोष्टु, क्रोष्टं च। लोह, दुर्ग, स्तम्भ,
शिंशपा, अग्र, तृण, शकट, सुमनस्, सुमत, मिमत, ऋच्, जलं-
धर, अध्वर, युगंधर, हसक, दंडिन्, हस्तिन्, पिण्ड, पञ्चाल,
चमसिन्, सुकृत्य, स्थिरक, ब्राह्मण,चटक, वदर, अश्वल, खरप,
लङ्क, इंध, अस्त्र, कामुक, ब्रह्मदत्त, उदुम्बर, शोण, अलोह,
दण्डक, अग्निशर्मन् वृषगण इति नडादिराकृतिगणः।

हरितादेरञः । २ ४ ॥ ३४ ॥

हरितादिः विदाद्यन्तर्गणः ।

गर्गादेर्यञ् । २ । ४ ॥ ३४ ॥

गर्ग, वत्स, वाजासे, संकृति, अज, व्याघ्रपात्, विद्-
भृत, प्राचीनयोग, अगस्ति, पुलस्ति, चमस, रैभ, अग्निवेश,
शङ्ख, शट, शक, एक, धूम, अवट, मनस्, धनंजय, वृक्ष,
विश्वावसु, जरमाण, लोहित, शंसित, बभ्रु, वल्गु, मण्डु,
गंडु, शङ्कु, लिगु, गुहलु, मन्तु, मङ्क्षु, अलिगु, जिगीषु, मनु,
तन्तु, मनायी, सूनु, कथक, कंथक, ऋक्ष, तृक्ष, वृक्ष, तनु,
तरुक्ष, तलुक्ष, तण्ड, कपित, कपिकत कपि, कत, कुरुकत, अन-
डुह, कण्व, शकल, गोकक्ष, अगस्त्य, कण्डिनी, यज्ञवल्क, वर्ण-
वल्क, अभयजात, विरोहित, वृषगण, रहूगण, शण्डिल, वर्णक,
चणक, चुलुक, मुद्गल, मुसल, जमदग्नि, पराशर, जतूकर्ण,
जातूकर्ण, महित, मंत्रित, अश्मरथ, शर्कराक्ष, पूतिमाष,
स्थूरा, अदरक, अररक, एलाक, पिङ्गल, कृष्ण, गोलंद, उलूक,

तितिक्ष, भिषज, भिषज्, भिष्णज, भण्डित, भण्डित, दल्भ, चेकित, चिकित्सित, देवहू, इन्द्रहू, एकलु, पिप्पलु, वृहदग्नि, सुलोहिन्, सुलोमिन्, उक्थ, कुटीगु इति गर्गादिः ।

अश्वादेः फञ् । २ । ४ ॥ ४३ ॥

अश्व, अश्मन्, शङ्ख, शूद्रक, विद, पुट, रोहिण, खर्जूर, खजूर खञ्जार, वास्त, पिञ्जूल, भडिल, भण्डिल प्रकृत, रामोद, क्षान्त, काशतीक्षण, गोलाङ्क, अर्क, स्वर, स्फुट, चक्र, श्रविष्ठ, पविद्, पवित्र, गोमिन्, श्याम, धूम, धूम्र, वाग्मिन्, विश्वानर कुटाशप, आत्रेये । जन, जड, खड, ग्रीष्म, अर्ह, कित, विशप, विशाल, गिरि, चपल, चुप, दासक, वैल्य, वैल्व प्राच्य, धर्म्य, आनडुह्य, पुंसि जाते । अर्जुन, प्रहृत, सुमनस्, दुर्मनस्, मन, मनन, प्रान्त, ध्वन्, । आत्रेय भरद्वाजे उत्स, आतव, कितव, वद, धन्य, पाद, शिव, खदिर, इत्यश्वादिः ।

शिवाद्यृष्यन्धकवृष्णिकुरुभ्योऽपत्येऽण् । २ । ४ ॥ ४६ ॥

शिव, प्रोष्ठ, प्रोष्ठिक, चण्ड, जृम्भ, भूरि, दण्ड, कुठार, ककुभ् ककुभा, अनभिम्लान, कोहित, सुख, संधि, मुनि, ककुत्स्थ, कहोड, कोहड, कहूय, कहय, रोध, कपिञ्जल, कुपिञ्जल, खञ्जन, वतण्ड, तृण, कर्ण, क्षीरह्रद, जलह्रद, परिल, पथिक, विष्ट, हैहय, पार्षिका, गोपिका, कपिलिका, जटिलिका, बधिरिका, मञ्जीरक, मजिरक, वृष्णिक, खञ्जास, खञ्जाह, कर्मार, रेख, लेख, आलेखन, विश्रवण, रवण, वर्तनाक्ष, ग्रीवाक्ष, पिटप, विटक, पिटाक, तृक्षाक, नभाक, ऊर्णनाभ, जरत्कारु, पृथा, उत्क्षेप, पुरोहितिका, सुरोहितिका, सुरोहिका, आर्यश्वेत, अर्यश्वेत, सुपिष्ट, मसुरकर्ण, मयूरकर्ण खर्जूर, कर्ण कदूरक,

तक्षन्, ऋषिषेण, गंगा, विपाश, कस्क, लह्य, द्रुह्य, अयस्थूल अयस्थूण, तृणकर्ण, तृण, कर्ण, पर्ण, भलन्दन, विरूपाक्ष, भूमि, इला, सपत्नी, त्रिवेणी, त्रिवणम् इति शिवादिराकृतिगणः ।

शुभ्रादिभ्यः । २ । ४ ॥ ५३ ॥

शुभ्र, विष्ट, पुर, (विष्टपुर) ब्रह्मकृत, शतद्वार, शलायल, शलाकाभ्रू, लेखाभ्रू, लेखाभ्र, विकंसा, विकास, रोहिणी, रुहिणी, धर्मिणी, दिश, शालूक, अजबस्ति, शकंधि, विमातृ, विधवा, शुक, विश, देवतर, शकुनि, शुक्र, उग्रज्ञातल, शतल, बंधकी, सृकण्डु, विस्त्रि, अतिथि, गोदन्त, कुशाम्ब, मकष्टु, शाताहर, पवष्टुरिक, सुनामन्, लक्ष्मण श्याकयोर्वाशिष्टे । गोधा, कृकलास, अणीव, प्रवाहण, भरत, भारत, भरम, मृकण्डु, कर्पूर, इतर, अन्यतर, अलीढ, सुदन्त, सुदक्ष, सुवक्षस्, सुदामन्, कद्रु, तुद, अकशाय, कुमारिका, किशोरिका । कुठारिका, अम्बिका, जिह्माशिन्, परिधि, वायुदत्त, शकल, शलाका, खडूर, कुवेरिका, अशोका, गन्धपिङ्गला, खडोन्मत्ता, अनुदृष्टिन्, अनुदृष्टि, जरतिन्, बलीवर्दिन्, विग्र, बीज, जीव, श्वन्, अश्मन्, अश्व, अजिर, इति शुभ्रादिराकृतिगणः ।

कल्याण्यादेर्इन् च । २ । ४ ॥ ६२ ॥

कल्याणी, सुभगा, दुर्भगा, बंधकी, जरती, बलीवर्दी ज्येष्ठा, कनिष्ठा मध्यमा, परस्त्री, अनुसृष्टी, इति कल्याण्यादिः ।

गृष्ट्यादिचतुष्पाद्भ्यो ढञ् । २ । ४ ॥ ७४ ॥

गृष्टि, हृष्टि, हलि, वालि, विस्रि, कुद्रि, अजवस्ति, मित्रयु इति गृष्ट्यादिः ।

रेवत्यादेष्ठण् । २ । ४ ॥ ७४ ॥

रेवती, अश्वपाली, मणिपाली, द्वारपाली, वृकवञ्चिन्, वृकग्राह, दण्डग्राह, कर्णग्राह, कर्णग्रह, कुक्कुटाक्ष इति रेवत्यादिः ।

कुर्वादिभ्यः । २ । ४ ॥ ८० ॥

कुरु, शकंधु, शंकु, गर्गर, मञ्जुष, अजमार, रथकार वावदूक, पथिकारिन्, मतिमत्, पितृमत्, शलाका, केशिनी कपिहस्ति, पिण्डी, इन्द्र, जाली, ऐजी, धनुजी, दमोष्णीषि, गणकारि, कैशोरि, कापिञ्जल, वाक्, पितृमत्, कुटशलाका, शालाका, मुर, पुर, एरका, शुभ्र, अभ्र, दर्भ, केशिनी, शूर्पणाय, श्यावनाय, श्यावरथ, श्यावपुत्र, सत्यंकार वडभीकार, पथिकार, मूढ, शाक, शालिन्, शालीन्, कर्तृ, हर्तृ, इन, पिण्ड, रथकार, नापित, तक्षन्, इति कुर्वादिः ।

तिकादेः फिञ् । २ । ४ ॥ ८३ ॥

तिक, कितव, संज्ञा, बाल, शिखा, उरश, शाठ्य, सैंधव, यामुन्द, रूप्य, ग्राम्य, नील, अमित्र, कुरु, देवर, देर, तैतल, शैलाल, औरश, कौरव्य, खैरिक, चोपयत, चेतयत, क्षैतयत, शैकयत, वाजवत, चन्द्रमस्, शुभ्र, गङ्ग, वरेण्य, सुयामन्, आरद्ध, वाह्यक, खल्पक, वृष, लोमक, उदन्य, यज्ञ इति तिकादिः ।

शकादिभ्यः इलुक् । २ । ४ ॥ १०४ ॥

शक, यवन, कंबोज, चोल, केरल, आधारि, विधारि, उपधारि शकादयः प्रयोगगम्याः ।

द्वेरतोऽप्राग्भर्गादेः ॥ २ । ४ । १०७ ॥

भर्ग, करूश, केकय, कश्मीर, साल्व, सुस्थाल, उरश, कौरव्य इति भर्गादिः ।

यस्कादेर्गोत्रे ॥ २ । ४ । १०८ ॥

यस्क, लह्य, द्रुह्य, अयस्थूण, अयः स्थूल, तृणाकर्ण सदामत्त, कम्बलहार बहिर्योग पर्णाढक कर्णाढक, पिण्डीजङ्घ, बकसक्थ, श्रिश्रि, कुद्रि, अजबस्ति, मित्रयु, रक्षोमुख, जंघारथ, उत्कास, कटुक, मथक, (मन्थक) पुष्करसद्, पुष्करमद्, विषपुट, उपरि, मेखल, क्रोष्टुकमान, (क्रोष्टुपाद, क्रोष्टुमाय, शीर्षमाय, खरप, पदक, वर्षुक, भलन्दन, भडिल, भण्डिल भडित, भण्डित, एते यस्कादयः ।

यञञोऽगोपवनादिश्यापर्णान्तात् ॥ २ । ४ । ११० ॥

गोपवन शैयु (शिग्रु) बिन्दु, भाजन, अश्वावतान, श्यामाक, श्योमाक, श्यामक, श्यापर्ण, बिदाद्यन्तर्गणोऽयम्॥ इति गोपवनादिः ॥

वोपकादेः ॥ २ । ४ । ११४ ॥

उपक, लमक, भ्राष्ट्रक, कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, चूडारक, आडारक, गडुक, उदङ्क, संधायुक, अबन्धक, पिङ्गलक, पिष्ट, सुपिष्ट, (सुविष्ठ) मयूरकर्ण, खरीघङ्घ, शला, थल, पतञ्जल, पदञ्जल, कठेरणि कुशीतक, (कशकृत्स्न,) निदाघकलशीकण्ठ, दामकण्ठ, कृष्णपिङ्गल, कर्णक, पर्णक, जटिरक, बधिरक, जन्तुक, अनुलोम, अनुपद, प्रतिलोम, उपजघ, प्रतान, अनभिहित, कमक वराटक, लेखाभ्र, कमन्दक, पिञ्जूल, वर्णक, मसूरकर्ण, मदाघ, कवन्तक, कमन्तक, कदामत, दामकण्ठ । एते उपकादयः ॥

तिककितवादौ द्वन्द्वे ॥ २ । ४ । ११५ ॥

तिककितव, वङ्खभकुभ, उत्तरशलंकट, अग्निवेशदासेरुक, शार्पिङ्गलक, शकुत्स, उपकलमक, भ्राष्ट्रककपिष्ठल, कृष्णा-

जिन कृष्णसुन्दर, वक्रनखगुद्परिणद्धाः, लङ्काशान्तमुखाः, वड-रभंडीरथाः उपकलमकाः, पफकनरकाः, एते तिककितवादयः।

पैलाद्यविप्रात् ॥ २ । ४ । १२५ ॥

पैल, शालंकि, सात्यकि, सात्यकामि, राहवि, रावणि, औदञ्चि, औदव्रजि, औदमेधि, औदव्यज्ञि, औदमज्जि, औदभृज्जि, दैवस्थानि, पैङ्गलोदायनि, राहुक्षति, भौलिंगि, राणि, औदन्यि, औद्वाहमानि, औज्जिहानि, औदशुद्धि, तद्राज, इति पैलाद्याकृतिगणः ।

न तौल्वल्यादेः ॥ २ । ४ । १२७ ॥

तौल्वलि, धारणि, पारणि, रावणि, दैलीपि, दैवति, वार्कलि, नैवति नैवकि दैवमित्रि दैवयज्ञि चाफट्टकि वैल्वकि वैकि वैङ्कि आनुहारति, पौष्करसादि, आनुरोहति, आनुति प्रादोहनि नैमिश्रि प्राडाहति वान्धकि वशीति आसिनासि आहिंसि आसुरि नैमिषि आसिबंधिकि पौष्पि कारेणुपालि वैकर्णि वैहति इति तौल्वल्यादिः ।

भिक्षादेश्च समूहे ॥ २ । ४ । १२८ ॥

भिक्षा, गर्भिणि, क्षेत्र, करीष अगार, चर्मिन, धर्मिन्, सहस्र, युवति, पदाति पद्धति, अथर्वन् दक्षिणा, भरत, विषय स्रोत्र, इति भिक्षादिः ।

पाशादेश्च यः ॥ २ । ४ । १४२ ॥

पाश तृण धूम वात अंगार पाटल पोत गल पिटक पिटाक शकट हल नट वन इति पाशादिः ।

श्वखलादिभ्योऽञिन् ॥ २ । ४ । १४४ ॥

खल डाक कुटुम्ब शाक कुंडलिनि इति खलादिराकृतिगणः ।

हेमादिभ्योऽञ् ॥ २ । ४ । १६१ ॥

हेमन् रजत उदुम्बर निचुदार कोहितक विभीतक, दंडकार गविधु कापटलो श्यामाक इति हेमादिराकृतिगणः ।

शराद्येकाचः ॥ २ । ४ । १६३ ॥

शर, दर्भ, कुटि, सोम, तृण, वल्वज, इति शरादिः ।

प्लक्षादेरण् ॥ २ । ४ । १६१ ॥

प्लक्ष, न्यग्रोध, अश्वत्थ, इङ्गुदी, शिग्रु, रुरु, कक्षति, वृहति, इति प्लक्षादिः ।

न्यायादिपदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकाट्ठण् ॥ २ । ४ । १६४ ॥

न्याय, न्यास, लोकायत, पुनरुक्त, परिषद्, चर्चा, क्रमेतर, श्लक्ष्ण, संहिता, पदेपद, क्रमसंघाटा, वृत्तिसंग्रह, गण, गुण, आयुर्वेद, इतिहास, पुराण, द्विपदा, ज्योतिष, अनुसूत्र, लक्ष्य, लक्षण, अनुलक्ष्य, सुलक्ष्य, वसत, वर्षशरद्, हेमन्त, शिशिर, प्रथम, गुण, अनुगुण, चर गुण, अथर्वन्, अथर्वण, इति न्यायादिः ।

राष्ट्रेऽनंगादिभ्यः ॥ २ । ४ । १८८ ॥

अंग, वग, सुह्म, पुण्ड इत्यंगादयः प्रयोगगम्याः ।

भौरिक्यैषुकार्यादेर्विधभक्तम् ॥ २ । ४ १८४ ॥

भौरिकि, भौलिकि, वोपयत, चोदयत, वेदयत, चैकयत, शैकयत, क्षैतयत, काणेय, बालिकाज्य इति भौरिक्यादिः ।

ऐषुकारी, सारस्यायन, चान्द्रायण, ताक्ष्ययिण, द्व्याक्षायण, त्र्याक्षायण, औलायन, मौवीर, दासमित्र, दासमित्रायण, शौद्रकायण, शयण्ड, शयाण्ड, शायाण्डायन, खाडायन, वैश्वधेनव, तुण्डदेव, शत्यण्डी, इत्यैषुकार्यादिः ।

राजन्यादिभ्यो वुञ् ॥ २ । ४ । १९० ॥

राजन्य, दैवलायव, आवृतवात्रव, शालंकायन, वाभ्रव्य, जालन्धरायण, कौन्ताल, आत्मकामेय, अंवरीपुत्र, वैल्वन्, शैलूषज, उदुम्बर, तैतल, सम्प्रिय, दाक्षि, वर्णनाभ, इति राजन्यादिः । आकृतिगणोऽयं तेन अर्जुनायनकं, वैराटकं, त्रैगर्तकमित्यादि सिद्धं भवति ।

मध्वादेः ॥ २ । ४ । १९६ ॥

मधु, विस, स्थाणु, उष्ट्रि, इक्षु, वेणु, कुक्कुन्थव, शमी, शरीर, हिम, किशरा, शर्याण, भवत, यदि, किसरु, इष्टका, शुक्ति, आसुती, आसन्दी, शकली, वेद, पीड़ा, अक्षशिला, अभिषि इति मध्वादिः ।

रेन् सेल वुण्ड्येञ्यान्ढण्फण्फिञ्ठकछण् कण् ठठणोऽश्मप्रेक्षा तृणकाशारीहणसुपन्थिसुतंगमवलाहस्स खिपंथिकरणोत्करनडकृशाश्ववर्यवराह कुमुदाश्वत्थादिभ्यः ॥ २ । ४ । २०२ ॥

१ अरीहण (अरीरण) द्रुघण द्रुहण, भलग (भगल) उलन्द, किरण, सापरायण, क्रोष्ट्रायण, औष्ट्रायण, त्रैगर्तायन, मैत्रायण, भास्त्रायण, वैमतायण, वैमतायन, गौमतायन, सौगतायन, सौसायन, धैमतायन, सौसायन, ऐन्दायण कौद्रायण, (कौन्द्रायण) खाडायन शाण्डिल्यायन, रायस्पोष, विपथ विपाश उद्दण्ड, उपञ्चन, खाण्डवीरण, वीरण, काशाकृत्स्न, जाम्बवत, शिंशपा, रैवत (रेवत) विल्व, सुयज्ञ शिरीष बधिर, जम्ब खदिर, सुशर्मन् भगत्ट भलन्दन खण्डु कलन यज्ञमा, इत्यरीहणादिः ।

२ कृशाश्व, अरिष्ट, अरिश्म, वेश्मन्, विशाल लोमश, रोमश, लोमक, गौमक शबल कूट वर्चल सुवर्चल सुकर, सूकर प्रातर (प्रतर) सदृश पुरण पुराग सुख धूम अजिन विनत,

असच्छब्दस्य शून्यपरत्वे दोषमाह-अन्यथेति विरोधमुपपादयति-असत इति । निःस्वरूपस्य शक्तत्वलक्षणस्य नियतपूर्ववर्तित्वलक्षणस्य वा कारणत्वस्यासंभवादित्यर्थः । एतामेवानुपपत्तिमभिप्रेत्य छान्दोग्यश्रुत्याऽप्यसतः सदुत्पत्तिर्निषिद्धेत्याह-कथमसत इति । स्वमते भेदानुवादस्य भोगनिषेधशेषत्वेन वा आर्थिकाभेदशेषत्वेन वा अर्थवत्त्वमुक्त्वा परमते "तयोरन्य" इतिवाक्यसामर्थ्यादेवेश्वरे ऽनशनसिद्धेरनश्नन्निति वाक्यवैयर्थ्यमिति सदृष्टान्तमाह-त्वन्मत इति । अर्थसिद्धमेवानूद्यत इत्याशङ्क्याह-अनुवादस्येति । अस्यानुवादस्य निषेधाद्यशेषत्वाद्वैयर्थ्यं चेत्याह-तद्वैयर्थ्याच्चेति ।

अशनानशनलक्षणविरुद्धधर्मानुवादो भेदप्रत्यक्षदार्ढ्यायेति न वैयर्थ्यमित्याशङ्क्य स्वतःप्रामाण्यलते स्वत एव दृढत्वान्नान्यापेक्षेति दूषयति-न चेति । परतस्त्वपक्षेऽपि समर्थप्रवृत्तिलिङ्गेनैव भेदप्रत्यक्षदार्ढ्य सिद्धेर्न श्रुत्यपेक्षेत्याह-परत इति । अर्थक्रियादिलिङ्गेन व्यवहारसमर्थार्थविषयकत्वलक्षणप्रामाण्यसिद्धावपि त्रैकालिकबाधरहितार्थकत्वलक्षणप्रामाण्यं प्रत्यक्षादेः श्रुतिसंवादादेव सिद्ध्यतीत्याशङ्क्य तादृशभेदस्य प्रत्यक्षाद्यगोचरत्वाच्छ्रुतौ तद्वाचकपदाभावाच्च, तत्संवादकत्वायोगात्प्रबलश्रुतिविसंवादाच्च मैवमित्याह-न च प्रत्यक्षस्येति । भेदश्रुतेरनुवादकत्वमङ्गीकृत्यापि प्रत्यक्षादिदार्ढ्य हेतुत्वं न संभवतीति सदृष्टान्तमाह-अततपराभिरिति । रुद्रो रोदनवान् चेतनत्वात् चैत्रवदित्यनुमानसिद्धरोदनानुवादकत्वेऽपि 'सोऽरोदीत्'इति वाक्यस्य वाऽर्हेऽपि रजतदाननिषेधपरस्य यथा न तदनुमानप्रा-

माण्यदार्ढ्यहेतुता। एवं न भोगनिषेधादिपरया भेद-प्रत्यक्षादिदार्ढ्यसिद्धिरित्यर्थः। भेदश्रुतेर्भेदे उपक्रमादि-तात्पर्यलिङ्गाभावान्न भेदपरतेत्युपसंहरति-तस्मादिति।

भेदश्रुतेर्भेदतात्पर्यकत्वकल्पनेऽपि तव न किञ्चि-त्फलमस्तीति मन्वानो विकल्पयति-किं चेति।

किं चानुवादश्रुतेरनुवाद्यभेदसिद्धये तत्र तात्पर्यं कल्प्यते, किं वा तस्य वेदार्थत्वाय ?। नाद्यः। प्रत्यक्षादित एव तत्सिद्धेः। अतत्परादपि तदुपपत्तेश्च। न द्वितीयः। तस्य वेदार्थत्वाभावात्। न ह्यदृष्टार्थं तस्य वेदार्थत्वं कल्पनीयम्। असत्त्वनिवृत्तेस्तु प्रत्यक्षादिप्रमाणैरेव सिद्धत्वात्।

ननु न कल्प्यते तस्य वेदार्थत्वं, किं तु वेदजन्यज्ञानविषयत्वमनुभूयत इति चेन्न। न हि वेदजन्यज्ञानविषयत्वमात्रं वेदार्थत्वम्। रुद्र-रोदनादेरपि तत्प्रसङ्गात्। प्रयोजनवद्वेदजन्यज्ञा-नविषयार्थो वेदार्थ इति चेत् किं प्रयोजनवा-न्वेदजन्यज्ञानविषयश्च योऽर्थः स वेदार्थः, किं वा प्रयोजनवद्वेदजन्यं यज्ज्ञानं तद्विषय इति ?। नाद्यः। वायुक्षेपिष्ठत्वादेरपि प्रयोजनवत्त्वाद् वेदजन्यज्ञानविषयत्वाच्च। द्वितीये च न भेदो वेदार्थः। भेदज्ञानाधीनप्रयोजनस्य प्रत्यक्षादिभि-

रेव सिद्धेः । तद्विषयशाब्दज्ञानस्य निष्प्रयोजनत्वात् ।

आद्येऽपि किं तत्प्रमितिसिद्धये, उत प्रतीतिमात्रसिद्धये ? । प्रथमं दूषयति । नाद्य इति । द्वितीये तात्पर्याभावेऽपि रुद्ररोदनादिप्रतीतिवत्तत्प्रतीतिः सिद्ध्यतीत्याह-अतत्परादिति । द्वितीयस्त्वसंभवीत्याह-न द्वितीय इति । प्रमाणाभावप्रयुक्तासत्त्वशङ्कानिवृत्तये हि वेदार्थत्वं कल्पनीयम् । न च प्रत्यक्षादिनिश्चिते भेदेऽसत्त्वशङ्काऽस्तीत्याह-न ह्यदृष्टार्थमिति ।

ननु वेदजन्यज्ञानविषयत्वमेव वेदार्थत्वम् । तस्य च भेदेऽनुभूयमानत्वान्न प्रयोजनाभावेनाक्षेपो युक्त इति शङ्कते । नन्विति । तत्र यथाश्रुतमतिप्रसङ्गेन निराकरोति-न, न हीति । अतिप्रसङ्गपरिहाराय विशेषणान्तरं शङ्कते-प्रयोजनेति । प्रयोजनवत्त्वं किं विषयस्य विशेषणमुत ज्ञानस्येति विकल्पयति-किमिति । आद्यमर्थवादार्थेऽतिव्याप्त्या दूषयति-नाद्य इति । प्रयोजनवत्त्वादिति । वायोः क्षिप्रगामित्वस्य वृष्ट्यादिद्वारा ऽस्मत्प्रयोजनहेतुत्वादित्यर्थः । द्वितीये निष्पादितक्रिये कर्म्मणीत्यादिन्यायेन वेदजन्यज्ञानस्य प्रयोजनवत्त्वमेव नेत्याह-द्वितीय इति ॥

अनुवादस्यान्यपरत्वाभावे "य एवं विद्वान् पौर्णमासीं यजते" इत्यादिवाक्यमपि त्रिकविधायकं स्यादित्याह-अनुवादस्येति ।

अनुवादस्यापि तत्र तात्पर्ये विद्वद्वाक्यमपि विधायकं स्यात् । अनधिगतार्थबोधकस्यैव

प्रमाणत्वाच्च । तात्पर्यद्वयकल्पनागौरवाच्च । ततो नानुवादः स्वार्थपरः ।

एतेन प्रत्यक्षस्याप्रामाण्येन वेदस्यानुवादकताप्रामाण्ये च तेनैव भेदसिद्धिः । अनुवाद्यस्यासत्त्वे च नानुवाद्यविधेयसंसर्गसिद्धिरिति परास्तम् । असदनुवादस्यापि दर्शनात् । व्यावहारिकप्रमाणसिद्धत्वमात्रेणानुवादोपपत्तेश्च । तत्त्वावेदकप्रमाणसिद्धस्यैवानुवाद इत्यत्र निदर्शनाभावात् । अनुवाद्यस्य चासत्त्वं यदि तुच्छत्वम्? । तदसत् । प्रपञ्चस्य तुच्छत्वानभ्युपगमात् । यदि सद्विलक्षणत्वं?, तर्हि तद् भूषणमेव विधेयसंसर्गस्यापि तथात्वात् । अन्यथा प्रकृते निषेधाऽनन्वयप्रङ्गात् । तस्माद् द्वासुपर्णेति वाक्यं शुद्धजीवस्वरूपपरं न भेदपरमिति ॥

शब्दस्य जिज्ञासितार्थबोधकत्वेन प्रामाण्यं वक्तव्यम् । अन्यथा तद्वैयर्थ्यात् । जिज्ञासा च न निर्ज्ञात इति नानुवादस्य प्रामाण्यमित्याह-अनधिगतेति । किं च तव मते जीवेशभेदे जीवभोगे ईश्वरभोगे चानेकतात्पर्यकल्पनागौरवं वाक्यभेदश्चेत्यभिप्रेत्याह-तात्पर्येति । तत इत्युपसंहारः ।

एवं परमतं दूषयित्वा स्वमते उक्तदोषं परिहरति-एतेनेति । तत्र भेदप्रत्यक्षस्याप्रामाण्ये वेदस्य नानुवादकतेत्येतत्तावद् दूषयति-असदनुवादस्येति ।

सद्विलक्षणस्य भ्रान्तिप्रतिपन्नशुक्तिरजतादेरपि यद्रजतमित्याद्यनुवाददर्शनादित्यर्थः । किं च वेदस्यानुवादकत्वानुपपत्त्या प्रत्यक्षस्य प्रामाण्यमात्रं साध्यते उत तत्त्वावेदकप्रामाण्यम् ? । आद्यमिष्टमित्यभिप्रेत्याह-व्यावहारिकेति । द्वितीयं दूषयति। तत्त्वावेदकेति । अनुवाद्यस्य।सत्त्वे चेत्यत्रासत्त्वपदेन किं तुच्छत्वं विवक्षितमुत सद्विलक्षणत्वम् ? । आद्यमनङ्गीकारपराहतमित्याह-अनुवाद्यस्येति । द्वितीये तत्संसर्गस्य पारमार्थिकस्यासंभवेऽपि तत्समानस्वभावस्य संभवात्तस्यैवाद्वैतानुकूलस्य द्वैतव्यवहारसमर्थस्य तद्वाक्यार्थत्वं युक्तमित्यभिप्रेत्याह-यदीति । किं चात्र निषेधायैवानुवादः । निषेधश्च सत्यस्यानुपपन्न इति तस्मिन्मिथ्यात्वमावश्यकमित्याह-अन्यथेति । स्वमतस्य निरवद्यतामुपसंहरति-तस्मादिति ॥

समाने वृक्षे पुरुषो निमग्नो
अनीशया शोचति मुह्यमानः ॥
जुष्टं यदा पश्यत्यन्यमीश-
मस्य महिमानमेति वीतशोकः ॥

इत्युत्तरमन्त्रस्यास्मन्मत एवोक्तार्थोपपादकतया पूर्वमन्त्रेणैकवाक्यत्वं न परमत इत्यभिप्रेत्य तद्व्यावर्त्याशङ्कामाह-तदनन्तरमिति ।

तदनन्तरं च कथं भोक्तुर्जीवस्याशनादिराहित्यं स्वरूपम् । आगन्तुकस्य स्वरूपत्वायोगात् । न च तत्स्वाभाविकं जीवस्येदानीं भोगविशिष्टत्वात् । न हि दण्डविशिष्टस्तदा-

नीमेव तदभावविशिष्टो भवतीत्याशङ्क्य भोगस्य कल्पितत्वादधिष्ठानस्य कालत्रयेऽप्यारोप्यशून्यत्वाद् दार्ष्टान्तिकवैषम्यम् । न हि सर्पबुद्धिगृहीता रज्जुस्तदानीमपि सर्परहिता न भवतीत्यभिप्रेत्याह-समाने वृक्षे पुरुषो निमग्न इति । समाने बिम्बरूपजीवेश्वराश्रये शरीरे पुरुषो बुद्ध्युपहितो निमग्नः कर्तृत्वाद्यभिमानवान् । स्वरूपेणाप्रकाशान्निमग्नः । अत एव तत्कारणमोहावृतो ऽनीशया स्वस्यानन्दरूपेश्वरभावप्रतीत्या शोचति । विषयागमापायनिमित्तं दुःखमनुभवति ।

अनश्नन्नित्युक्तमशनादिराहित्यं किं जीवस्यागन्तुकमुत स्वाभाविकम् ? । आद्येऽपि तत्तस्य स्वरूपं धर्मो वा ? । नाद्यः । आगन्तुकस्य नित्यस्वरूपत्वायोगात् । न द्वितीयः । अनशनस्यागन्तुकधर्मत्वेऽशनस्य स्वाभाविकत्वप्रसङ्गात् । द्वितीये तत्किं स्वरूपं धर्मो वा ?। उभयथापि तस्याशनायादिमत्त्वानुभवविरोध इति शङ्कार्थः । अनशनस्य स्वाभाविकत्वमेवाङ्गीकृत्योक्तशङ्कापरिहारायोत्तरमन्त्र इत्यभिप्रेत्य परिहारप्रकारमाह-भोगस्येति । आरोपितविपरीताकारः स्वाभाविक एवेत्यत्रोदाहरणमाह- नहीति । मन्त्रं व्याचष्टे-समान इति । जीवेश्वराश्रय इति । तदभिव्यक्तिस्थानत्वात्तदाश्रय इत्यर्थः । निमग्नः सर्वगतस्य वस्तुतो निमज्जनासंभवादित्यभिप्रेत्य निमग्नसादृश्यमाह-स्वरूपेणेति । तत्र हेतुमाह-कर्तृत्वेति । अत एवेत्यस्य शोचतीत्य-

नेनान्वयः । निमग्नस्यापि ब्रह्मरूपत्वात्कथं शोक इत्याशङ्क्य विस्मृतकण्ठचामीकरवत्सतोऽपि ब्रह्मभावस्याननुभवाच्छोक इत्याह-अनीशयेति । तस्य स्वप्रकाशत्वादनुभवो वा कथमित्याशङ्क्याविद्ययाऽऽवृतत्वादित्याह-तत्कारणेति । कर्तृत्वादिस्तच्छब्दार्थः ।

नन्वनीशयेत्यत्रेश्वरत्वाभाव एव शोकहेतुतया प्रतीयते । स च जीवेश्वराभेदमतेऽनुपपन्न इत्याशङ्क्य भेदमतेपि तस्य शोकहेतुत्वमनुपपन्नमतिप्रसङ्गात् । तस्मादभेदश्रुत्यनुरोधाय तदप्रतीतिरेवानीशेत्याह-न चानीशेति ।

न चानीशया ईश्वरत्वाभावस्तृतीयया शोकहेतुत्वेन निर्दिष्टो, न तु तदप्रतिपत्तिरिति वाच्यम् । तथा सति तव मते तस्य मुक्तावपि सत्त्वेन तदापि तन्निमित्तशोकप्रसङ्गादस्मन्मत इदानीमपि तदभावादज्ञानमेवानीशा । अत एव जीवेश्वराभेदसाक्षात्कारात्तन्निवृत्तिमाह-जुष्टं कार्यं कारणसंघातैः सेवितम् । अविवेकिभिस्तदात्मतया गृहीतम् । यदाऽधिकारी अन्यं विवेचनात् शरीरत्रयात्पृथग्भूतं शरीरत्रयसाक्षितया ऽवगतं शोधिततत्वंपदार्थं ईशमीशं सन्तं पश्यति । ईश्वर इति स्वात्मानं पश्यति । साक्षात्करोतीति यावत् । तदाऽस्यात्मत्वेनावगतस्य महिमानमपरिच्छिन्नानन्दात्मतामेति इतिनान्त-

रीयकृतयाऽनर्थनिवृत्तिं च दर्शयति वीतशोक इति।

अथवा जुष्टं विवेकवैराग्यादिभिः प्रक्षालिताशयमलैः सनकादिभिर्नैरन्तर्येणात्मत्वेन सेव्यमानमन्यं कार्यकरणसंघाताद्विलक्षणमीशं यदा पश्यतीत्यर्थः। नतु पदातीतादन्यं पश्यति। तदा तस्य महिमानमाप्नोतीत्यर्थः। तथा सति जीवेश्वरतदुभयभेदानां ज्ञानं मुक्तौ हेतुः स्यात्। तथा च "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिज्ञानज्ञेयनियमश्रुतिविरोधः स्यात्।

यत एवाज्ञानमेव शोकहेतुरत एव तद्विरोधिज्ञानाच्छोकनिवृत्तिरुत्तरार्द्धे श्रूयत इत्याह-अत एवेति। जुष्टमितिपदं त्वंपदार्थविषयतया व्याख्याय तत्पदार्थविषयतयाऽपि व्याकरोति-अथ वेति। एवं स्वमतेन मन्त्रार्थमभिधाय पराभिमतमर्थं दूषयति-नत्विति। जीवप्रतियोगिकभेदवानीश्वर इति ज्ञानस्य मुक्तिहेतुत्वे तस्य भेदतद्धर्मिप्रतियोगितत्त्वावच्छेदकरूपानेकपदार्थविषयत्वं वक्तव्यम्। तथा च "तमेव विदित्वा ऽतिमृत्युमेति" "एकधैवानुद्रष्टव्यम्" "तमेवैकं जानथात्मानम्" "तमेव धीरो विज्ञाय" इत्यादिश्रुतिष्वात्ममात्रज्ञानस्यैव मुक्तिहेतुत्वावधारणधीविरोध इत्याह तथा सतीति॥

किं च पराभिमतार्थे मन्त्रशेषस्येश्वरस्य महिमानमेतीति यथाश्रुत एवार्थः, उत तत्समानमहिमानमिति?। आद्यस्त्वसम्भवीत्याह-किं चेति।

क्रमाक्रमक्रियाभावाद् बाधकात्प्रतिबन्धवित् ॥
बाधकं साध्यमाकार्षं लिङ्गमालिङ्ग्य वारयेत् ।
निरुछ्वासतया हन्त भावानां दुः खमापतेत् ॥
तद्वाध्यानुमावाध्याप्रत्यभिज्ञान वाक्षजम् ।
अनुमानेन नो बाध्यमिति वाच्यं विपश्चिता ॥
सूर्य्यादिवस्तुनोऽध्यक्षमनुमानेन बाधितम् ।
अर्थस्यासंभवे भावाच्च विशेषो द्वयोरपि ॥

बीजत्वाच्छालिबीजं च यवांकुरं यथाऽनुमानं बाध्यतेऽध्यक्षात् । प्रत्यभिज्ञापिते तथाप्यजनकत्वं यदन्त्यस्य ह्रत्यस्य यदा नयेत् ॥

एकत्वात्प्रत्यभिज्ञानमदाद्यऽध्यक्षबाधितम् ।
तदेवं प्रत्यभिज्ञायाःन वाध्यत्वमिह स्त्रिवः ॥
कारणदुष्टता याऽस्याःभ्रातेरिव कुतो भवेत् ।
नचैतस्याः प्रमाणत्वादन्योन्याश्रयदोषतः ॥
प्रत्यक्षतोऽपि नाक्षाणामअत्यक्षाणामदुष्टता ।
तस्याःप्रत्यक्षता या स्यात् प्रतिबन्धस्य हानितः ।
अनुमानत्वेऽपि नैवास्याः । कारणस्य विशुद्धता ॥
तदेवं प्रत्यभिज्ञायाः न प्रामाण्यमिति स्थितम् ।

अत्रोच्यते । किमिदमिन्द्रियान्वयव्यतिरेकानुविधायि स्थिरतरवस्तुग्राहि प्रत्यक्षं नानुभूयते, किं वानुभूयमानमपि निशीथिनीनाथद्वयावलंबि प्रत्यक्षवद्भ्रान्तमिति ? । तत्रानुभूयत इति ब्रुवाणो ऽनुभवेनैव निराक्रियते । द्वितीयेऽपि किं कदाचित् कुमुदिनीनाथैकग्राहि प्रत्यक्षवत्कस्यचिल्लक्षणिकग्राहि प्रत्यक्षमुत्पन्नं येनैतद्भ्रांतं स्यादिति । यच्चानुमानं क्षणिकत्वग्राहि तत्प्रत्यक्षे बाधितत्वादश्रावणशब्दद्दत्यनुमानवदप्रमाणत्वा-

द्बाधकमिति । किंच सत्त्वादेर्लिङ्गस्य व्याप्तिग्रहणं न प्रत्यक्षेण । परोक्षत्वात् क्षणिकत्वस्य । अनुमानेन ग्रहणेऽनवस्था, इतरेतराश्रयत्वं च प्रतिपाद्युक्तमिति । अथ सत्त्वमर्थक्रिया-कारित्वेन व्याप्तमर्थक्रियाकारित्वं च क्रमयौगपद्येनेति । तयोश्च व्याप्तिः प्रत्यक्षेणैव प्रतीयतइति नानवस्थेति । तथाहि—। क्रमेणाङ्कुरादिकं कार्यमुत्पाद्यमानमुपलभ्यते तदभावो यौगपद्येन । उभयनिषेधे केवलभूतलग्राहि प्रत्यक्षं प्रकारान्तराभावं निश्चापयति तेन क्रमयौगपद्याभ्यामर्थक्रिया-कारित्वस्य व्याप्तिं प्रतिपद्यत इति । न ते नित्यात् क्रमयौगपद्यं निवर्त्तमानमर्थक्रियाकारित्वलक्षणं सत्त्वमादाय निवर्त्तमानं क्षणिकेष्वेवावतिष्ठत इति व्याप्तिग्रहणं प्रत्यक्षमूलमिति । भवत्वे-कान्तनित्यात् क्रमयौगपद्यनिवृत्तिनिबन्धनार्थक्रियाव्यावृत्ति-स्तथा न सा क्षणिकेष्वेवावतिष्ठते । यथैकान्तनित्येष्वर्थक्रिया न संभवति तथैकान्तक्षणिकेष्वपीति । एतच्च पश्चात्प्रतिपाद-यिष्यते । तन्न गृहीतव्याप्तिकं क्षणिकानुमानं प्रत्यभिज्ञाबाध-कमिति । प्रतिपादयिष्यते च प्रत्यभिज्ञायाः प्रमाण्यमिति । तस्मादनुगतव्यावृत्ताकाराबुद्ध्यात्मकं वस्तु व्यवस्थापयति । एतदेवाह—। घटमौलिसुवर्णेष्विति ।

घटमौलिसुवर्णेषु बुद्धिर्भेदावभासिना ।
संविन्निष्ठा हि भावानां स्थितिःकात्र विरुद्धता ॥

भेदावभासिनेति । भेदमनुगतव्यावृत्तरूपमवभासितुं शीलं यस्याः सा तथा । तथाहि—सुवर्णमिति अनुगताकारा बुद्धिः, घट-श्च मुकुटश्चेति व्यावृत्ताकारा चानुभूयतइति । न चैतद्वाच्यं विरोधादेकं वस्तु नोभयरूपमिति । यत आह । संविन्निष्ठा हीति । यस्मादन्यत्रापि नीलपीतव्यवस्था संवेदननिबन्धनैव

तदिहापि विरोधेऽपि संवेदनमेव प्रमाणमिति । एवं प्रत्यक्षेणो-भयात्मकं वस्तु अनुभूयमानमपि यो मोहान्न प्रतिपद्यते तं प्रत्य-नुमानमुपन्यस्यते । सत्वाद्यथानुपपत्तेः सर्वं नित्यानित्यात्मकम् । यथा घटे एकान्तनित्येऽनित्यार्थक्रियाविरोधात् । सन्ति च सप्तपदार्थाः । न तावद्विशदतरदर्शनावध्ये यस्य सत्त्वस्य ज्ञानवा-दिमताश्रयणेनासिद्धत्वमुद्भावनीयम् । विज्ञानस्याप्यभावप्रसक्तेः । नापि सर्वशून्यवादिमताश्रयणेन । वादे तस्यानधिकारात् । सर्वा-भावे हि कस्मै किं केन प्रतिपादयेदित्यादेरुक्तत्वात् । नापि प्रति-ज्ञार्थैकदेशत्वेनासिद्धत्वम् । धर्मभेदस्याप्यभ्युपगमात् । नापि विकल्पविकल्पतो धर्मभेदः । तदा हि खरतुरगविषाणयोरपि गम्यगमकभावः स्यात् । कल्पिताच्च हेतोः कल्पितसाध्य-प्रसक्तेः । नाप्येकान्तेन भेदः । संबन्धासिद्धेः । समवायादि-संबन्धस्य निरासात् । न चात्र भेदाभेदप्रभाविदोषः । गुडना-गरसंज्ञितवस्त्वभ्युपगमात् । तदुक्तम् ।

गुडश्चेत्कफहेतुः स्यात् नागरं पित्तकारणम् ।
तन्मूलमन्यदेवेदं गुडनागरसंज्ञितम् ॥
मधुरं नहि सर्वं स्यात् कफहेतुर्यथा मधु ।
तीक्ष्णं वा पित्तजनकं यथा माराधिका मता ।

तदेवं भिन्नाभिन्ने वस्तुनि नासिद्धो हेतुः । नापि विरुद्धः । सपक्षे सद्भावात् । नापि विरोधाक्रान्तत्वान्नित्यानित्यात्मत्वं घटस्यासिद्धमिति वाच्यम् । तथाप्रतिभासनात् । संविन्निष्ठा हि विषयव्यवस्थितयः । तथा च छायातपयोरपि यद्येकत्राभासनं स्याद्विरोधेऽपि केन नानुमन्येत तथावस्थानम् । तथाहि—मृद्रू-पस्य ध्रौव्यसंज्ञितस्य सर्वावस्थानुयायिनो नित्यस्यानित्यत्वे-नोत्पादव्ययसंज्ञितेनैकात्मतया प्रतीतेः । अन्यथैकान्तभेदे मृत्सं-

स्थानयोरपरस्परात्मतया प्रतिभासनं स्यात् । नाप्येकान्ते-नैकत्वम् । अनुगतव्यावृत्तेन द्विरूपाया बुद्धेरुत्पादात् । तदुक्तम् ।

घटमौलिसुवर्णार्थिना स्रोत्पादस्थितित्रयम् ।
शोकप्रमोदमाध्यस्थं जनो याति सहेतुकम् ॥

न चात्रानुगताकारा बुद्धिः सविकल्पकत्वादप्रमाणमिति वाच्यम् । व्यवसायरूपत्वात्प्रमाणस्येत्युक्तत्वात् । तदेव देश-कालस्वभावाभेदेऽपि संख्यासंज्ञालक्षणकार्यभेदान्तरसिंहाकारमेव वस्तु । तदुक्तम् ।

नरसिंहं नररूपत्वान्न सिंहो नररूपतः ।
संज्ञाविज्ञानकार्याणां भेदाज्जात्यन्तरं हितम् ॥
नान्वयो भेदरूपत्वान्न भेदान्वयरूपतः ।
मृद्भेदद्वयसंसर्गवृत्तिर्जात्यन्तरं घटः ।

अन्यथैकान्तकूटस्थो न कश्चित् क्वचित्प्रवर्तेत इत्यप्रवृत्तिनिवृत्तिकं जगत् स्यात् । अन्यथा परिणामित्वमेव स्यात् । एकान्तक्षणिकत्वेऽपि प्रतिसन्धानप्रत्यभिज्ञाद्यभावेन स्वगृहेऽप्यागमनं न स्यात् । तस्मादनेकान्तात्मन्येव वस्तुनि व्यवहारोऽपि घटते । तदेवमुभयात्मकं वस्तु सिद्धम् । ननूक्तं विरोधाक्रान्तत्वात्कथमेतदिति ? । सत्यमुक्तं किंत्वयुक्तम् । तथाहि—। विरोधो द्विधा सहानवस्थानलक्षणः, परस्परपरिहारलक्षणश्च व्यावर्ण्यते तत्र किं ययोर्न कदाचिदेकत्रावस्थानं तयोः सहानवस्थानमुत किं यत्कालावस्थानेऽपि पश्चादनवस्थानेनेति ? । आद्ये पक्षेऽहिनकुलादीनां न विरोधः स्यात् । अन्यथा त्रैलोक्येऽप्युरगादीनामभावः स्यादिति । येन कस्यचिन्नरवनितादेर्विरोधो न स्यात् । तयोरपि कंचित्कालमेकत्र स्थित्वापगमात् । किंच वडवानलजलधिजलयोर्विद्युदम्बुदांभसोश्चिरतरमेकत्रावस्थाने

कथमयं विरोधः ? । अथ बलवता द्वितीयस्य निवर्त्तते तथाभावः । न स्वयं विश्लेषे किलाविकलकारणस्य भवतोऽन्यभावेऽभावाद्विरोधव्यवस्था । यथाशीतोष्णयोः । तदसत् । यतो बलवता किं क्षणिकस्य निवर्त्तनमुताक्षणिकस्य ? । क्षणिकस्यापि किमतीतानागतक्षणिकस्य उत वर्त्तमानक्षणिकस्येति ? । तन्नातीतानागतयोरविद्यमानत्वादेव कस्य केन निवर्त्तनम् । दैवरक्ता हि किंशुका अप्येकक्षणस्थायिनः । वर्त्तमानस्य केनचिन्निवर्त्तनं वारणं वा संभवति । अथ विरोधिनाऽसामर्थ्योत्पादनेन मन्दतरतमादिकार्योत्पत्तौ त्रिचतुरेषु क्षणेषु निवर्त्तते । ननु सामर्थ्यविनाशे निर्हेतुकं विना संवादो निरर्थकः स्यात् । अथ सहकारित्वमेव सामर्थ्यविनाशनम् । ननु क्षणस्यानुपकार्यत्वात्कथमसौ सहकारी ? । एककार्यकारणादिति चेत्तर्हि कार्यकारणभावमात्रमेव स्यान्निवर्त्यनिवर्त्यकभावः । सहकारिणो विरोधव्यवस्थायां न कस्यचिदयं न स्यात् । तन्न क्षणिकस्य निवर्त्तते सहावस्थानविरोधः । अथाक्षणिकस्य तस्यापि निवृत्तिः किं भिन्ना स्यादभिन्ना वा ? । अभिन्ना निवृत्तिकरणत एव कृतः स्यात् । तथा च कारणमेव स्यान्न विरोधः । भिन्ना चेत् । तस्या एव कारणं स्यात्, न कश्चिन्निवर्त्तको नाम । किञ्च भवतु कथंचिच्छीतोष्णादीनां विरोधस्तथाप्ययं नित्यानित्ययोर्न सम्भवति । तथा हि—किमविकलकारणं नित्यत्वमनित्यत्वेन व्यावृत्तमुतानित्यत्वं नित्यत्वेनेति ? । न तावदाद्यः पक्षः । यतः कारणवत्त्वे नित्यत्वमेव न स्यात् । अथाविकलकारणं अविचलितस्वरूपं तस्यापि न केनचिन्निवर्त्तनं निवर्त्तने वानित्यत्वमेव न स्यात् । नापि क्षणिकत्वम् । किंच प्रतिक्षणविसरारुषु भावेषु तदेव किंचिन्नित्यत्वं नास्ति येन क्षणिकत्वं व्याव-

र्यते। सद्भावे वा कथं सहावस्थितिविरोधइति । अथ परस्परपरिहारस्थितिलक्षणो नित्यत्वयोर्विरोधः स हि किल स्वरूपनिष्ठो व्यावर्यते। नैकं वस्तु द्विरूपं संभवति इति। तदसत्। यत एकस्यापि प्रस्तरादेः शीतस्पर्शस्य क्षतः कालान्तरेणोष्णस्पर्शस्य दर्शनात्। न च तद्वस्तु भिन्नम्। विरुद्धोभयपर्यायात्मतया प्रत्यभिज्ञायमानत्वात्। अथैकविरोधोभयरूपता नोपलभ्यते। वह्नेरेकस्यापि उष्णानुष्णस्वभावस्य दर्शनात्। तथाहि स्पर्शरूपतया वह्निरुष्णो न रूपतया। अन्यथा तदवलोकने जननयनदहनमापद्येत। न च स्पर्शरूपपरमाणूनां परस्परपरिहारेणावस्थानान्नैकमुभयरूपमिति वक्तव्यम्। यत्तत्तथापरिणते वह्निद्रव्ये न केवलापरे परमाणवो विद्यन्ते। न चेन्द्रियान्तरकल्पनावैफल्यदोषो वाच्यः। कथंचिद्भेदस्याभ्युपगमात्। किंचैकस्मिन्नात्मनि विरुद्धधर्माधर्मयोरेकसंबन्धेनावस्थाने कथमयं विरोधः। अथ कर्मरूपतया तयोरेकत्वात् तथावस्थानेऽपि न युगपद्विरुद्धफलजनकत्वम्। तदप्यसत्। तस्यापि दर्शनात्। तथाहि—पादे व्रणच्छेदकर्मणि दुःखोत्पादेऽपि मुखे कर्पूरादिना सुखोत्पादस्यापि दर्शनात्। किंचायं नित्यानित्ययोः सामान्यलक्षणयोः सतोर्विरोध उत सामान्यलक्षणस्वलक्षस्वलक्षणयोः?। अहोस्वित्स्वलक्षणयोः किमारोपितयोरथारोपितानारोपितयोरिति?। न तावदाद्यपक्षः। एकत्रैवानेकसामान्यसद्भावाभ्युपगमात्। नापि द्वितीयः। यतः।

> निर्विशेषं न सामान्यं भवच्छशविषाणवत्।
> विशेषोऽपि च नैवाऽस्ति सामान्येन विना कृतः।

नापि तृतीयः। रूपरसादीनामेकत्र सद्भावदर्शनात्। चतुर्थे

तु खरतुरगविषाणयोरिव को नाम विरोधः । अन्यथारोपितानारोपितयोर्भावाभावयोः परस्परपरिहारस्थितलक्षणो विरोधः । तथाहि—नित्यत्वं निवृत्तिस्तुच्छरूपाऽनित्यत्वं, अनित्यत्वनिवृत्तिश्च नित्यत्वं, तयोः कथं न विरोधः। तदप्यसत्। यतो न तुच्छरूपोऽभावः प्रमाणगोचरचारीति प्रबन्धेन प्रतिपादितः कथं तर्हि भावाभावात्मकं वस्तु । नैतदस्ति। यस्मात्परदेशाद्यपेक्षयाभाव एवाभावः। नापि प्रागभावप्रध्वंसाभावविशेषणसत्तासमवायात्मकः । सत्तया सह संबधासिद्धेः । स हि समवायलक्षणोऽभ्युपगम्यते तस्य च पूर्वमेव निरस्तत्वादिति । किं च सत्तासमवायादनित्यतायामात्मादिष्वपिऽनित्यत्वप्रसङ्गः। यथा च समवायोऽन्यद्वाऽएकान्तनित्यत्वं वस्तु न संभवति । तथाग्रे प्रतिपादयिष्यामः॥ तन्न कश्चिद्भावव्यतिरिक्तोऽभावोऽस्ति। येन विरोधः स्यात् । ततः सिद्धो नित्यानित्यात्मको घटः तत्सिद्धौ च न विरुद्धो हेतुः । नाप्यनैकान्तिकः ? । विपर्यये बाधकप्रमाणसद्भावात् । तथाहीदं सत्वमर्थक्रियांकारित्वेन व्याप्तं सा च कूटस्थनित्यादनित्याच्च व्यावर्त्तमाना सत्वमादायैव निवर्त्तते । तेनोत्पादव्ययध्रौव्यवत्येव वस्तुनि सत्वमवतिष्ठते । न च सत्तासम्बधेन सत्वं वाच्यम्। सत्तादीनामसत्वप्रसङ्गात् । अपरसत्ताभ्युपगमे वानवस्था । तदव्यापिलक्षणमतिव्यापि च । शशविषाणादीनामपि सत्वप्रसङ्गात्। तेषां सकलशक्तिरहितत्वान्न सत्तासम्बन्ध इतिचेत्तर्हि शक्तिरेव सत्वे लक्षणं किं सत्तासम्बन्धेन । इतरेतराश्रयत्वं च स्यात् । तथाहि-। सति सत्ता सम्बन्धे सत्वं, सति सत्वे सत्तासम्बन्धः । सा च कूटस्थस्य न विद्यते। तथाहितन्नित्यं क्रमेण वा शक्तिमत्स्यात्, यौगपद्येन वा ? । न तावत्क्रमेण सकलसामर्थ्योपपन्नस्यैकक्षण एव समस्तकार्यकारणप्र-

सङ्गात्। सहकार्यपेक्षा च समर्थस्य न विद्यते। असामर्थ्येवा पूर्वमसमर्थस्य सहकारिसंनिधौ सामर्थ्योत्पत्तौ परिणामित्वप्रसङ्गः। सहकारिणा सामर्थ्यमुत्पाद्यमानं ततो भिन्नमभिन्नं वा स्यात्?। अभेदपक्षे कूटस्थनित्यताहानिः। भिन्नकरणे तस्मादेव कार्योत्पत्तिः स्यात्, न नित्यात् इत्यादिसौगतैरेवात्र विजृम्भितं तदिह नोच्यते विस्तरभयात्। तन्न क्रमेणकर्तृत्वम्। नापि यौगपद्येन। प्रथम एव क्षणे कृतत्वाद्द्वितीयादिषु न किञ्चित्कर्त्तव्यमस्तीति सत्वसामर्थ्यरहितस्य व्योमोत्पलस्येवासत्त्वं स्यात्। पुनःकरणे वा क्रमपक्ष एव स्यात्। तत्रचोक्तो दोषः। न च कृतकरणमस्ति। तन्न यौगपद्येनापि करोति। न वापरं क्रमाक्रमरूपं प्रकारान्तरमुपेयते। अस्मन्मतानुप्रवेशप्रसङ्गात्। तन्न कूटस्थनित्यं किञ्चित्करोति। नाप्येकान्तक्षणिकम्। तदपि हि क्रमेण वा कुर्याद्यौगपद्येन वा?। न तावक्रमेण। स हि देशक्रमो वा स्यात्, पिपीलिकानामिव कालक्रमो वा यत्र। नडादीनामिव तत्र नैकस्मिन् देशे कार्यं कृत्वा, देशान्तरे क्षणिकं वस्तु करोति। तत्रैव तस्य ध्वस्तत्वात्। नाप्येकस्मिन् क्षणे कृत्वा द्वितीयेऽपि दधाति। क्षणिकत्वहानिप्रसङ्गात्। अथ नायं क्रमः सौगतैरुपेयते किं तर्हि कार्यन्तरासाहित्यं कैवल्यमङ्कुरादेर्यौगपद्यमपि कार्यान्तरसाहित्यम्। तथाहि—लोको वदति क्रमेण यवाङ्कुरा उत्पन्ना यौगपद्येनैवेति?। ननु कल्पनामात्रमेतत्। वस्तुनः पुनः सौगतानां द्विविधं कारणं सामग्रीलक्षणं सहकारिलक्षणं च। तत्र यदि सामग्रीलक्षणं कारणमाश्रित्य क्रमयौगपद्यमिष्यते तन्न संभवति। तत्र यौगपद्याभावात्। एकमेव हि कार्यं सामग्री जनयति नापरम्। तन्न कार्यान्तरसाहित्यलक्षणं यौगपद्यं तत्रास्ति। नापि सहकारि

कारणमभ्युपगम्य तथा भावव्यवस्था। तत्र हि यौगपद्यस्यैव सम्भवति। तथा हि–। तानि स्वं स्वमुपादेयकार्यमुपादानभावेन परस्परकार्यत्वे सहकारिभावेन जनयन्तीति कुतः क्रमः। तत्परापेक्षया कल्पित एव क्रमयौगपद्यभावः। न च निरंशं वस्तु अनेककार्यजनक संभवति। सांशताप्रसङ्गात्। न चोपादानसहकारिभावः संभवति। तथाहि–द्वितीयांशभावाभावादेकमेव जनयेत्। न चैकं जनकमुपेयते। तन्न क्षणिकपक्षेऽपि क्रमयौगपद्यक्रियासंभवः। किं च क्षणिकं वस्तु सव्यापारं वा कार्यं कुर्यान्निर्व्यापारं वा?। निर्व्यापारस्य करणे खपुष्पस्यापि कार्यक्रिया स्यात्। व्यापारवत्त्वे प्रथमे क्षणउत्पद्यते द्वितीये व्याप्रियत इति क्षणिकत्वहानिः। अथ प्राक्कालभावित्वमेव व्यापारो नापरस्तर्हि तत्क्षणभाविनां जगत्क्षणानामपि कारणत्व स्यात्। तथा च सूत्ररूपतापि घटस्य स्यात्। न चोपेयार्थिनां नियतकारिणोपादानं स्यात्। न चानन्तरक्षणविनष्टे चिरतरविनष्टे वा कश्चिद्विशेषोऽस्तीति चिरतरविनष्टमपि कुर्यात् इति मृतेन कुक्कुटेन वासितव्यम्। ततो घटरूपतया परिणमन्नेव मृत्पिण्डस्य कारणत्वं न प्राग्भावः। न चानुसन्धातारमात्मानमन्तरेण कार्यकारणभावप्रतीतिः। तथाहि–कारणविषयेण प्रत्यक्षेण कारणमेव प्रतिपन्नं कार्यं कार्यविषयेणापि कार्यमेव न कारणम्। अथ निर्विकल्पकदर्शनद्वयानन्तरमिदमस्मादुत्पन्नमित्येवमाकारं स्मरणज्ञानमुदेति तेन तथाभावग्रहः। तदप्यसत्। स्मरणं हि अनुभवानुसार्येवोत्पद्यते। न चानुभवद्वयेन कार्यकरणभावो ऽनुभूतः। येन तथास्मरणं स्यात्। आत्मनश्चाभावे कस्य तत्स्मरणं स्यात्। तन्न क्षणिकपक्षेऽपि कार्यकारणभावप्रतीतिः। किं च कार्यं सदुत्पद्यते उतासत्?। यदि

सतिकमुत्पद्यतेऽथासन्किं न व्योमोत्पलम् । अथ प्रागभावभावान्न व्योमोत्पलस्योत्पत्तिः । ननु प्रागभावोऽपि तस्य किमिति नास्ति । उत्तरकालमभावादितिचेत् । इतरेतराश्रयत्वम् । तथाहि—यस्योत्तरकालमुत्पत्तिस्तस्य प्रागभावो यस्य प्रागभावस्तस्योत्पत्तिरिति । तन्नैकान्तिकनित्येऽनित्ये वाऽर्थक्रियात्वमस्तीति नित्यात्मन्येवार्थक्रियाकारित्वेन सत्त्वम् । तथाहि=स एव मृत्पिण्डो घटरूपतया परिणतइति प्रतीतिः । यद्रूपं हि कारणमुपलभ्यते तद्रूपमेव कार्यमपि । तदेव द्रव्यं तेन पर्यायेण परिणमदुपलभ्यते, नात्यन्तविभिन्नमभिन्नं वा घटादि। कार्यं प्रतीयते । तदुक्तम्—द्रवति गच्छति तांस्तान् पर्यायानिति । द्रव्यमेवमान्तरङ्गं बहिरङ्गाः पर्यायाः । ननु द्रव्यस्य कुतः सत्वसिद्धिः ? । प्रत्यभिज्ञाप्रत्यक्षादिति ब्रूमः । तथाहि । यदबाधितबोधगोचरचारि तत्सत् । यथा स्तम्भकुम्भादि अबाधितप्रत्यभिज्ञाप्रत्यक्षगोचरचारि पूर्वोत्तरपर्यायव्यापि द्रव्यम् । भेददर्शनमपि भेदवादिभिरिन्द्रियान्वयव्यतिरेकविधायितया प्रत्यक्षमुपेयतेऽ तोऽभेदाध्यवसायिन्यपि पूर्वदर्शनाहितसंस्कारप्रबोधप्रभवस्मरणसहायेन्द्रियान्वयव्यतिरेकानुविधायिनी प्रत्यभिज्ञा कथं न प्रत्यक्षम् । न चाद्यं वर्तमानकालभाविनिप्रत्यासीदत्यतस्तदनुसारिणी धीस्तत्रैव प्रवर्त्तितुमुत्सहते पूर्वन्नेति वाच्यम् । एवं हि विशददर्शनावसेयास्तम्भादयोऽपि न प्रत्यक्षाः स्युः । तथाहि—अर्वाधीनावयवसंबन्धेन्द्रियजनितप्रत्यक्षावसेयमध्यपरावयवादिव्यापि स्तम्भादिद्रव्यं चार्वाधीनावयवमात्रपर्यवसितप्रत्यक्षं न स्यात् । परमाणुरूपावयवानां वाऽप्रत्यक्षत्वात् । ततः सकलप्रमाणशून्याग्राह्यतापद्येत । अथ विततदेशव्यवस्थिताः परमाणवः प्रतिभासविषयाः । तदसत् । सान्त-

राणां तेषामप्रतिभासनात्। संयोगात्तथाभासनमिति चेत्। न तेषां संयोगः किमेकदेशेन, सर्वात्मना वा? । नैकदेशेन। निर्देशत्वात्परमाणूनाम्। नापि सर्वात्मना। पिण्डस्याणुमात्रत्वप्रसङ्गात्। तन्न परमाणवः प्रतिभासविषयाः, किं त्वेकपरिणामपरिणतं स्तम्भादि द्रव्यं प्रतिभासगोचरचारि तद्यथा अर्वाचीनावयवसम्बन्धेन्द्रियजनितप्रत्यक्षेण विभिन्नदेशव्यवस्थितपरोक्षावयवव्यापि पुरोऽवस्थितवस्तु प्रतीयते, तथा वर्त्तमानपर्यायसम्बन्धेन्द्रियात्स्मृतिसहायादुत्पन्नेन प्रत्यभिज्ञाप्रत्यक्षेणातीतदेशकालादिव्यवस्थितानेकपर्यायव्याप्येकं प्रत्यक्षमिति न कश्चिद्दोषः। न च क्षणिकानुमानबाधितत्वात्प्रत्यभिज्ञानं भ्रान्तमिति वाच्यम्। अन्यथा विशददर्शनं हिमांशुधवलिमानं परिच्छिदद्दुत्पद्यमानं नीलं निशीथिनीनाथबिम्बं सरवान्नीलोत्पलवदित्यनुमानमनुभवन्न प्रमाणं स्यात्। अथास्य प्रत्यक्षबाधितत्वान्न प्रामाण्यम्। क्षणिकानुमानस्यापि प्रत्यभिज्ञाप्रत्यक्षबाधायां समानम्। अथ प्रत्यभिज्ञानस्य भ्रान्तत्वात्क्षणिकानुमानस्य प्रमाणता तर्हीतरेतराश्रयत्वम्। सति हि प्रत्यभिज्ञानस्य भ्रान्तत्वेऽस्य प्रमाण्यं, सत्यस्य प्रमाण्ये प्रत्यभिज्ञाभ्रान्ततेति। न च प्रत्यक्षमनुमानेन बाध्यते। तत्पूर्वकत्वादनुमानस्य। अन्यथानुमानपूर्वकत्वेऽनवस्था स्यात्। ततः सिद्धमबाधितं प्रत्यभिज्ञाप्रत्यक्षम्। किञ्च यदि नियतव्यक्तिसंबन्धेन्द्रियजनितप्रत्यक्षं नातीतादिपर्यायात्मकद्रव्यग्राहि स्यात् तद्यदेतत्सुप्रसिद्धं वह्न्यनुमानं तदपि न स्यात्। तद्धि महानसादिव्यवस्थितधूमध्वजसंबन्धेन्द्रियजनितप्रत्यक्षेणाशेषत्रैलोक्योदरविवरवर्त्तिधूमवह्निविशेषव्यवस्थिततिर्यक्सामान्ययोर्व्याप्तिग्रहणे सति वर्त्तते। तच्चेन्द्रियसम्बद्धवस्तुमात्रविषयप्रत्यक्षतायां न स्यात्। तस्माद्यथा-

प्रत्यक्षं व्याप्तिग्राहकमशेषविशेषात्मकतिर्यक्सामान्यग्राहि तथा प्रत्यभिज्ञाप्रत्यक्षं ऊर्ध्वतासामान्यग्राहीति । न च लूनपुनर्जातकेशादिषु एकत्वमन्तरेणाप्यनुमानं भ्रान्तमिति वाच्यम् । तत्रापि सामान्यस्य सत्वात् । न चैकत्रभ्रान्तं प्रत्यक्षं सर्वत्र भ्रान्तमिति वाच्यम् । तस्मात्सिद्धं नित्यानित्यात्मकं वस्तु । तत्सिद्धौ च सदसदात्मकं सामान्यविशेषात्मकं मुत्पादव्ययध्रौव्यात्मकं च सिद्धम् । विशेषोत्पादविनाशानामनित्यत्वेऽन्तर्भावात् । अन्येषां नित्यत्व इति । न चैतद्वाच्यम् । सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः । चोदितो दधि खादति । किमुष्ट्रेनाभिधावति । पर्यायनयस्याऽप्यभ्युगमात् । अत एव सप्तभङ्गी सिद्धति । तथाहि—यदा द्रव्यस्य प्रधानविवक्षा तदा स्यादस्तीति कथ्यते । यदा पर्यायाणां तदा स्यान्नास्तीति । यदा युगपदुभयप्राधान्यप्रतिपादनविवक्षा तदाऽवक्तव्यम् । एते सकलादेशास्तत्संयोगे एव । अपरे चत्वारो भङ्गा भवन्ति । ते च स्वावयवविवक्षया विकलादेशाः । तद्यथा – अस्ति च नास्ति च । अस्ति चावक्तव्यं नास्ति चावक्तव्यं च । अस्ति च नास्तिचावक्तव्यं चेति नापरभङ्गसंभवः । एवं संख्यालक्षणगोचरविप्रतिपत्तिं निराकृत्येदानीं फलविप्रतिपत्तिं निराकुर्वन्नाह—प्रतीतेस्तु फलमिति ।

प्रतीतेस्तु फलं नान्यत्प्रमाणं न ततः परम् ।
अतद्रूपेऽपि योग्यत्वान्नियतार्थस्य वेदकम् ॥

तु पुनरर्थे । फलं पुनः प्रमाणस्यार्थाधिगतिरेव नान्यदिति । तद्विज्ञानान्तरं वा स्यात्प्रवृत्तिर्वा अर्थक्रियाप्राप्तिर्वेति ? । तत्र न तावज्ज्ञानान्तरप्रमाणान्तरम् । तद्धि प्रमाण-

द्भिन्नविषयं वा स्यादभिन्नविषयं वा ?। यदि भिन्नविषयं तत्किं केन सङ्गतम् । एवं हि घटज्ञानस्यापि पटज्ञानं फलं स्यात् । अथाभिन्नविषयं तदा साधितक्रिये कर्मणा विशेषाधायि किं कुर्वत्साधनं स्यात् । निश्चयमिति चेत् । न, प्रमाणस्यैव निश्चयात्मकं प्रमाणं तर्हि निश्चय एव प्रमाणमस्तु किं तेन । निश्चयकरणात्तदपि चेत् । चक्षुरादिकमस्तु । निश्चयात्मकप्रमाणवादिभिरपि निश्चयः फलमिष्यते। तेन ज्ञानान्तरं फलमिति । नापि प्रवृत्तिप्राप्ती । तयोः पुरुषसाध्यत्वात् । उक्तं च शास्त्रकारैः । न हि प्रमाणं गलेग्रहित्वा पुरुषं प्रवर्त्तयति । नाप्यर्थमुत्पाद्यार्थयति किंत्वर्थपरिछेदकत्वमेव प्रवर्त्तकत्वं प्रापकत्वं चेति । तस्मादर्थाधिगतिरेव फलम् । प्रमाणमपि ततत प्रतितेऽपरं किंतु प्रतीयतेऽनेनेति प्रमाणम् । प्रतितेरेव एतदुक्तं भवति । नात्मनः परमार्थेन प्रमाणं भिद्यते । किंचात्मैव ज्ञानावरणक्षयोपसंभवात् प्रमाणं स एव प्रतीतिरूपफलमित्याकारः प्रमाणमिति चेत् । न, अर्थाकारतायां ज्ञानस्य जडतास्यात् । अथ निलाद्याकारतैवार्थोद्भवति जडता यदि निलपरमाणुरूपता तदा कथं न जडता ? । अथ परमाणवात्मके विज्ञाने नीलप्रतिबिम्बमात्रमेव भवति । यथा अनिलात्मके स्फटिके नीलादीति । तदसत् । यतो न स्फटिकस्यापि निलपरिमाणुपरिणतेरन्यत्प्रतिबिम्बमिति । किं च कारणत्वाद्यथाऽर्थादाकारो भवतीति तथा चक्षुरादेरपि स्यात् । अयोगत्वान्नेति चेत् । तर्हि योगतैव वास्तु किमाकारेण । तेन यदुक्तमाकारमन्त्रे प्रतिकर्मव्यवस्था न स्यादिति तन्निरस्तम् । ज्ञानमेव हि नियतार्थग्रहणमस्तु किमाकारेणेति । एत देवाह—अतद्रूपेऽपीत्यादि । यस्मादाकारवादिनापि वस्तुस्वाभाव्यमाकारग्रहणाज्ञानस्या-

भ्युपगतं तस्मात्तदेव नियतार्थग्रहणे ज्ञानस्यास्तु किं व्यवधिना । न च स्वाभाव्यमहेतुकं किंतु कर्मणः क्षयोपशमवैचित्र्यादात्मैव नियतार्थज्ञानाकारः तथापरिणमंस्तांस्तान्नर्थान्प्रतिपद्य तद्गतिस्थितमित्यन्यलक्षणतमःपटलं निरस्य प्रत्यक्षमक्षिसमुद्गलदर्शनाय श्रीसिद्धसेनघटितस्युतगीः शलाकां शुद्धामवाप्य विमलं विहितं मयैव तत्॥ इति श्रीशान्त्याचार्यविरचितायां वार्त्तिकवृत्तौ प्रत्यक्षपरिच्छेदः ॥ १॥

एवं प्रत्यक्षसंख्यालक्षणगोचरफलविप्रतिपत्तिं निराकृत्येदानीं परोक्षस्य तां निराकर्त्तुमाह । पूर्वमेव परोक्षस्येत्यादिना

पूर्वमेव परोक्षस्य विषयः प्रतिपादितः ।
प्रमाणफलसद्भावो ज्ञेयः प्रत्यक्षवद्बुधैः ॥ १ ॥

अनुमानशब्दलक्षणस्य परोक्षस्यास्पष्टास्त एव स्युरित्यादिना विषयोऽस्पष्टात् । सामान्यं प्रतीयमान विशेषमन्तरेणानुपपद्यमानं सलिलादावपि प्रवर्त्तयेत् । अथ विशिष्टं तदा वैशिष्ट्यं वक्तव्यम् । किं तत्र समवायः किं वा तस्येदमिति प्रतीतिरिति ? । न समवायः । तस्य निरस्तत्वात् । साधारणस्य च समवायस्य न विशेषकारित्वमिति । द्वितीये तु पक्षे इतरेतराश्रयत्वम् । तथाहि—। विशिष्टसामान्यप्रतीतौ विशेषप्रतीतिः, विशेषप्रतीतौ विशिष्टसामान्यप्रतीतिरिति । किं च तस्येदमिति प्रतीतावपि नियतदेशविशेषाप्रतीतौ नानुमानादेः प्रवर्त्तेत व्याप्तिग्रहणकाले च वह्न्यादिसामान्यस्य सिद्धत्वाद्गृहीतग्राहित्वेन च प्रामाण्यं न स्यादिति । विशेषोऽपि सामान्येन प्रतीयत इति चेत् । सामान्येनेति कोऽर्थः । किं सामान्यमेव सामान्यं प्रतीत्य प्रतीयते, किं वा विशेष-

इति ?। यदि सामान्यं तदा तेनापि पुनरन्यत् सामान्यं ततो प्यन्यदित्यनवस्था । अथ नास्ति लक्षणं किंतु युगपदुभयं प्रतीयते । नैतदस्ति । उभयाप्रतीतेः । न ह्येकं दण्डायमानं सामान्यमपरो विशेषस्तत्र लक्ष्यते । उक्तं च ।

दोहिमिणएहिणीयं सथमुल्लराणतदमिस्यत्तं ।
जंसविसगपहाणाल्लणेण अण्णोणनिरथेरकम् ॥

अथाभिन्नसामान्यप्रतीतौ नियतदेशविशेषप्रतीतिः । एवं ह्यशेषविशेषप्रतीतिरपि स्यात् । तथाहि—यद्यस्मादभिन्नस्वरूपं तत्तस्मिन् प्रतीयमाने प्रतीयते । यथैकव्यक्तिसामान्यप्रतीतौ व्यक्त्य न्तरसामान्यमभिन्नस्वरूपं च व्यक्त्यन्तरमिति कृष्णादेर्विशेषणस्याप्रतीतिरिति चेत् । विशेषणानामभेदप्रतीतिः स्यात् । भेदेऽपि उपाधिमति निश्चीयमानेऽशेषोपाधीनामपि निश्चयः स्यात् । तस्मादभिन्नसामान्यप्रतीतौ अशेषव्यक्तिप्रतीतिर्भवेदिति ।

किंच

कस्मात्सास्नादिमत्स्वेव गोत्वं यस्मात्तदात्मकम् ।
तादात्म्यमस्य कस्माच्चेत् स्वभावादिति गम्यताम् ॥

एवमभ्युपगममप्रदर्श्य दूषयन्ति वार्तिजन्मन्यजातावेदागता नाश्रयान्तरात्प्रागासीत् । न च तद्देशे सा तयासङ्गता । कथम् ।

व्यक्तिनाशेनचेष्टान्नष्टा गता व्यक्त्यन्तरम् ।
न तत्कुडम्रे नस्थिता देश सा जातिः क्वेति कथ्यताम् ॥
न जाति र्न चेत्तत्रासीदस्ति पश्चान्न बांशवत् ।
जहाति पूर्वं नाधारं महोव्यवनसंततिः ॥

एवं तादात्म्यनक्षेऽपि न युक्तः । तस्माद्विशेषा एव

सामान्यपरिणामवन्तोऽस्पष्टाः परोक्षस्य विषया इति । ननु विशेषविषयत्वेऽनुमानादेः कथं न ताणादेः प्रतीतिर्न दूरप्रत्यक्षेऽपि तस्या प्रतीतेः । तदेवं न सामान्यं विषयः । नाप्यन्यापोहः । स हि पर्युदासरूपो वा स्यात्प्रसज्यरूपो वा ? । प्रथमपक्षे वस्त्वन्तरमेव स्यात् । तच्च सामान्यं वा विशेषो वेति विधिरेव शब्दार्थः स्यात् । द्वितीये तु निषेधमेव मात्रेति प्रतिपाद्यते । तस्य च शब्दाद्यर्थत्वम् । अयुक्तप्रतीतेः । तथाहि—परप्रतिपादनार्थं तस्य प्रयोगः । परस्तु नीलाद्यर्थी नानीलनिषेधमात्रं जिज्ञासति । प्रतिपादकोऽपि तथैव प्रतिपादयति । अजिज्ञासितं प्रतिपादयन्नप्रेक्षाकारी स्यात् । अथ किमानयामीति जिज्ञासायामनीलमपि जिज्ञासितं नीलमित्यनिषेध्य तेनैवं प्रतिपाद्यस्य विधावेव जिज्ञासा न प्रतिषेधमात्रे । प्रतिपादकोऽपि तथैव प्रतिपादयति । सामर्थ्यादन्यप्रतिपत्तिरिति । नैतदस्ति । प्रतिपाद्यस्य सामान्येन विधावेव जिज्ञासा न प्रतिषेधमात्रे । विधिप्रतिपत्तौ सामर्थ्यादन्यप्रतिषेध इति । किंचायमपोहो भावे भावस्य वा प्रतीयेत, केवलो वा ? । प्रथमपक्षे भावयोः प्रतीतिः किं तेनैवानुमानादिना किं वा प्रमाणान्तरेण ? । यदि तेनैव तदा किं भावौ प्रतीत्य प्रतीयते, किं वापोहप्रतीताविति । न तावत्प्रथमः पक्षः । न हि नीलशब्देनानीलं प्रतीयते । प्रतीयमानत्वे वा कथं तन्निषेध इति । नीलं वा प्रतीत्यानीलापोहप्रतीतौ संवलन्ती प्रतीतिः स्यात् । अथ नीलत्वमेवानीलापोहात्मकं प्रतीयमानमुभयव्यवहारं रचयति तत्रायातोऽस्मत्पक्षमिति । नापि द्वितीयः पक्षः । न हि केवलोऽपोहः प्रतीयते । पश्चात्ताविव्यनुभवात् । नापि प्रमाणान्तरं किंचित्तत्रानीलप्रत्यायकमस्ति । येन तदपोहः प्रती-

येत । न चाभावेन भावस्य कश्चित्संबन्धः संभवतीत्युक्तम् । तस्मान्न भावसंबन्धित्वेनापोहस्य प्रतीतिरिति । केवलस्य च प्रतीतौ सर्वशब्दानां पर्यायता स्यात् । लिङ्गलिङ्गिनोरभावश्च भवेत् । तथाहि—यदेव लिङ्गिशब्दस्यापि तथा विशेषणविशेष्यभावोऽपि न स्यात् । असत्त्वं च न किंचिदस्ति । यदपोहेन सत्वाख्यं साधनं भवेत् । अथासत्यपि बाह्ये वासनानां नानात्वात्तज्जनितानां ध्वनीनां न पर्यायतेति । तन्न । वासनानामपि नानात्वानुपपत्तेः । ता हि अनुभवनिबन्धनाः । एकरूपस्य चापोहप्रतीतौ कथं वासनानां नानात्वमिति । तथा आकालापोहस्यैकरूपत्वादतीतानागतवर्त्तमानताव्यपदेशाः नोपपद्येरन्निति । अक्रियानिषेधस्य चाभावैकरूपस्य सद्भावेऽकार्षीत्, करोति, करिष्यतीति च व्यपदेशानुपपत्तिरिति वचनलिङ्गभेदश्च न स्यात् । तथा सर्वप्रमेयादिशब्दानामसर्वादेरभावादपोह्याभावेनापोहवाचकत्वं न स्यात् । अपि चापोहः किमाश्रितोऽनाश्रितो वा ? । अनाश्रितत्वे न कस्यापि । आश्रितत्वे गुणो वा स्यात्, सामान्यं वा भवेत् । तथाहि । यदि प्रतिव्यक्तिभिन्नस्तदा गुणः, अथैकस्तदा सामान्यमिति । अथापोह्यतेऽनेनेति ज्ञानाकारः, अपोह्यतेऽस्मिन्निति स्वलक्षणं, अपोहनमपोह इत्यन्यनिषेधः, तदेवं विधिरूपापोहाभ्युपगमान्निषेधमात्रे यद्दूषणं तदसदिति । तथाहि । न तावत्सामान्यं शब्दादिविषयः । अविद्यमानत्वात् । नापि स्वलक्षणम् । प्रत्यक्षवच्छाब्देऽप्रतिभासनात् । तदुक्तम्—

> शब्देनाव्यावृत्ताक्षस्य बुद्धावप्रतिभासनात् ।
> अर्थस्य दृष्टाविव तच्छब्दाः कल्पितगोचरा इति ॥

नापि ज्ञानम् । तस्यापि स्वलक्षणत्वात् । नापि ज्ञानाकारः,

किं तु स एव दृश्यविकल्प्यञ्चैकीकृत्य वहीरूपतयाध्यस्तोऽवं पञ्चमाकारः । वैभाषिकाणां तु आकाराभावाज्ज्ञानमेव वहीरूपतयाऽध्यस्तमर्द्धचतुर्थकोरोऽपोह इति न निषेधमात्रः केवलः । तस्य विधिरूपतया वस्तुस्वभावव्यवस्थितेः ।

स्वभावपरभावाभ्यां यस्माद् व्यावृत्तिभागिनः ।
यतोयतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः ॥
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ।
तस्माद्यो येन शब्देन विशेषः संप्रतीयते ॥
नशक्यस्ततोऽन्येन तेन भिन्नव्यवस्थितिरिति ।

तेन न सर्वशब्दानां पर्यायता । नापि लिङ्गिनोरभावः, विशेषणविशेष्यभावो वा । तथाहि स्वकारणादेव भावाः सकलसजातीयविजातीयव्यावृत्ता जायन्ते । तेनानेकव्यावृत्त्यात्मकेषु एकव्यावृत्त्या निश्चयेऽपि व्यावृत्त्यन्तरेण निश्चितास्तन्निश्चयाय शब्दलिङ्गप्रयोगे न पर्यायतामाप्नोति । वस्तूभूते चोपाधौ प्रवर्त्तमानः शब्दः उपाधिमन्तमशेषोपाध्युपकारकं निश्चितयाऽशेषोपाधीनां निश्चयात् पर्यायतां शब्दान्तराणामापादयेदित्यादयो दोषा वास्तवे शब्दार्थे ग्रन्थकारैः प्रतिपादितास्तस्मादपोहपक्षो ज्यायानिति । अत्रोच्यते । यथावदुक्तं दृश्यविकल्पयोरेकीकरणमपोहो न तुच्छरूप इति । तदेकीरणं किं तेनैव ज्ञानान्तरेणेति ? । न तावत्तदेव विज्ञानं स्वाकारं दृश्यं च पृथक् प्रतिपाद्यैक्यं प्रतिपद्यते । अप्रतीतेः, क्षणिकत्वाच्च । नापि ज्ञानान्तरम् । तद्धि भिन्नं स्यात्, एकं वा भवेदिति । भिन्नं कथमेकं प्रत्येति । स्वसंवेदनं हि ज्ञानं न विषयंदर्शनं तु दृश्यविषयमिति । एकं तु यदि द्वयं न प्रत्येति कथमैक्यम् । अथैक्यं प्रत्येति कथं द्वयोरैक्यमिति । अथ वासनाप्रबोधाद्विकल्पविज्ञानं सकलजातीयसाधारणमुत्पद्यतेऽइत्येक-

त्वग्रहणमुच्यते । न वस्तुभूतसमानपरिणाममन्तरेण । सजातीया-विभागानुपपत्तेरिति । एकार्थक्रियाकारित्वात्सजातीयत्वमिति चेत् । क्रियायाः किमन्यक्रियैक्यादैक्यं किं वा स्वरूपेणेति? । प्रथम-पक्षे न स्यात् । द्वितीये तएवार्थक्रियाकारणाः किं नैकीभव-न्तिअभ्युपेतहानिश्चेति । तदेवमत्र बहु वक्तव्यं तच्च नोच्यते विस्तरभयादिति । तन्नापोहोऽपि परोक्षस्य विषय इति । एवं विषयविप्रतिपत्तिं निराकृत्येदानीं फलविप्रतिपत्तिं निराकर्त्तुमाह–। प्रमाणफलमद्वावइति । यथैव हि प्रत्य-क्षस्य प्रमाणमेव फलमर्थाविगतिरूपं तदेव च प्रमाणपरि-छेदकत्वात् । तथा परोक्षस्यापि विज्ञेयमिति । संख्या-विप्रतिपत्तिं निराकुर्वन्नाह । परोक्षं द्विविधमिति ।

परोक्षं द्विविधं प्राहुर्लिङ्गशब्दसमुद्भवम् ।
लैङ्गिकप्रत्यभिज्ञादि भिन्नमन्ये प्रचक्षते ॥

अक्षाणां परं परोक्षम् । पारस्करादित्वात्सुडागमः । द्वौ विधौ प्रकारावस्येति द्विविधम् । द्वैविध्यमेवाह–लिङ्गशब्दसमुद्भ-वमिति । लिङ्गजनितं शब्दजनितमेव परोक्षार्थनिश्चायकं नान्यदिति । नन्वन्यदपि प्रत्यभिज्ञादिकं परोक्षं मन्यन्ते । तदेव लैङ्गिकप्रत्यभिज्ञादिभिन्नमन्ये चक्षते समानतन्त्राः । परोक्षं प्रत्यभिज्ञादि त्रिधाश्रुतमविप्लवमिति वचनादिति । तदयुक्तम् । यतः श्रौतं त्रिविधं भवति न त्वविप्लवमिति । तथाहि–प्रत्य-क्षेण परोपदेशसहायेन यज्जन्यते ज्ञानं तच्छ्रौतं प्रत्यक्षपूर्वकम् । तथा लिङ्गेन परोपदेशरहितेन जनितं श्रौतं लिङ्गपूर्वकम् । परोपदेशेन तु केवलेन जनितं शब्दपूर्वकमिति । एव त्रिविधं भवति श्रौतं न त्वविप्लवम् । प्रमाणमित्यर्थः । प्रत्यक्षे हि परो-पदेशस्यानर्थकत्वात् । अथ तत्रापि किञ्चित्परोक्षं तर्हि तत्रानु-

मानमेव स्यात् । तथाहि—परोक्षं हि वस्तुनः साक्षात्प्रतीयते किंतु अन्यदर्शनादन्यस्माच्च यद्यनियतात्प्रतीयेत तदा यत कुतश्चित्सर्वं प्रतीयेत। नियता च प्रतीतिर्लौकिकमेव तत्र यदाक्षानुसारि प्रत्यभिज्ञाज्ञानं तत्प्रत्यक्षमेव न श्रौतम्। यत्तु प्रत्यक्षानिश्चितं दृष्टसाधर्म्यादर्थक्रियाकारित्वं निश्चीयते तल्लैङ्गिकमेवेति कुतस्त्रिविधं परोक्षमिति। अथायमपि वह्निर्दाहादिसमर्थ इति सामर्थ्यविषयं प्रत्यभिज्ञानं न प्रत्यक्षम्। सामर्थ्यस्य परोक्षत्वात्। नाप्यनुमानम्। व्याप्तिस्मरणाद्यननुभवात्। तस्मात्प्रमाणान्तरमिति।तदयुक्तम्। यस्मात्सामर्थ्यं वह्नेरन्यत्ततः प्रत्यक्षेण तत्स्वरूपनिश्चयादेव सामर्थ्यस्य निश्चयाद्यो दाहिकां शक्तिं न जानाति स वह्निमपि। तत्स्वरूपापहारे भिन्नसामर्थ्यमिति चेत्। न, मन्त्रादेः तथाभूतस्यैव वह्निस्वरूपस्य पर्यायस्योत्पत्तिरिति। भवतु सामर्थ्यं न निश्चयः मूढस्य दृष्टसाधर्म्यादनुमानमेवेत्युक्तम्। व्याप्तिस्मरणं तु क्वचिदकस्माद्धूमदर्शनाद्वह्निप्रतिपत्तावपि दृष्टम्। अथार्थित्वात् पूर्वमेव सर्वस्य कृतत्वात्तथा प्रतिपत्तिरत्रापि समानम्। किंच किं तत्प्रमाणान्तरम्? । श्रौतमिति चेत्। किमिदं श्रौतम्?। किं शब्दविषयं किंवा शब्दोल्लेखीति? । प्रथमपक्षे श्रोत्रेन्द्रियज्ञानं सकलमेव श्रौतं स्यात् तच्चागमविरोधीति। तथाहि अष्टाविंशतिभेदमिति ज्ञानाभिधायी जैनागमः । स चैवं त्यक्तः स्यात्। अथ शब्दोल्लेखि। एवमपि मतिज्ञानं श्रौतं स्यात्। सविकल्पकं च सकलं प्रमाणं प्रसज्येत। तत्रेदं श्रौतस्य लक्षणं किं तदीत्याह—। परोपदेशजं श्रौतमिति ।

परोपदेशजं श्रौतमनिशेषं जगुर्जिनाः ।
परोक्षं प्रत्यभिज्ञादि त्रिधा श्रौतं न युक्तिमत् ॥

परस्मै परस्मादुपदेशस्तस्माज्जातं यज्ज्ञानं तच्छ्रौतं जगुर्जिनाः । तथा चागमः ।

सुयकारणं अनुसोसुयं च तक्कारणं लनु लम्मि ।
जिरइसुयनुवयारो सुयञ्च परमच्छनुजीवो ॥

अस्यायमर्थः । श्रौतस्य ज्ञानस्य कारणं यतः स इति शब्दः श्रौतं वा तत्कारणं तस्य शब्दस्य हेतुः । ततस्तस्मिन् शब्दे क्रियते श्रुतोपचारः । कारणे कार्योपचारात्कार्ये वा कारणोपचारादिति । परमार्थतः जीवः श्रौतमिति । ज्ञानस्य जीवात् कथंचिदभिन्नत्वादिति । नन्वनेन शब्दस्य जनकत्वं जन्यं वा ज्ञानं श्रुतमभिहितं तत्तु सकलमेव परोपदेशजं शरीरचेष्टात् लक्षणेनोपदेशेन जनितस्यासंग्रहात् । न शब्दस्योपलक्षणत्वात् । यद्वा सापि शब्द एवेत्याह । साच शब्दच्छ्रोत्रियजन्तमिकयं मिपठवनुहोइकत्वाविहुतदभावे तदभिप्पयानुक्कुण इचेट्ठा । अयमर्थः—सा च हस्तादिसंज्ञापरबन्धनाय क्रियामाणशब्दने प्रयुक्तत्वात् शब्दार्था । शब्दस्यार्थो यस्या सा शब्दार्था । शब्दएवेत्यर्थः । कुत एतदित्याह । यत्तस्यांकितायां प्रत्ययो भवति । प्रतिपाद्यस्य चेष्टायां स्त्रीलिङ्गत्वेऽपि प्राकृतत्वाल्लिङ्गव्यत्ययः । एतदेव समर्थयति । कर्त्तापि चेष्टायाहुतिरियस्मादर्थं यस्मात्कर्त्तापि तदभावे मूकत्वात् । यदभिप्रायः । शब्दार्थप्रतिपादनाभिप्रायः । करोति चेष्टा । हस्तादित्यर्थः । तस्मात्परोपदेशजं श्रौतमिति । तेन शब्दाभावेऽपि श्रौतं सत्यपिच शब्दो शब्दोल्लेख्यपि क्वचिन्न श्रौतमिति । अत एवाह । मतिशेषमिति । अपरोपदेशशब्दजनिताजनितमतिं प्रतिपादयन्ति स्म श्रुतनिस्तना चेति वचनात् । तस्माद्यदि प्रत्यभिज्ञा आप्तोपदेशजनिता तदा प्रत्यक्षार्थविषयत्वान्न प्रमाणान्तरम् । अथानाप्तजनिता तदात्र विकल्पवन्न प्रमाणमिति निगमयन्नाह—। परोक्षं प्रत्यभिज्ञादीति ।

प्रमाणभूतं त्रिधेति । न युक्तियुक्तमिति । आगमबाधान्नाह । अन्यथेहादिकमिति ।

अन्यथेहादिकं सर्वं श्रौतमेव प्रसज्यते ।
यच्चोक्तं नागमात्पक्षं मानं जाड्यजृम्भितम् ॥

यदि सविकल्पकं सकलमेव श्रौतं तदा इहादिग्रहणादथेहादिपरिग्रह इति सकलमेव शब्दोल्लिखित्वात् श्रौतं स्यादिति । अथ क्वचिदागमत्यागेऽपि । यथैन्द्रियजं ज्ञानं परोक्षमति प्रत्यक्षं प्रत्यपादीति । तदयुक्तमित्याह । यथेत्यादि । तादृगम्बराणां चान्यविलसितम् । तथाहि—सकलवस्तुज्ञानापेक्षयापरोक्षमिन्द्रियज्ञानमुक्तं न त्वेकस्मिन्नंशेन इति । ततस्थितं द्विधा श्रौतमिति । एवं द्वैविध्यं व्यवस्थाप्येदानीं लैङ्गिकं परोक्षव्याख्यानुमहाल्लिङ्गाल्लिङ्गिनीत्यादि ।

लिङ्गाल्लिङ्गिनि यज्ज्ञानंमनुमानन्तदेकधा ।
प्रत्येति हि यथा वादी प्रतिवाद्यपि तत्तथा ॥

लिङ्गाल्लिङ्गविषयमपि ज्ञानं लिङ्गग्रहणलिङ्गिन्यपि तद्वृत्तिस्यतस्य प्रत्यक्षं भवति लिङ्गग्रहणम् । ननु तस्य तल्लिंगमेव न भवति यस्य तु लिङ्गितस्य न लिङ्गमन्तरेण तत्र ज्ञानमिति किं लिङ्गग्रहणेन । ये लिङ्गमेवानुमानं मन्यन्ते तन्निरासार्थं लिङ्गग्रहणमिति । लिङ्गाद्यल्लिङ्गिनि ज्ञान तदनुमानं न लिङ्गमेवेत्यर्थः । यद्येवं तदा लिङ्गिनि ज्ञानमित्यवस्तु । अनेन हि तत्सुनिरस्तं भवति । नैवं हि प्रतिपत्तिगौरवं स्यादिति । लिङ्गग्रहणमिति । स्वार्थपरार्थभेदेन द्वैविध्यं प्रतिपन्नास्तन्निरासार्थमाह । तदेकधेति । एकप्रकारैव परोक्षार्थस्य प्रतिपत्तिरिति । तदेवाह । प्रत्येति हि यथावादी प्रतिवाद्यपि तत्तथेति । हि यस्मादर्थे यस्मादन्यथानुपपन्नाल्लिङ्गाद्यथा स्वयं वादी परोक्षं वस्तु प्रत्येति । प्रतिवाद्यपि तथैव तत्स्वयं

निश्चितात्लिङ्गात्प्रत्येति न परवचनादिति । तथाहि—। परवचनं यदि प्रमाणं तदा किं त्रिरूपवचनेन । प्रतिज्ञामात्रेणैवार्थसिद्धिः । अथाप्रमाणं तदा कथं ततो लिङ्गप्रतिपत्तिरिति । अथ प्रत्यक्षमेव तत्र प्रमाणं पश्य मृगो धावतीति । तत्संमुखीकरणादनुमानत्वं नाक्षिनिकोचादेरपि स्यात् । अथ शब्दस्य सर्वथाऽप्रमाणत्वदनुमानोपचरात् प्रामाण्यं नान्यथेति ख्यापनार्थमित्याह । उपचारेण चेत्तत्स्यादिति ।

उपचारेण चेत्तत् स्यादनवस्था प्रसज्यते ।
अन्यस्यासाधनादाह लक्षणं न तु साध्ययोः ॥

यद्यनुमानोपकारमात्रेणानुमानत्वं वचनस्य तदा पुरुषादेरपि स्यादित्याह—। अनवस्थेयं प्रसज्यते इति । उपचारेण प्रमाण्ये यत्किञ्चिदिति । दधिभक्षणादिकमपि अनुमानं स्यादिति । शब्दस्य चाप्तप्रतीतत्वेन प्रामाण्यस्य प्रतिपादयिष्यमाणात्वादिति । तस्मादेकधैवानुमानमिति । इदानीमवयवान्तरनिरासेन यस्यावयवस्य साधनाङ्गत्वं तदाह । अन्यस्य उपनयनिगमनादेः स्यान्नयार्थित्वात् कास्तवापक्षधर्मेद्यतद्व्यवस्था परार्थानुमाने तथैवास्तु । एवमसाधनाङ्गत्वात्प्रतिज्ञां साधनान्निरस्यति । अत्रोच्यते । तदुक्तम् । प्रतिज्ञा किं प्रमाणमुताप्रमाणमिति ब्रूमः । तर्हि किं तूपन्यासेन आप्तत्वासंदेहे तदुपयोगः । तन्निश्चये तु प्रतिज्ञामात्रादेव साध्यसिद्धिः । हेतूपन्यासोऽपि न युक्तः । किं पुनस्त्रैरूप्यवचनमिति । एतदेव दर्शयितुमाह । अन्यथानुपपन्नत्वमित्यादि ।

अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ।
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥

एतदुक्तं भवति। आप्तस्त्वं संदेहे अन्यथानुपपन्नादेव हेतुमात्रात् साध्यसिद्धेः किं त्रिरूपवचनेनेति। तथाहि—उपनयनिगमने तावत्सौगतैरेव निराकृते दृष्टान्ते दृष्टसामर्थ्यस्य हि हेतोः पुनर्द्धर्मिणि वचनमुपनयं वर्णयन्ति। तच्चायुक्तम्। पक्षधर्मवचनादेव तदर्थस्य गतत्वात्। अथानेनदृष्टसामर्थ्यस्य हेतोः ख्यापनं क्रियते तदा व्याप्तिवचनादेव सामर्थ्यसिद्धिः। यदि वानेन समर्थहेतुः ख्यापनं क्रियते तर्हि इदमेवास्तु किं हेतुवचनेन। तदेवं उपनयं निरस्यन्ति। निगमनमप्ययुक्तम्। तथाहि—गृहीतव्याप्तिकस्य हेतोर्द्धर्मिण्युपसंहारादेव निगमनार्थस्य गतत्वात्किं तेन। तदेवं त्रिरूप एव हेतुरिति। यत्र हेतोः साध्येन विनाऽनुपपन्नत्वं तत्र किं त्रैरूप्येण। तदभावे तस्याप्तस्त्वन्यत्र त्वादौ सत्यपि त्रैरूप्ये अगमकत्वादित्याह—। नान्यथेत्यादि। तथाहि—। नित्यानित्यात्मकं सर्वं सत्वान्यथानुपपत्तेरित्युक्ते भवत्येव साध्ये प्रतीतिः। अथ सर्वं नित्यं सत्वान्यथानुपपत्तेरित्यपि किं भवति। व्याप्तेरग्रहणात्। अत्र व्याप्तेर्दृष्टान्ते ग्रहणे सति कथं न त्रैरूप्यम्। ननु दृष्टान्ते व्याप्तिग्रहणं यद्यसाकल्येन तदा व्याप्तिग्रहणेऽपि न साध्यधर्मणि हेतोर्गमकत्वं स्यात्। अथ साकल्यं न तदानुमानं गृहीतग्राहित्वादप्रमाणं स्यात्। अथ देशविशेषप्रतीत्यर्थमनुमानम्। तन्न। यत्र साधनं तत्र तत्र साध्यमिति आधारान्तरभावेनैव व्याप्तेर्ग्रहणात्कथं न विशेषतीतिः। अथ आधारसामान्यस्यैव प्रति नाधारविशेषस्य। किमिदं सामान्यम्। कि विवक्षितसाध्यविशिष्टं किं वाऽविशिष्टमिति?। यदि साध्यविशिष्टं तदा कथं न साध्यप्रतीतिः। अथाविशिष्टं तदा न तत्र व्याप्तिरिति। अथ विवक्षितदेशमन्तरेणापि व्याप्तेरखण्डनात्तद्विशेषप्रतीतिरनुमाना

यदि त्वमेवाप्रतिहतज्ञानेच्छाक्रियाशक्तिमान् रागद्वेषादिशून्यत्वात्सर्वं समः सर्वकर्मफलदाता तर्हि सर्वेऽपि प्राणिनः फल्गुफलादभ्युदयाद्विरक्ताः सन्तो मोक्षमेवापेक्षमाणाः त्वामेव भगवन्तं सर्वफलदानसमर्थं कुतो न भजन्तीति चेत्तत्राह काङ्क्षन्त इति । इह लोके कर्मणां सिद्धिं फलनिष्पत्तिं कांक्षन्तोभीप्सन्तो देवता इन्द्रादीन्यजन्ते पूजयन्ति अज्ञानप्रतिहतविवेकज्ञानत्वान्न तु निष्कामाः सन्तो मामिति शेषः । कर्मफलसिद्धिमिच्छतां कुतो मनुष्यलोके देवतापूजनमिष्यते तत्राह क्षिप्रं हीति । हि यस्मादिन्द्रादियाजिनां तत्फलार्थिनां कर्मजा सिद्धिः कर्मजन्यं फलं मनुष्यलोके क्षिप्रं शीघ्रमेव भवति ज्ञानफलं तु चित्तशुद्ध्यपेक्षत्वान्न शीघ्रं भवतीत्यर्थः । मानुषे लोके कर्मफलं शीघ्रं भवतीत्यनेनान्यलोकेपि वर्णाश्रमधर्मव्यतिरिक्तकर्मफलसिद्धिर्भगवता सूचिता । नन्वन्यलोके विलम्बेन कर्मफलमत्र त्वविलम्बेनेति विभागे को हेतुरिति चेद्वर्णाश्रमप्रयुक्तकर्माधिकारभावाभावाविति गृहाण । यतः कर्मप्रयुक्तं फलं मानुषे लोके झटिति सिद्ध्यत्यतस्तत्तत्क्षुद्रफलसिद्धिकामाः ज्ञानमार्गविमुखा अन्यदेवता यजन्ते न प्रायेण मुमुक्षव इव मां साक्षात्ते भजन्तीति भावः ॥ १२ ॥

कस्मात्पुनः कारणात्त्वैव वर्त्मानुवर्तन्ते नान्यस्येत्यत आह । यद्वा मानुष एव लोके वर्णाश्रमकर्माधिकारो नान्येष्विति नियमः किं निमित्त इति चेत्तत्राह । यद्वा शरीरारम्भकगुणवैषम्यादपि न सर्वे समानस्वभावा अतोऽपि न सर्वे मामेव भजन्ते इत्याह—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

चातुर्वर्ण्यमिति । चत्वारो वर्णा एव चातुर्वर्ण्यं मयेश्वरेण सृष्टं उत्पादितं 'ब्राह्मणोऽस्य मुखमासीदिति' श्रुतेः । गुणकर्मविभागशः गुणाः सत्त्वादयः कर्माणि शमादीनि तयोर्विभागशः द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते इत्युक्तेः गुणविभागेन कर्मभागेन चेत्यर्थः । तथाहि सत्त्वप्रधाना ब्राह्मणास्तेषां सात्विकानि शमदमादीनि कर्माणि सत्त्वोपसर्जनरजःप्रधानाः क्षत्रियास्तेषां च शौर्यतेजःप्रभृतीनि कर्माणि तमउपसर्जनरजःप्रधाना वैश्यास्तेषां च कृष्यादीनि कर्माणि तमःप्रधानाः शूद्रास्तेषां च तामसानि त्रैवर्णिकशुश्रूषादीनि कर्माणीति मानुषे लोके व्यवस्था तथा च मनुष्यलोके परं वर्णाश्रमादिपूर्वके कर्मण्यधिकारस्तत्रैव वर्णादेरीश्वरेण

सृष्टत्वात् लोकान्तरेषु तत्र वर्णाद्यभावादीश्वरमेव चतुर्वर्णाश्रमादिविभाग-भागिनोऽधिकारिणोनुवर्तन्ते तेनैव वर्णादेस्तद्व्यापारस्य च सृष्टत्वात्तदनु-वर्तनस्य युक्तत्वादिति प्रश्नद्वयसमाधानं बोध्यम् । तृतीयस्य तु स्पष्टमेव।

परेतु चतुर्णां वर्णानां हितं चातुर्वर्ण्यं गुणाश्च कर्माणि चेति गुणकर्म द्वन्द्वैकवद्भावः कर्माण्यग्निहोत्रादीनि गुणाश्च द्रव्यदेवतारूपाः विभागशः साधारणासाधारणविभागेन तथाहि दानजपादिकं सर्वसाधार-णमग्निहोत्रादिकं त्रैवर्णिकस्यैव न शूद्रस्य राजसूयादिकं राज्ञ एव नेतरेषामिति विभागो दृश्यते यतश्चातुर्वर्ण्यं गुणकर्म च मया सृष्टं ततोन्यदेवतानामपि मदुत्थत्वात्पुत्रप्रीत्या पितुरिव तत्प्रीत्या ममैव तृप्ति-रस्तीति भाव इत्याहुः।

एवं तर्हि चातुर्वर्ण्यस्य विषमस्वभावस्य सृष्ट्यादेस्तन्निष्ठव्यापारस्य च स्रष्टृत्वात्तव वैषम्यादेः कर्मफलस्य कर्तृगामित्वाद्भोक्तृत्वादेश्च त्वयि प्रसङ्गात्संसारित्वादिकं ते स्यान्न नित्यमुक्तत्वादिकमित्याशङ्क्याह तस्ये-ति। तस्य विषमस्वभावस्य चातुर्वर्ण्यस्य व्यवहारदृष्ट्या कर्तारमपि मां परमार्थदृष्ट्या अकर्तारं विद्धि अव्ययं निरहङ्कारत्वेनाक्षीणमहिमानमसं-सारिणमित्यर्थः। तथा च मायया कर्तृत्वस्य स्वरूपतोऽकर्तृत्वस्य च संभवा-न्नित्यमुक्तत्वादिकं कर्मतत्फलसम्बन्धवैधुर्य्यं च सिद्ध्यतीति भावः ॥१३॥

वस्तुतः कर्तृत्वभोक्तृत्वाद्यभावात्कर्मतत्फलसम्बन्धशून्यमीश्वरं पश्यतो दर्शनानुरूपं फलं दर्शयति—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥

न मामिति। येषां कर्मणां विश्वसर्गादीनां भक्तपरिपालनदुष्टनिग्रहा-दीनां चाहं कर्त्ता तवाभिमतस्तानि कर्माणि मां भगवन्तं वासुदेवं न लिम्पन्ति देहारम्भकत्वेन न बध्नन्ति निरहङ्कारत्वेन कर्तृत्वाभिनिवेशाभावात्। एवं कर्तृत्वं निराकृत्य कर्मफलासक्त्यभावाद्भोक्तृत्वं निराकरोति न मे इति। मे ममाप्तकामस्य न कर्मफले स्पृहा तृष्णा आसक्तिः आप्तकामस्य का स्पृहेति श्रुतेः। ईश्वरस्य तव कर्मलेपाभावेऽपि मादृशस्य जनस्य किमायातमित्या-शङ्क्याह इतीति । कर्तृत्वाभिनिवेशफलासक्तिभ्यां हि कर्माणि बध्नन्ति तदभावान्न मां कर्माणि बध्नन्तीत्येवं योऽन्योपि मामकर्तारमभोक्तारं चात्मत्वे-

नाभिजानाति कर्तृत्वभोक्तृत्वादिरहितोऽसङ्गोऽद्वितीयः परमात्माहमस्मीति स्वाभेदेन साक्षात्करोति स अकर्त्रभोक्त्रात्मज्ञानवान् कर्मभिर्न बध्यते देहादिसम्बन्धं प्राप्य न संसरतीत्यर्थः । तस्यापि कर्माणि देहाद्यारम्भकत्वेन न बन्धकानि भवन्तीति भावः ।

अन्ये तु इदं द्वयमित्थं योजयन्ति तथाहि मम वर्त्मानुवर्तन्त इत्यत्र मत्कृतेर्विषयभूतं कर्ममार्गमनुवर्तन्त इति यदुक्तं तद्विस्पष्टयति चातुर्वर्ण्यमिति । गुणकर्मविभागशः गुणानां सत्त्वादीनां कर्मणां शमादीनां च विभागेन रजउपसर्जनसत्त्वप्रधानस्य ब्राह्मणस्य शमदमादयः कर्माणि सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजोधृत्यादयः कर्माणि तमउपसर्जनरजःप्रधानवैश्यस्य कृष्यादीनि कर्माणि रजउपसर्जनतमःप्रधानस्य शूद्रस्य परिचर्यात्मकं कर्म एवं गुणकर्मविभागशश्चातुर्वर्ण्यं चत्वारो वर्णा एव चातुर्वर्ण्यं चातुराश्रम्यं च सर्गादौ मया सृष्टमत एव मम वर्त्मानुवर्तन्ते इति यदुक्तं तत्सिद्धं । तर्हि यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यत इति श्रुतेस्तवापि चातुर्वर्ण्यसृष्टिकर्मकर्तुस्तत्फलेन जन्मादिना सम्बन्धसम्भवान्न नित्यत्वेश्वरत्वादिः सिद्ध्यतीत्याशङ्कायां न विकल्पो न हि वस्तुमायामात्रमिदं द्वैतमितिश्रुतेः स्रष्टृस्रष्टव्यादेर्मायिकत्वेन मिथ्यात्वान्निष्कलस्य निष्क्रियस्याविक्रियस्य मम सर्जनादिक्रियाऽयोगात् वस्तुतो मामकर्तारमेव विजानीहीत्याह तस्येति । तस्य चातुर्वर्ण्यस्य प्रपञ्चस्य च मायया कर्तारमपि मायामोहितचित्तानां कर्तृवत्प्रतीयमानं मां परमात्मानमकर्तारं निर्गुणत्वाद्वस्तुतः कर्तृत्वादिधर्मशून्यमेव विद्धि । तदभावे कर्मासम्भूतौ तत्फलजन्माद्यसम्भवादव्ययं नाशरहितं नित्यशुद्धबुद्धमुक्तस्वभावमेव विजानीहीत्यर्थः ।

अपरे तु अथ वैषम्यदोषपरिहारार्थमाह चतुर्णां वर्णानां भावश्चातुर्वर्ण्यं ब्रह्मक्षत्रविट्शूद्ररूपं गुणाः सत्त्वादयः कर्म वर्णाश्रमोचितं तद्विभागेन तत्तद्वर्णोचितेन मयैव विराड्रूपेण सृष्टं निर्मितं तस्य चातुर्वर्ण्यस्य विराड्रूपेणैव कर्तारं मां विजानीहि तथाऽव्ययमक्षरं शुद्धस्वरूपमसङ्गमकर्तारं विद्धि । अत्रार्थे शातपथी श्रुतिः तदेतद्ब्रह्म क्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवत् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्र इति । भाष्यम् ब्रह्म क्षत्रं विट् शूद्र इति यच्चातुर्वर्ण्यं तदेतत् तत् किं ? तत् तेषु अग्निना वैश्वानरापरपर्यायेण विराड्रूपेण सम-

ष्टिना देवेषु ब्रह्माऽभवत् स एव मनुष्येषु व्यष्टिरूपेण ब्राह्मणोऽभवत् तथा देवेष्वष्टविधेनेन्द्रवरुणादिना क्षत्रियेण मनुष्येषु क्षत्रियोऽभवत् तथा देवेषु षड्विधेन वसुरुद्रादित्यादिना वैश्येन मनुष्येषु वैश्योऽभवत् तथा देवेष्वेकविधेन पूषसंज्ञकेन शूद्रेण मनुष्येषु शूद्रोऽभवत् । तथा ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृत इत्याद्यपि परस्य ब्रह्मणो ममोपाधिद्वयं मायाकार्यं च स्वस्य कूटस्थासङ्गचिद्रूपेण मायातत्कार्यसम्बन्धासम्भवान्मायाकर्तृकैः सृष्ट्यादिकर्मभिः श्लेषो यथा नास्ति तथा प्रत्यग्रूपस्य ममासङ्गत्वेन देहेन्द्रियादिकृतकर्मभिरपि श्लेषो नास्त्येव कर्तृत्वभोक्तृत्वादिधर्मशून्यं मां परमात्मानं श्रवणमननादिसंजातविज्ञानबलेन यः स्वात्मत्वेन विज्ञाय कर्माणि प्रवर्तते स कर्मभिर्न बध्यते इत्याह नेति । कूटस्थासङ्गचिद्रूपत्वेन बुध्यादिसम्बन्धशून्यस्य मे प्रत्यगात्मनः कर्मफले कर्मसु तज्जन्यफलेषु च न स्पृहाऽस्ति स्पृहाया बुद्धिधर्मत्वाद्बुद्ध्यादिसाक्षिणोऽविकारिणो मम तद्धर्मायोगान्न कर्मफलेच्छा सम्भवत्यत एव न मां कर्माणि लिम्पन्ति स यथा कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत इति कामिन एव कर्मसङ्कल्पतदारम्भश्रवणात्कर्मफलेच्छुनैव विज्ञानं यज्ञं तनुत इतिश्रुत्युक्तविज्ञानात्मना कर्माणि क्रियन्ते न त्वकामिना अक्रियेण मयाऽतो न बुद्ध्यादिभिः कृतानि कर्माणि मामकर्तारं कर्मतत्कर्तृसाक्षिणं लिम्पन्ति स्पृशन्ति येन फलेच्छुना यत्कर्म क्रियते स तेन कर्मणा लिप्यते तैलवर्तिवन्नान्यस्ततो बुद्ध्यादेः कर्मकर्तुरन्यस्य बुद्ध्यादिकृतकर्माणि लेपाय न भवन्तीत्येवं कर्मफलेच्छारहितं कर्मणामकर्तारमभोक्तारं चाकाशवत्सर्वगतमसङ्गमविक्रियं बुद्धितद्धर्मतत्कर्मतदवस्थासाक्षिणं मां परमात्मानं स्वतत्त्वं योऽभिजानाति सम्यगाभिमुख्येनायमेवाहमस्मीति साक्षात्स्वात्मना यो वेत्ति स विद्वानधिकारिको लोकसङ्ग्रहार्थं कृतैः कर्मभिर्न बध्यते कृतानि कर्माण्यमुष्य देहारम्भकाणि न भवन्तीत्यर्थः ॥ १४ ॥

तव कर्मतत्फलसम्बन्धाभावे तथा ज्ञानवतश्च तदसम्बन्धे ममापि किं कर्मणेत्याशंक्य कर्मणि कर्तृत्वाभिमानं तत्फले तृष्णां च त्यक्त्वा मुमुक्षुवत्त्वया कर्म कर्तव्यमेवेत्याह—

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

एवमिति । पूर्वैरतीतैरप्यास्मिन्युगे ययातिप्रभृतिभिर्मुमुक्षुभिरेवं ज्ञात्वा नाहं कर्ता न मे कर्मफले स्पृहेत्येवं बुध्वा कर्म कृतं यस्मात्पूर्वैरपि कृतं तस्मात्त्वमपि तन्मार्गानुसारेण कर्मैव कुरु न तूष्णीमासनं नापि संन्यासम् । यद्यतत्त्वज्ञस्तदा चित्तशुद्ध्यर्थं तत्त्वज्ञश्चेल्लोकसङ्ग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरमांतर्पूर्वयुगान्तरेपि कृतं नाधुनातनं कृतं निर्मितं तथा चास्मिन्युगेऽन्ययुगे च पूर्वं पूर्वतरैः कृतत्वादवश्यं त्वया कर्तव्यं कर्मेति भावः ।

विदुष उपाधिकृतानां कर्मणामबन्धकत्वज्ञानमेव परार्थप्रवृत्तौ बलवत्साधनमिति सूचयित्वा प्राञ्चोप्यबन्धकत्वज्ञानेनैव परार्थं प्रवृत्ता इति शिष्टाचारं प्रमाणय्य त्वयाप्येवं प्रवर्तितव्यमित्याह एवं ज्ञात्वेति । अहं बुध्यादिसाक्षी प्रत्यगेवास्मि देहेन्द्रियादिभ्यो भिन्नः सन्देहेन्द्रियकृतैः कर्मभिर्न बद्ध इत्यात्मनो देहेन्द्रियादिभ्यो भिन्नत्वं देहादिकृतकर्मणामबन्धकत्वं चैवमुक्तरीत्या विज्ञाय मुमुक्षुभिर्मुक्तैर्मुमोचयिषुभिरितीदं गर्भितणिजन्तं रूपं अविद्याबन्धेभ्यो मोचयितुमिच्छद्भिर्मुमुक्षुभिः पूर्वैरपि जनकादिभिर्लोकहितार्थं कर्म कृतं यस्मात्तस्मात्त्वं पूर्वैः कृतं ज्ञानवृद्धैरनुष्ठितं पूर्वतरमनादिकालप्रवृत्तं कर्मैव लोकहितार्थं कुरु न तु संन्यासमित्यर्थ इत्यन्ये ॥१५॥

कर्मविषये कश्चित्संशयोप्यस्ति किं येन पूर्वैः पूर्वतरं कृतमित्यातिनिर्बन्धेन कर्तृकर्मविशेषणं ददासीति चेदस्त्येवातस्तद्विशेषणदाने यथा पूर्वैः कृतं तथा मयापि कर्तव्यमिति निश्चित्य तत्र तव प्रवृत्तिः सुकरा स्यादतो विशेषणं सफलमित्यभिप्रेत्य कर्मणो दुर्ज्ञेयत्वमाह—

किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः ।

तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

किं कर्मेति । किं परमार्थतः कर्म किं वा परमार्थतोकर्मेत्येवमत्रास्मिन्कर्मविषये कवयो मेधाविनोऽपि मोहिताः मोहं निर्णयासामर्थ्यं प्राप्ता. अत्यन्तदुर्निरूपत्वात्तयोः नौस्थस्य निष्क्रियेष्वपि वृक्षेषु गमनभ्रमदर्शनात् दूराच्चक्षुःसन्निकृष्टेषु गच्छत्स्वपि पुरुषेष्वगमनभ्रमदर्शनाच्च दुर्विज्ञेयत्वं तयोरित्यर्थः । तत्तस्मात्ते तुभ्यमहं कर्माकर्म च प्रवक्ष्यामि प्रकर्षेण संदेहोच्छेदेन वक्ष्यामि यत्कर्माकर्मस्वरूपं ज्ञात्वा मोक्ष्यसे मुक्तो भविष्यस्यशुभात्संसारबन्धनादित्यर्थः । तत्ते कर्मेत्यत्राकारप्रश्लेषोपि बोध्यः ॥ १६ ॥

ननु सर्वलोके प्रसिद्धत्वादहमेवैतज्जानामि देहेन्द्रियादिव्यापारः कर्म तूष्णीमासनमकर्मेति तत्र किं त्वया वक्तव्यमित्याशङ्क्य दुर्ज्ञेयत्वं दर्शयति—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥

कर्मण इति । किं त्वया वक्तव्यमिति नावमन्तव्यं हि यस्मात्कर्मणः शास्त्रविहितस्यापि तत्त्वं बोद्धव्यमस्ति विकर्मणश्च प्रतिषिद्धस्य अकर्मणश्च तूष्णींभावस्य च तत्त्वं बोद्धव्यमस्तीति वाक्यत्रयेऽपि तत्त्वमस्तीत्यध्याहारः । कर्मणइत्युपलक्षणं यस्मात्कर्माकर्मविकर्मणां गहना दुर्ज्ञाना गतिस्तत्त्वमित्यर्थः ॥ १७ ॥

किं पुनः कर्मादेस्तत्त्वमित्यपेक्षायां कर्मादेस्तत्त्वं निरूपयन् तत्र तावन्नौस्थस्य तटस्थतरुपर्वतादिषु समारोपितचलनप्रतीतिरिव लोकस्य देहाद्याश्रयं कर्मात्मन्यध्यारोप्याहं कर्ता ममैतत्कर्मास्य फलं मया भोक्तव्यमिति भ्रान्त्या प्रतीतिस्तन्निवृत्त्यर्थं भगवानाह—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

कर्मणीति । क्रियते इति कर्म व्यापारमात्रं तस्मिन्कर्मणि देहेन्द्रियादिव्यापारे विहिते प्रतिषिद्धे च अहं करोमीत्यादिकर्तृत्वादिधर्माध्यासेनात्मन्यारोपिते नौस्थेनाचलत्सु तटस्थवृक्षादिषु समारोपिते चलन इवाकर्माकर्त्रात्मस्वरूपविज्ञानेन वस्तुतः कर्माभावं नाहं कर्ता न ममैतत्कर्म नास्य फलं ममाऽपेक्षितमित्येव यः कश्चित्पश्येत् पश्यति तटस्थवृक्षादिष्विव चलनाभावं यथा पूर्वं जनकादयो मुक्ता मुमुक्षवश्च पश्यन्ति स्म तथेत्यर्थः । सूर्यादिषु गच्छत्स्वप्यगमनप्रतीतिरिव देहेन्द्रियादिषु सर्वदा प्रवृत्तिनिवृत्तिरूपव्यापाराविशिष्टेषु सत्स्वपि निर्व्यापारस्तूष्णीं सुखमास इति भ्रान्तिप्रतीतिनिराकरणायाह अकर्मणीति । देहेन्द्रियादिषु त्रिगुणमायापरिणामत्वेन सर्वदा सव्यापारेषु सत्स्वपि निर्व्यापारस्तूष्णीं सुखमासे इतिभ्रांत्या समारोपितेऽकर्मणि कर्माभावे दूरस्थचक्षुःसान्निकृष्टपुरुषेषु गच्छत्स्वप्यगमन इव सर्वदा सव्यापारदेहेन्द्रियादिस्वरूपविज्ञानेन वस्तुतः कर्मनिवृत्त्याख्यप्रयत्नरूपं व्यापारं यः पश्यति दूरस्थपुरुषेषु गमनमिव औदासीन्यावस्थायामप्युदासीनोऽहमास इत्यभिमानस्य कर्मरूपत्वात् स एतादृशो मनुष्येषु मध्ये बुद्धिमान् स युक्तो योगी कृत्स्नकर्मकृत् समस्तकृच्च स इति बुद्धिमत्त्वयोगयुक्तत्वसर्वकर्मकृत्त्वैस्त्रिभिर्धर्मैः स्तूयते । अत्र प्रथमपादेन कर्म-

विकर्मणोस्तत्त्वं कर्मशब्दस्य विहितनिषिद्धपरत्वात् द्वितीयपादेन त्वकर्मणस्तत्त्वं दर्शितमिति बोध्यम् । तत्र त्वं मन्यसे कर्मणो बन्धहेतुत्वात्तूष्णीमेव मया सुखेन स्थातव्यमिति तन्मृषा असति कर्तृत्वाभिमाने विहितस्य प्रतिषिद्धस्य वा कर्मणो बन्धहेतुत्वाभावात् सति च कर्तृत्वाभिमाने तूष्णीमहमास इत्यौदासीन्याभिमानात्मकं यत्कर्म तदपि बन्धहेतुरेव वस्तुतत्त्वापरिज्ञानात् तस्मात्कर्मविकर्माकर्मणामीदृशं तत्त्वं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभिमानफलतृष्णात्यागेन विहितं कर्मैव कुर्वित्याशय इति भाष्यकृदनुमतं व्याख्यानम् ।

कर्मणि ज्ञानकर्मणि दृश्ये जडे प्रपञ्चे सद्रूपेण स्फुरणरूपेण वानुस्यूतं सर्वभ्रमाधिष्ठानमकर्मावेद्यं स्वप्रकाशचैतन्यलक्षणं परं ब्रह्म परमार्थदृष्ट्या यः पश्येत्तथाऽकर्मणि च स्वप्रकाशे पूर्वोक्ते दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थं स दृग्दृश्ययोः सम्बन्धानुपपत्तेर्यः पश्यति एवं परस्पराध्यासेऽपि बुद्धं वस्तु यः पश्यति स एव मनुष्येषु मध्ये बुद्धिमान् परमार्थदर्शित्वान्नान्यस्तस्यापरमार्थदर्शित्वात् स च युक्तो बुद्धिसाधनयोगयुक्तान्तःकरणशुद्ध्या एकाग्रचित्तः अतस्सएवान्तःकरणशुद्धिसाधनकृत्स्नकर्मकृदिति वास्तवधर्मैरेव स्तूयते । यस्मादेवं तस्मात्त्वमपि परमार्थवस्तुदर्शी भव तावतैव कृत्स्नकर्मकारित्वोपपत्तेरित्याशयः। अतो यदुक्तं यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति यच्चोक्तं कर्मादीनां तत्त्वं बोद्धव्यमस्तीति स बुद्धिमानित्यादिस्तुतिश्च तत्सर्वं परमार्थदर्शने सङ्गच्छते । अन्यथाऽनेनाशुभात्संसारान्मोक्षानुपपत्तेस्तत्त्वं चान्यत्र बोद्धव्यमस्तीति । न वाऽतज्ज्ञाने बुद्धिमत्त्वमिति युक्तमेव परमार्थदर्शिनां व्याख्यानमित्यन्ये ।

अपरे तु कर्म यज्ञादिकं ससाधनं तस्मिन्नकर्म स्पन्दशून्यं कूटस्थं ब्रह्म यः पश्येत् कर्मतदङ्गेषु ब्रह्मदृष्टिमध्यस्येत् ।

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मंत्रोहमहमेवाज्यमहमग्निरहं हुतम् ॥

इत्युक्तेः। अन्यथा यत्कुर्तं तद्वृथाचेष्टारूपमवानो गहना कर्मणो गतिः किं तदकर्म यत्कर्मण्यध्यस्यते इत्याकाङ्क्षायां यत्रैतत्कर्म पुण्यपापात्मकं दृश्यते पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति तत्फलं च सुखदुःखादिकं अहं सुखी अहं दुःखीति स प्रत्यक्चेतनोऽकर्म तत्रैवेदं कर्मास्पन्दे स्पन्दात्मकं सर्पः असर्पे इवाध्यस्तमिति यः पश्येत् स बुद्धिमानित्यादिना स्तूयते इत्याहुः ॥ १८ ॥

तदेतत्कर्मण्यकर्मदर्शनादिकं स्तुवन् परमार्थवस्तुदर्शिनः कर्तृत्वाद्यभिमानाभावेन कर्मालिप्तत्वं प्रपञ्चयति यस्येत्यारभ्य ब्रह्मकर्मसमाधिनेत्यन्तेन—

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।

ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥१९॥

यस्य पूर्वोक्तपरमार्थदर्शिनः सर्वे यावन्तो वैदिका लौकिका वा समारभ्यन्त इति समारम्भाः कर्माणि कामः फलेच्छा सङ्कल्पोऽहं करोमीति-कर्तृत्वाभिमानस्ताभ्यां वर्जिताः लोकसङ्ग्रहार्थं वा जीवनमात्रार्थं वा प्रारब्धकर्मवेगाद्वृथाचेष्टारूपा भवन्ति तं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि भस्मीभूतानि कर्माणि शुभाशुभलक्षणानि यस्य तं ज्ञानाग्निदग्धकर्माणं बुधा ब्रह्मविदो वस्तुतः पण्डितमाहुः। परमार्थदर्शी हि पण्डित उच्यते न तु पण्डितत्वेन प्रसिद्धोऽपि वैशेषिकादिर्भ्रान्तत्वादित्यर्थः ।

अन्ये तु इदं श्लोकचतुष्टयमित्थं योजयन्ति । ननु कर्मणां बन्धकत्वमेव सिध्यति 'कर्मणा बध्यते जन्तुरिति' स्मृतेरिति चेन्न तत्स्मृतेरविद्वत्कर्तृकर्मविषयकत्वा 'त्तं विदित्वा न लिप्यते कर्मणा पापकेनेति' विदुषः कर्मालेपश्रुतेः। कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा विदुषा क्रियमाणं कर्माकर्मैव तन्न बन्धाय भवत्यविदुषा कृतमकर्मैव कर्म तदेव बन्धाय भवति। तर्हि कर्माकर्मणोर्लक्षणं किमित्याकाङ्क्षायामाह किमिति । श्रुतिस्मृतिभ्यां यद्विहितं तत्कर्म यदविहितं तदकर्मेति केचित्पण्डिता जगुः(१) । वैदिकं स्मार्तं च यत्तत्सर्वं कर्म तत्संन्यासोऽकर्मेत्यपरे(२)। चलनात्मकं कर्माचलनात्मकं तूष्णीमासनमकर्मेत्यन्ये(३) । केचित्तु किं कर्म किमकर्मेति किं वा कर्मशब्दवाच्यमकर्मशब्दवाच्यं वा किमिति कवयः । सर्वशास्त्रज्ञा अप्यत्र कर्माकर्मतत्त्वनिर्णये मोहिता मूढभावं गतास्तत्तत्त्वं निर्णेतुमसमर्था जाता इत्यर्थः । यत एवं ततः कर्माकर्मस्वरूपमजानते ते तुभ्यं कर्म चाकर्म च प्रवक्ष्यामि तयोर्ल-

(१) मीमांसका इत्यर्थः । तन्मते कर्मण एव मुख्यत्वात् । श्रुत्यादिनिषिद्धस्याविहितस्य वाऽकर्मत्वात् ।

(२) सम्प्रदायविदः ।

(३) नैयायिकाः ।

क्षणमुपदेक्ष्यामि यज्ज्ञात्वा ययोस्तत्त्वं विज्ञायाशुभात्संसारान्मोक्ष्यसे कर्माकर्मणोस्तत्त्वं सम्यग् ज्ञात्वा मुक्तो भविष्यसीत्यर्थः ॥ १६ ॥

ननु कर्माकर्मणोरुभयोस्तत्त्वमारुरुक्षोर्ज्ञातव्यं वा किमारूढस्य वेत्याकांक्षायामारुरुक्षोः कर्माकर्मविकर्मणां तत्त्वं सम्यग्ज्ञातव्यमेव तद्बोधस्यैव तस्य दुरवगाहत्वात्तान्येव बोद्धव्यानि प्रयत्नेनास्यात्रैवाधिकारो नात्यत्रेत्याशयेनाह। कर्मणो हीति। मुमुक्षोरारोढुमिच्छतः कर्मणो वर्णाश्रमादेरनुष्ठेयस्य बोद्धव्यमस्ति ज्ञाते सति हि कर्मस्वरूपे यथाशास्त्रं कर्म कर्तुं शक्यते नाज्ञाते शास्त्राणामनेकत्वाच्छास्त्रप्रवर्तकानां बहुविधत्वाच्च देशकालयुगाधिकारिवर्णाश्रमवयोवस्थादिभेदेन सङ्कोचव्याकोचाभ्यां कर्मविधेरनेकरूपत्वाच्च कर्तव्यस्य कर्मणस्तत्त्वं सम्यग्बोद्धव्यमित्यर्थः। विकर्मणोऽवन्तसम्बन्धवता विधिना विहितविपरीततया विधीयमानत्वाद्विकर्म प्रतिषिद्धं निन्दितं कर्म तस्य विकर्मणोऽपि तत्त्वं बोद्धव्यमस्ति ज्ञाते हि निषिद्धांशे यन्निषिद्धं तत्परिहर्तुं शक्यते ततो निरुक्तदेशकालादिभेदेन निषेधस्यापि बहुविधत्वात्तत्त्वं बोद्धव्यमस्तीत्यर्थः। तथैवाकर्मणोऽपि न कर्माकर्म कर्माभावः यस्मात्कर्म न सम्भवति तदकर्मेति वा कर्मसंन्यासस्तस्यापि तत्त्वं बोद्धव्यमस्ति। काम्यकर्मत्यागः निषिद्धकर्मत्यागः कर्मफलत्यागः सर्वकर्मपरित्यागः कर्ममात्रपरित्याग इत्यादिभेदेन संन्यासोऽपि बहुधा भिद्यते ततस्तस्यापि तत्त्वं बोद्धव्यमस्तीत्यर्थः। हि यस्मात्कारणात्कर्मण इति विकर्माकर्मणोरप्युपलक्षणं तथा च कर्माकर्मविकर्मणां त्रयाणामपि गतिरेवं कर्तव्यमिति कर्तव्यतानिश्चितिर्गहना विदुषामपि दुर्ज्ञेया भवत्यत आरुरुक्षोः कर्माकर्मविकर्मणां स्वरूपं शास्त्रत आचार्यतश्च सलक्षणं सरहस्यं च सम्यग्ज्ञातव्यमस्तीत्यर्थः ॥ १७ ॥

नैवैतान्यारूढस्य तु बोद्धव्यानि किन्तु कर्माकर्मणोरेव तत्त्वं बोद्धव्यमशुभमोक्षायेति पूर्वं प्रवक्ष्यामीति यत्प्रतिज्ञातं तदिदानीमुपदिशति कर्मणीति। क्रियते देहेन्द्रियैरेव निर्वर्त्यत इति कर्म लौकिको वैदिकश्च सर्वोऽपि व्यापारस्तस्मिन्कर्मणि चेष्टामात्रे औपाधिके आत्मयाथात्म्यज्ञो विद्वानकर्म कर्माभावं यः पश्येत्तथैवाकर्मणि देहेन्द्रियव्यापारोपरमलक्षणे तूष्णीमवस्थायां कर्म क्रियामेव यः पश्येत्। ननु कर्मण्यकर्मदर्शनं चाकर्मणि कर्मदर्शनं चोभयमपि न सम्भवति प्रत्यक्षविरोधान्न हि कर्माकर्म भवितुमर्हति व्यापारस्य दृश्यमानत्वान्नाप्यकर्म च कर्म भवति स्थाणुवत्तूष्णीं भावस्योपल-

श्यमानत्वात्। भावे चाभावदर्शनमभावे च भावदर्शनमतिविरुद्धमप्रामाणिकं च भावाभावयोरभावत्वभावत्वासम्भवादिति चेन्न सद्बुद्ध्या विचार्यमाणे दर्शनद्वयोपपत्तेः। तत्कथमिति चेदुच्यते स्वयमकर्मा सन्नेव पुमानन्यकर्मणा कर्मी भवति यथा मेघक्रियया चन्द्रः क्रियावान् यथा चालनक्रिययातपः क्रियावान् तथा देहेन्द्रियादितादात्म्येन देहेन्द्रियादिक्रियया स्वयमक्रियोपि सक्रियो भवत्याखिलो जन्तुस्तथापि ब्रह्मवेत्ता ब्रह्मैवाहमिति ब्रह्मण्येवात्मत्वविज्ञानेन स्वस्य देहादिसंबन्धाभावात्तत्कर्तृकं कर्माकर्मैव पश्यति तत्राहं ममेति स्वत्वाभावात्। न ह्यन्यकर्तृके कर्मण्यन्यस्य स्वत्वमुपपद्यते तदभावाद्देहादिकर्तृकं कर्मास्याकर्मैव भवत्यबन्धकत्वेनाकर्मतुल्यत्वात् तस्मात्तदकर्मैव पश्यतीत्यर्थः। न तु स्वगतं कर्माकर्म पश्यति स्वस्य निरवयवत्वेन क्रियासम्बन्धानुपपत्तेर्यथा वृक्षे चलति सति तत्स्थमाकाशं निष्क्रियं पश्यति यथा मेघेषु धावत्सु चन्द्रं निष्क्रियं पश्यति तथा देहेन्द्रियादिषु स्वच्छन्दं विषयेषु प्रवृत्तेषु सत्सु स्वं निष्क्रियमेव पश्यति विद्वान्। ततो निष्कलं निष्क्रियमित्यादिश्रुतिप्रामाण्यात्कूटस्थासंगचिद्रूपमात्मानमेवात्मत्वेन विजानतो विदुषो देहादिकर्तृके कर्मण्यकर्मदर्शनमुपपद्यत एव। तस्यैतस्य दर्शनस्य विद्वत्प्रत्यक्षत्वादकर्तारं स पश्यतीत्यादिस्मृतिसिद्धत्वाच्च प्रामाण्योपपत्तेः। किं च मूढः स्वास्मिन्देहाद्यध्यस्य तद्व्यापारोपरमं चाहमासे तूष्णीं सुखं न किंचित्करोमि दुःखकरं कर्मेत्यसुखे देहेन्द्रियादिनिरोधे सुखबुद्ध्या तदक्रियमेव पश्यति यथाश्वारूढोऽश्वस्थित्या स्वं स्थितं पश्यति यथा गच्छन्तमेव सूर्यमगच्छन्तं पश्यति न तथा विद्वान् किन्तु तस्मिन् देहादिव्यापारोपरमेप्यकर्मणि कर्मैव पश्यति यथा निरूढांगुलिमुष्टौ बहिःक्रियाभावेप्यन्तरङ्गुलीनां मुकुलीभावसिद्धेः कारणभूतांगुलिनिरोधनक्रिया विद्यते यथा निमीलिते चक्षुषि बहिर्दर्शनक्रियाऽभावेपि पक्ष्मनिरोधनक्रिया विद्यते तथा नाहं किंचित्करोमीति तूष्णीमवस्थायामपि बहिर्देहेन्द्रियादिचलनक्रियाऽभावेप्यन्तर्नाहं किंचित्करोमीति कर्तुराग्रहरूपा मानसी क्रिया विद्यत एव अन्तराग्रहक्रियाऽभावे बहिःपाण्यादिनिरोधायोगान्मनोव्यापारैकमूलत्वात्सर्वार्थसिद्धेरिन्द्रियक्रियासम्भवाच्चेन्द्रियनिरोधक्रिययैव देहो निश्चलस्तिष्ठति तदभावे देहचलनं वेन्द्रियचलनं वा स्यात्ततो मूढदृष्ट्या त्वकर्माणि तूष्णीमवस्थानेऽपि कर्मदर्शनस्य न्यायदृष्टान्तानुभवसिद्धत्वादकर्मणि कर्मदर्शनमविरुद्धं च प्रामाणिकं च। भावे चाभावदर्शनमभावे च भावदर्शन-

मयुक्तमिति यत्तन्न देहचेष्टाया भावत्वेऽप्यबन्धकत्वेनाभावतुल्यत्वात्तत्र कर्माभावदर्शनस्योपयुक्तत्वाद्भावे चाभावदर्शनमुपपद्यते । तूष्णीमवस्थाया-मकर्मण्यप्युक्तरीत्या कर्मदर्शनादकर्मणि कर्मदर्शनं चोपपन्नतरमेवातो न कोऽपि विरोधः । ननु विदुषः कर्मण्यकर्मदर्शनमतीतानागतवर्तमानसर्व-कर्मनिर्मोकहेतुत्वेन जन्मादिबन्धनिवर्तकत्वात्कर्तव्यमेव भवति अकर्मणि कर्मदर्शनस्य तु निष्प्रयोजनत्वात् अकर्मणि च कर्म यः पश्येदिति विधिर-नर्थक एवेति चेन्न तस्याप्यकर्मास्पृष्टात्मदर्शनसाधनत्वेन सफलत्वोपपत्तेः निष्क्रियं शान्तमिति निष्क्रियत्वशान्तत्वयोर्ब्रह्मलक्षणत्वश्रवणादत्रापि नि-ष्क्रियत्वशान्तत्वधर्मवति देहेन्द्रियव्यापारोपरमे तूष्णीमवस्थाने स्वरूपभ्रमः स्यात्तन्मा भूदित्युपदिशति अकर्मणि च कर्म य इति । कर्मवदकर्मणोऽप्यौ-पाधिकत्वात्पुरुषतन्त्रत्वाद्दृश्यत्वाद्विचार्यमाणे सक्रियत्वाच्च स्वयमनात्मैव भवति । तद्द्रष्टा यः स एवात्मेति बोद्धव्यमिति सूचयितुमुपदिश्यते अक-र्मणि च कर्म य इति । किंचाकर्मणोऽपि कर्मवत्कर्मत्वज्ञानेन कर्माकर्मणोरु-भयोरप्यनात्मत्वे सिद्धे विदुषस्तूष्णीमवस्थाया अकर्मणो निष्फलत्वात्तद-पेक्षया लोकोपकारकत्वात्कर्मणि प्रवृत्तिः सफलेत्यपि सूचयत्यकर्मणि च कर्म य इत्यतो विधेः सर्वथा साफल्यमस्ति । ननु कर्मण्यकर्मदर्शनमकर्म-णि कर्मदर्शनं चैककर्तृकं न भवति परस्परविरुद्धत्वेन तयोरेकाश्रयत्वायोगा-द्विकल्पो नहि वास्त्वति द्वैतं सर्वं मिथ्यैव पश्यतो विदुषः देहेन्द्रियादेर्मिथ्या-त्वात्तदाश्रितकर्मणोऽपि मिथ्यात्वदर्शनमुक्तं न त्वकर्मणि कर्मदर्शनं युक्तं तस्य देहादिसत्यत्वज्ञानैकसाध्यत्वाद्देहादेः सत्यत्वं खलु तदाश्रितस्याकर्मणः सत्यत्वं कर्मत्वं च सिद्ध्यति तत्सिद्धौ तु कर्मण्यकर्मदर्शनं न सिध्यति तस्य मिथ्यात्वज्ञाननिबन्धनत्वादेवं परस्परविरुद्धयोस्तयोरेकपुरुषाधिकर-णत्वं न सम्भवति कर्मण्यकर्म यः पश्येदकर्मणि च कर्म य इति यच्छब्दद्व-यश्रवणाच्च ततस्तयोर्भिन्नपुरुषाश्रयत्वमेवेति चेन्न विदुष उभयत्र मिथ्या-त्वदर्शनस्यैव विवक्षितत्वाद्यथा देहेन्द्रियादेस्तत्कर्मणोऽपि च मिथ्यात्वं द्रष्टव्यं तथा तद्व्यापारोपरमस्यापि मिथ्यात्वमेव द्रष्टव्यम् । उभयोरप्यविद्याकार्य-भूतदेहाश्रयत्वेनावस्तुत्वाविशेषादन्यथा भेददृष्टेरशुभमोक्षासम्भवात् । अतः कर्माकर्मणोरुभयोस्तदाश्रयस्यापि मिथ्यात्वमेव निश्चित्य तदधिष्ठानं परं ब्रह्म निष्कलं निष्क्रियं शान्तमनन्तमखण्डानन्दैकरसमिदमेवाहमिति स्वा-त्मना विज्ञाय तदात्मना तिष्ठति स एवाऽशुभान्मुक्तो भवत्यतोऽन्यथात्मानं पश्यतो न मुक्तिरस्ति । तस्मात्तयोरेकपुरुषाश्रयत्वमेव न त्वनेकपुरुषाश्रयत्वं

यद्ब्रह्म तु यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्तीत्यत्र यथा तथा बोधसौकर्यार्थमेव न तु गृहीतृभेदसिद्ध्यर्थं स बुद्धिमानित्येकेनैव तच्छब्देनोपसंहारादेवं कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं यः करोति शास्त्रत आचार्यतो युक्तितोऽनुभूतितश्च स एव मनुष्येष्वधिकृतः सर्वशास्त्रेषु बुद्धिमानात्मतत्त्वज्ञः स एव युक्तो योगी च स एव कृत्स्नकर्मकृत् सर्वेषां श्रौतानां स्मार्तानामितरेषां च पुण्यकर्मणां कर्ता च भवति यथा 'कृता पविजितायाधरे याः संयन्त्येवमेनं तदाभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति' श्रवणात्सर्वाणि सर्वलोकैः कृतानि पुण्यकर्माण्यनेन कृतानि भवन्तीत्यर्थः।

यद्वा पूर्वोक्तश्लोकस्येत्थं योजना। ननु कर्माकर्मणोस्तत्त्वं सम्यक् ज्ञात्वा मुक्तो भविष्यसीति यदुक्तं तन्न युक्तं तथाहि तमेव विदित्वाऽतिमृत्युमेतीत्यात्मतत्त्वज्ञानादेव मुक्तिः श्रूयते न तु कर्माकर्मणोस्तत्त्वज्ञानादिति चेत्सत्यं आत्मज्ञानादेव मुक्तिस्तथापि तदा विद्वान्पुण्यपापे विधूयेति पुण्यपापविध्वंसनं कृतवत एव विदुषो मुक्तिः श्रूयते ततो मुमुक्षोः कर्मादितत्त्वज्ञानेन जन्मादिहेतुभ्यः कर्मादिभ्यो मोक्तव्यं तदर्थं कर्मादीनां तत्त्वं ज्ञातव्यमित्याह कर्मणोऽपि कर्तव्यत्वेन शास्त्रेणोक्तस्य स्वर्गादिहेतोस्तत्त्वं मुमुक्षोर्बोद्धव्यं। तद्विपरीतस्य दुर्गतिहेतोर्विकर्मणो निषिद्धस्यापि तत्त्वं बोद्धव्य तथैवानर्थहेतोरकर्मणो अश्रद्धया विहिताकरणलक्षणस्य तत्त्वं बोद्धव्यं सद्गुरोः। ननु चलनात्मकं कर्मेति चलनमेव कर्मणः स्वरूपं किं तस्य बोद्धव्यमस्तीत्याशङ्कायां कर्माकर्मविकर्मणां तत्त्वं मूढैर्ज्ञातुं न शक्यमित्याह हि यस्मात् कारणात् कर्मण इतीतरयोरप्युपलक्षणं कर्मणो विकर्मणोऽकर्मणश्च गतिस्तत्त्वावगतिर्याथात्म्यवेदनं सद्गुरूपदेशेन विना ज्ञातुं गहना दुर्घटा दुर्लभेत्यर्थः।

तर्हि तेषां तत्त्वं त्वयैवोपदेष्टव्यं जगद्गुरुणेत्याकांक्षायां कर्माकर्मविकर्मणां चाकाशादिप्रपञ्चस्य सर्वस्यापि तत्त्वं ब्रह्मैव तस्मिन्विदिते सर्वस्यापि तत्त्वं विदितं भवतीति सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन् ब्रह्म परमामित्येतच्छ्रुतिप्रमाणकं परावरैकत्वदर्शनं निःशेषसंसारभ्रमप्रविध्वंसकमुपदिशति कर्मण्यकर्म य इति। कृत् क्रियते सृज्यते इति कर्म ब्रह्मकार्यं महदादिस्थूलान्तं जगत्तस्मिन्कर्मणि सर्वत्र जगत्यकर्म नावेद्यते यत्र कर्म तदकर्म निष्कलं निष्क्रियमिति श्रुतेर्निष्क्रियं परं ब्रह्म यः पश्येत् प्रतीतं प्रपञ्चं सर्वं ब्रह्मैव यः पश्यतीत्यर्थः। ननु सविशेषं जगन्निर्विशेषं परं ब्रह्म

गवाश्ववदेतद्द्वयं परस्परविलक्षणं भवति गामश्वमिव ब्रह्मविलक्षणं विश्वं कथं ब्रह्म पश्यति विद्वानिति चेन्न तयोः कार्यकारणभावापन्नत्वादत्यन्तवैलक्षण्यानुपपत्तेः। गवाश्वयोस्तु कार्यकारणभावाभावाज्जातिभेदाच्च वैलक्षण्यं सम्भवति न तथा जगद्ब्रह्मणोः। ननु नामतो रूपतो गुणतो जातितश्च जगद्भिद्यते निरुक्तभेदस्य प्रत्यक्षत्वादेवं भेदभिन्नं जगत्कथं ब्रह्म पश्यतीति चेन्न नामरूपादेरधिष्ठानाज्ञानकल्पितत्वाद्यथैकस्मिन् तोये तरङ्गफेनबुद्बुदादिभेदकल्पना यथैकस्यामेव भूम्यां गृहक्षेत्रादिभेदकल्पना तथैवैकस्मिन्ब्रह्मणि नामरूपादिभेदकल्पना भ्रममूला न तु वास्तवी यथा द्रवत्वशीतत्वशुक्लत्वमधुरत्वादीनां तोयधर्माणां तरङ्गादिषु बहिरन्तरनुस्यूतत्वाज्जलसत्ताव्यतिरेकेण पृथक्सत्ताभावाच्च तरङ्गादि सर्वं जलमात्रमेव भवति। तथा जगत्यपि बहिरन्तस्सर्वत्राविच्छेदेन सत्त्वचित्त्वादीनां ब्रह्मधर्माणामनुगमदर्शनाद्ब्रह्मसत्ताव्यतिरेकेण पृथक्सत्ताभावाच्च चिद्धीदं सर्वं सद्धीदं सर्वं सर्वं खल्विदं ब्रह्म ब्रह्मैव सर्वमित्यादिश्रुतिभिरिदं सर्वं ब्रह्मैव ब्रह्मकार्यत्वान्मृत्कार्यघटवत् इदं सर्वं ब्रह्मैव ब्रह्मण्यारोपितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिर्मृदादिदृष्टान्तैश्च सम्यग्विचार्यमाणे जगत्सर्वं ब्रह्मैव भवत्यत एव शुद्धात्मब्रह्मवित्सर्वं जगद्ब्रह्मैव पश्यतीत्यर्थः। यद्यपि श्रुतियुक्तिदृष्टान्तानुभवैर्जगतो ब्रह्ममात्रत्वे सिद्धे जगतः कार्यत्वं निवृत्तं तन्निवृत्त्या ब्रह्मणोपि निमित्तापाये नैमित्तिकस्याप्यपाय इति न्यायेन कारणत्वं निवृत्तमेव भवति कार्यत्वसापेक्षत्वात्कारणत्वस्य तन्निवृत्तिरेवमुभयनिवृत्त्या तु कार्यकारणभावशून्यमेकमेवाद्वितीयं ब्रह्मेति ब्रह्मणोऽद्वितीयत्वं सिद्धं तथाप्यधुना विचाराद्द्वितीयत्वं ब्रह्मणः सिद्धं पूर्वं तु जगदिति ब्रह्मेति द्वैतमस्त्येवेत्याशंकायां न पूर्वमपि यथा रज्जुरेव सर्पतच्छिरःपुच्छादिरूपेणाभात् यथा मरुरेव जलतरङ्गफेनादिरूपेणाभात्तथा ब्रह्मैव भ्रांत्या द्रव्यगुणकर्मादिभेदभिन्नजगदात्मना भातं तत् वस्तुतो जगदस्तीति मुमुक्षुणा ब्रह्मणः कालत्रयेप्यद्वितीयत्वासिद्धये ब्रह्मणि तद्विवर्तत्वेन जगत्स्थितमिति द्रष्टव्यमिति व्यतिहारमुखेनोक्तमेव दर्शनं पुनर्दृढयति जगतो ब्रह्ममात्रत्वे निःसंदिग्धत्वायाकर्मणि च कर्म य इति। अकर्मण्युक्तलक्षणे ब्रह्मणि कर्म चोक्तलक्षणं जगद्यः पश्येद्ब्रह्मविवर्तत्वेन स्वतः सत्ताभावाद्रजतं शुक्तिमिव सलिलं मरुमिव च जगत्सर्वं ब्रह्मैव य पश्यतीत्यर्थः। 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति' श्रुतिर्ब्रह्मणि पृथक्सत्तावत्त्वेन नामरूपादिभेदभिन्नं जगत्पश्यतोऽविदुषोनर्थं ब्रवीति यतस्ततो

नामरूपादिद्वैतदर्शनं भ्रमकल्पितमुत्सृज्य निःश्रेयसार्थिना निःशेषविनष्टविपर्ययं यथा तथा नामरूपगुणं कर्म च सर्वं ब्रह्मैवेति(१) सिद्धम्। एवमसन्दिग्धमविपर्यस्तं सर्वं प्रत्यग्दृष्ट्या ब्रह्मैव यः पश्यति स एव बुद्धिमान्ब्रह्मवेत्ता स एव युक्तो ब्रह्मनिष्ठः स एव कृत्स्नकर्मकृत् कृत्स्नानि सर्वाण्यनेककल्पार्जितानि संचितान्याधुनिकजन्मकृतान्यप्रवृत्तफलानि कर्माणि नानायोनिप्रापकानि स्वयाथात्म्यविज्ञानखड्गेन कृन्तति छिनत्तीति कृत्स्नकर्मकृत् 'सर्वं पाप्मानं तरतीति' श्रुतेरेवं द्रष्टा यः सोऽशुभान्मुक्तो भवतीत्यर्थः।

केचित्तु कर्मणि वेदविहितेनुष्ठीयमाने सत्यकर्म नैष्कर्म्यं पश्येत् तथाकर्मणि नैष्कर्म्ये कर्मैव निमित्तभूतं पश्येत एवं मिथः कार्यकारणरूपत्वं पश्येत् यः स एव व्यवसायात्मिकबुद्धिमान् स एव कृत्स्नकर्मकृत् मुक्तौ सर्वकर्मफलानामन्तर्भूतत्वादित्यर्थः। अथैवं पश्यतः पुरुषस्य स्वरूपमाह यस्येति पञ्चभिरित्याहुः ॥ १८ ॥

यथा 'पुष्करपलाश आपो न श्लिष्यन्ते' इत्येतच्छ्रुत्युक्तरीत्या कर्मदर्शनेन शरीरयात्रोपयुक्तानि ज्ञानसमकालानि सर्वाणि कर्माणि यो विश्लेषयति स एव पण्डित इत्याह यस्येति। सम्यग्देहेन्द्रियादिभिरेवारभ्यन्ते क्रियन्त इति समारम्भाः प्राणत्राणोपयोगिनो देहेन्द्रियव्यापाराः सर्वे यस्य ब्रह्मविदः कामसङ्कल्पवर्जिताः कामोऽनेन भवितव्यमितीच्छावेगः सङ्कल्पस्तद्धेतुः सम्यक्त्वबुद्धिस्ताभ्यां वर्जिताः क्षुदादिवत्तत्कालिका भवन्ति तं ज्ञानाग्निदग्धकर्माणं कूटस्थासङ्गचिद्रूप एवाहं न तु कर्ता भोक्ता श्रोता द्रष्टा वक्तेत्यात्मन्येवात्मभावापत्त्या देहतद्धर्मतत्कर्मसु स्वस्यासङ्गत्वदर्शनं तदेवाग्निस्तेन दग्धानि निर्मूलितानि सर्वाणि विहिताविहितादिरूपाणि कर्माण्यौपाधिकानि यस्य तमेव जीवन्मुक्तं महापुरुषं बुधाः शास्त्रज्ञा पण्डितं प्राहुः। पण्डा कल्याणी सर्वत्र ब्रह्ममात्रावगाहिन्यखण्डात्मिका वृत्तिरस्य संजातेति पण्डितस्तमेव पण्डितं वदन्ति नान्यमित्यर्थः। अत्र कामसंकल्पवर्जिता इत्यनेन 'यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति' न्यायात्कर्मसु प्रवृत्तेः कारणं कामस्तत्कारणं संकल्प एवारम्भाणां तद्विवर्जितत्वे स्वार्थं वा विदुषः प्रवृत्तिरनुपपन्ना सती शरीरयात्रामात्रावशिष्टा सापि तत्कालिकी तत्रापि कामाद्यभावाद्वेगवर्जिता ज्ञानाग्निनिर्दग्धा च भवतीति सूचितं भवति ॥ १९ ॥

(१) द्रष्टव्यमित्यर्थः।

सर्वं ब्रह्मैव पश्यतो विदुषः स्वार्था परार्था वा प्रवृत्तिर्न संभवति क्वचिद्वासनयाहारादौ कर्मणि प्रवृत्तोऽपि स्वयमकर्मैव भवतीत्याह—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ २० ॥

त्यक्त्वेति। ब्रह्मवित्स्वयं नित्यतृप्तः नित्येनानन्दैकरसेन स्वात्मना साक्षात्कृतेन ब्रह्मणैव तृप्तस्तृप्तिं गतः स्वरूपसुखसम्पन्नस्तत एव निराश्रयः येन ससाधनं कर्म पुमानाश्रयति स आश्रयः कामस्तस्मान्निर्गतो यः स निराश्रयो निष्कामस्तत एव कर्मसु न प्रवर्तते काममूलत्वात्प्रवृत्तेस्तदभावो युक्तः। यदि वासनया भिक्षाटनादौ क्वचित्प्रवर्तते तदा कर्मफलासङ्गं कर्माणि फलन्ति यत्रेति वा कर्माणि फलतीति वा स्वयं कर्मफलत्वाद्वा कर्मफलो देहस्तत्रासङ्गं कर्ता भोक्ता वक्ता श्रोता द्रष्टाहमिति तत्तादात्म्यं त्यक्त्वा कर्मणि स्वोचितेऽभिप्रवृत्तोऽपि स विद्वान् परदृष्ट्या कुर्वन्नपि स्वदृष्ट्या तु किंचिन्न करोत्येव कर्मण्यकर्मत्वदर्शनेन कर्मभिरुपाधिकृतैर्न लिप्यते इत्यर्थः ॥ २० ॥

यस्तु विवेकवैराग्यशमदमादिसाधनसम्पत्त्या सर्वाणि कर्माणि संन्यस्य श्रवणमननाभ्यां विज्ञातात्मतत्त्वो यतिर्निदिध्यासनपरो भवति स तु शरीरयात्रामात्रात्मकं कर्म कृत्वा ब्रह्मनिष्ठया निर्मूलितबन्धः सन्मुक्तो भवतीत्याह—

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

निराशीरिति। निःशेषं निर्गता आशिषो वैषयिक्यः कामना यस्मात् स निराशीर्विनष्टसर्वकाम इत्यर्थः। तत एव त्यक्तसर्वपरिग्रहः त्यक्ताः कौपीनाच्छादनातिरिक्ताः सर्वे परिग्रहा येन स त्यक्तसर्वपरिग्रहो योगनिष्ठापरो यतिः स्वयं यतचित्तात्मा यतौ निरुद्धौ चित्तात्मानौ मनोदेहौ येन स यद्वा यतं संस्थापितं चित्तमात्मन्येव न क्वचिदनात्मनि येन स यतचित्तात्मा सन् शारीरं शरीरस्थितिकारणं शारीरं प्राणत्राणैकप्रयोजनं वा तत्रापि केवलं यतित्वज्ञानित्वकर्तृत्वाभिमाननिर्मुक्तं शारीरं कर्म कुर्वन् किल्बिषं न प्राप्नोति। ननु व्युत्थायाथ भिक्षाचर्यं चरन्तीति प्राणहेतोर्भिक्षाया यतेर्विहितत्वाद्विहितानुष्ठित्या किल्बिषासम्भवात् अप्राप्तकिल्बिषप्राप्त्यभावप्रतिपादनमयुक्तमिति चेन्न क्वचित्किल्बिषप्राप्तिप्रसङ्गाद्यतात्मेत्युक्त्या वाचोऽपि निरुद्धत्वा-

न्मौनिनो यतेः क्वचिदभिशस्तादिभ्योपि भिक्षाग्रहप्रसङ्गादाभिशस्तपातितवर्जमित्यादिश्रुतिप्रतिषिद्धानुष्ठित्या स्यादेव किल्विषं सम्यग्ज्ञानप्रातिबन्धकं यत्तदेव कर्मण्यकर्मत्वदर्शनाग्निना निर्दह्य मुक्तिं प्राप्नोतीत्याशयेनोच्यते कुर्वन्नाप्नोति किल्बिषमिति।

यद्वा—

मधु मांसं च मद्यं च तांबूलं तैलमौषधम्।
त्याज्यान्यष्टौ यतेर्दूरात्तथा कान्ता च काञ्चनम्॥

इत्यतिनिषिद्धमपि शारीरं शरीरस्थितिकारणं यदभावे शरीरं निर्गच्छति श्रवणादि न सिध्यति तच्छारीरं सर्पदंशननेत्ररागोदरशूलादिमहोपद्रवे औषधसेवालक्षणं 'औषधवदशनमाचरेदिति' श्रवणाच्छारीरं कर्म केवलमयत्नसिद्धं कुर्वन् यतिः श्रवणादिशीलः किल्बिषं न प्राप्नोति।

यद्वा—

निराशीर्नित्यानित्याविवेकवैराग्यतीव्रमोक्षेच्छाभिराशीर्भ्य ऐहिकामुष्मिकसुखाशाभ्यस्तुच्छविषयाभ्यो निर्गतो यः स निराशीस्तत एव त्यक्तसर्वपरिग्रहः धर्मप्रजासंपत्यर्थं परिगृह्यते इति परिग्रहो दारादिः सर्वोपि मोक्षेच्छया परित्यक्तो येन स त्यक्तसर्वपरिग्रहः संन्यस्तसर्वकर्मतत्साधनो यतिः स्वयं यतचित्तात्मा यतौ बाह्यप्रवृत्तेर्निवर्तितौ चित्तमात्मा कार्यकारणसंघातश्च द्वौ येन स यतचित्तात्मा सन् शारीरं शरीरोपाधिकत्वादात्मा शारीरः तत्प्रापकं कर्मापि श्रवणादिकं शारीरमेव भवति बाह्यं जपादिकर्म सर्वं परित्यज्यान्तरं केवलं शारीरमेव श्रवणादिलक्षणं कर्म कुर्वन् किल्विषं दुःखप्रदं संसारबन्धनं न प्राप्नोति कुर्वन्नाप्नोति किल्बिषमिति वदता भगवता जपादिकर्मणा सह श्रवणादि कुर्वन् वा श्रवणादि त्यक्त्वा तद्व्यतिरिक्तं कर्मैव कुर्वन् किल्बिषमेव प्राप्नोतीति सूचितं भवति तेन यतेः श्रवणादिरेव सर्वदा कर्त्तव्यः नान्यत्स्तोत्रमन्त्रजपादिकमिति सिद्धं भवति। तथा च स्मृतिः।

यमानभीक्ष्णं सेवेत नियमान्मत्परस्त्यजेत्।
जिज्ञासायां सम्प्रवृत्तो नाद्रियेत्कर्मचोदनाम्॥ इति॥

संन्यस्य श्रवणं कुर्यान्नान्यद्यतिः किंचित् क्वचिदिति चेत्यर्थः॥ २१॥

अन्ये तु इदं द्वयमित्थं योजयन्ति। कथं तर्हि विवेकिनामविवेकिनां च विशेषः स्यादित्याशङ्क्य कर्मादौ सङ्गासङ्गाभ्यां विशेष इत्यभिप्रेत्याह त्यक्त्वेति। यद्वा भवतु ज्ञानाग्निना प्राक्तनानामप्रारब्धकर्मणां दाह आगामिनां चानुत्पत्तिः ज्ञानोत्पत्तिकाले क्रियमाणं तु फलाय भवेदित्याशङ्कां निराक-

वरतनुहृतिं वालिद्रोहं मनागपसर्पणं
परिमितगुणे स्पष्टावद्ये मुधा किमुदासते ॥ ३१ ॥

परिक्रम्य क एते प्रत्यासन्नसुरसरिदनूपवनोपवनमहीतलनिहित-योगासनाः स्थिरतरपर्यङ्कबन्धबन्धुरनिभृतोन्नततरर्जुकाया मुण्डजटिल-शिखाजटा मुनयः । निर्वर्ण्य हन्त विदितमेतत् (सान्तर्हासं)

स्तनभरनतमन्तर्ब्रह्म सञ्चिन्तयन्तः
पुलकितनिभृताङ्गाः पुष्पबाणागमस्थाः ।
विजितकरणवर्गा विश्रुतात्मान एते
मुषितनिखिलधर्मा मुक्तभावं भजन्ते ॥ ३२ ॥

नामतश्चैतान्निर्दिशामि

मिताः गुणाः यस्य तस्मिन् स्पष्टं अवद्यं यस्य तस्मिन् जन इति शेषः मुधा उदासते उदासीना भवन्ति किं वदन्त्येवेत्यर्थः ॥ ३१ ॥

प्रत्यासन्नायाः सुरसरितोऽनूपे तीरे यदुपवनं तस्य महीतले निहित पर्यङ्कः स्थिरतरेषु पर्यङ्केषु बन्धेन नियमनेन बन्धुराः सुन्दराः निभृताः निश्चलाः उन्नताः प्रांशवः ऋजवः अवक्राः काया देहा येषां ते तथा मुण्डाः केचित् जटिलाः केचित् शिखाजटाः शिखामात्रजटाः केचित्, वर्तन्ते । एते के इति विचारः हन्तेति हर्षे । विदितमेतन्मयेति शेषः अन्तर्हासेन हृदयहासेन सहितं यथा तथा ॥

इदं वक्ष्यमाणार्थप्रतिसन्धानेन–

स्तनेति–॥ अन्तश्चित्ते ब्रह्म संचिन्तयन्तः तत्कीदृशं स्तनभरेण नतं योषिद्रूपं पुलकितं निभृतंचाङ्गं येषां ते तथा पुष्पबाणागमे कामशास्त्रे तिष्ठन्तीति तथोक्ताः विजितः स्वस्वविषयेभ्य आहृत्य एकतानीकृतः इन्द्रियाणां वर्गः यैस्ते तथा करण-वर्गविजिता इतिवा । आहिताग्न्यादिवत् समासः । विश्रुतः विशेषेण श्रुतः आत्मा स्वस्वरूपं यैस्ते तथाविश्रुतः प्रसिद्धः आत्मा स्वभावो येषां ते तथा वर्णाश्रमधर्म त्यागिनः । पुण्यपापे विधूयेति श्रुतेः । विधूतसकलधर्मा इति च ब्रह्मचिन्तनं पुलकितांगत्वं आगमनिष्ठत्वं जितेन्द्रियत्वं आत्मवित्वं विधूतधर्मत्वं इत्येतानि मुक्तलक्षणानि तत एव मुक्तभावं भजन्ते ॥ ३२ ॥

एतान् पूर्वोक्तान् ।

श्रद्धायाजी षड्रसब्रह्मवादी
कामैकान्ती काकणीनिष्कदासः ।
मार्जाराणां कुक्कुटानां बकानां
छात्रा एते सिद्धचार्वाकतन्त्राः ॥ ३३ ॥

स्वस्ति चैतादृशां स्वोपकारमात्रसंरम्भाय । दृश्यते हि

नवदलपुटे कल्प्या यस्य प्रभोरपि तल्पधीः
नटपरिवृढो यस्याधस्ताच्छ्रमं शमयिष्यते ।
वटविटपिनस्तस्याङ्कुराननुत्कटपल्लवान्
स्थपुटचटसापेक्षी भिक्षुः प्रतिक्षणमीक्षते ॥ ३४ ॥

(आकाशे कर्णं दत्त्वा) किं ब्रूथ भिक्षवः । प्रव्रज्यापरिग्रहः परिवदनञ्चेति विप्रतिषिद्धमिति । ही ही निगृहीता एव यूयं स्ववचन-

---

श्रद्धेति—॥ अन्येषां स्वस्मिन् श्रद्धोत्पत्तये यजतीति श्रद्धायाजी षड्रसा एव कट्वाम्ललवणमधुतिक्तकषाया एव ब्रह्मेति वक्तुं शीलमस्यास्तीति तद्वादी कामे मन्मथे एकः मुख्यः निश्चयो स्यास्तीति कामैकान्ती कामपुरुषार्थ एव श्रेयानिति निश्चयवान् काकणीनिष्कस्य अशीतिभागमात्रहेम्नः दासः एते मार्जाराणां यत्रकुत्र-चिच्चिश्चलतया स्थित्वा समीपागतस्वाभिमतप्राणिनां छात्राः बलात्कारेण स्त्रीसंभोगं कुर्वतां कुक्कुटानां पर्याप्तप्रयोजनपर्यन्तं अल्पाननवेक्षमाणानां बकानां च शिष्याः सिद्धं चार्वाकतन्त्रं येषां ते तथा ॥ ३३ ॥

स्वोपकारमात्रसंरंभाय स्वस्ति अस्त्वितिशेषः । संरंभो दृश्यतेहीत्यर्थः ।

नवेति—॥ यस्य वटस्य नवे दलपुटे पत्रपुटे प्रभोर्हरेरपि तल्पधीः पर्यंकबुद्धिः कल्प्या भगवान् हि प्रलयसमये सर्वमुपसंहृत्य महार्णवे वटदले शेत इति प्रसिद्धेः नटानां परिवृढः प्रभुश्शंभुः यस्याधस्तात् मूलदेशे श्रमं ताण्डवजनितं शमयिष्यते शंभुः किल सन्ध्यासुताण्डवं कृत्वा तज्जन्यं श्रमं वटमूले स्थित्वा शमयतीति प्रसिद्धं तस्य वटविटपिनः वटवृक्षस्य अनुत्कटाः अप्रकाशाः पल्लवाः येषां तान् अंकुरान् स्थपुटचटसे विशालायतभाजने अपेक्षा अस्यास्तीति स्थपुटचटसापेक्षी भिक्षुर्माणवकः प्रतिक्षणं ईक्षते । एतद्दलानि कदा परिणतानि भविष्यन्ति कदाहं तैः पृथुलं चटसं गृहीत्वा भिक्षां गृहीष्यामीति क्षणे क्षणे पश्यतीति भावः ॥ ३४ ॥

आकाशे कर्णदानं भिक्षुवचश्श्रवणार्थं किं ब्रूथेति तद्वचनानुवादः । प्रव्रज्यायाः सन्यासवतस्य परिग्रहः परिवदनं परिवादः सन्यासिनां परिवादस्य निषिद्धत्वात्

विरोधेन। प्रव्रजिताः खलु भवन्तोपि स्वगृहेभ्यः परिवदन्ति च मामिति (अन्यतोवलोक्य) अयमपरः कश्चिदिह रौक्मकुण्डलदण्डकमण्डलुमण्डितः कटितटनिबिडनिगुम्भितदर्भरज्जुरष्टकाश्राद्धभोजननिरन्तराध्मातकुक्षिरनवरतविरचितहुङ्कारभर्त्सितपुरोवर्त्तिजन इतस्ततो दत्तदृष्टिस्तृणीकृतजगत्त्रयास्त्रैविष्टपैरपि दुष्प्रवेशं धर्मध्वजस्य कुलपतेराश्रममुपजिगमिषति । इमन्तावदाश्रमद्वारोपरोधेन तस्थुषी विशेषतो विविदिषामि ।

दर्पः—उपसृत्य प्रश्रयमभिनयन् अयि भगवति भारतकथाप्रसिद्धवैभवा प्रव्राजिताश्रमाधिदेवताकल्पा प्रत्यायितयोगसिद्धिस्सुलभैव संदृश्यसे । तदहमिह ग्रामकुलगोत्रादिभिर्विशेषतस्त्वां विजिज्ञासे ।

असूया—भद्र अन्तिमाश्रमप्रविष्टैरवक्तव्यं पृच्छसि । अप्रणम्य तु मां कथं यूपवत्तिष्ठसि ।

दर्पः—वयःकर्मविद्यादिभिरधिकोहं आश्रमाधिका तु भवती । इहतु नन्तृनन्तव्यभावे सन्दिहानस्तिष्ठामि ।

असूया—अथ तर्ह्यस्मिन्नाश्रमे योसौ कुलपतिरशेषधर्मविदास्ते तमेव धर्मसङ्कटं पृच्छावः—

नवास्मत्परिवदनं विप्रतिषिद्धमिति किं ब्रूयेति अन्वयः । हीहीति जुगुप्सायां । स्ववचनविरोधेन युष्मामेव निगृहीताः कुत इत्यत आह प्रव्रजिता—इति । प्रस्थिताः खलु भवन्तः रौक्मे रुक्मकृते कुण्डले कटितटे निबिडं यथा भवति तथा गुंभिता वेष्टिता रज्जुर्यस्य स तथा तृणीकृतं तृणं कृतं जगत्त्रयं येन स तथा । त्रैविष्टपैः देवैः इमं प्रकृष्टं आश्रमद्वारोपरोधेन आश्रमद्वारावरणेन तस्थुषी स्थिता विविदिषामि वेत्तुमिच्छामि ।

प्रश्रयं विनयं । भारतकथायां प्रसिद्धवैभवा प्रव्राजकाश्रमस्य अधिदेवतातुल्या प्रत्यायिता प्रत्ययवती योगसिद्धिर्यस्यास्सा तथा विजिज्ञासे विज्ञातुमिच्छामि ।

अन्तिमाश्रमः सन्यासाश्रमः वयःकर्मविद्यादिभिरित्यत्रादिशब्देन अभिजनो गृह्यते । अशेषान्धर्मान् वेत्तीति अशेषधर्मवित् । धर्मयोस्संकटं संमर्दं किं तदित्यत आह—

दर्पः—यदभिमतं भवत्यास्तदभ्युपगच्छामि । तिष्ठत्वयं विमर्शः । किन्तु किञ्चिदन्तर्वर्त्तते ।

भवतीं सन्निवेशेन भाववीक्षितचेष्टितैः ।
अनुभूतचरीं मन्ये वेषस्तु विषमस्तव ॥ ३५ ॥

असूया—अहमपि दृष्टपूर्वमिव भवन्तं भावयामि तिष्ठत्वयं विमर्शः परमहंसपरिव्राजकैरपि महानुभावैर्वृत्तवृद्धेति क्रियासमभिहारेण वन्दितपादां महाभागां मामप्रणम्य दीपदण्डवत्तिष्ठतः पाण्डरपटस्य ते प्रायश्चित्तिं ब्राह्मणेन विधापयितुं तव च शुद्धिमापादयितुमिच्छामि ।

दर्पः (स्वगत) परिगृहीतान्त्याश्रमा प्रगल्भमिव किं प्रजल्पति (प्रकाशं) सविचिकित्सं अस्तुतर्हि असौ आश्रमस्वामी प्रष्टव्यः इत्युभावुपसर्पतः ।

दम्भः—उभौ दृष्ट्वा मौनव्रतमभिनीय पत्नीं चेष्टया चोदयति ।

* कुहना—ससंभ्रममुपसृत्य भद्द ब्रह्मणि भअवइ सण्णासिणि तुम्हेहिं अह्मघरवइसआसादो दूरे ठाअव्वं दीहमग्गागमणदूसिआणं तुह्माणं अकिअमज्जणाणं अच्चासत्ती दूरपरिहरणिज्जा

---

* भद्र ब्राह्मण भगवति सन्यासिनि युवाभ्यामस्मद्गृहपतिसकाशाद् दूरे स्यातव्यं दीर्घमार्गागमनदूषितयोर्युवयोरकृतमज्जनयोरत्यासत्तिर्दूरपरिहरणीया

भवतीमिति—॥ सन्निवेशेन संहननेन भावाः विलासाः वीक्षितानि दृग्विलासाः चेष्टितानि यातायातानि तैः अनुभूतचरीं अनुभूतपूर्वां भूतार्थे चरट् प्रत्ययः वेषस्तु इदानींतनवेषस्तु विषमः पूर्वस्माद्विषमः ॥ ३५ ॥

परमहंसपरिव्राजकैः परमहंसाश्चते परिव्राजकाश्च तैः वृत्तेन वृद्धेति क्रियासमभिहारेण पौनःपुन्येन पाण्डरः पटो यस्य तस्य गृहस्थस्येत्यर्थः । ब्राह्मणेन वेदोक्तकर्मणा प्रायश्चित्तिं विधापयितुं कारयितुं । परिगृहीतः अन्त्याश्रमो यया सा तथा ।

आश्रमस्य दीर्घमार्गे आगमनेन दूषितयोः स्पृष्टमतोरकृतमज्जनयोः अकृतस्नानयोः अत्यासत्तिः समीपागमनं । मन्त्रसिद्धेः मन्त्रफलसिद्धेः परिपन्थिनी ।

मन्तसिद्धिपरिपंथिणी अ तुह्माणं छाआ महाजोइविग्गहे मा होज्ज णं खु महप्पाणोवि मुणिअणा दूरे पणमन्ति तेहिं वि उवणीअं भाईरहीसलिलं ण काहेवि घरसामी हत्थेण घेप्पइ ।

दर्पः—अतिमहानयमपूर्वदंपत्योर्युवयोर्धर्मनियमः अपिच वयमाप्लुता गङ्गायमुनासङ्गमे पुण्यतमैश्च मन्त्रैः पुनः पुनः प्रोक्षिताः आदित्यवत्तेजस्विनां स्वयंप्रकाशविग्रहाणामस्माकं किं त्वया च्छायोपलभ्यते लभ्यते तु परं निरयपातः अहह सर्वलोकसम्भावितं सर्वाधिकं मामतिथिमिमां च परमहंसपरिव्राजिकामन्योन्यनतृनन्तव्यभावसंशयनिर्मोचनाय समधिगतावनादृत्य नूनमसौ तेपतिराश्रमापस्मारो मौनव्याजेन स्वमौढ्यमेव प्रच्छादयति ।

डम्भः—सभ्रूक्षेपं हुंकरोति ।

*कुहना—सरभसमुपसृत्य करतलेन मुखं पिधाय महप्पहा धधम्मद्धअ वाढ्डिअमं जोग्गेण कम्मणा मोत्तूण जोग्गाणं अदिहीणं जोग्गं पडिवअणं दाअव्वं ।

मन्त्रसिद्धिपरिपन्थिनी च युवयोश्छाया महायोगिविग्रहे मा भूत् एनं खलु महात्मानोऽपि मुनिजना दूरे प्रणमन्ति तैरप्युपनीतं भागीरथीसलिलं नकदापि गृहस्वामी हस्तेन गृह्णाति ।

* महाप्रभाव धर्मध्वज वाङ्नियमं योग्येन कर्मणा मुक्त्वा योग्ययोरतिथ्योर्योग्यं प्रतिवचनं दातव्यं ।

अपूर्वदंपत्योः अदृष्टपूर्वदंपत्योः अकारपूर्वदंपत्योरिति च । संगमे संभेदे । स्वयंप्रकाशः अनन्याधीनप्रकाशः येषां तेषां उपलभ्यते किं नोपलभ्यत एवेत्यर्थः । निरये नरके पातः पतनं तु लभ्यते । अहहेत्याश्चर्यं । सर्वैः लोकैः लोकस्थजनैः संभावितं पूजितं सर्वेभ्य अधिकमन्योन्यं नंतृनन्तव्यभावे संशयप्रशमाय । आश्रमापस्मारः—

आश्रमस्य अपस्मार इव वैकल्यहेतुः ।

करतलेन मुखपिधानं प्रश्रयकार्यं ।

प्राणसंयमनं प्राणायामं ।

असंभाष्यैः संभाषणं ।

डम्भः—प्राणसंयमनमभिनीय प्रणवमुद्घोष्य ।
(स्वगतं)—अकामोपनतमिदमसंभाव्यसंभाषणं—(प्रकाशं) रेरे व्रात्य-ब्राह्मण मूढजनमूर्धाभिषिक्त स्वमौढ्यप्रच्छादकं मां प्रख्यापयसि दिष्ट्या खलु मया तपस्संचयभीरुणा नैतावन्तं कालं शप्यसे शप्ताः खलु मया कति कति भस्मसात्समपद्यन्त—अविदितपूर्व दुराचार दूरं गच्छ गच्छ मा ते भून्मम दृष्टितेजसा भस्मीभावः ।

दर्पः—सक्रोधं रेरे मूढ द्विजातिरिति जातिबहुमनादेव मया पादेन शिरसि न ताड्यसे अपि च ।

तुण्डीरं मण्डलं मे कुलपतिरपि च स्कन्दभूपालवन्द्यः
क्षेत्रं सत्यव्रताख्यं क्षितितलतिलकं क्षुद्रकाञ्च्यग्रहारः ।
प्रख्यातः शिष्यभूम्ना दिशिदिशि भवता कूपकूर्मोपमेन
स्थाता वादाहवेषु स्थविर कथमहं न श्रुतो नापि दृष्टः ॥३६॥

(विहस्य)—अहो महादाम्भिक अविदितमदीयाचार किमिति दुराचार इत्युपक्रोशसि, अथवा कः खल्वयं मया विना मत्प्रभावज्ञः यस्य मे महायोगिनोपि अभिजनविद्यावृत्तेषु षोडशीमपि

व्रात्यः कर्मत्यागी । मूढजनानां मूर्धाभिषिक्त अधिपते दिष्ट्यादैवात् । तपस्संचयात् भीरुणा एतावन्तं कालं नशप्यसे शप्तो न भवसि । अविदितपूर्व अज्ञातपूर्व दुष्ट आचारो यस्य स दुराचारः ते भस्मीभावो मा भूत् ।

जातिं ब्राह्मण्यं ।

स्वोत्कर्षमाह अपिचेति—॥

तुण्डीरमिति—॥ मेमण्डलं तुण्डीरं कुलपतिस्स्कन्दभूपालवन्द्यः । स्कन्दभूपालेन वन्द्यः । क्षितेः तिलकनिभं सत्यव्रताख्यं क्षेत्रं अग्रहारः क्षुद्रकाञ्ची दिशि दिशि शिष्यभूम्ना शिष्याणां बहुत्वेन प्रख्यातः । वादाहवेषु स्थाता अहं कूपकूर्मोपमेन भवता कथं न श्रुतः न दृष्टश्च । कूप एव वर्तमानः कूर्म इव क्वचित्स्थितः त्वं अत एव मां न श्रुतवान् न दृष्टवांश्चेति भावः ॥ ३६ ॥

अविदितः मदीय आचारः येन स तथा तस्य संबुद्धिः दुराचार इत्युपक्रोशसि मामिति शेषः । महायोगिनोपि यतो मम षोडशीं कलां नार्हन्ति अतएव

कलान्नार्हन्ति किमुत पृथग्जनाः अत एव हि श्रोत्रियानपि त्रिवर्षपूर्वांश्च नमस्करोमि किञ्च वेत्थ मामकं धर्मप्रवर्तनेनाभिसन्धिम् ।

रथ्यावादविशङ्क्यमानजरठासम्बन्धिसम्भाषणात्
त्यक्ता हन्त पतिव्रता गुणनिधिस्सत्रासमम्बा मया ।
विद्यातश्च विवाहतश्च विदितादाचारतश्च क्षितौ
कूटस्थाभ्यधिकस्य मे किमधिकः को वा समः कथ्यते ॥ ३७ ॥

दम्भः—अरे ब्रह्मबन्धो दुर्विनीत दुराग्रह यद्येवं त्वमास्थितसमाचारः किञ्च परिव्राजिकाम्प्रणमसि पितरमिव सर्वलोकाभ्यर्चितं विदितसकलवेदितव्यैर्महात्मभिरप्यविदितवैभवं त्रिवर्षपूर्वं श्रोत्रियं मां धर्मपत्नीं च मम पतिव्रतावृत्तिनियमेन प्रत्यक्षितपरावरतत्त्वैरपि पितामहादिभिः क्रियासमभिहारेण कृतनमस्कारां किञ्चाभिवादयसि ।

दर्पः—हे धर्मध्वज आत्मश्लाघापातकिन् अद्य खलु पूज्यपूजाव्यतिक्रमेण कपूयां योनिं प्रतिपत्स्यसे श्वयोनिं वा चण्डालयोनिं वा अहमपि

"त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति" इतिस्मृतौ सत्यामपि तांश्चनमस्करोमि । धर्मप्रवर्तने अभिसन्धिं किं न वेत्थ जगति प्रसिद्धमपि किं न जानासीत्यर्थः ।

रथ्येति—॥ रथ्यायां वादेन भाषणेन विशङ्क्यमानायाः इयं रथ्यायामुच्चैर्वदति स्वैरिणी किमिति जनैः शङ्क्यमानायाः जरठायाः संबन्धिभिः संभाषणात् हेतोः मया पतिव्रता गुणानां निधिरम्बा माता सत्रासं जरठासंबन्धिभिरियं संभाषणं कृतवती किल तत्सम्बन्धिसम्बन्धात् अस्या मातृत्वप्रयुक्तनमस्कारादिकमप्यनर्हमिति त्रासेन सहितं यथा भवति तथा त्यक्ता विदितात् सर्वलोकप्रसिद्धात् आचारतश्च कूटस्थाभ्यधिकश्च मे को वा समः सम इति कथ्यते विद्यादिभिः कूटस्थादप्यधिकस्य मम कोवान्यः साम्यं लभेत साम्यस्याप्यभावे आधिक्यस्य का कथेत्याशयः ॥ ३७ ॥

ब्रह्मबन्धुः ब्राह्मणापसदः । आस्थितस्समाचारो येन स तथा विदितानिसकलानि वेदितव्यानि यैस्तैः । महात्मभिरप्यविदितं आनन्त्यादपरिच्छिन्नं वैभवं यस्य तं वृत्तेषु नियमेन प्रत्यक्षितानि परावरावराणि तत्त्वानि यैस्तैः । क्रियासमभिहारेण पौनःपुन्येन ।

सर्वलोकसञ्चारी त्वदभ्यर्चकं क्वापि कमपि न पश्यामि (सोच्चैर्हासं) भो जड वञ्चक ।

प्रजानां पतयो दृष्टाः पशूनां बृहतामपि ।
न च त्वमधिकस्तेभ्यो न चास्मान्बहुमन्यसे॥३८॥

नूनं मदधिकजनपरिवादेन सहसैव निरयङ्गमिष्यसि ।

*कुहना *भअवइ एसो दुब्बह्मणो महेसिपरिवादेण विणासं पडिवज्जइ।

असूया—अयि धार्मिकपत्नि दुर्ब्राह्मणीव किमिति नामाभ्यागतमतिथिमधिक्षिपसि किन्तु अन्योन्यपरिवादिनावेतौ महानुभावौ तणमावाभ्यां चिन्तव्यौ ।

दम्भः—सक्रोधं रेरे वाचाटवायस सारमेय इव वृथापर्यटनशीलोसि तथाहि ।

जातिमात्रशरणा बहिष्कृताः
केचिदादृतजघन्यवृत्तयः ।

---

* (छाया) भगवति एष दुर्ब्राह्मणो महर्षिपरिवादेन विनाशं प्रतिपद्यते ।

आत्मश्लाघया स्वप्रशंसया पातकिन् पूज्येषु पूजाव्यतिक्रमेण कपूयां कुत्सितां योनिं जातिं । कोसावित्यत आह श्वेति—॥ तद्यइहकपूय चरणाः कपूयां योनिमापद्यन्ते । श्वयोनिं सूकरयोनिं चण्डालयोनिं वा इति श्रुतिरनुसन्धेया । सर्वलोकसंचारीत्येतद्विशेषणं साभिप्रायं तन्मोढ्यज्ञानेन उच्चैर्हासः ।

जड वञ्चकेति प्रत्येकं संबोधनं ।

प्रजानामिति—॥ प्रजानां पशूनां बृहतामपि पतयः बृहतां पतयः बृहस्पतयः त्वं तेभ्यो नाधिकः अथाप्यस्माच बहुमन्यसे ॥ ३८ ॥

अधिकः उत्तमः ।

भगवति सन्यासिनि । एष दुर्ब्राह्मणो महर्षिपरिवादेन विनाशं प्रतिपद्यते ।

वाचाटः बहुगर्ह्यवचनः स चासौ वायसश्च तस्य संबुद्धिः । सारमेयः श्वा सहि इतस्ततो वृथा पर्यटति । सारमेय इति तत्साम्यमुक्तं । तदेव विशदयति—।

जातीति—॥ जातिमात्रं ब्राह्मण्यादिमात्रमेव शरणं रक्षकं येषां ते तथा मात्रचातज्जात्युक्ताचारे वैधुर्यं द्योत्यतं स्वपक्षे जातिशब्देन हीनवस्तुभूयिष्ठगण्डूष

Brahma is the real कर्त्ता—all actions are performed by Him: " केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥" We are but instruments ('निमित्तमात्रं भव सव्यसाचिन्'). That is the real truth. As truth alone can lead to Truth, no man who supposes himself to be the कर्ता can ever know the Lord. We are to consider all the gods taken together as a single being. Agni, Vāyu, Indra &c. are his different aspects. Agni and Vāyu typify the energetic elements. And Indra is the complete self. Energy may be either राजसिक or सात्त्विक; when it is राजसिक, Agni burns only his worldly enemies and Vāyu blows away his worldly difficulties, and both are egoistic then. But when Energy is सात्त्विक, the only purpose that it serves with Agni and Vāyu is to burn down or blow away sin and to take the man, now divested of egotism, to the Self. Now, the Agni and the Vāyu of our text are of the former class; *i. e*, the man whom all the *devas* taken together stand for energises only in the path of रजः. His egotism must be completely destroyed before he can have Self-realisation. He had an idea before that he could do anything and that he was the all-conqueror. But he realises now that he has not been able to conquer himself—to burn down or blow away his egotism. His complete self, Indra, is all humility now and his eyes have consequently been opened so that he perceives the presence of Brahma where he had never suspected it. It is Divine Energy, शक्ति, who gives him the power to discover the unmanifested in the manifested. He is now convinced of his great error in supposing himself to be the कर्ता of the actions of which he is only the निमित्त and Brahma is the real

2

कर्ता. He has now complete S lf-realisation.

This in short is the meaning of this allegory. (14) to (25).

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव
तन्न व्यजानन्त किमिदं यक्षमिति ॥ १५ ॥

TRANSLATION.

He knew their thoughts and came before them (in the guise of a Yakṣa). They could not know who that Yakṣa was. (15).

तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि
किमेतद्यक्षमिति तथेति ॥ १६ ॥

TRANSLATION.

They said to Agni (the god of Fire): "O Jātavedas (Fire), find out who this Yakṣa is." Agni said, "All right." (16)

NOTE :— जातवेद: has been variously derived, such as, जातं वेदो धनं यस्मात् or जाते जाते जन्मनि जन्मनि विद्यते or जातान् वेत्ति ।

तदभ्यद्रवत् तमभ्यवदत् कोऽसीत्यग्निर्वा
अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति॥१७॥

TRANSLATION.

He hastened towards Him. The Yakṣa asked him who he was. He replied, "I am Agni, I am, Jātavedas."(17)

तस्मिंस्त्वयि किं वीर्यमित्यपीदं
सर्वं दहेयं यदिदं पृथिव्यामिति ॥ १८ ॥

TRANSLATION.

(The Yakṣa asked:) "What is the strength in thee who art Agni and Jātavedas?" (Agni replied) "Verily I can burn everything on Earth." (18)

तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्व-
जवेन तन्न शशाक दग्धुं स तत एव निववृते
नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ १९ ॥

TRANSLATION.

The Yakṣa placed before him a straw and told him to burn it. Agni advanced towards it with all speed but could not burn it. He then desisted from the act (and returning to the gods, he said), "I could not know who that Yakṣa was." (19)

अथ वायुमब्रुवन् वायो एतद्विजानीहि
किमेतद्यक्षमिति तथेति ॥ २० ॥

TRANSLATION.

Then (the gods) said to Vāyu, "O Vāyu! Find out who this Yakṣa is." He replied, "All right." (20)

तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा
अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥२१॥

TRANSLATION.

Vāyu hastened towards the Yakṣa who asked him, "Who art thou?" He replied, "I am Vāyu, I am Mātaris'van." (21).

N. B.—Note the vanity manifested in the mention by Agni as also by Vāyu of two names, one the ordinary name and the other the surname derived from the function which was peculiar to Agni or Vāyu and for which they were proud. मातरिश्वा is derived as मातरि आकाशे श्वयति वर्धते ।

तस्मिंस्त्वयि किं वीर्यमित्यपीदꣳ
सर्वमाददीयं यदिदं पृथिव्यामिति ॥ २२ ॥

TRANSLATION.

The Yakṣa asked, " What is the strength in thee who art Vāyu and Mātariśvan?" Vāyu replied, " Verily I can take up (blow away) everything on earth." (22)

तस्मै तृणं निदधावेतदात्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ २३ ॥

TRANSLATION.

The Yakṣa placed before him a straw and told him to take it up (blow it away). Vāyu advanced towards it in all haste but could not take it up. He then desisted from the act and (returning to the gods said,) " I could not know the identity of that Yakṣa." (23).

अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति । तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ २४ ॥

TRANSLATION.

Then the gods said to Indra, " Maghavan, you find out who is this Yakṣa." He said, "All right," and hastened towards the Yakṣa who vanished from his sight. (24)

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ताꣳहोवाच किमेतद्यक्षमिति ॥ २५ ॥

TRANSLATION

There in the sky he met a very beautiful woman, Umā, the daughter of Himavat, whom he asked who that Yakṣa was. (25)

॥ इति तृतीयः खण्डः ॥

॥ चतुर्थः खण्डः ॥

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये
महीयध्वमिति ततो हैव विदांचकार ब्रह्मेति ॥ २६ ॥

TRANSLATION.

She said, "He is Brahma. You have been glorified by this victory of Brahma (over the demons through you)." Then they knew him to be Brahma. (26)

COMMENTARY.

When the egotism of the man is completely destroyed, the Divine S'akti leads him to the knowledge of Brahma. It is from Her, the manifested aspect of Brahma, that he learns that the unmanifested Brahma is the cause of all actions. He is convinced of the power of Brahma and his heart must naturally go towards Him in admiration. Then he will feel a longing for reaching Him ; and his heart's desire will be fulfilled in no time. (26)

तस्माद्वा एते देवा अतितरामिवान्यान्देवा-
न्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्ये-
नत्प्रथमो विदांचकार ब्रह्मेति ॥ २७ ॥

TRANSLATION.

These gods, Agni, Vāyu and Indra, proved superior to the other gods, because they reached nearer to Him and they first knew Him (the yakṣa) to be Brahma. (27)

COMMENTARY

A man has three elements in him the rational, the "spirited" and the appetitive (Plato). Indra represents the rational Element (which is properly the true self), Agni and Vāyu both represent the

"spirited" element and the other gods represent the appetitive element. Now, a man attains God through his rational and spirited elements and never through his appetitive element. The rational and spirited elements are therefore divine and are consequently superior to the appetitive element. It is by the right employment of reason (सत्त्वगुण) that Brahma can be attained and in the struggle for realisation the quality of रज: (the spirited element) will be of much help to the साधक in at least fighting against his evil tendencies. [C. F. Plato's Republic Sec. 441 (*e*).] The quality of तम: (the appetitive element) has its origin in darkness, is itself darkness and leads to nothing but darkness. A राजसिक man can become सात्त्विक, ultimately being able to reach God; but a तामसिक man can never become even राजसिक, much less सात्त्विक. So, it is always better to be राजासिक than to be तामसिक—to be active in a worldly way than to be quite idle. (27).

तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स
ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदांचकार
ब्रह्मेति ॥ २८ ॥

TRANSLATION.

Indra surpassed the other gods (including even Agni and Vāyu) because he reached nearest to Him and he first came to know Him (the Yakṣa) to be Brahma.

COMMENTARY.

Indra is the lord of all the gods. All that is best in them are, as it were, focussed in him. He is essentially pure reason, because reason is the highest part of a man and he has also a due measure of the

"spirited element" in him and that duly tempered. In his search after Truth, he employs with profit the सात्त्विक and राजसिक (rational and spirited) faculties of his mind and उमा lets him know the Truth. (28)

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३
इतीन्न्यमीमिषदा ३ इत्यधिदैवतम् ॥ २९ ॥

TRANSLATION.

It is He who flashed forth through lightning (i. e. from whom lightning derived its motion and light) and it is He who stopped motion (lit. closed), both of which phenomena can be symbolised by "Ā". This is what the gods were taught regarding the nature of Brahma; and this expresses the relation between Him and the world. (29)

COMMENTARY.

The meaning of this mantra is very obscure. S'aṅkarāchārya's interpretation is unsatisfactory. He interprets the mantra thus:—

"तस्य प्रकृतस्य ब्रह्मण एष आदेश उपमोपदेशो निरुपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोऽयमादेश इत्युच्यते । किं तद्यदेतत्प्रसिद्धं लोके विद्युतो व्यद्युतद्विद्योतनं कृतवदित्येतदनुपपन्नमिति । विद्युतो विद्योतनमिति कल्प्यते । आ इत्युपमार्थे । विद्युतो विद्योतनमिवेत्यर्थः । यथा सकृद्विद्युतमिति श्रुत्यन्तरे च दर्शनाद्विद्युदिव हि सकृदात्मानं दर्शयित्वा तिरोभूतं ब्रह्म देवेभ्योऽथवा विद्युतस्तेज इत्यध्याहार्यं व्यद्युतद्विद्योतितवत् आ इव विद्युतस्तेजः सकृद्विद्योतितवदिवेत्यभिप्रायः । इतिशब्द आदेशप्रतिनिर्देशार्थ इत्ययमादेश इति । इच्छब्दः समुच्चयार्थः । अयं चापरस्तस्यादेशः । कोऽसौ न्यमीमिषत् । यथा चक्षुर्न्यमीमिषन्निमेषं कृतवत् स्वार्थे णिच् । उपमार्थ एव आकारः । चक्षुषो विषयं प्रति प्रकाशतिरोभाव इव चेत्यर्थः । इत्यधिदैवतं देवताविषयं ब्रह्मण उपमानदर्शनम् ॥

The meaning according to this interpretation is, the real Brahma as he was taught to the gods can be compared to the flash of lightning and to the closing of the eyelids, because of His sudden appearance and instantaneous disappearance. But this interpretation pays no attention to the context nor does it give any sense. No Vedantist can hold that ब्रह्मभान (knowledge of Brahma) is transitory. If Brahma is once realised, all actions instantly cease, ब्रह्मभान alone remains and the साधक is merged in चैतन्य (Brahma Who is knowledge Absolute). Hence ब्रह्मभान is not transitory. What *could be* transitory is यक्षभान but यक्षभान *was not* transitory for two gods could find time to talk with him and for all that time and sometime before, the *Yakṣa* was before the gods. Besides, considerable text-torturing is involved in the interpretaion offered by Sankarāchārya. व्यद्युतत् and न्यमीमिषत् which are verbs he takes to have the force of nouns: व्यद्युतत् = विद्योतनम्, न्यमीमिषत् = निमेषः, *i.e*, did=deed! His second interpretation विद्युतो व्यद्युतत् = विद्युतस्तेजो विद्योतितवत् is better but there is another difficulty. "आ" he takes to mean "as", but he omits the *pluta* sign ३ after आ. All the texts read आ ३ and not आ. आ ३ can never mean "as if" Therefore Sankarānanda suggests, "आकारप्लुतिराश्चर्यार्थो" but that too gives no sense.

Madhvāchārya's interpretation is more unsatisfactory. His commentary on this mantra, as translated by Babu Srischandra Vasu, runs thus:—

"The instruction about Brahman, so far as His Adhidaiva (cosmological aspect) is concerned is this:—

"Hari, called Kapila, illumines even the lightning itself and others. He closing His eyes sleeps on the

[1]समाहूयाब्रवीद् वृद्धं सुहृदं ब्रह्मवादिनम् ॥ १८ ॥
अयोध्यां गच्छ भद्रन्ते त्वरितो जवनैर्हयैः ।
पितरं तत्र कौशल्यां ब्रूयास्त्वं मातरं च मे ॥ १९ ॥
मातामहकुले चापि यथा वर्त्तामहे वयम् ।
तथा पूर्वं भवान् [2]ब्रूयात् पितुर्म्मातुश्च मेऽग्रतः ॥२०॥
रामश्चोपेत्य विज्ञाप्यो मामुद्दिश्य सगौरवम् ।
भृत्यस्ते भरतः पादौ मूर्द्धाभ्यर्च्य प्रसाद्य च ॥ २१ ॥
कुशलानामयं स्निग्धं पृच्छतीति समागमे ।
लक्ष्मणश्च परिष्वज्य प्रष्टव्यः कुशलं त्वया ॥ २२ ॥
ब्रूयाश्च मातरं मे त्वं कौसल्यामभिवादनम् ।
सुमित्रामपि च ब्रूया वैदेही[3]मभिवादनम् ॥ २३ ॥
स तेनैवं समादिष्टो भरतेन महात्मना ।
दूतः शीघ्रहयो भूत्वा प्रययौ[4]चैव तां पुरीम् ॥ २४ ॥
[5]अयोध्यां सुभृशं रम्यां मनुराजर्षिनिर्म्मिताम् ।
यां स राजीवताम्राक्षो राजा दशरथोऽन्वशात् ॥२५॥
प्राप्तवानचिरेणैव स तां भरतशासनात् ।
[6]न्यवेदयत् कुशलिनं राज्ञो भरतमन्तिके ॥ २६ ॥

1. G. 19. अथा &c. but P. has समा &c. 2. G. 20. शंसेत् &c. 3. G. 23. स्त्वाभि &c. 4. G. 24. यत्र सा पुरी। P. has सेनया पुरा। 5. G. 25. अयोध्या सुभृशं रम्या मनुराजर्षिनिर्म्मिता। but P. has अयोध्यां &c. 6. G. 26. न्यवेदयत तद्राज्ञे मातृभ्यांऽथ द्विजस्तथा। P. is worm-eaten here.

कृतकृत्योऽथ राजेन्द्र भरतः सत्यविक्रमः ।
धनुर्वेदे च वेदे च नीतिशास्त्रे[1]च पारगः ॥ २७ ॥
अर्थशास्त्रे [2]च कुशलो व्यायामे [3]च तथैव च ।
हस्तिशिक्षासु निष्णातो रथशिक्षासु निष्ठितः ॥२८॥
आलेख्ये चैव लेख्ये च लङ्घने प्लवने तथा ।
ज्योतिर्गतिषु निष्णातस्त्वद्वाक्येन चोदितः ॥ २९ ॥
एवं विधानि कर्म्माणि[4]कृतानि सुबहून्यपि ।
[5]कृतार्थो भरतो राजंस्त्वत्सकाशमुपैष्यति ॥ ३० ॥
[6]तच्छ्रुत्वा मुमुदे राजा दूतस्य वचनं[7]प्रियम् ।
[8]कौसल्या सा च कैकयी सुमित्रा राम एव च ॥ ३१॥
प्रतिसन्दिश्य तं राजा दूतं सत्कृत्य चार्हतः ।
प्रेषयामास नृपतिर्भरतस्य[9]पुरं तदा ॥ ३२ ॥

इत्यार्षे रामायणे आदिकाण्डे बालचरिते
भरतदूतागमनम् ।

---

1. G. 27. धु &c. 2. G. 28. धु &c. 3. G. 28 धु &c P. has धि &c. 4. G. 30. कृतवान् &c. P. is worm-eaten here. 5. G. 30 ततोऽद्य भरतो राजंस्त्वत्सकाशमुपागतः । but P. agrees with our text. 6. G. 31. श्रुत्वा राजा प्रहृष्टोऽभूद्दूत &c. 7. P. तदा । 8. G. 31. कौशल्याद्याश्च देव्यस्तास्तयोर्भ्रा रामलक्ष्मणौ ॥ P. is worm-eaten here. 9. G. 32. पुनस्तदा. P. is worm-eaten.

* LXXXII.

[1]राजापि तौ सुतस्नेहात् सस्मार दयितौ सुतौ ।
तदा भरतशत्रुघ्नौ महेन्द्रसमदर्शनौ ॥ १ ॥
[2]सर्व एव हि चत्वारस्तस्येष्टा ह्यभवन् सुताः ।
जाताः शरीर एकस्मिंस्ते विष्णोर्बाहवो यथा ॥ २ ॥
[3]समे पितुः सुतस्नेहे तस्य राज्ञो महात्मनः ।
गुणरत्नाकरे रामे बहु[4]मानाधिकोऽभवत् ॥ ३ ॥
[5]स प्रशस्तैर्गुणौघैर्हि रामो रतिकरोऽभवत् ।
पितृमातृसुहृद्भ्रातृप्रजानां नरचन्द्रमाः ॥ ४ ॥
[6]स हि[7]सर्वजनं नित्यं मधुरं[8]मृदु चाब्रवीत् ।

---

* This is Chap 1. Ayodhyákáṇḍa in B. & G, but in P. it is the last Chapter of the Ádikáṇḍa, as in our text. 1. Before this SL. B. (1-3) reads. गच्छता मातुलकुलं भरतेन तदानघः । शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥ स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः । मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः ॥ तत्रापि निवसंतौ तौ तर्प्यमाणौ च कामतः । भ्रातरौ स्मरतां वीरौ वृद्धं दशरथं नृपं ॥ For this SL. B. 4. राजापि तौ महातेजाः सस्मार प्रोषितौ सुतौ । उभौ भरतशत्रुघ्नौ महेंद्रवरुणोपमौ ॥ 2. For this SL. B. 5. सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः । स्वशरीराद्विनिर्वृत्ताश्चतार इव बाहवः ॥ 3. For this SL. B. 6. तेषामपि महातेजा रामो रतिकरः पितुः । स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ 4. G. (Ayodhyákáṇḍa) Chap. I. 3. मानोऽधिको &c., but P. has मानाधिको &c. 5. In place of this SL. B. 7-9. सहि देवैरुदीर्णस्य रावणस्य वधार्थिभिः । अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ कौसल्या शुशुभे तेन पुत्रेणामिततेजसा । यथावरेण देवानामदितिर्वज्रपाणिना ॥ सहि रूपोपपन्नश्च वीर्यवाननसूयकः । भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥ 6. For this SL. B. 10. सच नित्यं प्रशांतात्मा मृदुपूर्वं च भाषते । उच्यमानोपि परुषं नोत्तरं प्रतिपद्यते ॥ 7. G. 5. सर्व &c. but P. has सर्वं &c. 8. G. 5. प्रियमब्रवीत्, but P. agrees with our text.

उच्यमानोऽपि परुषं नोवाचाप्रियमन्वपि ॥ ५ ॥
[1]ज्ञानवृद्धवयोवृद्धैर्गुणवद्भिः सदा नरैः ।
स कथां योजयामास[2]मैत्रं संगतमेव च ॥ ६ ॥
[3]विद्वानुदारो मेधावी पूर्वभाषी प्रियंवदः ।
वीर्यवान्न च वीर्येण महता स्वेन गर्वितः ॥ ७ ॥
[4]अनावृतकथो धीमान् वृद्धानां प्रतिपूजकः ।
[5]नित्यानुरक्तप्रकृतिः प्रजानामनुरञ्जकः ॥ ८ ॥
सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ।
[6]दीनानुकम्पको[7]दक्षः प्रियवागनसूयकः ॥ ९ ॥
[8]कुलक्रमागताया[9]श्च राज्यप्राप्तौ गतस्पृहः ।

---

1. Before this SL. B. 11. reads: कदाचिदुपकारेण कृतेनैकेन तुष्यति । न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ For this SL. B. 12. शीलवृद्धैर्ज्ञान वृद्धैर्वयोवृद्धैश्च सज्जनैः । कथयन्नास्ते वै नित्यमस्त्रयोग्यांतरेष्वपि ॥ 2. G. 6. मैत्रीं &c. 3. For this SL. B. 13. बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः । वीर्यवान्न च वीर्येण महता स्वेन विस्मितः ॥ 4. For this SL. B 14. न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः । अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते ॥ 5. G. 8. भक्तानुरक्त &c. but P. has नित्यानुरक्त &c 6. .B. 15. दीनानुकम्पी धर्मज्ञो नित्यं प्रगहवाञ्छुचिः । 7. G. 9. धीमान् &c. 8. For this, and the following 9 Slokas B. 16-37. कुलोचितमतिः क्षात्रं स्वधर्मं बहुमन्यते । मन्यते परया प्रीत्या महत्स्वर्गफलं ततः ॥ नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः । उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा ॥ अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित् । लोके पुरुषसारज्ञः साधुरेको विनिर्म्मितः ॥ स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः । बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥ सर्वविद्याव्रतस्नातो यथावत् साङ्गवेदवित् । इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥ कल्याणाभिजनः साधुरदीनः सत्यवागृजुः । वृद्धैरभिविनीतश्च द्विजैर्धर्म्मार्थदर्शिभिः ॥ धर्म्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान् । लौकिके समयाचारे कृतकल्पो विशा-

राज्यलाभादपि परं मेने[1] विद्याधनं परम् ॥ १० ॥
दयावान् सर्वभूतेषु शरण्यः शरणैषिणाम् ।
दाताभिगोप्ता साधूनां शरणागतवत्सलः ॥ ११ ॥
कृतप्रत्युपकारी च कृतज्ञः सत्यसंगरः ।
गुणज्ञो गुणवांश्चैव वश्यात्मा दृढनिश्चयः ॥ १२ ॥
अदीर्घसूत्रो दक्षश्च क्रियासु प्रतिपत्तिमान् ।
[2]सुखोपसर्पः सुहृदामनुग्राही प्रियंवदः ॥ १३ ॥
प्राणान् जह्याच्छ्रियञ्चैव स्फीतामपि महायशाः ।
अपि वा दयितान् भोगान् न तु सत्यं कदाचन ॥१४॥

रदः ॥ निभृतः संवृताकारो गुप्तमंत्रः सहायवान् । अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥ दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचः । निस्तन्द्रीरप्रमत्तश्च स्वदोषपरदोषवित् ॥ शास्त्रज्ञश्च कृतज्ञश्च पुरुषान्तरकोविदः । यः प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणः ॥ सत्संग्रहानुग्रहणे स्थानविच्चिग्रहस्य च । आयकर्मण्युपायज्ञः संदृष्टव्ययकर्म्मवित् ॥ श्रेष्ठ्यञ्चास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च । अर्थधर्म्मौ च संगृह्य सुखतन्त्रो न चालसः ॥ वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित् । आरोहे विनये चैव युक्तो वारणवाजिनां ॥ धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः । अभियाता प्रहर्ता च सेनानयविशारदः ॥ अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः । अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥ नावज्ञेयश्च भूतानां न च कालवशानुगः । एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥ संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः । बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये चापि शचीपतेः ॥ तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः । गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ तमेवं वृत्तसम्पन्नमप्रधृष्यपराक्रमं । लोकनाथोपमं नाथमकामयत मेदिनी ॥ एतैस्तु बुद्धिभिर्युक्तं गुणैरनुपमैः सुतं । दृष्ट्वा दशरथो राजा चक्रे चिन्तां परन्तपः । अथ राज्ञो बभूवैव वृद्धस्य चिरजीविनः । प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥ एषा ह्यस्य परा प्रीतिर्हृदि संपरिवर्त्तते । कदा नाम सुतं द्रक्ष्याम्यभिषिक्तमहं प्रियं ॥

9. G. 10. ऋच राज्य प्राप्तेर्गत &c. 1. G. 10. विद्यागमं &c., P. is worm-eaten here. 2 G. 12. सुखाय सर्वसुहृदामर्थग्राही &c., but P. agrees with our text.

ऋजुर्वदान्यः प्रियकृद्विनीतः शीलवान्मृदुः ।
महासत्त्वो महोत्साहो महात्मा गुणवत्तमः ॥ १५ ॥
तेजस्वी च क्षमावांश्च सोमवत् प्रियदर्शनः ।
[1]कालवत् समरेऽरीणां शरद्भानुरिवामलः ॥ १६ ॥
एभिर्गुणगणैर्युक्तमन्यैश्चानुपमद्युतिम् ।
दृष्ट्वा दशरथो रामं गुणाकरमरिन्दमम् ॥ १७ ॥
चिन्तयामास सततं तद्गतेनान्तरात्मना ।
यौवराज्ये सुतं राममभिषिञ्चेयमित्युत ॥ १८ ॥
एवं हृदि[2]तदा तस्य बुद्धिर्विपरिवर्त्तते ।
अभिषिक्तं कदा रामं पश्येयमिति धीमतः ॥ १९ ॥
[3]पात्रभूतोऽस्य राज्यस्य सर्वभूतानु[4]कम्पकः ।
मत्तः प्रियतरो रामः प्रजानां स्वगुणैर्विभुः ॥ २० ॥
[5]पराक्रमे शक्रसमो बृहस्पतिसमो मतौ ।
महीधरसमः स्थैर्ये[6]धैर्ये तोयनिधिर्यथा ॥ २१ ॥
महीमहमिमां कृत्स्नामधि[7]तिष्ठन्तमात्मजम् ।
अनेन[8]वपुषा दृष्ट्वा सुखं स्वर्गमवाप्नुयाम् ॥ २२ ॥

---

1. G. 16 दुर्द्धर्षः समरे &c. 2. G. 17. सदा &c. 3 For this SL. B. 38. वृद्धिकामो हि लोकस्य सर्वभूतानुकंपकः। मत्तः प्रियतरो लोके पर्जन्य इव वृष्टिमान् ॥ 4. G. 20. रञ्जकः, P. is worm-eaten here. 5. For this SL B. 39. यमशक्रसमो वीर्ये बृहस्पतिसमो मतौ । महीधरसमो धृत्यां मत्तश्च गुणवत्तरः ॥ 6. G. 21. मत्तश्च गुणत्तरः ॥ P.is worm-eaten here. 7. G. 22. तिष्ठन् &c. evidently a mistake ; P. agrees with our text. 8. G. 22. वयसा &c. B. 40. वयसा दृष्ट्वा यथा स्वर्गं &c. After this SL. B. has 11. Slokas in

this Chapter and 18 in the next, before it comes to a Sloka corresponding to the next SL. in our text :—इत्येवं विविधैस्तैस्तैरन्यपार्थिवदुर्लभैः । शिष्टैरपरिमेयैश्च लोके लोकोत्तमैर्गुणैः ॥ तं समीक्ष्य तदा राजा युक्तं समुदितैर्गुणैः । निश्चित्य सचिवैः सार्धं यौवराज्यममन्यत ॥ दिव्यंतरिक्षे भूमौ च घोरमुत्पातजं भयं । संचचक्षेथ मेधावी शरीरे चात्मनो जरां ॥ पूर्णचंद्राननस्याथ शोकापनुदमात्मनः । लोके रामस्य बुबुधे संप्रियत्वं महात्मनः ॥ आत्मनश्च प्रजानां च श्रेयसे च हितेन च । प्राप्तकाले स धर्मात्मा भक्त्या त्वरितवान्नृपः ॥ नानानगरवास्तव्यान् पृथग्जानपदानपि । समानिनाय मेदिन्यां प्रधानान् पृथिवीपतिः ॥ तान् वेश्म नानाभरणैर्यथार्हं प्रतिपूजितान् । ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥ न तु केकयराजानं जनकं वा नराधिपः त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियं ॥ अथोपविष्टे नृपतौ तस्मिन्परपुरार्दने । ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥ अथ राजवितीर्णेषु विविधेष्वासनेषु च । राजानमेवाभिमुखा निषेदुर्नियता नृपाः ॥ स लब्धमानैर्विनयान्वितैर्नृपैः पुरालयैर्जानपदैश्च मानवैः । उपोपविष्टैर्नृपतिर्वृतो बभौ सहस्रचक्षुर्भगवानिवामरैः ॥ Here ends Chap. I. in B.- ततः परिषदं सर्वामामंत्र्य वसुधाधिपः । हितमुद्धर्षणं चैवमुवाच प्रथितं वचः ॥ दुंदुभिस्वरकल्पेन गंभीरेणानुनादिना । स्वरेण महता राजा जीमूत इव नादयन् ॥ राजलक्षणयुक्तेन कांतेनानुपमेन च । उवाच रसयुक्तेन स्वरेण नृपतिर्नृपान् ॥ विदितं भवतामेतद्यथा मे राज्यमुत्तमं । पूर्वकैर्मम राजेन्द्रैः सुतवत् परिपालितं ॥ सोऽहमिक्ष्वाकुभिः सर्वैर्नरेन्द्रैः प्रतिपालितं । श्रेयसा योक्तुमिच्छामि सुखार्हमखिलं जगत् ॥ मयाप्याचरितं पूर्वैः पंथानमनुगच्छता । प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ इदं शरीरं कृत्स्नस्य लोकस्य चरता हितं । पांडुरस्यातपत्रस्य छायायां जरितं मया ॥ प्राप्य वर्षसहस्राणि बहून्यायूंषि जीवतः । जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ॥ राजप्रभावजुष्टां च दुर्वहामजितेन्द्रियैः । परिश्रान्तोस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते । सचिकृष्टानिमान्सर्वाननुमान्य द्विजर्षभान् ॥ अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः । पुरंदरसमो वीर्ये रामः परपुरंजयः ॥ तं चंद्रमिव पुष्येण युक्तं धर्मभृतां वरं । यौवराज्ये नियोक्तास्मि

[1]तं तस्य भावं भावज्ञा विज्ञाय सुधियो जनाः ।
गुरवो मन्त्रिणश्चैव पौरजानपदास्तथा ॥ २३ ॥
[2]समेत्य मन्त्रयामासुर्मन्त्रयित्वा तु निश्चयम् ।
ऊचुः समन्ततः सर्वे वृद्धं दशरथं नृपम् ॥ २४ ॥
[3]अनेकवर्षशतिको वृद्धोऽस्यद्य नरेश्वर ।
स रामं यौवराज्ये [4]तमभिषेक्तुमिहार्हसि ॥ २५ ॥
[5]इति तद्वचनं श्रुत्वा तेषां [6]च हृदयेप्सितम् ।
अनिच्छन्निव जिज्ञासुर्जनांस्तान् प्रत्युवाच सः ॥ २६ ॥
[7]कथं तु मयि धर्म्मेण पृथिवीमनुशासति ।
भवन्तः कर्तुमिच्छन्ति युवराजं ममात्मजम् ॥ २७ ॥

प्रातः पुरुषपुंगवं ॥ अनुरूपः स वो नाथो लक्ष्मीवान् लक्ष्मणाग्रजः । त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरं ॥ अनेन श्रेयसा सद्यः संयोज्येहमिमां महीं । गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै ॥ यदिदं मेनुरूपार्थं मया साधु सुमंत्रितं । भवंतो मेनुमन्यन्तां कथं वा करवाण्यहं ॥ यद्यप्येषा मम प्रीतिर्हितमन्यद्विचिन्त्यतां । अन्या मध्यस्थचिन्ता तु विमर्दाभ्यधिकोदया ॥ इति ब्रुवन्तं मुदिताः प्रत्यनन्दन्नृपा नृपं । वृष्टिमन्तं महामेघं नर्दन्त इव बर्हिणः ॥ स्निग्धोनुनादः संजज्ञे ततो हर्षसमीरितः । जनौघोद्घुष्टसन्नादो मेदिनीं कंपयन्निव ॥ 1, For this SL. B. (Ayod. K.) Chap. II. 19. तस्य धर्म्मार्थविदुषो भावमाज्ञाय सर्वशः । ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥ 2. For. this SL. B. 20. समेत्य ते मंत्रयितुं समतागतबुद्धयः । ऊचुश्च मनसा ज्ञात्वा वृद्धं दशरथं नृपं ॥ 3. For this Sl. B. 21 & 22. अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव । स रामं युवराजानमभिषिंचस्व पार्थिव ॥ इच्छामो हि महाबाहुं रघुवीरं महाबलं । गजेन महता यान्तं रामं छत्रावृताननं ॥ 4. G. 25. त्वमभि &c. 5. For this Sl. B. 23. इति तद्वचनं श्रुत्वा राजा तेषां मनः प्रियं । अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥ 6. G. 26. स्वहृदये &c. 7. For this Sl. B. 24 & 25. श्रुत्वैतद्वचनं यन्मे राघवं पतिमिच्छथ । राजानः संशयोयं मे तदिदं ब्रूत तत्त्वतः ॥ कथं नु मयि धर्म्मेण पृथिवीमनुशासति । भवन्तो द्रष्टुमिच्छन्ति युवराजं महाबलं ॥

कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तश्चाद्विसर्गः। क ᳲ करोति। कः करोति। क ᳲ खनति। कः खनति। क ᳲ पठति। कः पठति। क ᳲ फलति। कः फलति। येन नाप्राप्त इति न्यायेन विसर्जनीयस्य स इत्यस्यापवादोऽयं न तु शर्परे विसर्जनीय इत्यस्य। तेन वासः क्षौमं अद्भिः प्सातमित्यादौ विसर्ग एव।

सोऽपदादौ। ८। ३। ३८॥

विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः॥ पाशकल्पककाम्येषु॥ * ॥ पयस्पाशम्। यशस्कल्पम्। यशस्कम्। यशस्काम्यति॥ अनव्ययस्येति वाच्यम्॥ * ॥ प्रातः कल्पम्। काम्ये रोरेवेति वाच्यम्। नेह। गीः काम्यति।

इणः षः। ८। ३। ३९॥

इणः परस्य विसर्जनीयस्य षः स्यात्पूर्वविषये। सर्पिष्पाशम्। सर्पिष्कल्पम्। सर्पिष्कम्। सर्पिष्काम्यति। नेह। उच्चैः कल्पम्। दोः पश्य। गीः काम्यति।

नमस्पुरसोर्गत्योः। ८। ३। ४०॥

गतिसञ्ज्ञयोरनयोर्विसर्जनीयस्य सः स्यात्कुप्वोः परयोः। नमस्करोति। साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा। तदभावे नमः करोति। पुरोऽव्ययमिति नित्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः। पुरौ। पुरः प्रष्टव्याः।

इदुदुपधस्य चाप्रत्ययस्य। ८। ३। ४१॥

इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः परयोः। निष्प्रत्यूहम् । आविष्कृतम् । दुष्कृतम् । अप्रत्ययस्य किम् । अग्निः करोति । वायुः करोति । एकादेशशास्त्रनिमित्तकस्य विसर्गस्य न षत्वम् । कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् । तेनेह न । मातुः कृपा । मुहुसः प्रतिषेधः ॥ * ॥ मुहुः कामः ।

तिरसोऽन्यतरस्याम् । ८ । ३ । ४२ ॥

तिरसः सो वा स्यात्कुप्वोः परयोः । तिरस्कर्ता । तिरः कर्ता ।

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे । ८ । ३ । ४३ ॥

कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षो वा स्यात्कुप्वोः। द्विष्करोति द्विः करोति इत्यादि । कृत्वोऽर्थे किम् । चतुष्कपालः ।

इसुसोः सामर्थ्ये । ८ । ३ । ४४ ॥

एतयोर्विसर्जनीयस्य षः स्याद्वा कुप्वोः । सर्पिष्करोति । सर्पिः करोति । धनुष्करोति । धनुः करोति । सामर्थ्यमिह व्यपेक्षा। सामर्थ्ये किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् ।

नित्यं समासेऽनुत्तरपदस्थस्य । ८ । ३ । ४५ ॥

इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्कुप्वोः। सर्पिष्कुण्डिका । धनुष्कपालम् । अनुत्तरपदस्थस्य किम् । परमसर्पिः कुण्डिका । कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थः । व्यपेक्षायां नित्यार्थश्च ।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वन-व्ययस्य । ८ । ३ । ४६ ॥

अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात्करोत्यादिषु परेषु नतूत्तरपदस्थस्य । अयस्कारः । अयस्कामः । अयस्कंसः । अयस्कुम्भः । अयस्पात्रम् । अयःसहिता कुशा । अयस्कुशा । अयस्कर्णी । अतः किम् । गीःकारः । तपरकरणं किम् । भाःकरणम् । अनव्ययस्य किम् । स्वःकामः । समासे किम् । यशः करोति । अनुत्तरपदस्थस्य किम् । परमयशःकारः ।

अधःशिरसी पदे । ८ । ३ । ४७ ॥

एतयोर्विसर्गस्य सादेशः स्यात्पदशब्दे परे । अधस्पदम् । शिरस्पदम् । समासे इत्येव । अधः पदम् । शिरः पदम् । अनुत्तरपदस्थस्येत्येव । परमशिरः पदम् ।

कस्कादिषु च । ८ । ३ । । ४८ ॥

इण्विण उत्तरस्य विसर्गस्य षः स्यादन्यस्य तु सः । ᳲकᳲपयोरपवादः । कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालम् । आकृतिगणोऽयम् । भास्करः ।

छन्दसि वाप्राम्रेडितयोः । ८ । ३ । ४९ ॥

विसर्गस्य सो वा स्यात् कुप्वोः प्रशब्दमाम्रेडितं च वर्जयित्वा । अग्ने त्रातर्ऋतस्कविः । गिरिर्न विश्वतस्पृथुः । नेह वसुनः पूर्व्यः पतिः । अप्रेत्यादि किम् । अग्निः प्रविद्वान् । परुषः परुषः ।

कःकरत्करतिकृधिकृतेष्वनदितेः । ८ । ३ । ५० ॥

विसर्गस्य सः स्यात् । प्रदिवो अयस्कः । यथानो वस्यस-

स्करत् । सुपेशस्करति । इळस्पृधि । सोमं न चारुं मघवत्सुनस्कृतम् । अनदितेरिति किम् । यथा नो अदितिः करत् ।

पञ्चम्याः परावध्यर्थे । ८ । ३ । ५१ ॥

पञ्चमीविसर्गस्य सः स्यादुपरिभावार्थे परिशब्दे परतः । दिवस्परि प्रथमं जज्ञे । अध्यर्थे किम् । दिवस्पृथिव्याः पर्योजः ।

पातौ च बहुलम् । ८ । ३ । ५२ ॥

पञ्चम्या इत्येव । सूर्यो नो दिवस्पातु ।

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । ८ । ३ । ५३ ॥

वाचस्पतिं विश्वकर्माणम् । दिवस्पुत्राय सूर्याय । दिवस्पृष्ठं मन्दमानः । तमसस्पारमस्य । परिवीत इळस्पदे । दिवस्पयो दिधिषाणाः । रायस्पोषं यजमानेषु ।

इडाया वा । ८ । ३ । ५४ ॥

पतिपुत्रादिषु परेषु । इडायास्पुत्रः । इडायाः पदे ।

अपदान्तस्य मूर्द्धन्यः । ८ । ३ । ५५ ॥

आपादसमाप्तेरधिकारोऽयम् ।

सहेः साडः सः । ८ । ३ । ५६ ॥

साड्रूपस्य सहेः सस्य मूर्द्धन्यादेशः स्यात् । तुराषाड् । तुराषाड्भ्याम् ।

इण्कोरित्यधिकृत्य । ८ । ३ । ५७ ॥

नुम्विसर्जनीयशर्व्यवायेपि । ८ । ३ । ५८ ॥

एतैः प्रत्येकं व्यवधानेपीण्कुभ्यां परस्य सस्य मूर्द्धन्यादेशः स्यात् । सर्पींषि । धनूंषि । वा शरीति पक्षे विसर्जनीयः । पिपठीःषु तदभावे ष्टुत्वेन पूर्वस्य षत्वम् । पिपठीष्षु । प्रत्येकमिति व्याख्यानादनेकव्यवधाने षत्वं न । निंस्व । निंस्से । नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थम् । व्याख्यानात् । तेनेह न । सुहिन्सु । पुंसु । अतएव न शर्ग्रहणेन गतार्थता ।

आदेशप्रत्यययोः । ८ । ३ । ५९ ॥

एकापि षष्ठी विषयभेदाद्भिद्यते । इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्द्धन्यादेशः स्यात् । सिषेच । सुष्वाप । अग्निषु । वायुषु । कर्तृषु । रामेषु । शक्ष्यति । वक्ष्यति । इन्द्रो माबक्षत् । स देवान् यक्षत् । वचियजिभ्यां लेट् । भ्रक्ष्यति । जर्क्षु इत्यादौ सत्वस्यासिद्धत्वेपि कुत्वलब्धगकारात्परत्वेन षत्वम् । इणकोः किम् । रामस्य । आदेशप्रत्यययोः किम् । सुपीः । सुपिसौ । अपदान्तस्य किम् । हरिस्तत्र ।

शासिवसिघसीनां च । ८ । ३ । ६० ॥

इणकुभ्यां परस्यैषां सस्य षः स्यात् । शिष्टः । शिष्यात् । अशिषत् । ऊषतुः । ऊषुः । उषितः । जक्षतुः । जक्षुः । इणकोः किम् । शास्ति । वसति । जघास ।

स्तौतिण्योरेव षण्यभ्यासात् । ८ । ३ । ६१ ॥

अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सनि नान्यस्य । तुष्टूषति । द्युतिस्वाप्योरित्युत्वम् । सुष्वापयिषति । सिषाधयिषति । स्तौतिण्योः किम् । सिसिक्षति । उपसर्गात्तु स्यादि-

ष्वभ्यासेनेति षत्वम् । परिषिषिक्षति । षणि किम् । तिष्ठासति । सुषु-प्सति । अभ्यासादित्युक्तेर्नेह निषेधः । इण् प्रतीषिषति । इक् अधीषिषति ।

सः स्विदिस्वदिसहीनां च । ८ । ३ । ६२ ॥

अभ्यासेणः परस्य एयन्तानामेषां सस्य स यत्र न षः षणि परे । सिस्वेदयिषति । सिस्वादयिषति । सिसाहयिषति ।

प्राक् सितादड्व्यवायेपि । ८ । ३ । ६३ ॥

सेवसितेत्यत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषामड्व्यवा-येपि षत्वं स्यात् । अभ्यषुणोत् । अभ्यषेणयत् । न्यषेधत् ।

स्थादिष्वभ्यासेन चाभ्यासस्य । ८ । ३ । ६४ ॥

प्राक् सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात् एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम् । अभ्यासेन व्यवाये अषोपदेशार्थं वचनम् । अभिषिषेणयिषति । अदन्ताभ्यासार्थं च ॥ अधितष्ठौ । षणि प्रतिषेधार्थं च । अभिषिषिक्षति । स्थादिष्वेवाभ्यासस्येति निय-मान्नेह । अभिसुषाव । अभिसुसूषति ।

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेन-यसेधसिचसञ्जस्वञ्जाम् । ८ । ३ । ६५ ॥

उपसर्गस्थान्निमित्तात्परस्य एषां सस्य षः स्यात् । अभिषु-णोति । अभिषुवतीत्यादि । उपसर्गात्किम् । दधि सिञ्चति ॥

सदिरप्रतेः । ८ । ३ । ६६ ॥

प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात् । निषीदति । न्यषीदत् ।

स्तन्भेः । ८ । ३ । ६७ ॥

स्तन्भेः सौत्रस्य सस्य षः स्यात् । विष्टभ्नोति । विष्टभ्नाति । व्यष्टभत् । सौत्रस्य किम् । विस्तम्भते । तद्बीजं तु स्तन्भेरिति तवर्गीयोपधपाठ इति माधवः । योगविभाग उत्तरार्थः । किञ्च अप्रतेरिति नानुवर्तते । बाहुप्रतिष्टम्भविवृद्धमन्युः ।

अवाच्चालम्बनाविदूर्ययोः । ८ । ३ । ६८ ॥

अवात् स्तन्भेरेतयोरर्थयोः षः स्यात् । अवष्टभ्नोति । अवष्टभ्नाति । अवतष्टम्भ । आलम्बनाविदूर्ययोः किम् । अवस्तब्धो वृषलः शीतेन ।

वेश्च स्वनो भोजने । ८ । ३ । ६९ ॥

व्यवाभ्यां स्वनतेः षः स्याद्भोजने । विष्वणति मांसम् । सशब्दं भुङ्क्त इत्यर्थः । व्यष्वणत् । विषष्वाण । अवष्वणति । भोजने किम् । विस्वनति मृदङ्गः ।

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् । ८ । ३ । ७० ॥

परिनिविभ्यः परेषामेषां सस्य षः स्यात् । परिषेवते । न्यषेवत । विषिषेविषते । प्राक्सितादित्यस्य पूर्वोऽवधिः । परिषितः । निषितः । विषितः । परिषयः । निषयः । विषयः । सितसयौ षिञ्प्रकृतिकौ क्ताजन्तौ । प्रत्ययविशिष्टग्रहणं किम् । विषिनोति । परिषीव्यति । स्थादिष्वेवाभ्यासस्येति नियमोऽपि प्राक्सितादेव । परिषिषेव । न्यषीव्यत् । व्यषीव्यत् । परिषहते । न्यषहत । व्यषहत । परिष्करोति । पर्यष्कार्षीत् । व्यस्कार्षीत् । परिष्टौति । व्यष्टौत् । न्यस्तौत् । परिष्वजते । न्यष्वजत । व्यष्वजत ।

सिवादीनां वाड्व्यवायेपि । ८ । ३ । ७१ ॥

परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवाये। तथैवोदाहृतम् । एतदर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्तुस्वञ्जोः परिनिवीत्यत्र पुनरुपादानम् ।

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । ८ । ३ । ७२ ॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते । अनुस्यन्दते वा जलम् । अप्राणिषु किम् । अनुस्यन्दते हस्ती । अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव । प्राणिषु नेत्युक्तौ तु न स्यात् ॥

वेः स्कन्देरनिष्ठायाम् । ८ । ३ । ७३ ॥

षत्वं वा स्यात् । कृत्यैवेदम् । अनिष्ठायामिति पर्युदासात् । विष्कन्ता । विस्कन्ता । निष्ठायां तु विस्कन्नः ।

परेश्च । ८ । ३ । ७४ ॥

अस्मात्परस्य स्कन्देः सस्य षो वा स्यात् । योगविभागादनिष्ठायामिति न सम्बध्यते । परिष्कन्दति । परिस्कन्दति । परिष्कण्णः । परिस्कन्नः । षत्वपक्षे णत्वम् । न च पदद्वयाश्रयतया बहिरङ्गतया षत्वस्यासिद्धत्वम् । धातूपसर्गयोः कार्यमन्तरङ्गमित्यभ्युपगमात् । पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यम्। पूर्वं साधनेनेति मतान्तरे तु न णत्वम् ॥

परिस्कन्दः प्राच्यभरतेषु । ८ । ३ । ७५ ॥

परिस्कन्द इति पूर्वेण प्राप्तस्य षत्वस्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । प्राच्यभरतेषु किम् । पूर्वेणान्यत्र विकल्पः ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः । ८ । ३ । ७६ ॥

षत्वं वा स्यात् । निःष्फुरति । निःष्फुलति । निःष्फुरति । निःस्फुलति । निष्फुरति । निष्फुलति । विस्फुलति ॥

वेः स्कभ्नातेर्नित्यम् । ८ । ३ । ७७ ॥

विष्कभ्नाति । विष्कभ्नोति ।

इणः षीध्वंलुङ्लिटां धोऽङ्गात् । ७८ ॥

इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्द्धन्यादेशः स्यात् । च्योषीढ्वम् । प्लोषीढ्वम् । अच्योढ्वम् । ऐधिढ्वम् । इड्भिन्न एव इणिह गृह्यते इति मते तु ऐधिध्वम् । ढधयोर्वस्य मस्य च द्वित्वविकल्पात् षोडश रूपाणि । चकृढ्वे । इण्ग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वम् । यक्षीध्वम् । षीध्वंलुङ्लिटां किम् । स्तुध्वे । अङ्गात् किम् । वेविषीध्वम् ।

विभाषेटः । ८ । ३ । ७९ ॥

इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्द्धन्यः स्यात् । अयिषीढ्वम् । अयिषीध्वम् । लविषीढ्वम् । लविषीध्वम् । आयिढ्वम् । आयिध्वम् । लुलुविढ्वे । लुलुविध्वे । इणः किम् । आसिषीध्वम् । अङ्गादिति नानुवर्तते । तेनेहापि विकल्पः । उपदिदीयिढ्वे । उपदिदीयिध्वे ।

समासेऽङ्गुलेः सङ्गः । ८ । ३ । ८० ॥

अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्द्धन्यः स्यात्समासे । अङ्गुलिषङ्गः । समासे किम् । अङ्गुलेः सङ्गः ।

भीरोः स्थानम् । ८ । ३ । ८१ ॥

भीरुशब्दात्स्थानस्य मूर्द्धन्यः समासे । भीरुष्ठानम् । असमासे तु भीरोः स्थानम् ॥

अग्नेः स्तुत्स्तोमसोमाः । ८ । ३ । ८२ ॥

अग्नेः परेषामेषां सस्य षः स्यात्समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । समासे किम् । अग्नेः स्तोमः ।

ज्योतिरायुषः स्तोमः । ८ । ३ । ८३ ॥

आभ्यां स्तोमस्य मूर्द्धन्यः समासे । ज्योतिः ष्टोमः । आयुः ष्टोमः । समासे किम् । ज्योतिषः स्तोमः ।

मातृपितृभ्यां स्वसा । ८ । ३ । ८४ ॥

आभ्यां परस्य स्वसुः सस्य षत्वं स्यात्समासे । मातृष्वसा । पितृष्वसा । असमासे तु मातुः स्वसा । पितुः स्वसा ।

मातुःपितुर्भ्यामन्यतरस्याम् । ८ । ३ । ८५ ॥

आभ्यां स्वसुः सस्य षो वा स्यात्समासे । मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा । विभाषा स्वसृपत्योरित्यलुक् ।

अभिनिसः स्तनः शब्दसंज्ञायाम् । ८ । ३ । ८६ ॥

अस्मात् स्तनेः सस्य मूर्द्धन्यः । अभिनिःष्टानो वर्णः । शब्दसंज्ञायां किम् । अभिनिःस्तनति मृदङ्गः ।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ ॥

उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे ॥ निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । उपसर्गप्रादुर्भ्यां किम् । दधि स्यात् । अस्तिग्रहणं किम् । अनुस्सूयते । अथासत्यप्यस्तिग्रहणे सकारं प्रत्येवोपसर्गत्वमाश्रीयते । प्रादुःशब्दस्य तु कृभ्वस्तिष्वेव प्रयोग इत्यचाप्रसङ्गः । तथाप्येतत्प्रत्युदाहर्तव्यम् ।

अनु सूते इत्यनुसूः । सत्सूद्विषेति क्विप् । अनुस्वः अपत्यं आनुसेयः । चतुष्पाद्भ्यो ढञ् । ढेलोपोऽकद्र्वा इत्युकारलोपः । यच्परः किम् । अभिस्तः ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः । ८ । ३ । ८८ ॥

एभ्यः सुप्यादेः सस्य षः स्यात् । सुषुप्तः । पूर्वं धातुरुपसर्गेण युज्यते । क्विति लिटि परत्वात्सम्प्रसारणे षत्वे च कृते द्वित्वम् । पूर्वत्रासिद्धीयमद्विर्वचने । सुषुपतुः । सुषुपुः । अकिति तु द्वित्वेऽभ्यासस्य सम्प्रसारणम् । षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिः शेषः । नित्यत्वाच्च ततः सुपि रूपाभावान्न षः । सुसुष्वाप । सुतीति स्वरूपग्रहणम् । सुषूतिः । सुषमम् ।

निनदीभ्यां स्नातेः कौशले । ८ । ३ । ८९ ॥

आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये । निष्णातः शास्त्रेषु । नदीष्णः । सुपीति योगविभागात्कः । कौशले किम् । नद्यां स्नातः नदीस्नातः ।

सूत्रं प्रतिष्णातम् । ८ । ३ । ९० ॥

प्रतेः स्नातेः षत्वम् । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । अन्यत्र प्रतिस्नातम् ।

कपिष्ठलो गोत्रे । ८ । ३ । ९१ ॥

कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः । गोत्रे किम् । कपीनां स्थलं कपिस्थलम् ।

प्रष्ठोऽग्रगामिनि । ८ । ३ । ९२ ॥

प्रतिष्ठत इति प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः अग्रेति किम् । प्रस्थः ।

वृक्षासनयोर्विष्टरः । ८ । ३ । ९३ ॥

अनयोर्विपूर्वस्य स्त्रः षत्वं निपात्यते । विष्टरो वृक्ष आसनं च । वृक्षेति किम् । वाक्यस्य विस्तरः ।

छन्दोनाम्नि च । ८ । ३ । ९४ ॥

विपूर्वात् स्तृणातेर्घञन्तस्य सस्य षत्वं स्यात् छन्दोनाम्नि । विष्टारपङ्क्तिश्छन्दः । विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे छन्दो नाम्नि चेति घञ् । ततः कर्मधारयः । छन्दोनाम्नि किम् । पटस्य विस्तरः ।

गवियुधिभ्यां स्थिरः । ८ । ३ । ९५ ॥

आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवालुक् । युधिष्ठिरः ।

विकुशमिपरिभ्यः स्थलम् । ८ । ३ । ९६ ॥

एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ।

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशंक्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः । ८ । ३ । ९७ ॥

स्थ इति कप्रत्ययान्तस्यानुकरणं षष्ठ्यर्थे प्रथमा । तेन भूमिस्थितं गोस्थानमित्यादौ न । एभ्यः स्थस्य सस्य षत्वं स्यात् । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्यष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शंकुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः ।

परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः ॥ स्थस्थास्थिन्स्थॄणामिति वक्तव्यम् ॥ * ॥ स्थाशब्दः क्विबन्तः । ईत्वे वकारप्रतिषेध इति वचनात्प्रत्ययलक्षणेनेत्वं न भवति । स्थिनितीन् प्रत्ययान्तः स्थॄशब्द ऋप्रत्ययान्तः । सव्येष्ठाः । परमेष्ठी । सव्येष्ठा सारथिरिति ।

सुषामादिषु च । ८ । ३ । ९८ ॥

सस्य मूर्द्धन्यः । शोभनं साम यस्य सुषामा । सुषन्धिः ।

एति संज्ञायामगात् । ८ । ३ । ९९ ॥

सस्य मूर्द्धन्यः । हरिषेणः । एति किम् । हरिसक्थः । संज्ञायां किम् । पृथुसेनः । अगकारात्किम् । विष्वक्सेनः । इणको- रित्येव । सर्वसेनः ।

नक्षत्राद्वा । ८ । ३ । १०० ॥

एतिसंज्ञायामगकारान्मूर्द्धन्यो वा । रोहिणीसेनः । रोहिणी- षेणः । अगकारात्किम् । शतभिषक्सेनः । आकृतिगणोऽयम् ।

ह्रस्वात्तादौ तद्धिते । ८ । ३ । १०१ ॥

ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते । सर्पिष्टमम् । यजुष्टमम् । ह्रस्वात्किम् । गीस्तरा । तादौ किम् । सर्पिःसाद्भवति । तद्धिते किम् । सर्पिस्तरति ॥ तिङन्तस्य प्रतिषेधो वक्तव्यः ॥ * ॥ भिन्द्युस्तराम् ।

निसस्तपतावनासेवने । ८ । ३ । १०२ ॥

षः स्यात् । आसेवनं पौनःपुन्यम् । ततोऽन्यस्मिन्विषये । निष्टपति । निष्टप्तं रक्षो निष्टप्ता अरातयः । अनासेवने किम् । निस्तपति । पुनःपुनस्तपतीत्यर्थः ।

युष्मत्तत्ततक्षुःष्वन्तः पादम् । ८ । ३ । १०३ ॥

पादमध्यस्थस्य सस्य मूर्द्धन्यः स्यात्तकारादिष्वेषु परेषु । युष्मदादेशाः त्वंत्वातेतवाः । त्रिभिष्ट्वं देव सवितः । तेभिष्ट्वा । अभिष्टे । अप्स्वग्नेस्वधिष्टव । अग्निष्टद्विश्वम् । द्यावा पृथिवी निष्टतक्षुः । अन्तः पादं किम् । तदग्निस्तदर्यमा यन्म आत्मनो भिन्दाभू दग्निस्तत्पुनराहाजातवेदा विचर्षणिः । अत्राग्निरिति पूर्वपादस्यान्तो न तु मध्यः ।

यजुष्येकेषाम् । ८ । ३ । १०४ ॥

युष्मत्तत्ततक्षुःषु परतः सस्य मूर्द्धन्यो वा । अर्चिभिष्ट्वम् । अग्निष्टेयम् । अर्चिभिष्टतक्षुः । पक्षेऽर्चिभिस्त्वमित्यादि ।

स्तुतस्तोमयोश्छन्दसि । ८ । ३ । १०५ ॥

एकेषामिति वर्तते । स्तुतस्तोमशब्दयोः सस्य मूर्द्धन्यः । नृभिष्टुतस्य नृभिः स्तुतस्य । गोष्टोमम् । गोस्तोमम् । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् । पूर्वं पदं पूर्वपदमिति हि सामान्येन तत्राश्रीयते । न तु समासावयव एव ।

पूर्वपदात् । ८ । ३ । १०६ ॥

एकेषां छन्दसीति वर्तते । पूर्वपदस्थान्निमित्तात्परस्य षो वा । यदिन्द्राग्नी दिविष्ठः । युवं हि स्थः स्वर्पती ।

सुञः । ८ । ३ । १०७ ॥

छन्दसीति वर्तते । सुञिति निपातो गृह्यते । पूर्वपदस्थान्निमित्तादुत्तरस्य सुञः सस्य षः । ऊर्ध्वंजषुणः । अभीषुणः । इकः सुञीति दीर्घः । नश्च धातुस्थोरुषुभ्य इति णत्वम् ।

सनोतेरनः । ८ । ३ । १०८ ॥

अनकारान्तसनोतेरिराकुभ्यां परस्य सस्य षश्छन्दसि । गोषा इन्द्रो नृषा असि । जनसनेति विट् । विड्वनोरित्यात्वम् । अनः किम् । गोसनिम् । छन्दसि वनसनरक्षिमथामितीन्प्रत्ययः । खिर्णिषतेरप्रत्ययः । सिसनीः ।

सहेः पृतनर्ताभ्यां च । ८ । ३ । १०९ ॥

पृतनाषाहम् । ऋताषाहम् । चात् ऋतीषाहम् ।

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।८।३।११०॥

रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्द्धन्यो न स्यात् ॥ पूर्वपदादिति प्राप्तः प्रतिषिध्यते इति वृत्तिर्भूयोऽभिप्राया । तेन शासिवसीति प्राप्तमपि न । विस्रब्धं कथयति । उस्रो रश्मिः । उस्रा गौः । स्फायितञ्चीत्यादिना वसेः रक् । विसृपः । विसर्जनम् । दिवि स्पृशि । निस्पृहः । सवने सवने । सूते सूते ।

सात्पदाद्योः । ८ । ३ । १११ ॥

सस्य षत्वं न स्यात् । अग्निसात् । दधि सिञ्चति ।

सिचो यङि । ८ । ३ । ११२ ॥

सिचः सस्य षो न स्याद्यङि ॥ निसेसिच्यते । यङि किम् । अभिषिषिक्षति ।

सेधतेर्गतौ । ८ । ३ । ११३ ॥

गत्यर्थस्य सेधतेः षत्वं न स्यात् । गङ्गां विसेधति । गतौ किम् । निषेधति । निषिषेध ।

प्रतिस्तब्धनिस्तब्धौ च । ८ । ११४ ॥

अत्र षत्वं न स्यात् ।

सोढः । ८ । ३ । ११५ ॥

सोढ्रूपस्य सहेः सस्य षत्वं न स्यात् ॥ परिसोढा ।

स्तम्भुसिवुसहां चङि । ८ । ३ । ११६ ॥

उपसर्गादिति वक्तव्यम् ॥ * ॥ उपसर्गनिमित्तादेषां सस्य षो न स्याच्चङि । अवातस्तम्भत् । पर्यसीषिवत् । न्यसीषहत । अभ्यासात्प्राप्ने प्रतिषेधः ।

सुनोतेः स्यसनोः । ८ । ३ । ११७ ॥

स्ये सनि च परे सुञः षो न स्यात् । विसोष्यति । अभिसुसूषतेरप्रत्ययः । अभिसुसूः ।

सदेः परस्य लिटि । ८ । ३ । ११८ ॥

सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि । निषसाद ॥ स्वञ्जेरुपसंख्यानम् ॥ * ॥ परिषस्वजे । परिषस्वञ्जे ।

निव्यभिभ्योऽड्व्यवाये वा छन्दसि । ८ । ३ । ११९ ॥

सस्य मूर्द्धन्यः । न्यषीदत् । न्यसीदत् । व्यस्तौत् । व्यष्टौत् । अभ्यष्टौत् । अभ्यस्तौत् ।

इति दीपिकायामष्टमस्य तृतीयः पादः ।

अथ अष्टमाऽध्यायस्य चतुर्थः पादः ।

रषाभ्यां नो णः समानपदे । ८ । ४ । १ ॥

एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् ॥ आस्तीर्णम् । विशीर्णम् । कुष्णाति । पुष्णाति । यूष्णः । यूष्णा । पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अड्व्यवाय इत्येवात्र णत्वम् । पूर्वत्रासिद्धीये न स्थानिवदिति त्विह नास्ति । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात् । पग्रहणमुत्तरार्थम् । ष्टुत्वेनैव सिद्धेः । समानपदे किम् । अग्निर्नयति रामनाम । ऋवर्णान्नस्य णत्वं वाच्यम् ॥ * ॥ मातॄणाम् । अथवा क्षुभ्नादिषु नृमनतृप्नोति ग्रहणं ज्ञापयति । ऋवर्णादपि णत्वं भवतीति ।

अट्कुप्वाङ्नुम्व्यवायेऽपि । ८ । ४ । २ ॥

अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे ॥ करणम् । हरणम् । क्रियणा । गुरुणा । अर्हेण । अर्केण । मूर्खेण । वर्गेण । अर्घेण । दर्पेण । रेफेण । दर्भेण । रामेण । पर्याणद्धम् । पदव्यवायेपीति निषेधं बाधितुमाङ्ग्रहणम् । बृंहणम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । तृंहणम् । नेह । प्रेन्वनम् । तच्चाकर्तुं शक्यम् । अयोगवाहानामट्सूपदेशस्योक्तत्वात् । अथेह कस्मान्न भवति । आदर्शेन । न चाडादिभिरेव व्यवाये इति नियमः । अप्राप्तविधित्वात् । सत्यम् । योगविभागोत्र बोध्यः । व्यवायेपीत्येको

योगो विध्यर्थः । अट्कुप्वाङ्नुम् इत्यन्यो नियमार्थः । छान्दसो भिसो लुक् ।

पूर्वपदात्संज्ञायामगः । ८ । ४ । ३ ॥

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्सञ्ज्ञायां न तु गकारव्यवधाने ॥ द्रुरिव नासिकाऽस्य द्रुणसः । खरणसः । संज्ञायां किम् । चर्मनासिकः । अगः किम् । ऋचामयनं ऋगयनम् । अयट-गयनादिभ्य इति निपातनाण्णत्वाभावमाश्रित्याग इति प्रत्याख्यातं भाष्ये ।

वनं पुरगामिश्रकासिध्रकासारिकाकोटरा-ग्रेभ्यः । ८ । ४ । ४ ॥

वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं न त्वन्येभ्यः । इह कोटरान्तानां पञ्चानां कृतदीर्घाणां निर्देशो नियमार्थः । अग्रेशब्दस्य तु विध्यर्थः । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । एभ्य एवेति किम् । असिपत्रवनम् । वनस्याग्रे अग्रेवणम् । राजदन्तादिषु निपातनात्सप्तम्या अलुक् । प्राति-पदिकार्थमात्रे प्रथमा ।

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्यो-ऽसंज्ञायामपि । ८ । ४ । ५ ॥

एभ्यो वनस्य णत्वं स्यात् । दूर्वावनम् । दूर्वावणम् । शिरीषवनम् । शिरीषवणम् । द्व्यच्त्र्यच्भ्यामेव । नेह । देवदारुवनम् ॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः ॥ * ॥ इरिकावनम् । मिरिकावनम् । फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।

ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ॥ इति ।
यद्यपि वृक्षवनस्पत्योर्भेदस्तथापीहाभेदेन ग्रहणं द्रष्टव्यम् ॥

अन्होऽदन्तात् । ८ । ४ । ६ ॥

अदन्तपूर्वपदस्थाद्रेफात्परस्यान्हो नस्य णः स्यात् ॥ सर्वाह्णः। पूर्वाह्णः। अह्नोऽन्ह एतेभ्य इत्यन्हादेशः। टच् समासान्तः। अदन्तात्किम्। निरन्हः। अदन्तादिति तपरकरणान्नेह। परागतमहः परान्हः। दीर्घान्ही प्रावृडित्यत्र तु क्षुभ्नादित्वाण्णत्वं न। एवं चेतदर्थमन्ह इत्यदन्तानुकरणक्लेशो न कर्तव्यः। प्रातिपदिकान्तेति णत्ववारणाय क्षुभ्नादिपाठस्यावश्यकत्वात् ॥

वाहनमाहितात् । ८ । ४ । ७ ॥

आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात् ॥ इक्षुवाहणम्। आहितात्किम्। इन्द्रवाहनम्। इन्द्र स्वामिकं वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात् ॥

पानं देशे । ८ । ४ । ८ ॥

पूर्वपदस्थान्निमित्तात्परस्य णत्वं स्याद्देशे गम्ये। क्षीरं पानं येषां ते क्षीरपाणाः उशीनराः। सुरापाणाः प्राच्याः। पीयते इति पानम्। कर्मणि ल्युट्। देशे किम्। दाक्षीणां पानं दाक्षिपानम्।

वा भावकरणयोः । ८ । ४ । ९ ॥

पानस्येत्येव। क्षीरपाणम्। क्षीरपानम्। गिरिनद्यादीनां वा ॥ गिरिणदी। गिरिनदी। चक्रणितम्बा। चक्रनितम्बा।

प्रातिपदिकान्तनुम्विभक्तिषु च । ८ । ४ । १० ॥

पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात्॥ प्रातिपदिकान्ते माषवापिणौ । नुमि । व्रीहिवापाणि । विभक्तौ । माषवापेण । पक्षे माषवापिनावित्यादि । उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम् । नेह । गर्गाणां भगिनी गर्गभगिनी । अत एव नुम्ग्रहणं कृतम् । अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम् । न तूत्तरपदस्य । किन्तु प्रहिण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रहणम् । प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न । युवादेर्न । रम्ययूना । परिपक्वानि ॥

एकाजुत्तरपदे णः । ८ । ४ । ११ ॥

एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् ॥ आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थम् । वृत्रहणौ । हरिं मानयतीति हरिमाणी । मानयतेः क्विपि समासे ङीप् । नुमि । क्षीरपाणि । विभक्तौ । क्षीरपेण । रम्यविणा ।

कुमति च । ८ । ४ । १२ ।

कवर्गवत्युत्तरपदे प्राग्वत् । हरिकामिणौ । हरिकामाणि । हरिकामेण ।

उपसर्गादसमासेऽपि णोपदेशस्य । ८ । ४ । १३ ॥

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेपि ॥ प्रणमति । प्रणामकः । उपसर्गात्किम् । प्रगतो नायकोऽस्माद्देशात्प्रनायको देशः । असमासेपीति किम् । पूर्वपदाधिकारात्समासे एव स्यात् इति तदधिकारनिवृत्तिद्योतनार्थम् । णोपदेशस्य किम् । प्रनर्दति ।

हिनुमीना। ८। ४। १४॥

उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात्॥ प्रहिणोति। प्रहिणुतः। प्रमीणाति। प्रमीणीतः।

आनि लोट्। ८। ४। १५॥

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्य आनीत्यस्य नस्य णः स्यात्॥ प्रभवाणि। लोट् किम्। प्रहिमानि।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। ८। ४। १६॥

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद्गदादिषु परेषु॥ प्रणिगदति। अड्व्यवायेपि प्रण्यगदत्। आटा च। प्रण्यागदत् इत्यादि।

शेषे विभाषाऽकखादावषान्त उपदेशे। ८। ४। १७॥

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात्॥ प्रणिभवति। प्रनिभवति। अकखादौ किम्। प्रनिकरोति। प्रनिखदति। अषान्ते किम्। प्रनिपिनष्टि। उपदेशे किम्। इह प्रतिषेधो यथा स्यात्। पुष पुष्टौ। दिवादिः। प्रनिपोष्यति। प्रनिचखाद। इह च मा भूत्। विश्। प्रणिवेष्टा। इहोपसर्गाणामसमस्तत्वेऽपि संहिता नित्या। तदुक्तम्।

संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥ इति।

अनितेः। ८। ४। १८॥

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात् । प्राणिति ।

अन्तः । ८ । ४ । १९ ॥

पदान्तस्यानितेर्नस्य णत्वं स्यात् उपसर्गस्थान्निमित्तात्परश्चेत् । हे प्राण् ।

उभौ साभ्यासस्य । ८ । ४ । २० ॥

साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति । प्राणिणत् । प्राणिणिषति ।

हन्तेः । ८ । ४ । २१ ॥

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात् । प्रहण्यात् ।

अत्पूर्वस्य । ८ । ४ । २२ ॥

हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य । प्रघ्नन्ति । वृत्रघ्नः । योगविभागसामर्थ्यादनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरेति णत्वमपि निवर्त्यते । यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तम् । तद्भाष्यवार्तिकविरुद्धम् । तपरकरणं किम् । प्राघानि ।

वमोर्वा । ८ । ४ । २३ ॥

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परतः । प्रहण्मि । प्रहन्मि । प्रहन्वः । प्रहण्वः ।

अन्तरदेशे । ८ । ४ । २४ ॥

अन्तः शब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु

अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । तपरः किम् । अन्तरघानि ।

अयनं च । ८ । ४ । २५ ॥

अयननस्य णो ऽन्तःशब्दात्परस्य ॥ अन्तरयणम् । अदेशे इत्येव । अन्तरयनो देशः ।

छन्दस्यृदवग्रहात् । ८ । ४ । २६ ॥

ऋकारान्तादवग्रहात्परस्य नस्य णः । नृमणाः । पितृयाणम् ।

नश्च धातुस्थोरुषुभ्यः । ८ । ४ । २७ ॥

छन्दसीति वर्तते । धातुस्थात् । अग्ने रक्षाणः । शिक्षाणो अस्मिन् उरुणस्कृधि । अभीषुणः । मोषुणः । उपसर्गादनोत्पर इति सूत्रं भंक्त्वा भाष्यकार आह ।

उपसर्गाद्बहुलम् । ८ । ४ । २८ ॥

उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलम् । प्रणो नय । प्रणसः । अञ् नासिकायाः । उपसर्गाच्चेत्ययं नसादेशः ॥ न च भवति । प्रनो मुञ्चतम् । प्रनः पूषा । उपसर्गग्रहणं प्राद्युपलक्षणम् । इतः प्रभृति छन्दसीति निवृत्तम् ।

कृत्यचः । ८ । ४ । २९ ॥

उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् ॥ प्रयाणीयम् । अचः किम् । प्रमग्नः ॥ निर्विण्णस्योपसंख्यानम् ॥ * ॥ अचः परत्वाभावान्नकारेण व्यवधानाच्चाप्राप्ते वचनम् । परस्य णत्वम् । पूर्वस्य ष्टुत्वम् । निर्विण्णः ।

णेर्विभाषा । ८ । ४ । ३० ॥

उपसर्गस्थान्निमित्तात्परस्य णयन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात् । प्रयापणीयम् । प्रयापनीयम् । विहितविशेषणं किम् । यका व्यवधाने यथा स्यात् । प्रयाप्यमाणं पश्य ।

हलश्चेजुपधात् । ८ । ४ । ३१ ॥

सर्वस्येजुपधस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणम् । हलादेरिजुपधात्कृन्नस्याचः परस्य णो वा स्यात् ॥ प्रकोपणीयम् । प्रकोपनीयम् । कृत्यच इति नित्यं प्राप्ते विकल्पोयम् । हलः किम् । प्रोहणीयम् । इजुपधात्किम् । प्रवपणीयम् । अचः । किम् प्रभुग्नः ।

इजादेः सनुमः । ८ । ४ । ३२ ॥ ॥

सनुमश्चेद्भवति इजादेर्हलन्ताद्विहितो यः कृत्तत्स्थस्यैव ॥ प्रेङ्खणीयम् । यदि तु विहितविशेषणं न व्याख्यायेत तर्हि नियमार्थता न लभ्येत णिज्लोपे कृते हलन्तात्परत्वेन णेर्विभाषेति विकल्पं बाधितुं विधेः सम्भवात् ॥ इजादेः किम् । मगि सर्पणे । प्रमङ्गनीयम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । अट्कुप्वाङिति सूत्रेप्येवम् । तेनेह न । प्रेन्वनम् । इह तु स्यादेव । प्रोम्भणम् ।

वा निंसनिक्षनिन्दाम् । ८ । ४ । ३३ ॥

एषां नस्य णो वा स्यात्कृति परे ॥ प्रणिंसनम् । प्रनिंसनम् । प्रणिक्षणम् । प्रनिक्षणम् । प्रणिन्दनम् । प्रनिन्दनम् । णोपदेशत्वादेषां नित्ये प्राप्ते विकल्पार्थमिदम् ।

न भाभूपूकमिगमिप्यायीवेपाम् । ८ । ४ । ३४ ॥

एभ्यः कृत्त्स्य णो न । प्रभानम् । प्रभवनम् । प्रपवनम् । पूञ एवेह ग्रहणमिष्यते । पूङस्तु प्रपवणम् । क्षोमस्य प्रक्रमनम् । प्रगमनम् । प्रप्यायनम् । प्रवेपनम् ॥ ण्यन्तभादीनां चोपसंख्यानम् ॥ * ॥ प्रभापनम् ॥

षात्पदान्तात् । ८ । ४ । ३५ ॥

नस्य णो न । निष्पानम् । सर्पिष्पानम् । षात्किम् । निर्णयः । पदान्तात्किम् । मुष्णाति । पदे अन्तः पदान्तोऽयमिति सप्तमीसमासोऽयम् । तेनेह । न । सुर्सपिष्केण ।

नशेः षान्तस्य । ८ । ४ । ३६ ॥

णत्वं न स्यात् । प्रनष्टः । षान्तस्य किम् । प्रणश्यति । अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् । प्रनङ्क्ष्यति ।

पदान्तस्य । ८ । ४ । ३७ ॥

पदान्तस्य नस्य णत्वं न स्यात् ॥ रामान् ।

पदव्यवायेऽपि । ८ । ४ । ३८ ॥

पदेन व्यवधाने णत्वं न स्यात् ॥ माषकुम्भवापेन । चतुरङ्गयोगेन ॥ अतद्धिते इति वाच्यम् ॥ * ॥ आर्द्रगोमयेण । शुष्कगोमयेण ।

क्षुभ्नादिषु च । ८ । ४ । ३९ ॥

एषु णत्वं न स्यात् । क्षुभ्नाति । क्षुभ्नीतः । क्षुभ्नन्ति । नरीनृत्यते । क्षुभ्नादिराकृतिगणः ।

स्तोः श्चुना श्चुः । ८ । ४ । ४० ॥

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ॥

ष्टुना ष्टुः । ८ । ४ । ४१ ॥

स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।

न पदान्ताट्टोरनाम् । ८ । ४ । ४२ ॥

पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् ॥ षट्सन्तः । षट्ते । पदान्तात्किम् । ईट्टे । टोः किम् । सर्पिष्टमम् ॥ अनाम्नव-तिनगरीणामिति वाच्यम् ॥ * ॥ षण्णाम् । यरोनुनासिक इति विकल्पं बाधित्वा प्रत्यये नित्यमिति वचनान्नित्यमनुनासिकः । षण्णगर्यः ।

तोः षि । ८ । ४ । ४३ ॥

तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः ॥

शात् । ८ । ४ । ४४ ॥

शात्परस्य तवर्गस्य श्चुत्वं न स्यात् । विश्नः । प्रश्नः ।

यरोऽनुनासिके ऽनुनासिको वा । ८ । ४ । ४५ ॥

पदान्तग्रहणमनुवर्तते । यरः पदान्तस्यानुनासिके परेऽनुना-सिको वा स्यात् ॥ एतन्मुरारिः । एतद्मुरारिः । स्थानप्रयत्नाभ्या-मन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते । चतुर्मुखः । पदान्तस्य किम् । क्षुभ्नाति ॥ प्रत्यये भाषायां नित्यम् ॥ * ॥ तन्मात्रम् । चिन्मयम् । कथं तर्हि मदोदग्राः ककुद्मन्त इति । यवादिगणे दकारनिपातनात् ।

अचो रहाभ्यां द्वे । ८ । ४ । ४६ ॥

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः ॥ हर्य्यनुभवः । नह्यस्ति ।

अनचि च । ८ । ४ । ४७ ॥

अचः परस्य यरो द्वे वा स्तो नत्वचि ॥ दध्यत्र । मध्वत्र । वाक्क् । वाक् ॥ यणो मयो द्वे वाच्ये ॥ * ॥ यण इति पञ्चमी मय इति षष्ठीति पक्षे तवल्क्कारः ॥

द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ॥

मय इति पञ्चमी यण इति षष्ठीति पक्षे । सुध्य्युपास्यः । तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि । एकधमेकयम् । द्विधं द्वियम् । द्विधमेकयम् । एकधं द्वियम् ॥ शरः खयः॥*॥ शर इति पञ्चमी खय इति षष्ठीति पक्षे स्थ्थाली । स्थाता । खय इति पञ्चमी शर इति षष्ठीति पक्षे वत्स्सरः । क्षीरम् । अप्स्सराः ।

नादिन्याक्रोशे पुत्रस्य । ८ । ४ । ४८ ॥

पुत्रशब्दस्य न द्वे स्त आदिनि परे आक्रोशे गम्ये ॥ पुत्रादिनी त्वमसि पापे । आक्रोशे किम् । तत्त्वकथने द्विर्वचनं भवत्येव । पुत्त्रादिनी सर्पिणी ॥ तत्परे च ॥ * ॥ पुत्रपुत्रादिनी त्वमसि पापे ॥ वा हतजग्धयोः ॥ * ॥ पुत्रहती । पुत्त्रहती । पुत्रजग्धी । पुत्त्रजग्धी । चयो द्वितीयाः शरि पौष्करसादेः ॥ * ॥ वथ्सः । अफ्सराः ॥

शरोऽचि । ८ । ४ । ४९ ॥

अचि परे शरो न द्वे स्तः । चतुर्षु ।

त्रिप्रभृतिषु शाकटायनस्य । ८ । ४ । ५० ॥

त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम् ॥ इन्द्रः । इन्न्द्रः । राष्ट्रम् । राष्ष्ट्रम् ।

सर्वत्र शाकल्यस्य । ८ । ४ । ५१ ॥

द्वित्वं न । अर्कः । ब्रह्मा ।

दीर्घादाचार्याणाम् । ८ । ४ । ५२ ॥

द्वित्वं न । दाचम् । पाचम् ॥

झलां जश् झशि । ८ । ४ । ५३ ॥

स्पष्टम् । लब्धा । बोद्धा । झशि किम् । दत्तः । धत्तः ।

अभ्यासे चर्च । ८ । ४ । ५४ ॥

अभ्यासे झलां चरः स्युर्जशश्च ॥ झशां जशः । खयां तु चरः । तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इति विवेक आन्तरतम्यात् ॥ चखान । डुढौके । चकार । जघान बभूव । ददौ । बुबुधे ।

खरि च । ८ । ४ । ५५ ॥

खरि परे झलां चरः स्युः । भेत्ता । योत्स्यते । रिप्सते । लिप्सते ।

वाऽवसाने । ८ । ४ । ५६ ॥

अवसाने झलां चरो वा स्युः । वाक् । वाग् । तत् । तद् ।

अणोऽप्रगृह्यस्यानुनासिकः। ८। ४। ५७॥

अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधि। दधिँ। अणः किम्। कर्तृ। अप्रगृह्यस्य किम्। अग्नी।

अनुस्वारस्य ययि परसवर्णः। ८। ४। ५८॥

स्पष्टम्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः। कुर्वन्तीत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम्।

वा पदान्तस्य। ८। ४। ५९॥

पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्॥ त्वङ्करोषि। त्वंकरोषि। सँय्यन्ता। संयन्ता। सँव्वत्सरः। संवत्सरः। यँल्लोकम्। यंल्लोकम्। अत्रानुस्वारस्य पक्षेऽनुनासिका यवलाः।

तोर्लि। ८। ४। ६०॥

तवर्गस्य लकारे परे परसवर्णः स्यात्॥ तल्लयः। विद्वाँल्लिखति। नकारस्यानुनासिको लकारः।

उदः स्थास्तम्भोः पूर्वस्य। ८। ४। ६१॥

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्॥ आदेः परस्य। उत्थानम्। उत्तम्भनम्। अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः। थस्य झरो झरीति पाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणम्। न तु खरि चेति चर्त्वम्। चर्त्वं प्रति थकारस्यासिद्धत्वात्॥ उत्पूर्वस्कन्दश्छन्दस्युपसंख्यानम्॥ *॥ उत्कन्दः॥ रोगे च॥ *॥ उत्कन्दो रोगः।

झयो होऽन्यतरस्याम् । ८ । ४ । ६२ ॥

झयः परस्य हस्य वा पूर्वसवर्णः । स्यात् ॥ घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः ॥ वाग्घरिः । वाग्हरिः ।

शश्छोऽटि । ८ । ४ । ६३ ।

पदान्ताज्झयः परस्य शस्य छो वा स्यादटि ॥ दस्य श्चुत्वेन जकारे कृते खरिचेति जकारस्य चकारः । तच्छिवः । तच्शिवः ॥ छत्वममीति वाच्यम् ॥ * ॥ तच्छ्लोकेन । श्मि किम् । वाक्श्च्योतति ।

हलो यमां यमि लोपः । ८ । ४ । ६४ ॥

हलः परस्य यमो लोपः स्याद्वा यमि । आदित्यो देवताऽस्यादित्यं हविः । यमां यमीति यथासंख्यविज्ञानान्नेह माहात्म्यम् ।

झरो झरि सवर्णे । ८ । ४ । ६५ ॥

हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि ॥ कृष्णर्द्धिः । द्वित्वाभावे लोपे च सति एकधम् । असति लोपे द्वित्वलोपयोर्वा द्विधम् । असति लोपे द्वित्वे च सति त्रिधम् । पक्षान्तरेण पुनर्द्वित्वे चतुर्धम् ॥

उदात्तादनुदात्तस्य स्वरितः । ८ । ४ । ६६ ॥

उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् ॥ अग्निमीळे । अस्यासिद्धत्वाच्छेषनिघातो न । तमीशानासः ।

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् । ८ । ४ । ६७ ॥

उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् ॥ गार्ग्यादिमते तु स्यादेव । प्रयस्राहः वोश्वाः । क्वाऽभीशवः । उदात्तस्वरितपर इत्येव वक्तव्ये उदात्तग्रहणं शास्त्रान्ते मङ्गलार्थम् । अनेकेषामाचार्याणां सङ्कीर्तनं पूजार्थं भवति ।

अ अ । ८ । ४ । ६८ ॥

अकारो विवृतः संवृतः स्यात् । वृक्षः । प्लक्षः । इह शास्त्र कार्यार्थमकारो विवृतः प्रतिज्ञातस्तस्य तथाभूतस्यैव प्रयोगो मा भूदिति संवृतप्रत्यापत्तिरियं क्रियते । दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते । तेन तयोः संवृतो न भवति । किन्तु ह्रस्वानामेव षण्णां विवृतानां ह्रस्वाः षट् संवृता भवन्तीति सर्वेष्टसिद्धिः ।

इत्योरम्भट्टेन विरचितायां व्याकरणदीपिकायां वृत्तौ
अष्टमस्याध्यायस्य चतुर्थः पादोऽध्यायश्चाष्टमो ग्रन्थ-
श्चायं शास्त्रञ्चेदं शब्दानुशासनं नाम सम्पूर्णम् ॥
शुभम्भवतु ॥

महामंडलशास्त्रप्रकाशक समिति यन्त्रे श्री अम्बिकाचरणचक्रवर्तिद्वारा मुद्रित ।

REPRINT FROM THE PANDIT.

व्याकरणदीपिका

पाणिनीयसूत्रवृत्तिः

श्रीपण्डितवरवैद्यनाथभट्टविश्वरूपा-
परनामधेयेन ओरम्भट्टेन विरचिता

काशीस्थ(हिन्दू कालेज)रणवीरसंस्कृतपाठशालीय-
व्याकरणाध्यापकेन व्याकरणाचार्योपाधिकेन
गणपतिशास्त्रिणा संशोधिता ।

काश्याम् ।
मेडिकल हाल नामकमुद्रालये प्रकाशितम् ।

:o:o:

VAYÁKARANA DÍPIKÁ

PÁṆIṆÍSÚTRAVRITTI

BY

ORAMBHATTA

EDITED BY

VYÁKARANÁCHÁRYA

Pandit Ganpati Shástri Mokate, Professor,
Central Hindu College, Benares.

Printed by Ambica Charan Chakravarti at the Mahamandal
Shastra Prakashak Samiti Press Ld., and cover printed
and published by BHAGAVATI PRASAD B. A.,
at the Medical Hall Press, Benares,
for proprietors.,

E. J. LAZARUS & CO.
Medical Hall Press, Benares.

 1916. [Price Rs, 8-8. मूल्य ८॥)

भूमिका।

इह खलु यत्किमपि गीर्वाणवाणीमयं न्याय-वैशेषिकादिशास्त्रमधिजिगांसवो जना आदौ व्याकरणशास्त्रमेव सर्वशास्त्रोपकारिकमिति मन्वाना इन्द्रचन्द्राद्यनेकविद्वत्तमप्रणीतेषु व्याकरणस्मृत्यन्तरेषु सत्स्वपि सकलव्याकरणतत्त्वसञ्चयाद्यनेकगुणगरिष्ठां समस्तशब्दशास्त्रातिशायिनीं लौकिकालौकिकोभयविधशब्दसाधुत्वप्रदर्शिकामष्टभिरध्यायैरुपनिबद्धां पाणिनीयस्मृतिमेवाध्येतुं प्रवर्तमाना दृश्यन्त इति न तिरोहितं विदुषाम्। तदस्याः पाणिनीयस्मृतेरतिदुरूहगभीरार्थप्रतिपादकभाष्यकैयटादितः शब्दतत्त्वं निर्णेतुं न शक्नुवन्तीति पर्यालोचयद्भिः परमकारुणिकैर्महामहोपाध्यायभट्टोजीदीक्षितैः सूत्रपाठव्युत्क्रमेण तत्तत्प्रकरणान्युपनिबध्य पाणिनीयसूत्रव्याख्या सिद्धान्तकौमुदी नाम व्यरच्यत। सा च यद्यपि सम्प्रति सकलगुणगरिष्ठतया सर्वस्मिन् भारते वर्षे पठनपाठनैरतिप्रचुरप्रचारा चकास्तितमाम्। तथाप्यत्रोपनिबद्धानां फक्किकानामतिदुरूहतया न सा मन्दसाधारणानुपकरोतीत्यालोच्य सुकुमारमतीनां सुखेन तदर्थावबोधाय महान्तमुपकारमादधाना सूत्रार्थतदुदाहरणप्रत्युदाहरणप्रदीपिका व्याकरणदीपिका

नाम सरला पाणिनीयसूत्रवृत्तिर्व्यरच्यत श्रीधोंडभट्ट विश्वरूपात्मजेन वैद्यनाथभट्टविश्वरूपापरनामधेयेन ओरम्भट्टेन । ग्रन्थकारश्चायं महाराष्ट्रकुलोत्पन्नः शेखरकारादर्वाचीन एव काशीनाथशास्त्रिसमानकालिक इति अभियुक्तव्यवहारादिना ज्ञायते। उक्तशास्त्रिणश्च महामहोपाध्यायबालशास्त्रिणां परमगुरवो वैयाकरणकेशरीति नाम्ना प्रथितयशसो राजकीयसंस्कृतपाठशालायामध्यापयन्तो वैक्रमे १६१६ सम्वत्सरे पाठशालां विससर्जुः वैक्रमे १६१६ संवत्सरे च परलोकं जग्मुरितिग्रन्थनिर्माणकालो द्विपञ्चाशत्वर्षेभ्यः पराचीन वेति सुस्पष्टमेव ।

इयं चामुद्रिता सती न सर्वेषां जनानामुपकारं कुर्यादित्यालोच्य काशीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवनाध्यक्षैः श्रीविद्वद्वरविन्ध्येश्वरीप्रसादपाण्डितैः प्रोत्साहितस्तेभ्य एवैकं नातिशुद्धं पुस्तकं समासाद्य लाजरसयन्त्रालयाध्यक्षभगवतीप्रसादमहोदयैः प्रवर्तितोऽहं संशोध्य प्राकाशयमिमां वृत्तिम् । तदिमामवलोकयन्तु शास्त्ररसिकाः क्षाम्यन्तु च दृष्टिदोषेण सीसकाक्षरयोजकदोषेण वानुपलक्षितानशुद्धिदोषान् सफलयन्तु च मामकीनं परिश्रमं गुणैकपक्षपातिन इत्यभ्यर्थयते ।

मोकाटे इत्युपाह्व

गणपति शास्त्री ।

अवनत कुविद्यास (कुविस्यास) परासर अरुस् अयस् मौद्ग-ल्याकर मौद्गल्य युकर इति कृशाश्वादिः ॥

३ ऋश्य (हृश्य) न्यग्रोध' शर निलीन (निवास नि-वात) निधान निबन्धन (निबन्ध (विवद्ध) । परिगूढ (उपगूढ) असनी सित मत् वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुहु (अनडुह्) अरडु परिवंश वेणु वीरण खण्ड दण्ड परिवृत्त कर्दम अंशु इत्यादिः ।

४ कुमुद शर्करा न्यग्रोध इक्कट संकट कङ्कट गर्त बीज परिवाय निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ बल्वज यवास कूप विकण्टक दशग्राम । इति कुमुदादिः ।

५ काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह विस तृण कर्पूर बर्वर मधुर ग्रह कपित्थ जतु सीपाल इति काशादिः ॥

६ तृण नड मूल वन पर्ण वर्ण वराण विल पुल फल अर्जुन अर्ण सुवर्ण वल चरण वुस ॥ इति तृणादिः ॥

७ प्रेक्षा फलका (इलका बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कंकट संकट कट कूप बुक पुक मह परिवाप यवाष धुवका गर्त कूपक हिरण्य इति प्रेक्षादिः ।

८ अश्मन् यूथ ऊष मीन नद दर्भ वृन्द गुद खण्ड नग शिखा कोट पाम कन्द कान्द कुल गह्व गुड कुण्डल पीन गुह इत्यश्मादिः ॥

९ सखि अग्निदत्त वायुदत्त (गोपिल) भल्लपाल (भल्ल पाल) चक्र चक्रवाक छगल अशोक करवीर वासव वीरपूर वज्र कुशीरक शीहर (सीहर) सरक सरस समर सलल सुरस सुरस रोह तमाल कदल सप्तल इति सख्यादिः ॥

१० संकाश कपिल कश्मीर समीर सूर सरक सूरसेन सुपथिन् पन्थ यूप यूथ अंश अंग नांशा पलित अनुनाश अश्मन् कूट मलिन् दश कुम्भ शीर्ष चिरन्त विरत समल सीर पञ्जर नल मन्थ रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका इति संकाशादिः ।

११ बल चुल नल दल वट लकुल उरल पुल्क पुख उलकुल मूल वन कुल इति बलादिः ।

१२ पक्ष तुष तुष कुण्ड अण्ड कम्बलिका वलिक चित्र अस्ति कुम्भ सीरक सरिक सरक सकल सरस सकल समल अतिश्वन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक सिंहक अंकुश सुवर्णक हंसक हिंसक कुत्स विल खिल यमल हस्त कला सकर्णक इति पक्षादिः ।

१३ कर्ण वशिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिग कुन्ती कुम्भी जित्वन् जीवनूत कुलिश आण्डीवत आण्डीवत जव जैत्र आकम आनक इति कर्णादिः ।

१४ सुतंगम मुनिचित्त विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक शुक विग्र बीजवापिन् अर्जुन श्वन् अजिर जीव खण्डित कर्ण विग्रह इति सुतंगमादिः ।

१५ प्रगदिन् मगदिन् मददिन् कविल खण्डित गदित चूडार मन्दार कोविदार इति प्रगद्यादिः ।

१६ बराह पलाशा पलाश शेरीष शिरीष पिनद्ध निबद्ध वलाह स्थूल विदग्ध विजग्ध विभग्न निमग्न बाहु खदिर शर्कर । इति वराहादिः ।

१७ कुमुद गोमय रथकार दशग्राम अश्वत्थ शाल्मलि शिरीष मुनिस्थल कुण्डल कूट मधुकर्ण घासकुन्द शुचिकर्ण इति कुमुदादिः ।

अथ तृतीयोऽध्यायः ।

नद्यादिराष्ट्रदूरौत्तराड्ढण्यौत्याहञ् ॥ ३ । १ । १ ॥

नदी मही वाराणसी श्रावस्ति कौशंबी वनवासी काशपठी खादिरी पूर्वनगरा पाथा मालवा दार्वा सनक इति नद्यादिः ।

कन्यादेश्च ढकञ् ॥ ३ । १ । ५ ॥

कन्त्रि पुष्कल उम्बि कुंडिना नगर महिष्मती चर्मती इति कत्र्यादिः ।

शकलादेर्वृद्धात् ॥ ३ । १ । २१ ॥

शकल गौकक्ष इत्यादिः । शकलादिर्गर्गाद्यन्तर्गणः ।

उष्णादिभ्यः कालात् ॥ ३ । १ । २७ ॥

उष्णकाल शीतकाल उष्णादयः शिष्टप्रयोगगम्याः ।

ठयादिभ्यष्ठणिणठौ ॥ ३ । १ । २८ ॥

वैकालिक वैकालिकी आनुकालिकी आनुकालिकः ऐदंकालिकी ऐदंकालिकः धौमकालिकी धौमकालिका धौमकालिकः आपत्कालिकी आपत्कलिका कौपकालिकी कौपकालिकः क्रौधक्रौधकालिकी क्रौधकालिकः और्ध्वकालिकी और्ध्वकालिकः पौर्वकालिकी पौर्वकालिकः ठयादयः प्रयोगगम्याः ।

काश्यादिवाहीकग्रामात् ॥ ३ । १ । २९ ॥

काशिकी: काशिकी वैदिकी वैदिका कारन्तपिकः कारन्तपिकी कारन्तपिका शाकलिकः शाकलिकी शाकलिका पान्थनिकः पान्थनिकी पान्थनिका आरातकः आरातकी आरातका कास्तिरिकः कास्तिरिकी कास्तिरिका सैपुरिकः सैपुरिकी सैपुरिका स्कोनगरिकः स्कोनगरिकी स्कोनगरिका नायिकाः । वास्तुका वातानप्रस्थकः नान्दीपुरकः कौकुटीवहकः दाशरू-

ष्यकः । काशी वेदि देवदत्त सांयाति सांवाह अच्युत मौदन शबकुलाल हस्तिकव्याके नाम (?) हिरण्य करण अरिंदम सर्वमित्र सिंधुमित्र दशमित्र छागमित्र शाबाबलान गौवाशन तारङ्गि युवराज उपराज देवराज इति काश्यादिः ।

कच्छादेर्नृनृस्थे ॥ ३ । १ । ४६ ॥

कच्छ सिंधु वर्णु गन्धार मधुनत् कम्बोज कश्मीर साल्व कुरु अनुषण्ड द्वीप अनूप अजवाह विजापक कलूतर रङ्कु इति कच्छादिः ।

गहादिगर्तोत्तरपदेभ्यः ॥ ३ । १ । ५० ॥

गह अन्तस्थ सम विषम मध्य मध्यंदिन उत्तम अंग वंग मगध पूर्वपक्ष अपरपक्ष अधमशाख उत्तमशाख एकशाख समानशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अवस्यन्दन कामप्रस्थ खाडायन काठेरणि लावे रणि सौमित्रि शौशिरि आसुत् दैवशर्मि श्रौति आहिंसि आमित्रि व्याडि वैजि आध्यशिव आनृशंसि शौङ्गि आग्निशर्मि भौति वाराटकि वाल्मिकि वाल्मीकी क्षैमवृद्धि आश्वत्थि औद्गाहमानि ऐकविंदवि दन्ताग्रहंस तत्वग्र तन्त्वग्र उत्तर अन्तर अनन्तर इति गहादिराकृतिगणः ।

दिगादेस्तौ ॥ ३ । १ । ६० ॥

दिश् वर्ग पूग गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अंन्त मुख जघन मेघ यूथ उदक न्याय न्याय वंश वेश काल आकाश इति दिगादिः ।

समानादिलोकोत्तरपदाध्यात्मादिभ्यष्ठण् ॥३।१।६४॥

अध्यात्म अधिदेव अधिभूत इहलोक परलोक इत्यध्यात्मादिराकृतिगणः ।

भर्तुः संध्यादेरण् ॥ ३ । १ । ७६ ॥

संध्या, संध्यावेला, अमावास्या, त्रयोदशी चतुर्दशी पञ्चदशी, पौर्णमासी, प्रतिपत्, संवत्सर, आशाश्वात्, आशाश्वतक, इति संध्यादिः।

दिगाद्यङ्गांशाद्यः ॥ ३ । १ । १२ ।

दिश वर्ग पूग गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन यूथ उदक न्याय वश वेश काल आकाश।

दंत कण्ठ ओष्ठ जंघा जघन पाद कर्ण इत्यंगांशादिः।

परिमुखादेरव्ययीभावात् ॥ ३ । १ । १२४ ॥

परिमुख, परिहनु, पर्योष्ठ, पर्यलखल, परिरथ, परिसर, अनुसीर, उपस्थूल, उपकपाल, अनुपथ, अनुपग, अनुतिल, अनुसीर, अनुमाष, अनुयव, अनुयूप, इति परिमुखादिः।

शिक्षादेश्चाण् ॥ ३ । १ । १३६ ॥

शिक्षा, अगयन, अगयन, पदव्याख्यान, छन्दोमान् छन्दोभाषा, छन्दोविचिति, न्याय, निरुक्त, पुनरुक्त, व्याकरण, निवाप, वास्तुविद्या, अङ्गविद्या, छत्रविद्या, त्रिविद्या, विद्या, उत्पात, उत्पादा, संवत्सर, मुहूर्त, निमित्त, उपनिषद् इति शिक्षादिः।

रैवतिकाद्यः ॥ ३ । १ । १५६ ॥

रैवतिक स्वापिशि क्षमवृद्धि गौरग्रीव गौरग्रीवि औदमेधि औदवापि वैक्षवापि इति रैवतकादयः।

शुण्डिकादेरण् ॥ ३ । १ । १६३ ॥

शुण्डिक कृकण कृपण स्थण्डिल उदकपान उपल तीर्थ भूमि तृण पर्ण इति शुण्डिकादिः।

मौदादिभ्यः ॥ ३ । १ । १७० ॥

मौद, पैप्पलाद, जाजली, माधुकरी, इत्यादयः मौदादयः प्रयोगगम्याः ।

कठादिभ्यः श्लुग्वेदे ॥ ३ । १ । १७१ ॥

कठ, चराक, इत्यादयः प्रयोगतोऽनुसर्तव्याः ।

शौनकादिभ्योणिन् ॥ ३ । १ । १७४ ॥

शौनक, वाजसनेय, शार्ङ्गरव, शापेय, शाष्पेय, खाडायन, स्तम्भ, स्कन्ध, देवदर्शन, रज्जुभार, रज्जुकण्ठ, कठशाठ, कषाय, तल, तण्ड, पूरुषांसक, अश्वपेज, इति शौनकादिः ।

कुलालादेर्वुञ् ॥ ३ । १ । १८४ ।

कुलाल, वरुड, चाण्डाल, निषाद, कर्मार, सेना, सिरिन्ध्र, सिरिध्रि, सैरिन्ध्रं, देवराज, पर्षत्, परिषत्, बधू, मधु, रुरु, रुद्र अनडुह, ब्रह्मन्, कुम्भकार, श्वपाक इति कुलालादिः ।

शण्डिकसिन्ध्वादिशलातुराण्ण्याञ्ञण् ॥३।१।२०१॥

शण्डिक सर्वसेन सर्वकेश शक सट रक शङ्ख बोध इति शाण्डिकादिः ।

सिन्धु वर्णु मधुमत् कम्बोज शाल्व कश्मीर गन्धार किष्किन्धा उरसा दरद् गन्दिका सिन्ध्वादिः ।

पर्पादिष्टट् ॥ ३ । २ । ८ ॥

पर्प, अश्व, अश्वत्थ, रथ, जाल, न्यास, व्यास, इति पर्पादिः ॥

वेतनादेर्जीवति ॥ ३ । १ । ११ ॥

वेतन, वाहन, अर्धवाहन, धनुर्दण्ड, जाल, वेश, उपवेश, प्रेषण, उपवस्ति, सुख, शय्या, शक्ति, उपनिषद् उपदेश,

स्फिज् स्फिज, पाद, उपस्थ, उपस्थान, उपहस्त इति वेतनादिः ।

भस्त्रोत्संगादेष्ठट्ठण् हरति ॥ ३ । २ । १५ ॥

उत्संग, उडुप, उत्पुत, उत्पन्न, उत्पुट, पिटक, पिटाक, इत्युत्संगादिः ।

भस्त्रा, भरट, भरण, शीर्षभार, शीर्षेभार, असंभार, असंभोर, इति भस्त्रादिः ।

निवृत्तेऽक्षद्यूतादेः ॥ ३ । २ । १८ ॥

अक्षद्यूत, जंघाप्रहृत, जंघाप्रहत, पादस्वेदन, कण्टक, मर्दन, गतानुगत, गतागत, यातोपयात, अनुगत, इत्यक्षद्यूतादिः ।

परदारादीन्यति ॥ ३ । २ । ३७ ॥

परदार, गुरुदार, गुरुतल्प, इति परदारादयः प्रयोगगम्याः ।

प्रभूतादिभ्यो ब्रुवति ॥ ३ । २ । ४५ ॥

प्रभूत, पर्याप्त इत्यादि प्रभूतादयः प्रयोगगम्याः ।

सुस्नादीन्पृच्छति ॥ ३ । २ । ४४ ॥

सुस्नात, सुखरात्रि, सुखशयन इति सुस्नातादिः ।

माशब्दमित्यादिभ्यः ॥ ३ । २ । ४६ ॥

माशब्द, नित्यशब्द, कार्यशब्द, इति माशब्दादयः प्रयोगगम्याः ।

किशरादेष्ठट् ॥ ३ । २ । ५३ ॥

किशर, नरद, नलद, स्थागल, तगर, गुग्गुल, उशीर, हरिद्रा, हरिद्रु, पर्णी, पर्णी, इति किशरादिः ।

इष्टादिभ्योऽन्येषाम् ॥ ३ । २ । ६० ॥

इष्ट, पूर्त, उपासादित निगदित, परिगदित, परिवादित, निकथित, निषादित, निपठित संकलित, परिकलित संरक्षित, परिरक्षित, अर्चित गणित, अवकीर्ण आयुक्त, गृहीत, आम्रात, श्रुत, अधीत, अवधान आसेवित, अवधारित, अवकल्पित, निराकृत, उपकृत, उपाकृत, अनुयुक्त, अनुगणित, अनुपठित, व्याकुलित इतीष्टादिः ।

छत्रादेरञ् ॥ ३ । २ । ६३ ॥

छत्र शिक्षा प्ररोह स्था कुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा विशिका भक्षा उदस्थान पुरोडा विक्षा चुक्षा मन्द्र इति छत्रादिः ।

नवयज्ञादयोऽस्मिन् वर्तन्ते ॥ ३ । २ । ७१ ॥

नवयज्ञ पाकयज्ञ इत्यादयः प्रयोगगम्यः ।

निकटादिषु वसति ॥ ३ । २ । ७६ ॥

टिकट वृक्षमूल श्मशान इत्यादयः प्रयोगगम्या ।

गोदानादीनां ब्रह्मचर्ये ॥ ३ । २ । ७८ ॥

गौदानिकः माहानाम्निकम् आदित्यवृत्तिकमित्यादि-प्रयोगगम्याः ।

देवव्रतादीन् डिन् ॥ ३ । २ । ८१ ॥

देवव्रती अव्रती आवन्तरदीक्षीत्यादि प्रयोगगम्याः ।

व्युष्टादिष्वण् । ३ । २ ॥ ८६ ॥

व्युष्ट, नित्य, निष्क्रमण, प्रवेशन, उपसंक्रमण, तीर्थ, आस्तरण, सङ्ग्राम, संघात, अग्निपद, पीलुमूल, पीलू, मूल, प्रवास, उपवास, इति व्युष्टादिः ।

ऋत्वादिभ्योऽण् । ३ । २ ॥ ११४ ॥

ऋत्वादिभ्योऽण् ॥ ३ । २ । ११४ ॥

आर्तवम्, औपवस्त्रम्, प्राशित्रम् इत्यादयः प्रयोगगम्याः।

चूलादिभ्योऽण् ॥ ३ । २ ११८ ॥

चौलम्, श्राद्धम् चूलादयः प्रयोगगम्याः ।

स्वर्गस्वस्तिवाचनादिभ्यो यश्श्लुक् ॥ ३ । २ । १२३ ॥

स्वर्ग्यः, यशस्यम् आयुष्यम् काम्याः; इष्टधः, स्वस्तिवाचिनादिभ्यः—स्वस्तिवाचनम्, शान्तिवाचनम्, पुण्यवाचनम् सुकृत्वाचनम्, कल्याणवाचनम्, गणाविमौ प्रयोगगम्यौ ।

तद्धरद्वहदावहत्सु वंशादेर्भारात् ॥ ३ । २ । ११६ ॥

वंश, कुटज, वल्वज, मूल, स्थूणा, स्थूण, अक्ष, सश्मन्, अश्व, श्लक्ष्ण, इक्षु, खट्वा इति वंशादिः ।

दण्डादियत्नाद्यघम् ॥ ३ । २ । १७४ ॥

दण्ड, मुसल, मधुपर्क, कशा, अर्घ, मेघ, मेधा, सुवर्ण, उदक, वध, युध, युग, गुहा, भाग, इभ, भङ्ग, इति दण्डादिः ।

छेदादेर्नित्यम् ॥ ३ । २ । १७८ ॥

छेद, भेद, द्रोह, दोह, नर्ति, नर्त, कर्ष, तीर्थ, संप्रयोग, विप्रयोग, प्रयोग, विप्रकर्ष, प्रेषण, सप्रश्न, विप्रश्न, विकर्ष, प्रकर्ष, विराग, विरंग, इति छेदादिः ॥

वामाद्यादेः खः ॥ ३ । २ । १८४ ॥

वामधुरीणः, सर्वधुरीणः, उत्तरधुरीणः, दक्षिणधुरीण इत्यादि वामादिः प्रयोगगम्यः ।

प्रतिजनादेः ॥ ३ । २ । २०१ ॥

प्रतिजन, इदंयुग, संयुग, समयुग, परयुग, परकुल, परस्यकुल, अमुष्यकुल, सर्वजन, विश्वजन, महाजन, पञ्चजन, इति प्रतिजनादिः ।

कथादेष्ठण् ॥ ३ । २ । २०२ ॥

कथा, विकथा, विश्वकथा, विश्व, कथा, संकथा, वि, तण्डा, कुष्ठविद्, जनवाद, जनोवाद, वृत्ति, संग्रह, गुणगण, आयुर्वेद इति कथादिः ।

युगाद्योर्यः ॥ ३ । २ । २१० ॥

युग्यम्, हविष्यम्, सुयुग्यम्, अतियुग्यम्, परमयुग्यम्, इति युगादिः ।

हविरन्नभेदापूपादेर्यो वा ॥ २ । २ । २०८ ॥

अपूप, तंडुल, अभ्युष, अभ्यूष, अभ्योष, अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक कर्ण वेष्टक इर्गल अर्गल । अन्नभेदादेश्च—यूप स्थूणा दीप अश्व पत्र इत्यपूपादिः ।

पृथ्वादेर्वेमन् ॥ ३ । ३ । ८ ॥

पृथु, मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड आकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु इति पृथ्वादिः।

वर्णदृढादिभ्यष्ट्यण् ॥ ३ । ३ । ९ ॥

दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ट लवण ताम्र शीत उष्ण जड बधर पण्डित मधुर मूर्ख स्थिर जवन इति दृढादिः ।

पतिराजान्तगुणांगराजादिभ्यः कृत्ये च ॥ ३ । ३ । १० ॥

अधिपति प्रजापति सेनापति, अधिराज, युवराज, पुरोहित बालमन्द ग्रामिक ग्रामिक पिण्डिक सुहित खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शीलिक सूतिक मूलिक अङ्गुलिक तिलक अन्तलिक रूपिक ऋषिक पुत्रिक, अविक छत्रिक पर्षिक

पथिक चर्मिक प्रतिक सारथि आस्तिक सूचिक संरक्ष सूचक नास्तिक अआनिक स्थाक्कर चूडिक नागर । गुणः ग्रंगं निमित्तं येषां प्रवृत्तेस्ते गुणांगाः गुणद्वारेण गुणिनि वर्तमानाः—जाड्य, मौढ्य, राजादिभ्यः—राज्य, काव्य, ब्राह्मण ताडव माणव, धूर्त चोर आराधय विराधय अपराधय एकभाव द्विभाव अर्हतोनुम् च । त्रिभाव अन्यभाव, अक्षेत्रज्ञ, संवादिन् संवेशिन् सभाषिन् बहुभाषिन्, बहुभाषिन्,शीर्षघातिन,विघातिन्, समस्थ, विषमस्थ परमस्थ, मध्यमस्थ, अनीश्वर, कुशल, चपल, निपुण, पिशुन कुतूल, क्षेत्रज्ञ निश्न बालिश अलस उत्पुरुष कापुरुष राजन्, गणपति, अधिपति गडुल दायाद विशस्ति, विषम विपात निपात शौटीर इति राजादिः ।

युवादिहायनान्तादण् ॥ ३ । ३ । १३ ॥

युवन् स्थविर होतृ यजमान भ्रातृ कुतुक श्रमण श्रवण कटुक कमण्डलु कुस्त्री सुस्त्री दुःस्त्री सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सुब्रह्मचारिन् अनृशंस कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ इति युवादिः ।

देवपथादिभ्यः ॥ ३ । ३ । ३६ ॥

देवपथ हंसपथ वारिपथ रथपथ स्थलपथ करिपथ अजपथ राजपथ शतपथ शंकुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वाम रज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य इति देवपथादिराकृतिगणः ।

शाखादेर्य ॥ ३ । ३ । ३८ ॥

शाखा मुख जघन शृङ्ग मेघ अभ्र चरण स्कन्ध स्कन्द स्कद शिरस् अग्र शरण इति शाखादिः ।

शर्करादेरण् ॥ ३ । ३ । ४३ ॥

शर्करा कपालिका कपाटिका कपिष्ठिका कनिष्ठिका

पुण्डरीक शतपत्र गोलोमन लोमन् गोपुच्छ नराची नकुल सिकता इति कर्करादिः ।

संजातं तारकादिभ्य इतः ॥ ३ । ३ । ११४ ॥

तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक स्तवक किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा घेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्णक द्रोह दोह सुख दुख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर मुकुर हर्ष उत्हर्ष रण कुवलय गर्ध क्षुधसीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष कोरक कल्लोल स्थपुट फल कंचुल शृङ्गार अंकुर शैवल बकुल श्वभ्र आराल कलंक कर्दम कन्दल मूर्छा अङ्गार हस्तक प्रतिविम्ब विघ्नतंत्र प्रत्यय दीक्षा गर्ज गर्भ । इति तारकादिराकृतिगणः ।

सिध्मादिरुक्क्षुद्रजन्तोः ॥ ३ । ३ । १२० ॥

सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव, पांसु पार्श्व पर्शु हनु सक्तु मास मांस पार्ष्णी धमनी वात दन्त वल ललाट जटा घटा कटा काला पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीत श्याम पिङ्ग पित्त पुष्क पृथु मृदु मंजु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धारा वर्ष्मन् पक्ष्मन् श्लेश्मन् पेश निष्पाद कुण्ड क्षुद्रजन्तु उपताप इति सिध्मादिः ।

मधुकृषिलोमपिच्छादिभ्यो रवलश्चेलाः ॥ ३ । ३ । १२५ ॥

लोमन् रोमन् वभ्रु हरि गिरि कर्क कपि मुनि तरु इति लोमादिः ।

पिच्छा उरस धुवक ध्रुवक काडाजटाघाटात्क्षेपे । प्रज्ञा-

पर्णोदक फेनाल्ले लौ । इति पिच्छादिः ।

नोङ्गादेः ॥ ३ । ३ । १३० ॥

अङ्गना, अंगवान्, वामनः । वामवान्, पामनः, पामवान् इत्यङ्गादिः प्रयोगतोऽनुगन्तव्यः ।

ज्योत्स्नादिभ्योण् ॥ ३ । ३ । १३० ॥

ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका इति ज्योत्स्नादिः ।

मण्यादिभ्यः ॥ ३ । ३ । १४० ॥

मणिवः । मणिलः, हिरण्यवान् इति मण्यादिः सिध्मादिषु वोध्यः ।

अभ्रादिभ्यः ॥ ३ । ३ । ३४२ ॥

अभ्र, अर्शस, उरस, उरसवान् इति प्रयोगतोऽनुसर्तव्यः ।

व्रीहितुन्दादेरिलश्च ॥ ३ । ३ । १५६ ॥

व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा वलाका इति व्रीह्यादिः तुन्द उदर पिचण्ड यव व्रीहि स्वाङ्ग इति तुन्दादिः ।

सुखादेः ॥ ३ । ३ । १६७ ॥

सुख दुःख तृप्र कृच्छ्र अस्र आस्र अलीक कठिन सोढ प्रतीप शील हल मालाऽत्क्षेपे । कृपण प्रणाय प्रणय्य दल कक्ष इति सुखादिः ।

वाहूवादेर्वलात् ॥ ३ । ३ । १७० ॥

वल उत्साह उद्भास उद्भास उद्वास शिखा कूल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध इति वलादिः ।

पुष्करादेर्देशे ॥ ३ । ३ । १७२ ॥

पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ विस मृणाल कर्दम शैलक करीष शिरीष यवास विगर्ह, प्रवाह, हिरण्य कैरव कल्लोल तट तरङ्ग पंकज सरोज राजीव नालीक सरोरुह पुटक अरविंद अम्भोज अब्ज कमल कल्लोल पयम् इति पुष्करादिः ।

विमुक्तादेरण् ॥ ३ । ३ । १७७ ॥

विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पत्नीवत् वसुमत् महीयस्त्वत् सत्वत् बर्हवत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णु उर्वशी वृत्रहन् इति विमुक्तादि ।

घोषडादेर्वुच् ॥ ३ । ३ । १७७ ॥

घोषड इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः । देवधिया रक्षोहण युञ्जान अञ्जन प्रभूत प्रतूर्त कृशानु कृशाकु इति घोषडादिः ।

आद्यादिभ्यः ॥ ३ । ४ । ७ ॥

आदि मध्य अन्त पृष्ठ निसेवि पार्श्व मुखत स्वर अर्थ इत्याकृतिर्गणः ।

देवादिभ्यः सप्तमीद्वितीयात् ॥ ३ । ४ । ६३ ॥

देवत्रावसतति, देवत्रागच्छति । मनुष्यत्रागच्छति, मनुष्यत्रावसति । पशुत्रागच्छति, पशुत्रावसति ।

मर्तादिभ्यो यः ॥ ३ । ४ । १२८ ॥

मर्तः, मर्त्यः सूरः सूर्यः, क्षेमः, क्षेम्यः, भागं, भाग्यं, आठ्यं, गम्यम् इत्यादिप्रयोगगम्याः ।

प्रज्ञादिभ्योऽण् ॥ ३ । ४ । १३२ ॥

प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन् षोडन् विद्या मनस् । श्रोत्र शरीरे । जुहूत । कृष्ण मृगे । औषधि भेषजे । चिकीर्षत् चोर शत्रु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच असनि कार्षापण देवता बन्धु इति प्रज्ञादिः ।

विनयादिभ्यः ॥ ३ । ४ । १३६ ॥

विनय, समय संप्रति संगति कथंचित् अकस्मात् समाचार उपचार समाय समयाचार व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय इति विनयादिः ।

दामिनीयौधेयपार्श्वादिवृकाच्छाजण् टेन्यण् ॥४।१४५॥

दामनि औलपि वैजावापि औदकि औदङ्कि अच्युतन्ति आच्युतन्ति अच्युतदन्ति आच्युतदन्ति शाकुन्तकि आकिदन्ति औहवि काकदन्तकि शात्रुंतपि सार्वसेनि बिन्दु वैन्दवि तुलभ मौञ्जायन् काकन्दि सावित्रीपुत्री इति दामन्यादिः ।

२ पर्शु असुर रक्षस् बाल्हीक वयस् वसु मरुत सत्वत् दशार्ह पिशाच असनि कार्षापण इति पर्श्वादिः ।

३ यौधेय कौशेय शौक्रेय शौभ्रेय धार्तेय घार्तेय ज्यावाणेय त्रिगर्त भरत उशीनर इतियौधेयादिः ।

अथ चतुर्थोऽध्यायः ।

भृशादेश्च्वौ क्तः ॥ ४ । १ । २६ ॥

भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत रेहत् संश्चत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवंस् अण्डर वर्चस ओजस् सुरजस् अरजस् इति भृशादयः ।

सुखादेर्भुजि ॥ ४ । १ । ३७ ॥

सुख दुःख तृप्र कृच्छ्र अस्र आस्र अलीक प्रतीत करुण कृपण सोढ एतानि सुखादीनि ।

गणपाठोऽयममोघवृत्तित उद्धृत्य सिद्धान्तकौमुदीतः संस्कृत्य यावदुपलब्धः प्रकाशितः ।

अथ प्रथमाध्यायस्य द्वितीयः पादः ।

नपोऽचो ह्रस्वः ॥ १ ॥

इयमहमिदमिति शब्दव्यवहारहेतुरुपदेशगम्यः प्रातिपदिकार्थे धर्मो लिगं स्त्रीपुंनपुंसकत्वादि । नपो–नपुंसकत्वाभिधायिनोऽजन्तस्य शब्दरूपस्य ह्रस्वादेशो भवति । कीलालपं ग्रामणि । नतभ्रु । अतिहि, अतिरि, अतिद्यु । अतिनु कुलं । नप इति किम् ? । कीलालपाः पुमान् । ग्रामणीः स्त्री । अच इति किम् ? । सुवाक् कुलं । रमते कुलं । काण्डे, कुड्ये । काण्डीभूतं कुलमित्यत्र लिङ्गानुपादानात् न भवति । युगवरत्राय । युगवरत्रार्थं । युगवरत्रेन्द्र (?) इत्यत्रासिद्धं वहिरङ्गन्तरङ्गे ।

नपुंद्व्यच् सन्तमवेधोजरस्तया मन्त्र कर्तृरित्रांतं ।
त्वाद्यात्वाद्वहुलं घ्यष्कानखभावोऽव्ययीभावः ॥ १ ॥
द्वंद्वैकत्वं संख्याव्ययपूर्वपदः पथोऽथ तत्पुरुषः ।
नञ् कर्मधारयो वहुरेभ्यश्च्छाया सभा शाला ॥ २ ॥
राजार्थराक्षसादेरराज आऔवुपक्रमोपज्ञं ।
संज्ञायां कंथोशीनरेषु सेना सुरा छाया ॥ ३ ॥
शाला निशा च वोर्णा स्थूणेशशगृहपरे सुदिनपुण्या-
देकाशच्चांहोरात्रः संख्यायां किल युगमयाने ॥ ४ ॥
फलभेदनयन जललवन धनान्नहललोह विवर-
मांसधनुर्जल कुसुमतुल्यवणमुखदलरुधिरनामानि ॥५॥
दध्यस्थिसक्थिजत्रुश्मश्चस्त्रास्त्रश्रु वस्तुमस्तुजतु-
त्रपुतालुजानुदारुकशोरुस्वादूनि वरुवर्षे ॥ ६ ॥
चुंवकांशुकशुल्कोल्मूकशालूकप्रातिपदिकमकुटतटं ।
पिठवटतिरीट लोष्टकरोट ललाटानि शृंगाटं ॥ ७ ॥

तुंष्टांडभांडकुंडं पर्णमृणं लवलतोरणो परणं ।
पीठोकत्थरिक्थकाष्ठं पृष्ठाजिनघनदधि(दीन)तुहिनं॥८॥
सोपानभुवनकाननमिथुनलवनगगनवेतनं वृजिनम् ।
कठिनश्मशानशाश्वनरत्नविपिननिम्नजिह्माहः ॥९॥
तलभं त्रिविष्टभं भं रूपोडुशिल्पपुष्पाणि ।
पापक्षमीपपरीपान्तरीपयुग्मेध्मसिध्मानि ॥ १० ॥
गुल्माध्यात्मं कुंकुमहिमकिसलयहृदयमिंद्रियं वलयं ।
प्रालयेमुत्तरीयं प्रांतप्रत्यन्तराष्ट्राणि ॥ ११ ॥
द्वारात्रवक्रतक्रस्फाराजिरचीरतीरकेयूरं ।
क्षिप्रश्नुद्रश्वभ्रक्रूरांबरनीरमाराणि ॥ १२ ॥ .
रध्रं चीवरकेसरमुदरांतरजठरगह्वरकुटीर-
छिद्रकुकुंदरपंजरमन्दिरचत्वरशरीराणि ॥ १३ ॥
वैराक्षरपुष्करचाम्रशिशिराशिबिरं तनोः शुक्रं ।
पनसां ससाहसविसं पीयूषपुरीषकल्माषं ॥ १४ ॥
शीर्षं जीर्षं किल्विषमिंद्रियमक्षं पृषद्धृषदुदश्वित् ।
वियताजगच्छकृद्यकृदलातपित्तं वृतं वृत्तम् ॥ १५ ॥
नवनीतनिमित्तानृतरजतामृतपलितमरकतविचित्तं ।
शवबदीश(?)विश्व कुलिशांगदद्दैवगुदास्पदाकाशं ॥१६॥
द्वंद्वसुखदुःखबर्हः अद्धांगशरावपार्श्वकिण्वानि ।
भयलिंगवर्षभगपदविंबकुटुंबानि शफवृदं ॥ १७ ॥
शिक्यं मध्यं धान्यं सत्यापत्याज्यपण्यधिष्ण्यानि ।
सस्यं कुड्यं कुप्यं माल्याघखकव्यकाव्यानि ॥ १८ ॥
हर्म्यं तूर्यं सैन्यं पिच्छकवचनामरोमानि ।
यादोलांतशतादीनि धातुनैकाधिकरणं च ॥ १९ ॥
सारं न्याय्ये धर्मभपूर्वनिमित्ते समे विभागेऽर्हं ॥

इति नपुंसक लिंगं ।

असमाहारे द्वंद्वः पुंसि भवेदश्व वडव इति । ॥ २० ॥

णघञजृधननंघोः किरिमा विषवातारि पंकनिर्यास–

स्वर्गसुरासुरवत्सर ऋतुवंशसमुद्रपुरुषाह ॥ २१ ॥

कंठोष्ठकेशदंतस्तनगुल्फकपोलनखभुजात्माभ्र–

ऋतुमान खङ्ग गिरिशरशरभ्यभिधानानि धान्यानि॥ २२ ॥

कटण (?) थनपभमयरषसशब्दनसौतोहरिद्गरुद्रमुत् ।

अर्घौ वैमै केषां विट्खणिजो दुंदुभिर्गंधिः ॥ २३ ॥

पाण्यञ्जुलिमणिसारथिद्रुत्यषिवस्त्यतिथिकुक्षुरविराशि-

ध्वनिमुनिकलिवलिकेलिक्रिमिकपिकविवन्हिवृष्ण्यग्निः ॥२४॥

शंखौघशंकुपुंखतरंगमृदंगाः समुद्रयुगपूगाः ।

मंचा ध्वजगजपुंजा नाडीव्रणवल्वजा लाजाः ॥ २५ ॥

ह्रदकंदकुंदबुद्बुद्जनपदशतपदशब्दा नकुंतदूतमठाः ।

धूर्तमुहूर्तव्राता हस्ताहवपुस्तसंग्रामाः ॥ २६ ॥

गंडकरंडवरंडाः षंडो मुंडशिखंडगुडसंडाः ।

गेहस्तंभनितम्बाः ककरेककटाहनिर्यासाः ॥ २७ ॥

आत्माश्मानौ पाद्मश्लेष्मस्कन्धगंधराथोः(?) ।

सीरोधनरात्रान्हाहापाङ्गाः पल्लवो मेद्रः ॥ २८ ॥

वृत्तामित्रच्छात्राः पुत्रो दशास्तु वस्त्रस्य ।

वशांशपुरोहाशप्राग्वंशास्तंडुलस्तरलः ॥ २९ ॥

कंबलचषालभ्रमरकललतालकुसूलदवला वृषलाः ।

मुसलोपलरैकीलास्तूलो वाकाप्रभृतयश्च पुल्लिङ्गं ॥ ३० ॥

इति पुलिंगं ।

ईदूदन्तं स्त्री स्त्री भूविद्युद्वल्लिदिक् सरिन्नाम ।

गायत्र्यादीत्प्राययंगं नौस्तमीन्यनीस्तन्युक्ताः ॥ ३१ ॥

विंशत्याद्यानवतेः प्रियंगुनरयूडुननुकुहुस्नायुः ।
रज्जूरधेनुदुंदुभिरक्षीरुचिशानिखनिनेमिः ॥ ३२ ॥
कुटितुदिदीधितिकाकणिरात्रिच्छविनीविवेणिपश्याश्री-
राज्यादिजविपंक्तिप्रवेणिनिः श्रेणिकृषिकोटिः ॥ ३३ ॥
धूलिवलिनालिशष्कुलिपाल्योषधिशक्तिशुक्तिकिंकिविदी।
स्थालीवापीवर्तिविपणीकांचीवांचिदरी ॥ ३४ ॥
मारी भेरी सूची वाण्यटवी भारती सुखुंडी ज्या ॥
मांड्याली मंजरिखारी लक्षावंनीसिकाशम्या ॥ ३५ ॥
जंघा पामासीमा सीरा गदानासिकाशिफाज्योत्स्नाः ।
वीणा तूणा घोणा तृष्णा कृष्णा घृणा धिषणा ॥ ३६ ॥
शांला माला वेला दोला पेला तुला शिलीला ।
हेला लाला त्रेतैला राध्या मन्दुरा मदुरा ॥ ३७ ॥
मंदिरा क्षुरा रशना शिरोधरा वागुरा सुरा वर्षा ।
प्रतिसरया प्रतिसिरया शर्करया वालुका सिकता ॥ ३८ ॥
आरा द्वारा कारा तारा धारा भिधा छिदा मेधा ।
रेखा विधा गुहा वपवसा क्रियाक्षिपसृजा लेखा ॥ ३९ ॥
चूडा पीडा क्रीडा घोटा घंटा जटा मटा खट्वा ।
यात्रा मात्रा भस्त्रा दंष्ट्रा ग्रीवा वरत्रेधा ॥ ४० ॥
जिह्वा स्पृहा स्फुलिंगा मंजिष्ठा रोधनाकुथाथ कंथा ।
मंजूषा गंडूषा मूषा साल्ना रसा रास्ना ॥ ४१ ॥
शाखा शिखा शलाका कक्षा स्वाहा स्वधा सुधा गोधा ।
यूकोकोल्का कक्ष्या क्षपा निशा मेखला लाक्षा ॥ ४२ ॥
छाया माया पेया दया बलाका कशेष्टिकेषिका ।
युक्ता रंभा सेना सभा सभा पिंडिका पृतना ॥ ४३ ॥
योग्या लता पताका शरद्दरद्दृषदुपानहत्संपत् ।

विषदापत्प्रतिपत्युत्संमत्परिषत्नभित्क्षुद्भ्रुत् ॥ ४४ ॥
संयत्प्रावृड्विप्रुड्ढिड्वणिक्कुसनसाशीः ।
भाश्चर्छिर्दिगीर्धूर्पूर्द्यौर्द्वार्वाक्त्वक्स्फिग्स्रुक्स्त्रुक् ॥ ४५ ॥
पात्रादिवर्जितादन्तोत्तरपदकौ द्विगुः समाहारे ।
अन्नादन्वांतौ वा नपुंसकं ङेऽर्थसे गुणिवत् ॥ ४६ ॥

इति स्त्रीलिंगं ।

स्त्रीपुंसेऽसनिर्योनिश्रोण्युर्मिगविषुधिमणितरण्यरणि ।
तुटियष्टिमुष्टिपाटलिसरीचिमधिवस्तिशाल्मलयः ॥ ४७ ॥
कर्कंधुसिंधुब्राह्मीपुरुद्राणीमृत्युश्चिष्कुतिथिरेणुः ।
आपत्यतद्धितोर्चिः स्त्रीनपि पुंसि चाद्धर्चः ॥ ४८ ॥
मधुसिन्धुसीधुकमंडलुसक्तुसानुपिप्लुपुरंडदार्वे परे ।
मोदकतटाकमस्तकसरकाढककंटकानीकम् ॥ ४९ ॥
वर्चस्कटंकचषकपिटकशुशुकपिनाकशूकवल्मीकं ।
तंडकबिटंकनिष्कफलकपंकाः कल्कशुल्कौ च ॥ ५० ॥
मूषकनिदाघमंचकनखपुंखधिडंगशृंगमुद्योगः ।
व्रजकुंडकूर्चपुच्छध्वजकपाटकुटकूटाः ॥ ५१ ॥
कर्वटकिरीटपिष्टं कवटानटनिकटशकटमथनीहाः ।
दंडांहमंडखंडाः कुक्कुटहट्टकांडरणवरणाः ॥ ५२ ॥
कार्षापणवाणव्रणसुवर्णतृणवर्णवारवाणानि ।
द्रोणसवर्णौ भूषणतोरणमराल्लघृतभूताः ॥ ५३ ॥
वृत्तक्ष्वेडितलोहितपलितैरावतशतायुतप्रयुताः ।
चुस्तवसंतौ हस्तः पुस्तो यूथद्वियूथौ च ॥ ५४ ॥
गूथप्रोथौ तीर्थः ककुदावार्कदयोधमौषधकवधौ ।
अष्टापदायुधदीनस्थानासनमलिनपुलिनानि ॥ ५५ ॥
खलीनसमानद्वीपिनि चंदनशतमानशयनानि ।

स्तैनापिधानयौवननिधनविमानौदनवितानाः ॥ ५६ ॥
उद्यानयानकुणपकुतविटपाः शूर्पमंडपद्वीपाः ।
विंबंजृंभं संगमदादि(डि)मगुल्माश्रमक्षेनाः ॥ ५७ ॥
ब्रह्मोद्यानं हिमकुसुमकुट्टिमकर्मनामलोम हिमं ।
गोमयकषायमलयाठ्ययवलयहिरण्यश्चविलयानि ॥ ५८ ॥
मध्यारण्यो शल्यं विहारपुरचक्रतोमरागाराः ।
क्षीरांधकारशेखरशिखरौशीरातिखरवप्राः ॥ ५९ ॥
प्रतिसरसहस्रराष्ट्रं वज्रसमरतिमिरपारवारोद्राः ।
कांतारजठरकन्धरशरीरकेदारदरवस्त्रं ॥ ६० ॥
सूत्रं पात्रं पत्रच्छत्रपत्राणि वक्त्रनेत्रमलाः ।
मंडलतमूलवल्कलमृणालनं मुसलबलवालाः ॥ ६१ ॥
शूलपलालचषालोत्पलखंडलहपूलशकलफलमुकुलाः ।
नीलप्रवालकुंडलसालकमलशीलमूलानि ॥ ६२ ॥
मंगलनिगलकपाला हलतैलविशालपाश्र्वपौत्रीवाः ।
रावशरावौ सैन्धवपूर्वप्रग्रीवगांडीवाः ॥ ६३ ॥
काशाकाशकशांकुशकोशकलशकर्षवर्षविषयूषाः ।
विषमाषकरीषरसांबरीषकार्पासनिर्यासे ॥ ६४ ॥
कसचमसकासमासोपवासदिवसा नृकंसगृहपटहाः ।
देहोप्सु शंखपद्मौ स्वतो द्विधैतेऽर्थतः केचित् ॥ ६५ ॥

उभयलिंगं ।

त्रिषु शृंखलवल्लूर विषाणहरीतकविभीतकामलकाः ।
भल्लातकतटपात्राः परलिंगं द्वंद्वतत्पुरुषे ॥ ६६ ॥
अतिवर्तंते स्वार्थे प्रत्ययकाः प्रकृति लिंगवचनानि ।
प्रकृतिर्न निवासादिषु हरीतकीत्यादिका व्यक्तिं ॥ ६७ ॥

वचनं तु खलतिकादिर्बहुविषयोत्तरपदं समासे नुः ।
साम्याद्गुणवचनानामाश्रयतो लिंगवचनानि ॥ ६८ ॥

इति त्रिलिंगं ।

स्त्रीपुंनपा सहोक्तौ परं नदति युष्मदस्मदत् संख्या–।
लिंगे सुड्धात्वव्ययवाक्यमवचनं च बहुलमिदं ॥ ६९ ॥

श्रीः

शाकटायनव्याकरणसूत्राणामकारादिक्रमणिका

अ०

अकः । २ । १ । २०६ ।
अकर्तरि । ४ । ४ । ३ ।
अकर्मकात् । १ । ३ । १०७ ।
अकल्पात् सूत्रात् । २ । ४।१७५ ।
अकासेऽमूर्धमस्तकात्स्वांगात् । २ । २ । १२ ।
अक्यव्घञचि । ४ । २ । १३० ।
अक्लिङ्घेतौ । ४ । १ । १७ ।
अक्ष्णो प्राण्यंगे । २ । १ । १४८ ।
अक्षश्नुः । ४ । ३ । २६ ।
अक्षुनुतुस्कम्भिच्छिश्विशप सहात्त्: । ४ । २ । १८० ।
अग्नेश्चेः । ४ । ३ । १९३ ।
अग्निचित्या । ४ । ३ । ७६ ।
अग्नौ परिचाय्योपचाय्यसमूह्य चित्याः । ४ । ३ । ६६ ।
अग्रांतशुद्धशुभ्रवृषवराहाहिमूषिकात् । २ । १ । २११ ।
अचि । १ । १ । १२१ ।
अचि । ४ । १ । १३ ।
अचोऽचित्ते । ४ । ३ । ९७ ।
अचो ह्रोऽह्रस्वः । १ । १ । ११७ ।
अच्याकु । ४ । १ । ८३ ।
अच्यस्पष्टश्च । १ । १ । १५४ ।
अजाङ्माङः । १ । १ । १२६ ।
अजातेः पंचम्याः । ४ । ३ ।१९९।
अजादिभ्यो धेनोः । २ । ४ । २४ ।
अजाद्यतां । १ । ३ । १३ ।
अज्झेः शतुः । १ । २ । १४ ।
अट्याद्येकाज् हलादिभ्योऽरुचि शुभिभ्यां भृशाभीक्ष्ण्ये यङ् । ४ । १ । १० ।
अणि । २ । ३ । ६२ ।
अण् कुटिलिकायाः । ३ ।२। १७ ।
अत इञ् । २ । ४ । २१ ।
अतङः । ४ । २ । १७१ ।
अतङाणणशतृसुस्याधुमस्णश्वमाः । १ । ४ । १०१ ।
अतोऽम् । १ । २ । ४ ।
अतश्शि चोत् । ४ । २ । ४३ ।
अतोऽणहः । २ । २ । १६८ ।
अतोऽनुनासिकस्य मं । ४ १।८८ ।
अतो ऽद्भुष्युः । १ । १ । १५७ ।
अतो हः । ४ । २ । ३९ ।
अत्र च । ३ । २ । २२६ ।
अत्यंतापह्नवे लिट् ।४।३।२११ ।
अथर्वणोऽण् । ३ । १ । १५२ ।
अदीर्घात् । १ । १ । ११८ ।
अदोऽनंनात् । ४ । ३ । १७७ ।
अदोऽट् । ४ । २ । २८ ।
अद्म्यव्यतः । ४ । २ । ३४
अद्यादिवैपुल्यात्सर्वादिकिंबहोः सम् । ३ । ४ । १२ ।
अधः । १ । २ । ८० ।

किं च भेदे 'तस्य महिमानम्'इत्येतद्विरुद्धम् । अन्यस्यान्यदीयमहिमप्राप्त्ययोगात् । तत्सदृशमहिमानमितिकल्पनायां लक्षणाप्रसङ्गात् । अत एव न स्तुतिमात्रपरतयाऽपि व्याख्येयम् । सम्भवति मुख्यार्थेऽत्यन्तपरोक्षार्थतायो अन्याय्यत्वात् । "ब्रह्म वेद ब्रह्मैव भवति"इतिवाक्यशेषविरोधात् । अत्र च ज्ञानाच्छोकनिवृत्तिर्न सुप्त्यादाविव सावशेषा । किं तु तत्कारणपुण्यपापयोस्तत्कारणाज्ञानस्य च निवृत्तत्वादात्यन्तिकी, इत्याह "यदा पश्यः पश्यते रुक्मवर्णम्" इति । निरञ्जन इत्यविद्याराहित्योक्तिः । परमं साम्यमित्यैक्यमाह । अत्यन्तसादृश्यस्य एकत्वे एव पर्यवसानात् । भेदगर्भसादृश्यस्य "न तत्समश्चाभ्यधिकश्च दृश्यते, न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः"इत्यादिश्रुतिस्मृतिभिर्निषिद्धत्वात् ।

द्वितीयं दूषयन्ति । तत्सदृशेति । ननु नेदं फलवचनं, कि तु भेदज्ञानस्तुतिपरमित्याशङ्क्य स्तुतेरपि लक्ष्यत्वादुक्तदोषतादवस्थ्यमित्याह-अत एवेति । लक्षणायाः क्वचित् क्वचिन्मतद्वयेऽप्यङ्गीकारान्न दोषतेत्याशङ्क्याह-सम्भवतीति । "स-यो ह वै तत्परमं ब्रह्म वेद, ब्रह्मैव भवति"इति तृतीयमुण्डकसमाप्तौ ब्रह्मभावस्यैव ज्ञानफलत्वेनोपसंहृतत्वादस्य महिमानमिति न स्तुतिमात्रमित्याह-ब्रह्म वेदेति ।

यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥

इति तृतीयमन्त्रमप्याकाङ्क्षितसमर्पणेनोक्तार्थपरतया व्याकरोति-अत्र चेति । पश्यः-द्रष्टा अधिकारी, कर्तारं पुरुषं-जीवं, रुक्मवर्णं-स्वप्रकाशं, ब्रह्मयोनिं-वेदयोनिम्, ईशं-अन्तं, यदा पश्यतीति योजना । नन्वत्राज्ञाननिवृत्तिर्न श्रूयते इत्यत्राह-निरञ्जन इति । परमं साम्यमुपैतीतीश्वरसादृश्यमत्र ज्ञानफलतया श्रूयते । तच्च मुक्तावपि भेदमन्तरेणानुपपन्नमित्यत आह-परममिति । वैलक्षण्यस्याल्पत्वापेक्षया साम्ये परमत्वनिर्देशो न त्वैक्यापेक्षं येत्याशङ्क्याह-भेदगर्भेति ।

किं चात्रैव तृतीयमुण्डके—

यथा नद्यः स्यन्दमानाः समुद्रे
ऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति नित्यम् ॥

इति विदुषो नामरूपविलयश्रवणात् त्वदभिमतसारूप्यायोग इत्याह-तथा विद्वानिति ।

"तथा विद्वान् नामरूपाद्विमुक्तः" इत्यादिना मुक्तौ नामरूपराहित्यप्रतिपादनात्, सादृश्यायोगाच्च, साम्यं समत्वं सर्वात्मत्वमिति वा । "तस्मात्तत्सर्वमभवत् । अत्र ह्येते सर्व एकीभवन्ति । आत्मा ह्येषां स भवति" इत्यादिश्रुतिभिर्विदुषः सर्वात्मत्वप्रतिपादनात् । एतेन द्वासुपर्णेत्यादेर्भेद उपक्रमादिभिर्निराकृतः । प्रत्यक्षादिसिद्धस्य भेदस्य

श्रुत्योपक्रमादिभिरप्रतिपाद्यत्वाच्च । प्रत्यक्षाद्यसिद्धभेदाभावाच्च ॥

नन्वत्र प्राकृतनामरूपयोरेव विलयः श्रूयते, न त्वप्राकृतयोरिति चेन्न । सङ्कोचे कारणाभावात् । समुद्रप्रविष्टनदीदृष्टान्तेन कृत्स्ननामरूपविलयस्यैव प्रतीतेः । अन्यथा दृष्टान्तवैषम्यापत्तेः । नामरूपमात्रस्य प्रकृतिकार्यत्वेनाप्राकृतयोस्तयोरभावाच्च । अन्यथा विदुषः प्राकृतशोकविलय एव वीतशोक इति श्रुत्यर्थ इति अप्राकृतनित्यशोकस्तस्य स्यात् । न च तत्र मानाभावः । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" इति सशरीरस्य प्रियाप्रियसंसर्गनियमोक्तेः । त्वदभिमतमुक्तानाञ्च सशरीरत्वादिति भावः । साम्यशब्दस्य सादृश्यवाचकत्वेऽपि परममिति विशेषणादभेदे पर्यवसानमित्युक्तम् । संप्रति तस्यार्थान्तरमाह-साम्यमिति । श्रुत्यन्तरे सर्वात्मभावस्यैव ज्ञानफलत्वेनोक्तत्वादत्रापि साम्यपदेन तदेवोच्यते इत्याह-तस्मादिति । अहं ब्रह्मास्मीति ज्ञानादित्यर्थः । आत्मा ह्येषामिति । स विद्वान् एषां देवानामात्मा भवतीत्यर्थः । आदिपदेन 'तद्धैतत् पश्यन् नृभिर्वामदेवः, प्रतिपेदेऽहं मनुरभवं, सूर्यश्च' इत्यादिश्रुतिः संगृहीता । एवमाथर्वणश्रुतेरद्वितीय एवोपक्रमादेरुपपादनात् परोक्तभेदविषयोपक्रमादिरयुक्त इत्याह-एतेनेति । मानान्तरानधिगतस्यैव सर्वत्रोपक्रमादिभिः प्रतिपाद्यत्वाद्भेदस्य चातथात्वान्न श्रुतिगम्यतेत्याह-प्रत्यक्षादीति । अस्तु तर्ह्यपूर्वभेद एव श्रुतिप्रतिपाद्य इत्याशङ्क्याह-प्रत्यक्षेति ।

"पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इति श्रुतौ भेदज्ञानादेवामृतत्वश्रवणाद् अन्यत्रापि तथेत्युक्तं चोद्यमनुवदति-यत्त्विति ।

यत्तु "पृथगात्मानं प्रेरितारं च मत्वा" इत्यादिवाक्याद्भेदज्ञानान्मुक्तिरिति । तदसत् । आत्मानं कार्यकारणसंघातात् पृथग्विलक्षणं मत्वा न पदार्थज्ञानमात्रान्मुक्तिरिति वाक्यार्थमीश्वरतादात्म्यमप्याह—प्रेरितारं च मत्वेति । पृथक्तयाऽवगतमेवात्मानं प्रेरितारं मत्वा ईश्वर इति ज्ञात्वेत्यर्थः । तेनामृतत्वं प्राप्नोतीत्यभेदज्ञानादेव । तत्रापि मोक्षस्य दर्शितत्वात् । प्रकारान्तरेण तदर्थकथने कथितनियमश्रुतिविरोधात् । "उदरमन्तरं कुरुते, अथ तस्य भयं भवति । मृत्योः स मृत्युमाप्नोति, य इह नानेव पश्यति । नात्र काचन भिदास्ति । नैवात्र काचन भिदास्त्यत्र भिदामेव मन्यमानः शतधा सहस्रधा भिन्नो, मृत्योः स मृत्युमाप्नोति" इति श्रुत्या भेदज्ञानस्यानर्थहेतुत्वप्रतिपत्तेः । तत्स्वरूपनिषेधाच्च । 'भयं द्वितीयाभिनिवेशतः स्यात्' इति स्मृतेश्च । तत्र "को मोहः कः शोक एकत्वमनुपश्यतः । यन्मदन्यन्नास्ति, कस्मान्नु बिभेमि । तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" इत्य-

भेदज्ञानात्, भयनिवृत्तिश्रेयःप्राप्त्योर्दर्शितत्वाच्च । तस्मान्न भेदज्ञानान्मोक्षः ॥

आत्मानं प्रेरितारं च पृथङ् मत्वाऽमृतत्वमेतीति नैतच्छ्रुत्यर्थः । पामराणामपि तादृशमननसत्त्वेनामृतत्वप्राप्तिप्रसङ्गात् । किं तु शरीराद्यभेदेन गृहीतमात्मानं ततः पृथङ् मत्वा पृथक्कृतमात्मानं प्रेरितारं च मत्वा ईश्वरत्वेन च निश्चित्यामृतत्वमेतीत्येवमर्थपरेयं श्रुतिरित्याह-तदसदिति । आत्मानं प्रेरितारं च पृथङ् मत्वेत्यर्थकथने "तमेव विदित्वा" इत्यादिश्रुतिविरोधश्चेत्याह-प्रकारान्तरेणेति । भेदज्ञानस्यानर्थहेतुत्वाच्छ्रुतिबाधितविषयकत्वेन भ्रान्तित्वाच्च न मोक्षहेतुतेत्याह-उदरमिति । उद्-अपि । अरम्-अल्पम् । अन्तरं-भेदम् । अल्पमपि भेदं यः साधयतीत्यर्थः । नानेवेति इवशब्देन नानात्वस्य मिथ्यात्वमुच्यते । तथा च मिथ्याभूतं नानात्वं पुरुषार्थतया यः पश्यति, स मृत्योरनन्तरमपि पुनर्मृत्युमाप्नोतीत्यर्थः । तत्स्वरूपेति । 'नात्र काचन भिदा' इत्यादिना भेदस्वरूपस्यापि निषिद्धत्वादित्यर्थः । उक्तश्रुतिमूलकस्मृतितोऽपि द्वैतबुद्धेर्भयहेतुत्वमास्थेयमित्याह-भयं द्वितीयेति । अभेदज्ञानस्य त्वनर्थनिवर्त्तकत्वपुरुषार्थहेतुत्वश्रवणात् स एव श्रुत्यर्थ इत्याह-तत्र को मोह इति । 'सहायमीक्षाञ्चक्रे' इतिपूर्ववाक्योक्तहिरण्यगर्भेक्षणस्वरूपमाह-यन्मदन्यन्नास्तीति । मत्तोऽन्यन्नास्ति यतः, अतः कस्माद् हेतोरहं बिभेमीत्यर्थः । यस्माद् देवादयो ब्रह्मात्मतया ज्ञात्वा तदेवाभवन् । तत्-तस्मात् । एतर्हि-इदानीमपि । अहं ब्रह्मास्मीति यो वेद । स सर्वात्मकं

ब्रह्मैव भवतीत्यर्थः । पराभिमतश्रुत्यर्थनिराकरणमुपसं-
हरति-तस्मादिति ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

इतिस्मृतौ, "सोऽश्नुते सर्वान्कामान्"इत्यादिश्रुतौ च मोक्षेऽपि भेदश्रवणात्स परमार्थ इत्युक्तं चोद्यमनुवदति । यत्त्विति ।

यत्तु मुक्तावपि सत्त्वाद्भेदः परमार्थ इति तदसत् । विदुषः सर्वात्मत्वप्रतिपादकोदाहृतश्रुति-विरोधात् । मम साधर्म्यमागता इति वैधर्म्यनिषेधद्वारा ऽभेदपरम् । "ज्ञानी त्वात्मैव मे मतम् । क्षेत्रज्ञं चापि मां विद्धि"इत्यादिना भगवतैवाभेदस्योक्तत्वात् ।

यत्तु न तत्र मायेत्यादिवचनम् । तदपि रजस्तमसोः कार्यमात्रनिषेधपरम् । भेदावस्थायां स्वरूपेण मायानिषेधानुपपत्तेः । वैकुण्ठवासिनां मायावशित्वाद्वा मायानिषेधवचनम् । यदपि 'सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा'इति वचनमुदाहृतम् । तत्र न तावत्सहश्रुतिर्ब्रह्मणा सहत्वं दर्शयन्ती भेदं दर्शयति । ब्रह्मणः सहत्वायोगात् ॥

तत्र स्मृतिवाक्यं तावदभेदपरानेकश्रुतिविरोधात् तदा नामरूपविलयश्रुतेः सादृश्यासंभवाच्च तदानुगुण्येनैव व्याख्येयमित्याह-तदसदित्यादिना । भेदपरत्वाभिधानं पूर्वापरवचनविरुद्धं चेत्याह-ज्ञानीति ।

"सर्वभूतेषु येनैकं भावमव्ययमीक्षते" इत्याकिदमादिपदार्थः। भगवद्वचनमपि-

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्॥
अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले॥

इत्यादिपूर्वापरवचनसहस्रविरोधादुदाहृतानेकश्रुतिविरोधाच्चावान्तरमुक्तिपरम्।

कथं तर्हि तत्र मायानिषेध इत्याशङ्क्य तदभिप्रायमाह-यत्त्वित्यादिना।

रजस्तमसोरिति। सत्त्वकार्यज्ञानसुखादेस्तदा सत्त्वेन तन्निषेधायोगादिति भावः। मायाशब्देन तत्कार्यलक्षणायां हेतुमाह-भेदेति। 'मायां तु प्रकृतिं विद्यात्'इति मायायाः सर्वकार्यप्रकृतित्वश्रवणान्मायाऽभावे वैकुण्ठवासिनां शरीराद्यभावापत्तेरिति भावः। वैकुण्ठवासिनामिच्छामनुसरति मायेत्येतावता वा न तत्र माया, इत्युक्तमित्याह-वैकुण्ठेति। परोदाहृतश्रुतिवाक्यमपि स्वमतानुरोधेन व्याख्यातुमनुवदति-यदपीति। किमत्र सह ब्रह्मणेति सहश्रुतिबलाज्जीवब्रह्मभेदः प्रतीयते इत्युच्यते, किं वा सर्वान्कामानिति सर्वशब्दबहुवचनबलाद्विजातीयभेद इति?। नाद्य इत्याह-न तावदिति।

अयोगमेवोपपादयितुं कामभोगे ब्रह्मणः केन प्रकारेण सहत्वमिति पृच्छति। सहत्वं हीति।

सहत्वं हि ब्रह्मणः-पुत्रेण सहागतः पितेत्यत्रेव प्रधानक्रियानुकूलतज्जातीयक्रियाकर्तृत्वेन,

किं वा पत्न्या इवानुज्ञामात्रेण ? । नाद्यः । ब्रह्मणोऽपि भोगप्रसङ्गात् । न द्वितीयः । ईश्वरस्य प्राणिमात्रभोगे अनुज्ञादातृत्वान्मुक्तौ तस्य विशिष्यनिर्देशवैयर्थ्यात् । ब्रह्मणः सहत्वे भृत्येन सह भुङ्क्ते राजेत्यत्र भृत्यस्येवाप्राधान्यमावश्यकमिति तस्य सर्वशेषित्वमपि भज्येत । न च गर्भदासन्यायेन शेषस्यापि प्राधान्यम् । स्वामिनि भाविभृत्योपकारवत्, ईश्वरे ह्यकामे मुक्तकृतोपकाराभावात् । तस्माद् ब्रह्मणः सहत्वायोगान्न सहयोगे तृतीया, नापि सर्वान् कामानिति सर्वशब्दबहुवचनाभ्यां मुक्तावनात्मभेदसिद्धिः । । तयोरल्पत्वनिवृत्तिमात्रपरत्वात् ।

पुत्रे पितृगमनानुकूलगमनवत् ब्रह्मण्यपि विद्वद्भोगानुकूलभोगः स्यात् । तथा च तस्य नित्यतृप्तत्वादिविरोध इत्यभिप्रेत्याह-नाद्य इति । द्वितीये किमीश्वरस्य मुक्तभोग एवानुज्ञादातृत्वमुत सर्वप्राणिभोगे ? नाद्यः । सर्वकर्मफलदातुरीश्वरस्य संसारिभोगेऽप्यनुज्ञातृत्वादित्याह-ईश्वरस्येति । द्वितीये दोषमाह-मुक्ताविति । पक्षद्वयेऽपि ब्रह्मणः पुत्रवत्पत्नीवच्च गुणत्वमपि स्यात् । "सहयुक्ते ऽप्रधाने"इति स्मरणादित्याह-ब्रह्मण इति । ननु यथा स्वामिनो दासीबालकपोषकत्वेऽपि न तच्छेषत्वमेवमीश्वरस्य मुक्तभोगानुकूलस्यापि न तच्छेषत्वमित्याशङ्क्य वैषम्यमाह-न चेत्यादिना । गुणत्वादिप्रसङ्गेन ब्रह्मणः सहत्वायोगान्न सहयोगे

दिति । ननु सविशेषो व्याप्तिग्राहिणा प्रमाणेन प्रतिपन्नः किं वा नेति? । यदि प्रतिपन्नस्तदा किमनुमानेन । अथ गृहीतस्तदा न तस्य व्याप्तावन्तर्भाव इति तदेव व्याप्तिग्राहिणा प्रमाणेनान्यथानुपपत्तौ गृहीतायां न किञ्चित्त्रैरूप्येण । अथ यदि व्याप्तिग्राहिणा प्रमाणेन साकल्येन व्याप्तिग्रहणं तदा किं हेतूपन्यासेन । साध्यस्य सिद्धत्वादिति । असत्यं प्रतिपाद्यार्थं हि तदुपन्यासः । तथाहि—द्विविधः प्रतिपाद्यो ऽगृहीतव्याप्तिको गृहीतव्याप्तिकश्च । तत्र । अगृहीतव्याप्तिग्राहकप्रमाणोपदर्शनमेव नोपपद्यते प्रथमं हेतूपन्यासमन्तरेण । तच्च सपक्षाद्यनपेक्षं प्रवर्त्तमानं त्रैरूप्यं व्यपोहति । गृहीतव्याप्तिकस्य तु हेतूपदर्शनमात्रमेव क्रियते । एतत्त्रैरूप्यमुक्तम् । विदुषा वाच्यो हेतुरेव हि केवल इति । तदेवं सति नियमेन किञ्चित्त्रैरूप्येण कार्यकारणभावाद्वा स्वभावाद्वा नियामकादविनाभावनियमोऽदर्शनान्न । न दर्शनादिति चेत् । न, दर्शनादर्शनाभ्यां नियमं मन्यन्ते किं तु तर्कोद्भ्यूह्यपरनाम्नः । तथाहि—। प्रमाणातादात्म्यतदुत्पत्ती यथा निश्चीयेते तथा नियमोऽपि निश्चीयतां किं व्यवधिना । एतदेवाह—। कार्यकारणसद्भाव इत्यादि ।

कार्यकारणसद्भावस्तादात्म्यं चेत्प्रतीयते ।
प्रत्यक्षपूर्वकात्तद्वत् कथं नानुपपन्नता ।

ननु तर्कात्कार्यकारणत्वादि परस्य निश्चीयते, किं तु बाधकप्रमाणात्तत्कथमेतदिति । अत्रेदमुच्यते । किमिदं बाधकं प्रमाणम् । किं प्रत्यक्षमुतानुमानमिति । तत्र यद्यनुमानं तदानवस्था । नापि प्रत्यक्षम् । तद्धि निर्विकल्पकत्वात्पुरोऽव्यवस्थितयोरपि वह्निधूमयोः कार्यकारणभावं प्रत्येतुं शक्नोति किमंग पुनः साकल्येनेति । तस्माद्यदि धूमस्यान्य-

हिकमपि कारणं स्यात्तदायमपि धूमो न वह्नेरुत्पाद्यमान उपलभ्येत । ततोऽभ्यूह्यत सकलमेवैतद्रूपं सर्वत्रैवंविधरूपमन्तरेण नोपपद्यतइति । तच्च तर्काख्यं प्रमाणं केचित्प्रत्यक्षं मन्यन्ते । अपरेऽनुमानमन्ये प्रमाणान्तरमिति । तदेवमन्यथाऽनुपपन्नत्वमेव निबन्धनं न त्रैरूप्यमिति । अथान्यथानुपपत्तिर्व्यतिरेकः स नान्वयमन्तरेण घटते । तथाभूतश्च हेतुः क्वचिद्धर्मिण्युपसंहर्तव्यः । अन्यथा सर्वत्र प्रतीतिं जनयेन्न वा क्वचिदपीति, तत्कथं न त्रैरूप्यमित्येतदाशङ्क्याह—।

व्यतिरेकानुपपत्तिश्चेत्स्यादन्वयनिबन्धना ।
कथं सत्त्वं विना तेन क्षणिकत्वप्रसाधकम् ॥

व्यतिरेकोऽनुपपत्तिश्चेदित्यादि । नैतदस्ति । न हि सर्वत्रान्वयाविनाभूतो व्यतिरेकः परैरप्यभ्युपगम्यते । तदुक्तम् । यो हि सकलपदार्थव्यापिनीं क्षणिकतामिच्छति तं प्रति दृष्टान्तस्यैवाभावादिति । एतदेवाह—कथमित्यादि । इदानीं स्वसिद्धान्तमाह—। विनाप्यन्वयमात्मादावित्यादि ।

विनाप्यन्वयमात्मा दौप्राणादिसाधनं यदा ।
तदा स्यान्नान्वयापेक्षा हेतोः साध्यस्य साधने ॥

नेदं निरात्मकं जीवच्छरीरम् । अप्राणादिमत्वप्रसङ्गादिति । अस्मिन् प्रयोगे केवलोऽपि व्यतिरेको गमकत्वे निबन्धनइति वर्णयन्ति । अथात्मानमन्तरेण प्राणादिसत्वस्यानुपपत्तिः कथं निश्चिता । स्तंभादिषु नैरात्म्यस्याप्राणादिमत्वेन व्याप्तेरिति चेत् । ननु स्तंभादिषु नैरात्म्यं कथं निश्चितम्? । न तावत् प्रत्यक्षेण । परोक्षत्वादात्मानः । तदभावद्वा । अनुमानेन पराभ्युपगमेन तु तन्निश्चये काल्पनिकत्वं

हेतोः स्यादिति । अत्रोच्यते । नित्यं सत्वादिप्रसङ्गान्न प्राणादयोऽहेतवः । हेतुश्चैषां यद्यचेतनस्तदा स्तंभादिष्वपि प्रसज्येरन् । सचेतनोऽपि किं नित्यः, किंवा क्षणिक इति? । न तावन्नित्यः । अप्रच्युतानुत्पन्नस्थिरैकरूपस्य नकदाचित् क्रियाविरामः स्यात् । यद्वा कदाचिन्न भवेदित्युक्तम् । क्षणिकमपि किं विद्यमानं करोति किंवाऽविद्यमानम् । प्रथमपक्षे सर्वकार्यक्षणानामेककालताप्रसङ्गः । द्वितीये तु पूर्वमेव कार्यमुत्पाद्य कारणभावविशेषात्ततः । अथ प्राक्कालभावित्वं उत्तरक्षणभावित्वं किं न भवति । को हि पूर्वोत्तरक्षणयोर्विशेषः । संनिधानस्याविशिष्टत्वात् । अपरस्परकर्तृत्वस्यानभ्युपगमात् ।अथ पूर्वमेव कार्यस्य सद्भावे किं कारणेन । उत्तरमपि कार्यस्य सद्भावे किं कारणेन । तस्मिन् सति उत्तरस्य भावादिति चेत् । पूर्वस्यापि समानम् । अथैवमस्तु तथापि क्षणिकस्य कर्तृत्वं सिद्धमिति चेत् । न सिद्धम् । सत्तामात्रेणैकर्तृत्वे सर्वकार्यकर्तृत्वे स्यात् । स्वसंतानमेकं न करोति । नान्यसन्तानमिति चेत् । न, इतरेतराश्रयत्वप्रसङ्गात् । तथाहि--। कार्यत्वादेकसन्तानत्वमेकसन्तानत्वात्तत्कर्तृत्वमिति । तन्न क्षणिकस्यापि कर्तृत्वम् । तस्मात्कश्चिदजहात्पूर्वरूपस्य द्रव्यस्यैवोत्तरोत्तरेषु परिणतः कर्तृत्वं नान्यस्येति । तेन सिद्धं न प्राणादिरात्मानमन्तरेणोपपद्यत इति । वि। पक्षव्यावृत्तिरेवान्वयमन्तरेणापि गमिकेति । ननु सम्बन्धमन्तरेण कथमन्यथानुपपन्नत्वमित्याशङ्क्याह--। सम्बन्धिभ्यामित्यादि ।

संबन्धिभ्यां विभिन्नश्चेत्सम्बन्धः स्यान्न लोष्ठवत् ।
अनवस्था प्रसज्येत तदन्यपरिकल्पने ॥

तथाहि—संबन्धिभ्यां संबन्धः भिन्नो, वाऽभिन्नो वा। यद्यभिन्नः। स्तदासम्बन्धो वा स्यात्सम्बन्धी वा। अथ भिन्नस्तदा लोष्टकल्पो न तयोरसाविति। अथ संबन्धान्तरेण तयोरसाविति तस्याप्यभेदपूर्वः प्रसङ्गः, भेदेऽनवस्था स्यादिति। किञ्च संबन्धेन किं सम्बन्धः क्रियते संबद्धयोः, किंवाऽसंबद्धयोः ?। यद्यसंबधयोस्तत्रासाध्यसिद्धयोः क्रियेत। अथ सम्बन्धयोस्तदा किं संबंधेन। ततएव संबन्धत्वादिति। तस्मादनुपपत्तिरेव गमकत्वे निबन्धनसम्बन्धान्तरमिति। तदेवमन्वयं निरस्य पक्षधर्मत्वं निरस्यन्नाह—। कृत्तिकोदयपूरादे रित्यादि।

कृत्तिकोदयपूरादेः कलादिपरिकल्पनात्।
यदि स्यात् पक्षधर्मत्वं चाक्षुषत्वं नाकिंचनौ॥

कृतिकोदयश्च नदीपूरश्च। आदिग्रहणाच्चन्द्रोदयादिः। समुद्रवृद्ध्यनुमाने। तथाहि—। कृत्तिकोदयाद्रोहिण्युदयानुमाने कालो धर्मीपरिकल्प्यते। उपरिवृष्टानुमानेन दीप्तराट्टेशविशेषइति। तथा समुद्रवृद्धावपि पिपीलिकोत्सरणमत्स्यविकारादे. र्वृष्ट्यनुमानेभूतइति। एवं यदि यत्किञ्चित्कल्पयित्वा पक्षधर्मत्वं व्यवस्थाप्यते तदाध्वनौऽनित्यत्वे साध्ये चाक्षूषत्वं पक्षधर्मः स्यात्। तत्रापि जगतो धर्मित्वेन कल्पनादिति। तथाहि—। जगद्धर्मी अनित्यशब्दवान्न भवतीति साध्यो धर्मश्चाक्षूषघटवत्वादिति। तन्न पक्षधर्मत्वमपि गमकत्वे निबन्धनमिति। विशेषेऽनुगमाभावात्सामान्यसिद्धसाध्यतेति। अनुमानदूषणं परिहर्तुमाह—। समानपरिणामस्येत्यादि।

समानपरिणामस्य द्वयस्य नियमग्रहे।
न शक्तिर्न च वैफल्यं साधनस्य प्रसज्यते॥

तुल्यपरिणामयोर्लिङ्गसाध्ययोः । नियमग्रहोऽन्यथानुपपन्नत्वग्रहे सति ।नाशक्तिः । अननुगमात् । नापि सामान्यमात्रसाधनात्सिद्धसाध्यता दोषः । किंतु विशेषा एव समानपरिणामिनः साध्यन्त इति । एवं हेतुलक्षणमभिधायेदानीं पक्षलक्षणमाह—। इष्टं साधयितुं शक्यमित्यादि ।

इष्टं साधयितुं शक्यवादिना साध्यमन्यथा ।
साध्याभासमसाध्यत्वात्साधनागोचरत्वतः ॥

सिद्धं प्रत्यक्षादिबाधितं वादिना साधयितुं न शक्यते तथेष्टमपि साधनविषयीकृतं साध्यं नोक्तमेव । अन्यथेति । उक्तविपरीतं साध्याभासम् । असत्यत्वादिति । सिद्धस्यासाधयितुमशक्यत्वात् । तथाहि—पूर्वं प्रमाणेन सिद्धमपि साधनमपेक्षते तथा तेनैव सिद्धसाधितस्य किमन्यदपेक्षेत । तथा ततोऽप्यन्यदिति न स्यात् साधननिष्ठेति । एवं सिद्धस्य साधयितुमशक्यत्वमिति । बाधितस्य च साधनागोचरत्वादित्याह—। साधनागोचरत्वतइति । प्रत्यक्षादिबाधितं प्रतिपाद्यमानो न साधनमपेक्षत इति । यद्वा सिद्धबाधितं च साधयितुं न शक्यते। ततो हेतोः साधनगोचरचारि न भवतीति । एवं पक्षलक्षणमभिधायेदानीं बाधितोदाहरणान्याह । यथा सर्वगमित्यादि ।

यथा सर्वगमध्यक्षं बहिरन्तरनात्मकम् ।
नित्यमेकान्ततः सत्त्वाद्धर्मः प्रेत्यदुःखप्रदः ॥

सर्वगतं सामान्यं प्रत्यक्षं प्रति ज्ञायमानं प्रत्यक्षबाधितम् । एकान्तेन नित्यं शब्दादि प्रतिज्ञायमानंबाधितम् । प्रेत्य परलोके धर्मः सुखप्रदो न भवतीति । प्रतिज्ञां कुर्वतः आगमबाधासमानतन्त्रैः प्रत्यक्षपूर्वकं श्रौतमभ्युपगतं तदपेक्षयोदाहरणम् । बहिरन्तरनात्मकं सर्वमिति । आत्मा परिणामि द्रव्यं तदभा-

वस्य प्रतिज्ञायमानस्य प्रत्यभिज्ञाप्रत्यक्षेणानुमानेन वाऽन्यथा बाधनान्न पृथगुदाहरणं युक्तं स्यादिति । एवं हेतुलक्षणमभिधायेदानीं हेत्वाभासानभिधातुमाह—। रूपादिसिद्धितइत्यादि ।

रूपादिसिद्धितः सिद्धो विरुद्धोऽनुपपत्तिमान् ।
साध्याभावं विनाहेतुर्व्याभिचारिविपक्षगः ॥

स्वरूपासिद्धिः । अनित्यशब्दश्चाक्षुषत्वात् । सदिग्धसिद्धः वह्निसिद्धावुपादीयमानो धूमरूपतया संदिह्यमानो वादिसंघातः । भागासिद्धौ यथा—सर्वमनित्यम् । प्रयत्नानान्तरीयकत्वात् । वाद्यसिद्धः सांख्यस्य सुखादीनामाचैतन्यं साधयतः । यथा अचेतनाः सुखादयः । अनित्यत्वादिति । प्रतिवाद्यसिद्धौ वैशेषिकस्य जैनं प्रति द्रव्यादीनां सत्वं साधयतः । यथा सन्ति द्रव्यादीनि सत्ताभिसम्बन्धत्वादिति । आश्रयासिद्धो यथेश्वरः सर्वज्ञः सर्वं । कर्तृत्वादिति । संदिग्धाश्रयः, यथेहनिकुञ्जे मयूराः । केकायितादित्यादयः आदिग्रहणेन गृह्यन्ते । विरुद्धमभिधातुमाह—। विरुद्धइत्यादि । साध्याभावाव्यभिचारी विरुद्धः । यथा—अनित्यः शब्दः कृतकत्वादिति । इदानीमनैकान्तिकमाह—। व्यभिचारीति । रसपक्षविपक्षगामी अनैकान्तिक इति । अथवा एकान्तवादिनां सर्व एव हेतुस्त्रयीं दोषजातां नातिक्रामतीत्याह—। असिद्धः सिद्धसनस्येत्यादि । सिद्धसेनस्य सूत्रकर्तुः साकल्येनासिद्धत्वात् सकल एव हेतुरसिद्धइति । तथाहि—। सामान्यं वा हेतुः स्याद्विशेषो वा ? । अर्थोहस्य च पूर्वमेव निरासात् । तत्र सामान्यं सकलव्यापि सकलस्वाश्रयव्यापि वा हेतुत्वेनोपादीयमानं प्रत्यक्षसिद्धं वा स्यादनुमानसिद्धं वा भवेत् । न तावत्प्रत्यक्षसिद्धम् । तद्धिअक्षानुसारितया प्रवर्तते । अक्षं च विनितदेशानैव सन्निरूप्यतेअतस्तदनुसारि ज्ञानं तत्रैव

प्रवर्तितुमुत्सहते न सकलदेशकालव्यापिनि । अथ नियतदेशस्वरूपाव्यतिरेकात्तन्निश्चये तस्यापि निश्चयइति । तन्नियतदेशस्वरूपाव्यतिरेके नियतदेशतैव स्यान्न व्यापिता । तन्न व्याप्तिसामान्यरूपो हेतुः प्रत्यक्षसिद्धः । अनुमानसिद्धतायामनवस्थां प्रतिपादयति । तदुक्तम् ।

सामान्यं नानुमानेन विना यस्य प्रतीयते ।
न च लिङ्गविनिर्मुक्तमनुमानं प्रवर्तते ॥
असमान्यस्य लिङ्गत्वं न च केनचिदिष्यते ।
न चानवगतं लिङ्गं किञ्चिदस्ति प्रकाशकम् ॥

तस्याप्यनुमानेन स्यादन्येन गतिःपुनरनुमानान्तरादेव ज्ञाते नैवं कल्प्यते ।

लिङ्गलिङ्गानुमानानामानन्त्यादेकलिङ्गिनि ।
गतिर्युगसहस्रेषु बहुष्वपि न विद्यते ।

अपि चाशेषव्यक्त्याधेयस्वरूपं । प्रत्यक्षानुमानाभ्यां सामान्यं निश्चयमानं स्वाधारनिश्चयमुत्पादयेत् तन्निश्चयेऽपि स्वाधारनिश्चयमिति सकलः सकलज्ञः प्रसज्येत । तन्नैकान्तसामान्यरूपो हेतुः । साकल्येन सिद्धः । नापि विशेषरूपश्चैकान्तेन विशेषः परमाणुरूपः स्यात् । तस्य च न प्रत्यक्षानुमानाभ्यां सिद्धिरित्युक्तम् । न चानन्वितस्य हेतुत्वं सिद्धम् । विरुद्धानेकान्तिकावपि साध्यान्यथानुपपन्नत्वेन न सिद्धौ । यदि वाऽसिद्धत्वादेव तौ निरस्तौ । तथाहि—पक्षधर्मत्वे सति तौ स्याताम् । तदभावे तावप्यसिद्धाविति । सकलएवैकान्तवादिनो हेतुर्न सिद्ध इति । मल्लवादिनस्तु नयचक्रविधातुर्मते न सकलएवैकान्तसाधनो हेतुर्विरुद्धइति । अनेकान्तात्मकं वस्तु विपर्ययसाधनादिति । अनेकान्तिकासिद्धावपि साध्यनिश्चयविपर्ययसाध-

नाद्विरुद्धाविति । तथाहि–निश्चयेन सहाप्रतिपत्तिसंदेहावपि विरुद्धावेव तदविनाभूतौ वासिद्धानैकान्तिकाविति । सकल एव हेतुर्विरुद्ध इति द्वेधासमंतभद्रस्येति । स हि प्रतिबंधविकलानां सर्वेषामेव हेतूनां व्यभिचारित्वं मन्यते । न चैकान्तसामान्ययोर्विशेषयोर्वा प्रतिबन्धउपपद्यते । तथाहि–सामान्ययोरैकान्त-मनित्ययोः परस्परमनुपकार्योपकारभतयोः कः प्रतिबन्धः । विशेषयोस्तु नियतदेशकालयोः प्रतिबन्धग्रहेऽपि तत्रैव तयोरर्थः स्यात् । साध्यधर्मिण्यगृहीतप्रतिबन्ध एवान्यो विशेषहेतुत्वेनापादीयमानः कथं नानैकान्तिकइति । तस्मात् समानपरिणामस्यैव सामान्यविशेषात्मनो हेतोरनेकान्तात्मनि साध्ये गमकत्वं नैकान्तसाधन इति स्थितम् । सर्वज्ञसाधनविधौ परलोकसिद्धावात्मादि यच्च निरूपद्रवसौख्यहेतुः तत्रोपयुक्तमुभयात्मकवस्तुनिष्ठं व्युत्पादिते विशदमेतदिहानुमानम् । इति श्रीशान्त्याचार्यविरचितायां वार्तिकवृत्तावनुमानपरिछेदः ।

एवं प्रत्यक्षानुमाने व्याख्यायेदानीं शब्दप्रमाणव्याख्यानमाह-। ननु शब्दस्य सङ्केतवृत्तेरवस्तुविषयत्वात् कुतः प्रामाण्यंमिति? । तथाहि–ये यत्राकृतसङ्केताः शब्दास्ते तमर्थं नाभिदधति । यथा–गोशब्दादयोऽश्वादिकम् । अकृतसंकेताश्च सर्वएव शब्दाः-परमार्थवस्तुनीति व्यपकानुपलब्धिः ॥ अशक्यक्रियत्ववैफलाभ्यां न तावदयमसिद्धो हेतुः । तथाहि–। समुत्पन्ने वा वस्तुनि सङ्केताः क्रियन्तामनुत्पन्ने वा? । न तावच्चानुत्पन्ने । न ह्यनुत्पन्नं वस्तु शब्दस्यान्यस्य वा विषयतामुपयाति । शब्दो वाऽनुत्पन्नविषये नियोज्यमानो न कल्पितगोचरतामतिक्रमेत । शशविषाणादिशब्द इव । तन्नानुत्पन्नं सङ्केतभूमिः । उत्पन्नमपि किं गृहीतमगृहीतं वा? । न तावदगृहितं वस्तु संकेतगोचरीति । प्रसङ्गाद्द गृहीतमपि

क्षणिकत्वेन नष्टत्वान्न शब्दविषयः। तथाहि—वस्तुनो ग्रहणं, ततो निश्चयस्तदनन्तरं शब्दस्मरणं, ततो नियोग इति। एवं त्रिचतुरक्षणेषु सुदूरमुत्पन्नत्वान्न शब्दगोचरता। अथ तत्सजातीयक्षणस्य विद्यमानत्वात् कथं न शब्दविषयता तदसत्। न ह्यगृहीतं विद्यमानमपि शब्दविषयतामुपयाति। यथा स्वाद्यगृहीतं विद्यमानमपि, गोशब्दस्य पूर्वापरैकीकरणप्रक्रमेण नियोज्यमानः शब्दः कल्पितविषय एव नियोजितः स्यात्। तन्न वस्तु शब्दनियोगगोचरः। किं च वस्तुनि सम्बन्धकरणं प्रत्यक्षेण वा स्यादनुमानेन वा?। न तावत् प्रत्यक्षेण। तेन पुरोऽवस्थितरूपमात्रस्य प्रकाशनाच्छब्दस्य। न च तयोर्वाच्यवाचकसम्बन्धोपकर्तुं शक्यते। अथेन्द्रियज्ञानारूढ एव रूपव्युत्पत्तिभिर्दृश्यते। इदमेतच्छब्दवाच्यमस्येदमभिधानमिति। असदेतत्। तथाहि-अस्येदं वाचकमिति कोऽर्थः?। किं प्रतिपादकं, यदि वा कार्यं, कारणं, चेति?। तत्र यदि प्रतिपादकं तत्किमधुनैवाऽथान्यदा?। तत्र यद्यधुना शब्दरूपमर्थस्य प्रतिपादकं विशदेन रूपेणेति। तदयुक्तम्। अक्षव्यापारेणैव तथानीलादेरवभासनान्न तत्र शब्दव्यापारस्योपयोगः। अथान्यदा लोचनपरिस्पन्दाभावेन शब्दार्थोनुद्भासयेत्तदापि किं विशदेनाकारेण, आकारान्तरेण वा?। यदि विशदेन तदा चक्षुरादीनां वैफल्यमासज्येत। प्रवृत्तिश्च न स्यात् सर्वथा वस्तुनः। प्रतिपन्नप्रतिपन्नत्वात्। न हि प्रतिपन्न एव तावन्मात्रप्रयोजना प्रवृत्तिर्युक्ता। वृत्तेरविरामप्रसङ्गात्। अथ किंच प्रतिपन्नं रूपमस्ति तदर्थं प्रवर्तनम्। ननु यदप्रतिपन्नं व्यक्तिरूपं प्रवृत्तिविषयस्तर्हि न शब्दार्थस्तदेव च परमार्थिकम्। ततोऽर्थक्रियादर्शनात्। नान्यत्। तस्यार्थक्रियाविरहात्। अथकालान्तरे स्फुटतरेण ता न सोच्चभापर्योवनस्वसावाकारस्तदा सम्बन्धव्युत्पत्तिकाले

कालान्तरे वानेन्द्रियगोचरस्तत्कथं तत्र शब्दाः प्रवर्तमाना नयनादिगोचरेऽर्थे वृत्ता भवन्ति। नापि शब्दर्थानां कारणम्। स्वहेतोरेव तेषामुत्पत्तेः । नाप्यर्थकार्यम् । विप्रकानेऽप्यर्थे दर्शनप्रतिपादनाभिप्रायविवक्षादिभिर्व्यवधानात् । तन्नाक्षतः सम्बन्धवेदम् । नाप्यनुमानतः। तदभावे तदन्वनारात्। अथार्थापत्त्या संवेदनम्। तथाहि—। व्यवहारकाले शब्दार्थौ प्रत्यक्षः प्रतिभावतः। श्रोतुश्च शब्दार्थप्रतिपत्तिं चेष्टया प्रतिपद्यते । व्यवहारिणस्तदन्यथानुपपत्त्या तयोः सम्बन्धं विदन्ति। तदप्यसत् । नित्यत्वेनैवं कालत्रनिकः सम्बन्धो न वास्तवः। तथाहि—।श्रोतुः प्रतिपत्तिः सङ्केतानुसारिणी दृश्यते। कलिमार्यादादिशब्देभ्यो द्रविडार्ययोर्विपरीतप्रतिपत्तिदर्शनात्। तन्न वस्तुशक्यसंकेतक्रियम्। सङ्केतव्यवहारकलाव्यापिनि वस्तुनि निष्फलः स्वसङ्केतः। तथाहि—कथं नामास्माच्छब्दादमुमर्थं प्रतिपद्यन्ताम्। व्यवहारकाले प्रतिपत्तारइति ससंकेतं कुर्वते, प्रेक्षाकारिणः स चान्यत्वेन संभावयन्ति। अथ कालान्तरस्थायिनो नित्यस्य तत्रापि विशेषस्य सामान्यस्य वा आकृतेर्वावयवसंयोगलक्षणायाः सद्भावात् कथं न सकेतकरणसाफल्यम्। तदसत् । नित्यस्य क्रमयौगपद्यायोगेनार्थक्रियाविरहितोऽसात्वात् । यदि च वस्तुनि शब्दवृत्तिः स्यात्तदा न कश्चिद्दरिद्रः स्यात् । शब्दस्यैव सर्वार्थप्रतिपादकत्वात् । जातेरभिधानान्नैवमिति चेत् । जातेरभावात्। अथावभासमानापि कथं नास्तीति चेत्। न, जातिभासभावा। तथाहि—। दर्शने परिस्फुटतयाऽसाधारणमेव रूपं चकास्ति न साधारणम् । अथ साधारणमपि रूपमनुभूयते गौर्गौरिति । तदसत् । शाबलेयादिरूपविवेकनाप्रतिभासनान्नत्। न, शाबलेयादिरूपमिव साधारणम् प्रतिव्यक्तिभिन्नरूपोपलम्भात् । नापि कल्पनाज्ञाने, कल्पनापि

पुरः परिस्फुटमुद्भासमानव्यक्तिस्वरूपं व्यवसन्ती हृदियाभि जल्पाकारं प्रतीयते न तद्व्यतिरिक्तो वर्णाक्षराद्याकारशून्यः प्रतिभासो लक्ष्यते। वर्णादिस्वरूपरहितं च जातेरूपमुपगम्यते। तन्न कल्पनावसेयापि सा। यच्च नक्वचिद्विज्ञाने भाति। तदसत्। शशविषाणमिव। भवतु वा जातिः शब्दार्थस्तथापि न शब्दात्प्रवृत्तिः स्यात्। ज्ञानमात्रलक्षणत्वाज्जात्यर्थक्रियायाः। तस्यास्तु तदैव निष्पन्नत्वात्। अथ जाता व्यक्तिर्लक्ष्यते तेन लक्षितलक्षणावृत्तिः। दसककवत् प्रतीतेरभावात्पूर्वं जातिः पश्चाद्व्यक्तिरिति। किञ्च यदि नाम शब्दाऽऽतिराभाति व्यक्तेः किमायातम् येन तां लक्षति। सम्बन्धत्वाच्चेत्। संबन्धस्तयोः किं तदैव प्रतीयते, आहोस्वित्। पूर्वम्। ? न तावत्तदा। व्यक्तेरनधिगते अधिगमे वा किं लक्षितलक्षणया। सैव शब्दार्थः स्यात्। सत्तदनधिनम्। गमेनतद्गतसंबन्धानधिगतिर्न तदा तत्प्रतीतिः। नापि पूर्वम्। यदि नामैकदाऽकार्यकारणभूतयोः ताभ्यां तथा भाव्यमिति कोऽयं नियमः ?। अथ जातेरिदमेव सद्भावस्तथापि सर्वदारूपं यदुत विशेषनिष्ठता। ननु सर्वदा सर्वजातिव्यक्तिनिष्ठेतिकिमध्यक्षेणाधिगम्यतेऽनुमानेन वा ?। न तावत्प्रत्यक्षेण। सर्वव्यक्तीनां युगपदप्रतिभासमानात्। नैकदा तन्निष्ठता तेन गृह्यते क्रमेणापि व्यक्तिप्रतीतौ निरवधिर्व्यक्तिपरम्पराया सकलायाः परिछेत्तुमशक्यत्वादिति न तन्निष्ठाताग्रहः। नाप्यनुमानेन। तत्पूर्वकत्वेन तस्या तदभावेऽप्रवृत्तेः। तन्नजात्या व्यक्त्युपलक्षणम्। किंच जातेरपि शब्देन प्रतिपादनं न सम्भवति। तत्र सङ्केतासम्भवात्। तथाहि प्रतिपन्नायां तस्यां सङ्केतस्तत्प्रतिपत्तिश्च न प्रत्यक्षानुमानाभ्यामित्युक्तम्। शब्दै-

कप्रमाणधिऽतमेवानवस्थेतरेतराश्रयत्वं वा स्यादिति । किंच शब्दवाच्यं यद्यक्षणिकं तदा व्यवहारकालभाविक्रमवद्विज्ञानं नोत्पद्यते । नाक्रमात्क्रमिणोभावः । न च स्वविषयज्ञानोत्पाद-नादन्यद्वाच्यैत्वम् तन्न शब्दान् विज्ञानमवस्तुविषयत्वात्प्रमाण-मित्याशङ्क्याह–। तापछेदेकषैः शुद्धमिति ।

तापच्छेदकषैः शुद्धं वचनं त्वागमं विदुः ।
तापो ह्याप्तप्रमणीतत्वमाप्तोरागादिसंक्षयात् ॥

तापश्च छेदश्च कषश्च तैर्यद्वचनं शुद्धं तत्प्रमाणमिति । न शब्दस्य बाह्यार्थं विनाभावित्वेनार्थप्रतिपादकत्वात्प्रा-माण्यं किं तु पुरुषप्रामाण्यमेव संक्रातं प्रमाणशब्दत्वेनाभि-धीयतइत्युक्तम् । यथाशक्यक्रियात्ववैफल्यादिदूषणमभा -क्षणिकपक्षाश्रयणेन । तन्नोभयात्मकवस्तुवादिनां क्षतिमावहति। अस्पष्टविशेषविषयत्वं च परोक्षस्योक्तम् । तेन न केवल-प्रामाण्यपक्षभावे दोषः संभवी । अथ किमिदमस्पष्टत्वम् ? । किं ग्रहणमुताग्रहणम् । यदि ग्रहणं कथमस्पष्टत्वम् । अथाग्रहणं तदा कथं तत्प्रतीतिरिति । नानिदम् । तत्वप्रतीतेरस्पष्टत्वप्रति-पादनात् । अपि च घटशब्दादुत्पन्नं विज्ञानं पटं किं न प्रत्येति । यदि निर्विषयं शाब्द विज्ञानम् । अतः सङ्केतवशाद्वस्त्वन्तरमपि प्रत्येत्येव । ननु का प्रतीतिः किं ग्रहणमाहोस्विदग्रहणम् । यदि ग्रहणं तदा कथं निर्विषयम् ? । अथाग्रहणं तदा सद्विषयार्थः । अथ दृश्यविकल्पैकाकरणेन तद्व्यवसायः नाग्रहणाध्यवसाययोगात् । प्रत्यक्षस्यापि ग्रहणं न व्यवसायात् । न हि प्रत्यक्षं वस्तु अयः-सदंसकन्यायेन गृह्णाति, किंतर्हि तद्विषयव्यवसाय एव तद्ग्रहः । स च शाब्देऽपि समानः किं तु स्पष्टास्पष्टत्वकृतो विशेषइति । नन्वेवं सर्वनिगमानां प्रमाण्यमासद्येत । नैतदस्ति । एवं हि

सर्वप्रत्यक्षाणामपि प्रामाण्यं स्यात् । अथ तत्र कारणादिशुद्धिकृतो विशेषोऽत्रापि समान इति दर्शयितुं तानादीन् व्याख्यातुमाह । तपो हीत्यादि । इह पुरुषप्रामाण्याच्छब्दप्रामाण्यमुक्तम् । पुरुषस्तु त्रिभिर्गुणैः प्रामाणसर्वज्ञत्वेन वीतरागत्वेन अमूढत्वेन च । तानेव त्रिभिर्विशेषणैर्दर्शयति । नावीतरागोऽनाप्तत्वं जहाति । न मूढो पूर्वापराव्याहतं वक्ति । नासर्वज्ञः प्रमाणतत्त्वादि रचयति । अथ वीतरागस्य वचने किं प्रयोजनमस्ति, किं वा नास्ति? । यद्यस्ति कथं वीतरागः । अथ नास्ति तदा न प्रेक्षापूर्वकारी । किं चाराधयितुर्यदि फलं ददाति नेतरस्य तदा कथं वीतरागः । अथ न ददाति तदा किं तेनाराधितेनेति । नैतदस्ति । दिनकरदृष्टान्तेन चिन्तामण्यादिदृष्टान्तेन हि शास्त्रकारैः समाहितमिति नेह प्रतन्यते । तदेवं गुणत्रयवैकल्यान्नागमान्तराणां प्रामाण्यम् । तथाहि—लोभादिमूलोऽधर्मः, स्नानं चाधर्मशोधनमिति पूर्वापरव्याघातः । तथा च—

> गंगाद्वारे कुशावर्तै बिल्वके नीलपर्वते ।
> स्नात्वा कनखले तीर्थे संभवेन्न पुनर्भवे ॥
> इत्यभिधाय पुनरप्युक्तम् ।
> चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्ध्यति ।
> शतशोऽपि हि तद्धौतं सुराभाण्डमिवाशुचि ॥

तथा न हिंस्यात्सर्वभूतानीत्यभिधाय पुनर्हिंसाभिधानात् । तथागमान्तरप्रणेतॄणामवीतरागत्वमङ्गनासमालिङ्गनात्सुप्रसिद्धमेव । तथा प्रमाणसंपाद्युत्पादव्ययध्रौव्यात्मकवस्त्ववनभिधानादप्रामाण्यमित्याह मल्लवादी ।

विधिनियमभङ्गवृत्तिव्यतिरिक्तत्वादनर्थकवचोवत् जैनादन्यच्छाशनमनृतं भवतीति ।

वैधर्म्यमिति । वैधर्म्यप्रयोगः ॥ तथा ह्युत्पादव्ययध्रौव्याभिधायकत्वेन सत्त्वं व्याप्तं तद्व्यापकाभावाद्व्याप्याभावप्रतिपादनं वैधर्म्यप्रयोगः । विधिश्च नियमश्च भङ्गश्चते तथोक्तास्तेषु वृत्तिस्तदभिधानम् । तद्व्यतिरिक्तत्वात्तद्रहितत्वात् । जैनादन्यच्छाशनमिति । शास्यन्ते जीवादयोऽनेनेति शासनमाम्नायः । जिनप्रणीतस्तस्मादन्यद्वेदादि अनृतमसत्यार्थं भवति । अनर्थकवचोवत् । अनर्थकात्उन्मत्तकास्तद्वचनमिव । यद्वा अनर्थकं च तद्वचनं च । दशदाडिमादिवाक्यवत् ॥ विधिरुत्पादो भङ्गो व्ययो नियमो ध्रौव्यमिति । तदात्मकसकलमेव वस्तु तस्य साकल्येनाप्रतिपादनादागमान्तराणां न प्रामाण्यमिति । नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूता हि सप्तनया सूत्रद्रव्यास्तिकपर्यायास्तिकौ मूलनयौ शाखास्तद्भेदाः । तदुक्तम् ।

दव्वट्ठिनं यपज्जयणानं असेसावियप्पासिं ।

तत्र कापिलं शुद्धद्रव्यास्तिकम् बौद्धं शुद्धपर्यायास्तिकम् । शेषदर्शनानि शुद्धाशुद्धानीति । तत्र सांख्यो ध्रौव्यमेव प्रतिपन्नवान्न विधिविगमौ । तस्य हि न किञ्चिदुत्पद्यते । नापि विनश्यति । तदुक्तम् ।

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
व्यक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥

एवं पञ्चभिः हेतुभिः सत्कार्यवादः समर्थितः । तथाहि—यदसत्तन्न केनापि क्रियते । यथा काशकुसुमम् । असच्च परमतेन कारणकार्यमिति व्यापकविरुद्धोपलब्धिप्रसङ्गः ॥ न चैवं तस्मात् स्यात्सत्कारणे कार्यमिति । तथोपादानग्रहणादिति । उपादानकारणं तस्य नियतस्यैव ग्रहणम् । अन्यथा सर्वस्यैव विद्यमानत्वाविशेषाद् ग्रहणं स्यात्, न वा कस्यचित् । न चैवमतः सत्कार्यमिति ।

तथा सर्वसंभवाभावादिति । सर्वस्मात्सर्वं कार्यमुत्पद्येत । पूर्वं कारणाश्रयणेन प्रसङ्ग उक्तः । संप्रति तु कार्यमाश्रित्येति विशेषः । न च सर्वं सर्वतो भवति । तस्मादयं नियमस्तत्रैव । तस्य सद्भावादिति । तथा शक्तस्य शक्यकरणादिति । यद्यप्यसत्कार्यवादिभिर्नियतमेव कारणं नियतकार्यकरणशक्तिकमुपेयते तथापि शक्यमेव कार्यं करोति । यच्चनीरूपं तदनाधेयातिशयतथाभूतं च कथं केन चिच्छक्येत् कर्तुम् । तस्मात्सदेव शक्यते कर्तुं नासदिति । तथोक्तन्यायादसत्कार्ये न किंचित्कारणं स्यात् ॥ अस्ति च कारणं तदाह—कारणभावाच्च सत्कार्यमिति । तदसत् । एवं हि कार्यकारणे स्याताम् । न हि यद्यतोऽव्यतिरिक्तं तत्तस्य कारणं कार्यं वेति व्यपदेष्टुं युक्तम् । कार्यकारणयोर्भिन्नलक्षणत्वात् । अन्यथा हीदं कार्यं कारणमिति व्यवस्था न स्यात् । माभूदिति चेत् । न, अभ्युपगमविरोधात् । तथाहि—

> मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
> षोडशकस्तु विकारो न प्रकृतिः न विकृतिः पुरुषः ॥

इत्यभ्युपगमात् स बाध्येत । सर्वेषां हि कार्यत्वं कारणत्वं वा प्रसज्येत । यद्वा पुरुषवन्न प्रकृतित्वं च सर्वेषां स्यात् । पुरुषस्य वा प्रकृतिविकृतित्वं प्रसज्येत । तदसंबद्धमिदम् । उक्तंच । यदेव दधि तत्क्षीरं यत्क्षीरं तद्दधीति च वदता विंध्यवासित्वं ख्यापितं विंध्यवासिनेति । हेतुमत्त्वादिधर्मासङ्गिव्यक्तमव्यक्तमन्यदिति एतदपि बाध्येत । न हि यद्यतोऽव्यतिरिक्तस्वभावं तत्ततोऽपि विपरीतमुक्तम् । रूपान्तरलक्षणत्वाद्वैपरीत्यस्य, सत्त्वरजस्तमसां चैतन्यस्य च भेदेऽन्यनिमित्ताभावात् । ततश्च न भेदः । सर्वं विश्वमेकं द्रव्यं स्यात् सहोत्पत्तिप्रभङ्गश्च भवेदिति । अथ नापूर्वरूपोत्पत्त्या कार्यकारणत्वमभ्युपगम्यते यतो रूपाभेदे तद्विरुद्ध्येत

किं तु प्रधानं महदाद्यरूपेण परिणमति । सर्प इव कुंडलादि-रूपेणेति । ततः प्रकृते रूपाभेदेऽपि कार्यकारणव्यपदेशो न विरोधमनुभवतीति । तदसत् । परिणामासिद्धेस्तथाहि—किमसपूर्वरूपापरित्यागेन वा पूर्वरूपपरित्यागेन ? । प्रथमपक्षेऽवस्थानां साकर्यं स्यात् । ततश्च वृद्धावस्थायामपि बालाद्यवस्थोपलभ्येत । द्वितीयपक्षे न परिणामः स्यात् । पूर्वं हि स्वरूपं निरुद्धमपरं चोत्पन्नमिति कस्य परिणामः । अपि च तस्यैवान्यथाभावपरिणामे, भवद्भिर्वर्ण्यते सचैकदेशेन सर्वात्मना वा ? । न तावदेकदेशेन । एकस्यैकदेशासंभवात् नापि सर्वात्मना । पूर्वपदार्थनिराशेन पदार्थान्तरोत्पादप्रसङ्गात् । अतो न तस्यैवान्यथात्वं युक्तम् । तस्य स्वभावान्तरोत्पादनिबन्धनात् । व्यवस्थितस्य धर्मिणो धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भावलक्षणः परिणामोऽभ्युपगम्यते । ननु स्वभावान्यथात्वमिति चेत् । असदेतत् । यतः प्रच्यवमानउत्पाद्यमानश्च धर्मौ धर्मिणोऽर्थान्तरभूतोऽभ्युपगन्तव्यः । अन्यथा धर्मिण्यवस्थिते तस्य तिरोभावाविर्भावानासंभवात् तथाहि—। यस्मिन्ननुवर्त्तमाने यो व्यावर्त्तते स ततो भिन्नः । यथा घटेऽनुवर्त्तमाने ततो व्यावर्तमानः पटः व्यावर्तते च धर्मिण्यनुमानेऽति आविर्भावतिरोभावासङ्गीधर्मकलाप इति कथमसौ ततो नाभिन्नइति । धर्मी द्तवस्थएवेति कथं परिणतो नाम । यथा नार्थान्तरभूतयोर्घटयोरुत्पादविनाशेऽचलितरूपस्य घटादेः परिणामोभवति । अतिप्रसङ्गात् अन्यथा चैतन्यमपि परिणामि स्यात् । तत्संबंधयोर्धर्मयोरुत्पादविनाशात् । तस्यासौऽभ्युपगम्यते नाद्यस्येति न । सदसतोस्संबन्ध्यभावेन तत्सबन्धित्वायोगात् । तथाहि—। संबंधो भवन् सतो भवेदसतो वेति? । न तावत्सबन्धः समधिगताशेषस्वभावस्यान्यानपे-

क्षतया क्वचिदपि पारतन्त्र्यासंभवात्। नाप्यसतः। सर्वोपाख्याविरहतया तस्या क्वचिदप्याश्रितत्वानुपपत्तेः। न हि शशविषाणादिः क्वचिदप्याश्रित उपलब्धः। न च व्यतिरिक्तधर्मान्तरोत्पादविनाशे सति परिणामो भवद्भिर्व्यवस्थाप्यते किं तर्हि यत्रात्मभूतस्वभावानुवृत्तिरवस्थाभेदश्च तत्रैव तद्व्यवस्थाभेदश्च। न चात्यन्तभेदे धार्मिणामात्मभूतो धर्मो अनुवर्तत इति। तन्न भेदे परिणामः कश्चित्। एकान्तभेदे धर्मा वा स्युर्धर्मी वा ?। न तत्रापि कश्चित्परिणाम इति। ननूक्तं न सलिलात्कल्लोलानां भेदो नाप्यहेरुत्फणाद्यवस्थानम्। अथ च भिन्ना इव प्रतीयन्ते, तद्वद्धर्माणामाविर्भावतिरोभावमात्रं परिणामो नापूर्वविधिरिति। अथ कोऽयमाविर्भावः ?। स्वभावातिशयोत्पत्तिरुत तद्विषयं विज्ञानमाहोस्विदुपलम्भावरणविगमइति?। तत्र न तावदाद्यपक्षः। यतः स्वभावातिशयो यद्यसदुत्पद्यते, तदा कथं सत्कार्यवादः। अथ सन् तदा नाविर्भावः। अथ तस्याप्यवस्था पूर्वमसती पश्चाद्भवति। ननु साप्यवस्था यदि सती तदा कथं भवति। अथ न सती तदा स कथं नापूर्वविधिरिति। तत्राप्यवस्थान्तराभ्युगमेऽनवस्थानं न स्वभावातिशयोत्पत्तिराविर्भावइति। नापि तद्विषयं विज्ञानम्। नित्यत्वोपगमात्। तथाहि—भवतां सिद्धान्तः संविदासङ्प्रलयादेकैव बुद्धिरिति। न च न बुद्धिस्वभावो तद्विषया संवित्तिः किंतु मनःस्वभावेति वक्तव्यम्। बुद्धिरुपलब्धिरध्यवसायो मनः संवित्तिर्ज्ञानमित्यनर्थान्तरत्वात्। तन्न तद्विषयविज्ञानमप्याविर्भावः। नाप्युपलम्भावरणविगमलक्षणः। न ह्यनाधेयानयने स्वरूपस्य नित्यस्यावरणं किञ्चित्। असद्वा यद्यत् कथं तस्य विगमः। स्वत एव तस्य विगमरूपत्वात्। विगमरूपस्या-

वारकत्वेन कदाचिदुपलम्भः स्यात् । अथ सत्तदा कथं तस्य विगमः । न हि भवत्संमतेन विनश्यति । तिरोभावो विनाश इति चेत् । कोऽयं तिरोभावः? । किं स्वरूपविनाशः, पर्यायविनाशो, वा किं वावरणयोगो, विज्ञानानुत्पादकत्वं, चेति? । तत्र न तावत्स्वरूपपर्यायविनाशः । अनभ्युपगमात् । नाप्यावरणयोगः । अविचलितरूपस्यावरणयोगात्, अकिंचित्कुर्वाणस्यावरणत्वासंभवात् । अन्यथा जगतोऽपि स्यात् । करणे वा नित्यताहानेः विज्ञानानुत्पादकत्वमस्य युक्तम् । येन हि स्वरूपेण ज्ञानमकार्षीत्तस्य विद्यमानत्वात्सहकारिणोः प्रमाणसंवादि । तद्धि प्रत्यक्षं वा स्यादनुमानं वा? । न तावत् प्रत्यक्षम् । परोक्षत्वेनाभ्युपगमात् । यस्याप्यभ्युपगमः सोऽपि न युक्तवादी । यतस्तत्प्रत्येक्षेनेन्द्रियजन्यमभ्युपगम्यते किं त्वात्मनः संनिकर्षजम् । न-चकूटस्थस्य प्रागिव मनसा संयोगः संभवति । तस्य हि यदसंयुक्तंरूपं तत्संयोगकाले किमस्ति, किं वा नास्ति? । यद्यस्ति तदा न सा संयुज्यते । तथाहि—। यदसंयुक्तरूपं तन्न मनसा संयुज्यते । यथा मुक्तात्मादिअसंयुक्तरूपश्चात्मपूर्वावस्थायामिति स्वभावविरुद्धोपलब्धिरिति संयुक्तासंयुक्तस्वरूपयोः परस्परपरिहारेणावस्थानात् । अथैकरूपस्य तस्य रूपद्वयं तेन नासंयुक्तस्वरूपः । सर्वदैव तद्रूपत्वात् नैतदस्ति । यतो नैकरूपस्य संसरणं स्यात् । तथाहि-यदि कर्तृस्वरूपस्तदा न भोक्तृस्वरूपोऽथ भोक्तृस्वरूपस्तदा न कर्तृस्वरूपो यदि बंधस्वभावो न, न मुक्तस्वभावस्तदा न बंधस्तभाव इति किंचिद्दृगादिभिरपि मनसः संयोगः किं न संभवति । अनात्मरूपत्वादिति चेत । न, सर्वव्यापित्वे कुटस्थनित्यत्वे जडत्वे च सति कथमयं विभोगोऽयमात्माऽनात्मा चेति । यस्य मनःसंबंधः स आत्मा

तदन्योऽनात्मेति चेत्, नइतरेतराश्रयत्वप्रसङ्गात् । सत्यात्मत्वे मनः सम्बन्धः, सति मनःसम्बन्धे आत्मत्वमिति । शरीरसम्बन्धेनात्मा तदन्योऽनात्मेति यद्युच्येत तत्रेदमुच्येत शरीरसम्बन्धोऽप्याकाशादिभिः भिन्नो भवति । अनात्मरूपत्वान्नोत्तरम् । इतराश्रयत्वाभिधानात् तन्नात्मा नः सन्निकर्षोत्पन्नप्रत्यक्षाधिगम्यः । नाप्यनुमानगम्यः । तदभावे तस्याप्यभावात् । अथ सर्वगतश्चात्मा । सर्वत्रोपलभ्यमानगुणत्वात् । अतः सर्वगतस्यात्मनः सिद्धिः । तथाहि-सुखदुःखसाधनवस्तूत्पादौ देशान्तरे नाहेतुकः । न चादृष्टादन्यसुखादेर्हेतुः । न चादृष्टस्यानवारकस्य गुणत्वात्तन्नसत्वम् । न चासत्वे कार्ये कर्तृत्वमित्यात्मनस्तत्रापि सत्वमिति । यतस्तत्रात्मनः सत्वे सुखाद्युपलम्भः किं न भवति ? । कार्यसमवायिनो ज्ञानस्याभावादिति चेत् । तदपि तत्र किं न चकास्ति ? । शरीराभावादिति चेत् । तत्किं शरीरे समवेतं किं वात्मनि ? । यदि शरीरे तदा शरीरं भोक्तृ स्यान्नात्मा । न चैषोऽभ्युपगमः परस्य । अथात्मनि तदा सर्वत्रात्मनो विद्यमानत्वात्समवायस्य च व्यापित्वात् सर्वत्र सुखाद्युपलब्धिः स्यात् । मन शरीरविशिष्टस्यैवोपलब्धिर्नान्यस्येति चेत् । न, एकत्वहानेः । तथाहि—यस्मिन्विशिष्यमाणे यन्न विशिष्यते तत्ततो भिन्नम् । यथा नीलत्वेन विशिष्यमाणे घटेऽविशिष्यमाणो घटः । न विशिष्यते च शरीरात्मनि विशिष्यमाणो देशान्तरस्थ आत्मेति । किञ्च शरीरात्मनि स्थितमदृष्टं देशान्तरस्थसुखादिसाधकवस्तूत्पादकमस्तु किं तत्रादृष्टपरिकल्पनया ? । दूरत्वान्नेति चेत् । कथं चन्द्रादयो विज्ञानोत्पादकाः । तस्मान्नास्ति नियमः । सन्निहितेनैव कारणेनकार्यमुत्पादनीयं न दूरस्थेनेति । तत्र सर्वत्रोपलभ्यमानगुणत्वेनात्मनः सर्वगतमित्येकान्तभेदवादिनो मिथ्यावादिनइति ।

तथैकान्तभेदवादिनोऽपि । अथ विनाशस्याहेतुकत्वादुदयानन्तरं ध्वंसात्कुतो द्रव्यस्य सम्भवइति । तथाहि–। ये यद्भावप्रत्यपेक्षास्ते तद्भावनियताः । यथाऽन्त्याकारणसामग्री स्वकार्योत्पादने । अनपेक्षश्च विनाशं प्रति भावइति । तथाहि–। विनाशहेतुना किं स्वरूपं क्रियते किं वाऽभावः क्रियते ? । न तावत्स्वरूपम् । तस्य हेतोरुत्पन्नत्वात् । किं च तत्स्वरूपं नित्यमथानित्यम् ? । यदि नित्यं तस्याविनाश्यत्वादकिंचित्करो विनाशहेतुः । अथानित्यं तदा तस्य स्वत एव नश्वरत्वात् किं विनाशहेतुना? । अथ कालान्तरस्थायिना विनाशहेतुना विनाशः क्रियते न, कालान्तरस्थायित्वे नित्यतैव स्यात् । येन स्वभावेन भावेन भावः संवत्सरः स्थितः स चेसंवत्सरान्तरमासितव्यं तत्रा-प्यैवमिति कालान्तरस्थायित्वाऽभ्युपगमे नित्यतैवापतति तन्न पक्षान्तरसम्भवइति तत्राविनाशहेतोरकिञ्चित्करत्वमिति । तन्न स्वरूपकरणाद्विनाशहेतुरिति । अथ भावं न करोति तदपि नास्ति । यस्मादभावः किं पर्युदासरूपः, किं वा प्रसज्यरूपः ? । तत्र न तावत्पर्युदासरूपः । तस्यावस्थान्तरलक्षणत्वात् । तत्करणे न विनाशस्य किञ्चित्कृतम् । तथाहि–मुद्गराद्यदि कपालानामुत्पादो घटस्य किमायतम् । तच्चांशेन तेषामुत्पादादिति चेत् । तदुत्पादेऽन्यस्य ध्वंसः किं न भवति ? । तस्यैव निवृत्तिरिति चेत् । न, निवृत्ते र्वस्त्वन्तररूपत्वात्तदुत्पादे सर्वस्य स्यात् । न बाधिकास्यचिदभावादिति । असम्बन्धः स्यात् । तथाहि–। कपालोत्पत्तौ कपालोत्पत्तिरिति । अपि च ध्वंसोऽपि किं घटस्वरूपः किं वा अर्थान्तरमिति किं वा तुच्छरूप इति ? । तदेवावर्त्तत इत्यनवस्था । तत्रार्थान्तररूपाभावकरणे भावस्य किञ्चित्स्यात् । किं तु स्वरसत एव निवर्त्तमानो घटक्षणो मु-

द्गरादिसहकारिकारणं प्राप्य कपालानुत्पादयति । तदुत्पत्तौ च विजातीयसन्तानोत्पादेनासितो घट इति जनस्याभिधान इति । अथ प्रसज्यरूपमभावं करोति तदपि नास्ति । नीरूपस्य कर्तुमशक्यत्वात्करणे वा भावरूपतैव स्यात् । यतो भवतीति भावो ऽभिधीयते । नान्यद्भावस्यापि लक्षणम् । अथ भावो भावरूपतया भवति । अभावोऽभावरूपतयेति । विचित्ररूपा हि पदार्था भवन्ति । न हि नीलं पीतरूपतया भवति । तदप्यसत् । यतः केनचिद्रूपेणोन्मज्जनं हि भवनमभिधीयते सर्वोपाख्यारहितस्य नीरूपत्वान्न कस्यचिद्रूपस्य करणमिति कथं तत्र हेतुव्यापारः फलवानिति । तस्मादभावं करोति भावं न करोतीति क्रियाप्रतिषेधमात्रं स्यात् । तस्माद्विनाशस्याहेतुकत्वादुदयानन्तरध्वंसे कुतोऽनुगतस्य रूपस्य सद्भावो येन त्रैरूप्ये वस्तुनः स्यादिति । अपि चैकरूपत्वे वस्तुनः प्रथमे क्षणे यद्रूपं तदेव यदि द्वितीयादिष्वपि तदोत्पत्तिरूपत्वात प्रथमक्षणस्येव सर्वेषामुत्पत्तिरूपता स्यादिति । प्रतिक्षणमुत्पादे न कस्यचित्स्थितिरिति । अथ प्रथमक्षणे उत्पत्तिर्द्वितीयादिषु स्थितिरिति तदोत्पत्तिस्थितिमद्वयां न भेद इति तयोरपि भेदइत्यादिना क्षणिकवस्तुनः सिद्धेकुतो द्रव्यस्य संभव इति । अत्र वदन्ति । यद्यहेतुकत्वं नाशस्य तदा नित्यं सत्त्वमसत्त्वं वा स्यात् । तत्र यदि घटाभावस्य सत्त्वं तदा हेतोर्देशकालनियमाभावाज्जगति घटस्य नामापि न स्यात् । अथासत्त्वं तदा घटस्य नित्यत्वं व्यापित्वं वा प्रसजयेत । अथ न घटस्तदाभावस्याभेदः तर्हि कथं भावस्याहेतुकत्वम् । अन्यथा घटस्याप्यहेतुकता स्यात् । अथ घटहेतोरन्यो न मुद्गरादिहेतुरित्यहेतुकतोच्यते । यद्येवं प्रथमेऽपि क्षणे न घटस्य सत्त्वं स्यात् ।

विरोधिनि संनिधानात् । ननूक्तं न स्वरूपादन्योऽभाव इति कः केन विरुद्ध्यते । यद्येवं तदा घटस्य नित्यत्वं व्यापित्वं च स्यात् । तथाहि—यस्य यत्र स्वरूपं तस्य तत्र सत्त्वम् । यथा प्रथमे क्षणे घटस्य । अस्ति च सर्वत्र देशकाले घटस्य स्वरूपभूतोऽभाव इति । अथ स्वहेतोरेकक्षणस्थायी घट उत्पद्यते । तेन तदात्मको विनाशः कथ्यते । न पुनर्विनाशो नाम कश्चिद्विग्रहवानिति तेन द्वितीये क्षण एव न भवति । न पुनस्तस्य किञ्चिद्भवति । अथ द्वितीये क्षणे घटस्य किं सत्त्वं किं वाऽसत्त्वम् । यदि सत्त्वं कथं क्षणिकत्वम् । अथासत्त्वं तदा तदसत्त्वं यद्यहेतुकं तदा प्रथमेऽपि क्षणे किं न भवति । अथ तदसत्त्वं न किंचित् । येन प्रथमेऽपि क्षणे स्यात् । यदि तन्न किंचित्किं न घटो भवति । अथ द्वितीयादिक्षणेषु तुच्छरूपोऽस्याभावो भवति । तेन न सत्त्वमिति । प्रथमे क्षणे तुच्छरूपाभावात्सत्त्वमिति । ननु तुच्छरूपोऽभावः किं घटादभिन्नः किं वा भिन्न इति ? यद्यभिन्नस्तदा पूर्वः प्रसङ्गः । प्रथमेऽपि क्षणे सत्त्वं न स्यात् सर्वदेशकालेषु वा सत्त्वं स्यादिति । अथ भिन्नः स किन्निर्हेतुकः किं वा हेतुमान् इति ? । यद्यहेतुकस्तदा प्रथमेऽपि क्षणे घटस्य सत्त्वं न स्यात् । अथ हेतुकत्वात्तस्य तत्रापि भावात् । अहेतुमांस्तदा कथमहेतुकोऽभावइति । अपि च तुच्छरूपाभावोत्पत्तौ द्वितीयादिक्षणेषु यदि घटो न भवति । त्रैलोक्यमपि न किन्न भवति तत्सम्बन्धिनोऽभावस्योत्पत्तेः स एव न भवति न त्रैलोक्यमिति चेत् । कः सम्बन्धो न भावात्तादात्म्यं तत्र पूर्वमेवोक्तं दूषणम् । अथ तदुत्पत्तिस्तदपि नास्ति । यतः किमभावेन घटो जन्यते किं वा घटेनाभावइति । तत्र यद्यभावेन घटो जन्यते तदा तत्कारणवैफल्यं स्यात्सर्वत्र च घटस्य

सत्त्वं भवेदिति । अथ घटेनाभावो जन्यते तदा कथमहेतुकत्वम् । द्वितीयश्च घटक्षणोऽभावेन व्यवहितोत्पत्तिः स्यात्। अथ द्वितीयघटक्षण एव प्रथमस्याभावो नाद्योऽभाव अन्तराले कश्चिदिति । ननु क्षणिकत्वात्तद्विनाशे प्रथमघटक्षणस्योत्पत्तिः स्यात् । एवं कपालविनाशेऽपि । अपि च यदि वस्त्वंतरमेव तदा यदुक्तं पर्युदास एव एको नञर्थः स्यात्सोऽपि वा न भवेत् । यदि हि किञ्चित्कुतश्चिद्व्यावर्तेत तदातद्व्यतिरेके संस्पृश्येत तत्पर्युदासेन । अन्यथा घटो न भवतीत्युक्तेः पटो भवतीति पटस्य विधिरेवोक्तः स्यान्न घटस्य निवृत्तिरिति विधिरूच्येत । तस्मात्सुदूरमपि गत्वा वस्तूभयात्मकमभ्युगन्तव्यम् । स्वरूपेणासत्यरूपेणासदिति चेत् तेन भाववत्तदभावोऽपि हेतुमानिति । अपि चैवमेकान्तवादिनो जन्माप्यहेतुकं स्यात् । तथा हि—कारणेन कार्यस्य किं जन्म भिन्नं क्रियते, किंवाऽभिन्नम् ? । यदि भिन्नं क्रियते तदा कार्यस्य न किञ्चत्कृतं स्यात् । तत्सम्बन्धित्वं च सम्बन्धनिरासान्निरस्तम् । अथाभिन्नं क्रियते तदा तदेव क्रियते न जन्म । तच्च किं विद्यमानं क्रियते, किं वाऽविद्यमानं क्रियते? । यदि विद्यमानं तदा किं क्रियते । तदा शशविषाणमपि क्रियते । तथा विद्यमानमेव क्रियते । न त्वविद्यमानं क्रियत एव तेन यस्य कारणमस्ति क्रियते । यस्य नास्ति तन्न क्रियते । नन्वविद्यमानत्वाविशेषेऽपि मृत्पिण्डो घटस्यैव कारणं न शशविषाणस्येति किं कृतो नियमः । अथ यस्योत्पत्तिर्दृश्यते तस्य कारणं नेतरस्य । नन्वविद्यमानत्वाविशेषेऽप्येकस्योत्पत्तिर्नान्यस्येति कुतो वस्तुस्वभावैरुत्तरं वाच्यमिति चेत् । एवं तर्हि हेतुमद्विनाशवाद्यप्येतद्वक्तुं शक्नोति । कपालोत्पत्तौ घटस्यैव क्रियते नान्यस्येति ।

वस्तुस्वभावैरुत्तरं वाच्यमिति । तद्युक्तिवादिना पादप्रसारणं न कर्त्तव्यं किं तु युक्तिरनुसरणीया—तत्रैकान्तवादे उत्पादव्ययौ न युक्तिकाविति । अनेकान्तवाद एव युक्तिभारसह इति । तदेव वस्तु केनचिद्रूपेण विनश्यति केनचिदुत्पद्यते । नैकान्तेनासदुत्पद्यते । नाप्येकान्तेन विनश्यतीति युक्तम् । तदेवमुत्पादव्ययध्रौव्ययुक्तवस्त्वनभिधानान्यागमान्तराणि मिथ्यावादीनि तस्मात्सूक्तं जैनादन्यच्छाशनमनृतं भवतीति। ननु भवतु विधिनियमभंगवृत्तिव्यतिरिक्तत्वादन्यच्छाशनमनृतमनवरवपुषां त्वभ्युगमः । कथं तस्य हि विधिनियमभंगवृत्त्यव्यतिरिक्तत्वादिति तेऽपि स्त्रीमामोक्षनागमभ्युपेतोस्तेन मिथ्यादृशइति । तदुक्तम् ।

पयमरकरवएगंजे नरौ वे इसुत्तणिदिठसेसंरोवितोविहुमिच्छदिठीजमालिव ।

तथाहि यथा तिर्यग्नारकामरासंख्यानायुः सन्मूर्छजनरेषु रत्नत्रयस्य निर्वाणहेतोरभावाभिहिताऽर्हता तथा न योषासु तथापि ते तन्तुतदभावं प्रतिपन्ना इति । नापि प्रत्यक्षेण रत्नत्रयस्याभावः । परचेतोवृत्तीनां दूरन्वयत्वात् । नाप्यनुमानेनाप्रत्यक्षेएतस्याप्यभावात् । तदेव प्रत्यक्षानुमानागमबाधितं ज्ञानदर्शनचारित्रलक्षणं रत्नत्रयमविकलं कारणंनिर्वाणस्य स्त्रीष्वस्तीति कथमनिर्मोक्ष इति प्रयोगः । यदविकलं कारणं तदवश्यमेव कार्यमुत्पादयति । यथाऽन्त्या बीजादिसामग्री अङ्कुरादिकम्, अविकलं च निश्रेयसकारणं योषित्स्वति । अधस्तादुत्कृष्टगमनवदुपरिष्टादप्युत्कृष्टगमनासम्भवस्तासमिति स्त्रीत्वेनैव विरुद्धं रत्नत्रयमसिद्धोहेंतुरिति चेत् । न, प्रतिबन्धाभावात् न हि सप्तमपृथ्वीगमनाभावो मोक्षाभावेन व्याप्तिविपर्यये व्याप्तेरसिद्धः।

करोति त्यक्त्वेति । कर्मणि फले चासङ्गं कर्तृत्वाभिमानं भोगाभिलाषं च त्यक्त्वा अकर्त्रभोक्त्रात्मसम्यग्दर्शनेन बाधित्वा नित्यतृप्तः परमानन्दस्वरूपलाभेन निराकाङ्क्षः निराश्रयः आश्रयो देहेन्द्रियादिरद्वैतदर्शनेन निर्गतो यस्मात्स निराश्रयो देहेन्द्रियाद्यभिमानशून्यः। यद्वा दृष्टादृष्टेष्टफलसाधनाश्रयरहित इत्यर्थः। त्यक्तकर्मफलासङ्गेन ज्ञानवता पुरुषेण ससाधनं कर्म त्यक्तव्यमेव प्रयोजनाभावादित्याशंक्याह कर्मणीति । एवंभूतो जीवन्मुक्तो व्युत्थानदशायां लोकसंग्रहचिकीर्षया शिष्टनिन्दाजिहीर्षया वा ज्ञानोदयात्प्रागवस्थायामिव लौकिके वैदिके वा कर्मण्यभिप्रवृत्तोपि प्रारब्धकर्मवशाल्लोकदृष्ट्याऽभितः साङ्गोपाङ्गानुष्ठानाय प्रवृत्तोपि स्वदृष्ट्या नैव किंचित्करोति सः निष्क्रियात्मदर्शनेन बाधितत्वादित्यर्थः ॥ २० ॥

यदा सत्यपि विक्षेपके दर्शपूर्णमासादिकर्मणि सम्यगात्मदर्शिनः कर्मलेपो न भवति तदा किमु वक्तव्यं त्यक्तसर्वकर्मणो यतेः शरीरयात्रामात्रचेष्टस्य तल्लेपो भवतीति कैमुतिकन्यायेनाह निराशीरिति। निर्गता आशिषस्तृष्णा यस्मात्स यतौ निगृहीतौ चित्तात्मानौ अन्तःकरणबाह्यकार्यकरणसंघातौ येन सः जितेन्द्रिय इत्यर्थः। अतएव विगततृष्णत्वाज्जितेन्द्रियत्वाच्च त्यक्तसर्वपरिग्रहः त्यक्ताः सर्वे परिग्रहा भोगोपकरणानि येन सः एतादृशोऽपि प्रारब्धकर्मवशात् शारीरं शरीरस्थितिमात्रप्रयोजनं कौपीनाच्छादनादिग्रहणं भिक्षाटनादिरूपं प्रतिशास्त्राभ्यनुज्ञातं कर्म कायिकं वाचिकं मानसं च तदपि केवलं कर्तृत्वाद्यभिमानरहितं पराध्यारोपितकर्तृत्वेन कुर्वन् वस्तुतोऽकर्त्रभोक्त्रात्मदर्शनात् किल्बिषं धर्माधर्मफलभूतं संसारं नाप्नोति न प्राप्नोति मुमुक्षुं प्रति पापवत्सकामपुण्यस्याप्यनिष्टफलत्वेन किल्बिषत्वं ज्ञेयम् ॥ २१ ॥

ननु त्यक्तसर्वपरिग्रहस्य यतेः शरीरस्थितिमात्रप्रयोजनस्य कर्मणोऽभ्यनुज्ञाने याचनादिनापि स्वप्रयत्नेन शरीरस्थितिहेत्वशनादिकं सम्पाद्यं तद्विना शरीरस्थितेरसम्भवादित्याशंक्य अयाचितमसंक्लृप्तमुपपन्नं यदृच्छयेति वचनानुसारेणोत्तरमाह—

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥

यदृच्छेति । शास्त्राननुमतप्रार्थनाप्रयत्नादिव्यतिरेकेण लाभो प्रार्थितस्यान्नाच्छादनादेः शास्त्रानुमतस्य यदृच्छालाभस्तेन संतुष्टः संजातालं-

प्रत्ययस्तदधिकतृष्णारहित इत्यर्थः। तथा च शास्त्रं भैक्ष्यं चरेदिति प्रकृत्य अयाचितमसङ्क्लृप्तमुपपन्नं यदृच्छयेति याञ्चासङ्कल्पादिप्रयत्नं वारयति

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित॥

इति मनुरपि तद्वारयति। यतयो भिक्षार्थं ग्रामं प्रविशन्तीत्यादिशास्त्रानुमतस्तु प्रयत्नः कर्तव्य एव। एवं लब्धमपि शास्त्रनियतमेव ग्राह्यं न तु सर्वम्।

कौपीनयुगलं वासः कन्था शीतनिवारणी।
पादुके वापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम्॥

इत्यादिस्मृतेः। ननु स्वप्रयत्नं विनाऽलाभे शीतोष्णादिपीडितः कथं जीवेदत आह द्वन्द्वातीतः द्वन्द्वानि क्षुत्पिपासाशीतोष्णादीन्यतीतोऽतिक्रान्तः तैर्बाध्यमानोऽप्यक्षुभितचित्तः समाधिदशायां तेषामभानात्। व्युत्थाने तु भानेपि परमानन्दाद्वितीयाकर्त्रभोक्त्रात्मज्ञानेन बाधात्। अत एव विमत्सर विगतः परोत्कर्षाऽसहनपूर्वकस्वोत्कर्षवांछारूपो मत्सरो यस्मात्स अद्वितीयात्मदर्शनेन निर्वैरबुद्धिः अतएव समस्तुल्यो यदृच्छालाभस्य सिद्धावसिद्धौ च हर्षविषादरहितः सः स्वानुभवेनाकर्तैव लोकदृष्ट्या शरीरस्थितिमात्रप्रयोजनाभिक्षाटनादिकर्म कृत्वापि न निबध्यते बंधहेतोः सहेतुकस्य कर्मणो ज्ञानाग्निना दग्धत्वादित्युक्तानुवादः।

परावरैकत्वविज्ञानाग्निनिर्दग्धाविद्यातत्कार्यग्रंथेर्जीवन्मुक्तस्य विदुषः शरीरयात्रातिरिक्तं कर्तव्यं कर्म नास्तीति प्रतिपाद्य निदिध्यासोर्यतेर्मौनिनस्त्वनन्तद्वानविचारमन्तरेण शरीरयात्रां कुर्वतोपि विमुक्तौ प्रतिबंधो नास्तीत्युक्त्वा जीवन्मुक्तस्याजगरवृत्तेर्यदृच्छाप्राप्तेनान्नेन जीवनं कुर्वतोपि यतेर्या तृप्तिस्सा मुक्तिप्रतिबंधकी न भवतीतीदानीं प्रतिपादयति श्रीभगवान्वासुदेवो यदृच्छेति। द्वन्द्वातीतः द्वन्द्वानि त्वमहमिति इदमद इति इष्टमनिष्टमिति शुद्धमशुद्धमिति द्वैतमद्वैतमित्यादीनि विपरीतज्ञानान्यतीतः सर्वत्र ब्रह्मदृष्ट्या विनष्टविपरीतदर्शनस्तत एव विमत्सरः अहमेवेदं सर्वमिति सर्वस्य स्वात्मत्वेनाधिगतत्वादुत्कृष्टत्वापकृष्टत्वभावनानुपपत्तौ सर्वत्रात्मबुद्धिरत एव च यदृच्छालाभसंतुष्ट अयत्नप्राप्तो लाभो यदृच्छालाभः प्रारब्धवशात्स्वत एव प्राप्तः साधुना वाऽसाधुना दत्तः शुद्धोऽशुद्धो वाल्पोनल्पो वान्नाऽदिस्तेनैव सन्तुष्ट सन्नाहारस्य सिद्धावसिद्धौ च समो ब्रह्मानन्दानुभूत्या स्वयं हर्षविषादवैवर्ण्यादिरहितो भूत्वैवं शरीरयात्रां कृत्वाप्याजगरो ब्रह्मविद्यतिर्न बध्यते मुक्तः प्रतिबंधं न प्राप्नोति लोकदृष्ट्या

त्वाहारादिवैषम्येन प्रतिबंधकवद्दोषेण प्रतीयमानोपि विद्वान् सर्वमिदमहं च ब्रह्मैवेति भोक्तृभोज्यदातृदयादेः सर्वदृश्यस्य ब्रह्ममात्रत्वेन प्रविलापितत्वात्परे ब्रह्मण्यद्वितीये प्रतिबन्धहेतोरन्यस्यासंभवात्पतितेऽस्मिन् विद्वद्देहे विदेहमुक्तिं प्राप्नोतीत्यर्थ इत्याहुरन्ये ॥ २२ ॥

ननु सर्वमिदमहं च ब्रह्मैवेति सर्वस्यापि स्वस्य च ब्रह्मत्वमेव प्रत्यक्दृष्ट्या सर्वदा पश्यतां जीवन्मुक्तानां ब्रह्मविदां शरीरयात्रात्मकं कर्म ब्रह्मदृष्ट्या प्रविलापितत्वेन निस्सत्ताकतया तेषां मुक्तिप्रतिबन्धकं मास्तु लोकानुग्रहकामनया कर्मणि प्रवृत्तस्याधिकारिकस्यान्यस्य वा विदुषोऽहं कर्ता तेनेदं कर्तव्यमिति क्रियाकारकभेददृष्टिमवष्टभ्य क्रियमाणेन कर्मणा मुक्तिः प्रतिबध्यत एव नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिस्मृतिनियमादित्याशङ्कायां न ब्रह्मविद्भिर्महापुरुषैः क्रियमाणं क्रियाकारकादिभेदभिन्नमपि कर्म लौकिकं वैदिकं च सर्वं ब्रह्मैवेति सर्वत्र ब्रह्मबुद्ध्यैव क्रियते न तु मयेदं क्रियत इति भेददृष्ट्या ततस्तैः क्रियमाणं कर्माकर्मैव सत्स्वयं तेषां मुक्तिं प्रतिबद्धुं न शक्नोतीत्याशयेनाह—

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

गतसङ्गस्येति । मुक्तस्य ब्रह्मण्येवात्मभावापत्त्याऽहं ममाभिनिवेशेन विमुक्तस्य निरहङ्कृतेरत एव गतसङ्गस्य सज्यते पुमाननेन कर्मस्विति सङ्गः कामः स गतो यस्य तस्य गतसङ्गस्य निष्कामस्यात एव ज्ञानावस्थितचेतसः ज्ञानं सर्वत्र ब्रह्मदर्शनलक्षणं तत्रैवावस्थितं चेतो यस्य तस्य ज्ञानावस्थितचेतसः दृश्यावगाहिन्या वृत्तेः सदा ब्रह्माकारतामेवापादयतो यज्ञाय विष्णवे । यद्वा श्रौतैः स्मार्तैश्च कर्मभिर्देवान्यजंतीति यज्ञाः ब्राह्मणादयस्तेभ्यः जातावेकवचनं यज्ञाय लोकहितायैवाचरतः कर्माणि कुर्वत आधिकारिकस्य नित्यमनुष्ठीयमानं कर्म समग्रं कारणत्रयनिर्वर्तितं सर्वं कर्माकर्मादिलक्षणं वा सर्वं प्रविलीयते ब्रह्मबुद्ध्या प्रविलापितं सत्समूलं विनश्यति न जन्मादिफलाय कल्पत इत्यर्थः ।

अन्ये त्वित्थं योजयन्ति । त्यक्तसर्वपरिग्रहस्य यतेर्यद्भिक्षाटनादिरूपं कर्म तत्कृत्वा न निबध्यते इत्युक्ते गृहस्थस्य ब्रह्मविदो जनकादेर्यज्ञादिरूपं कर्म बन्धकं स्यादित्याशङ्कामपनेतुं त्यक्त्वा कर्मफलासंगमित्यादिनोक्तं विवृणोति गतसंगस्येति । गतः सर्वतो निवृत्तः संगः कर्मफलासक्तिर्यस्य

तस्य मुक्तस्य कर्तृत्वभोक्तृत्वधर्माधर्मादिबंधनशून्यस्य ज्ञाने ब्रह्मात्मैक्यबोध एवावास्थितं चेताश्चित्तं यस्य तस्य स्थितप्रज्ञस्येत्यर्थः । गतसंगत्वे हेतुः कर्तृत्वाद्यध्यासशून्यत्वं तत्र हेतुः स्मितप्रज्ञत्वामित्येवमुत्तरोत्तरस्य पूर्वपूर्वहेतुत्वं बोध्यम्। एतादृशस्यापि प्रारब्धकर्मवशाद्यज्ञाय ज्योतिष्टोमादियज्ञसंरक्षणार्थं तत्र श्रेष्ठाचारत्वेन लोकप्रवृत्त्यर्थं यज्ञाय विष्णवे तत्प्रीत्यर्थमिति वा आचरतः कुर्वतः कर्म यज्ञदानादिकं समग्रं सहाग्रेण फलेन विद्यते इति समग्रं प्रकर्षेण कारणोच्छेदेनात्मज्ञानेन विलीयते विनश्यतीत्यर्थः ॥ २३ ॥

ननु

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥

इत्यादिवचनेभ्यः कर्मफलस्यावश्यभावित्वात्कस्मात्क्रियमाणं कर्म फलमदत्वैव प्रविलीयत इत्याशङ्क्य ब्रह्मबोधेन तत्कारणस्य क्रियाकारकफलात्मकस्य द्वैतस्य बाधितत्वादित्याह—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥ २४ ॥

ब्रह्मेति । अर्पतेऽनेनेत्यर्पणं जुह्वादि मंत्रादि च करणकारकं तथार्प्यतेऽस्मा इत्यर्पणं देवतारूपं संप्रदानं तथार्प्यतेऽस्मिन्नित्यर्पणमधिकरणं देशकालादि तत्सर्वं ब्रह्माणि कल्पितत्वाद्ब्रह्मैव रज्जुकल्पितसर्पवदाधिष्ठानव्यतिरेकेणासदित्यर्थः । हूयते यदिति हविर्घृतादिद्रव्यं यजमानकर्तृकस्वत्वत्यागरूपयागाध्वर्युकर्तृकप्रक्षेपरूपहोमक्रिययोः साक्षात्कर्मकारकं तदपि ब्रह्मैव। घृतादिहविर्यत्राग्नौ प्रक्षिप्यते सोपि ब्रह्मैवेत्याह ब्रह्माग्नाविति-समस्तं पदं । तथा येन कर्त्रा यजमानेनाध्वर्युणा च त्यज्यते प्रक्षिप्यते च तदुभयमपि कर्तृकारकं तृतीययानूद्य ब्रह्मेति विधीयते इत्याह ब्रह्मणेति एवं तेन ब्रह्मरूपेण कर्त्रा हुतं हवनं त्यागक्रिया प्रक्षेपक्रिया च तदपि ब्रह्मैव। तथा तेन हवनेन यद्गन्तव्यं प्राप्यं स्वर्गादिफलरूपं अवहितं कर्म तदपि ब्रह्मैव अत्रत्य एवकारः सर्वत्र सम्बध्यते । हुतमित्यत्रापीत एव ब्रह्मेति सम्बध्यते काकाक्षिगोलकन्यायेन । अनेन प्रकारेण कर्मणि समाधिर्ब्रह्मज्ञानं यस्य स कर्मसमाधिस्तेन ब्रह्मविदा कर्मानुष्ठात्राऽपि ब्रह्म परमानन्दाद्वयम्

गन्तव्यमित्यनुषज्यते। यद्वार्प्यतेऽस्मै फलायेति व्युत्पत्त्यार्पणपदेनैव स्वर्गादिफलमपि ग्राह्यं तथा च तेन कर्मसमाधिना ब्रह्मविदा गन्तव्यं ब्रह्मैव न स्वर्गादितुच्छफलं विद्यया आविद्यककारकव्यवहारस्य बाधितत्वात् तदुक्तं वार्तिककृद्भिः—

कारकव्यवहारे हि शुद्धवस्तु न वीक्ष्यते।
शुद्धे वस्तुनि सिद्धे च कारव्यापृतिः कुतः॥

इति ज्ञानफलकथनं। तथा चोतरार्द्धे पूर्वं ब्रह्मपदं हुतमित्यनेन पूर्वार्द्धगतेन सम्बध्यते चरमं गन्तव्यपदेनेति नोभयत्र सम्बन्धकल्पनाक्लेश इति समंजसम्। तदेवं सर्वेषां क्रियाकारकव्यवहाराणां ब्रह्माज्ञानकल्पितानां ब्रह्मतत्त्वज्ञानेन बाधे रज्ज्वज्ञानकल्पितानां सर्पदण्डधारादीनां रज्जुतत्त्वज्ञानेनेव बाधितानुवृत्त्या क्रियाकारकादिव्यवहाराभासो दृश्यमानोपि दग्धपटन्यायेन फलाय कल्पत इत्यनेन श्लोकेन प्रतिपाद्यते। ब्रह्मदृष्टिरेव च सार्वयज्ञाद्यात्मिकेति स्तूयत इति बोध्यम्।

अन्ये तु प्रविलापनप्रकारमेवाह ब्रह्मेति। हविरर्प्यतेऽनेनेत्यर्पणं चमसस्रुक्स्रुवादिकं सर्वं ब्रह्मैवेति प्रत्यग्दृष्ट्या ब्रह्मवित्पश्यति मूढदृष्ट्या यद्रजतं तदेव विवेकिदृष्ट्या शुक्तिर्यथा तथा अज्ञदृष्ट्या यच्चमसादियज्ञसाधनं तदेव ब्रह्मविद्दृष्ट्या ब्रह्मैव भवतीत्यर्थः। ब्रह्म हविर्यज्ञीयं यद्धविश्चरुपुरोडाशादिकं होम्यद्रव्यं तत्सर्वं ब्रह्मैव पश्यति। ब्रह्मणा होमकर्त्रा कर्तापि ब्रह्मैवेति यजमानं स्वं ब्रह्मविद्ब्रह्मैव पश्यति। ब्रह्माग्नौ ब्रह्मैवाग्निस्तं होमाधिकरणं ब्रह्मैवेति पश्यति। तस्मिन्ब्रह्माग्नौ यद्धुतं हवनक्रिया तदपि ब्रह्मैव पश्यति। ब्रह्मकर्मसमाधिना सर्वस्य ब्रह्ममात्रत्वदर्शनं यत्तद्ब्रह्मकर्म तस्मिन्ब्रह्मकर्मणि समाधिश्चित्तस्य स्थापनं यस्य तेन ब्रह्मकर्मसमाधिना सर्वं ब्रह्मैव पश्यता ब्रह्मविदा यद्गन्तव्यमेवं दर्शनस्य फलत्वेन प्राप्तव्यमिदमेवाहमस्मीति तद्ब्रह्मैव भवति। इत्थं लोकहितार्थप्रवृत्तस्याधिकारिकस्य ब्रह्मविदोपि ससाधनं सर्वं कर्म ब्रह्मवृत्त्या ब्रह्ममात्रत्वेन प्रविलापितत्वात्स्वयं निःसत्त्वेनाकर्मैव सद्बन्धाय न भवतीति सिद्धम्। एतेन चलनात्मिकायाः प्रवृत्तेर्विरोधस्य दुष्करत्वात्सर्वदा विदुषोपि प्रवर्तितव्यत्वे प्राप्ते विवेकिनो व्यर्थव्यापृत्यपेक्षया वैदिकी प्रवृत्तिर्भूषणाय मनोहर्षाय लोकहिताय चान्ततोप्यबन्धाय च भवत्यतस्तयैव दृष्ट्या सद्भिर्ब्रह्मविद्भिः प्रवर्तितव्यमिति सूचितं भवतीत्याहुः॥

अपरे तु अथोपक्रान्तप्रमेयमुपसंहरन्नाह ब्रह्मेति । अर्पणं चित्तस्य दानसंकल्पो यस्तद्ब्रह्मरूपत्वाद्ब्रह्मैव । तथा हविःसमित्तिलाज्यादि वैराजब्रह्मणो व्यष्टिरूपत्वाद्ब्रह्मैव अग्निरपि वैश्वानरापरपर्यायं ब्रह्मैव तस्मिन्येन पुरुषेण हुतं सोपि ब्रह्मैवेति ज्ञात्वा येन क्रियते तेन ब्रह्मैव गतव्यं प्राप्तव्यं । किंभूतेन ब्रह्मकर्मसमाधिना ब्रह्मार्पणं कर्म ब्रह्मकर्म तस्मिन्समाधिश्चित्तैकाग्र्यं यस्य तेनेत्याहुः ॥ २४ ॥

पूर्वं ब्रह्मार्पणं ब्रह्महविरिति मंत्रेण चमसादीनां ब्रह्ममात्रत्वदर्शनलक्षणस्य ज्ञानस्य यज्ञरूपत्वेन वर्णयित्वा तस्यैव ज्ञानयज्ञस्य साक्षान्मोक्षैकसाधनत्वेन दैवादियज्ञापेक्षया सर्वोत्तमत्वं प्रतिपादयितुं मोक्षस्य व्यवहितसाधनानां दैवादियज्ञानां मुमुक्षुभिः स्वाधिकारानुरूपेण चित्तशुद्ध्यर्थमनुष्ठेयत्वं सूचयितुं च दैवादियज्ञान्निरूपयति दैवमित्याद्यष्टभिः—

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

देवानिन्द्रादीनुद्दिश्य प्रवृत्तो यज्ञो दैवस्तं दैवमेव यज्ञं श्रौतं स्मार्तं चापरे मोक्षकामाः योगिनः कर्मयोगिनो गृहिणश्चित्तशुद्ध्यर्थं पर्युपासतेऽनुतिष्ठन्तीति दैव एव वैदिको यज्ञो गृहिणा कर्तव्य इति सूचयित्वा ब्रह्मविदां यतीनां त्वयमेव यज्ञः कर्तव्यो मुक्त्यर्थमित्युक्तमेव ज्ञानयज्ञं प्रकारान्तरेण वर्णयति ब्रह्माग्नाविति । अपरे गृहिभ्यो भिन्ना यतयः श्रवणादिभिर्विज्ञातात्मतत्त्वाः स्वयं ब्रह्माग्नौ “सत्यं ज्ञानमनन्तं ब्रह्म तदेतद्ब्रह्मापूर्वमनपर”मित्यादिश्रुतिप्रसिद्धं निरस्ताशेषविशेषं सच्चिदानन्दघनं मत्परं ब्रह्म तदेवाग्निरविद्यातत्कार्यदावदाहकत्वात्सोपाधिकात्माहुतिप्रक्षेपाधिकरणत्वाच्च परं ब्रह्माग्निरित्युच्यते तस्मिन् ब्रह्माग्नौ यज्ञं पामरैरहं भोक्तेति विषयोपभोगैरिज्यत इति यज्ञः आत्मा सोपाधिकस्तं यज्ञं वस्तुतो निर्विशेषमप्यध्यासतो बुद्ध्याद्युपाधियुक्तमात्मानमाहुतिनिक्षेपणकाले यज्ञेनात्मना निर्विशेषस्वरूपेणैव ब्रह्मणि जुह्वति । अहं ब्रह्मास्मीत्यहं पदार्थं सोपाधिकवत्प्रतीयमानं विवेकवृत्त्या निर्विशेषं भावयित्वा ब्रह्माभिन्नमनुभवन्तीत्यर्थः । यद्वा यज्ञं सोपाधिकमात्मानं “यज्ञेन यज्ञो” विष्णुरिति वै श्रवणात्सोपाधिकेनेश्वरेण सहैव जुह्वति सोपाधिकमीश्वरं सोपाधिकमात्मानं चोभौ तत्तदुपाधिमपोह्य चोभयोरधिष्ठानभूतेन तुरीयेण निर्विशेषेण ब्रह्मणाऽभिन्नौ पश्यन्ति । यथा तरङ्गबुद्बुदौ तन्नामरूपापोहेन तदाधारभूतसमुद्रेणाभिन्नौ पश्यन्ति तद्वदित्यर्थः ।

अपरे योगिनः कर्मकुशलाः दैवं यज्ञं देवसम्बन्धी दैवः इन्द्रसूर्यवरुणादय इज्यन्ते यस्मिन्निति यज्ञस्तं दैवं यज्ञं पर्युपासते परितः सर्वत्र देवेषु ब्रह्मबुद्धिराहित्येनोपासत इत्यर्थः । अपरे ज्ञानयोगिनस्तु यज्ञेन ज्ञानयज्ञेन यज्ञं कर्मरूपं ब्रह्मरूपाग्नौ जुह्वति प्रविलापयन्तीत्यर्थ इत्यन्ये ।

अपरं तु एवं जीवब्रह्माभेदज्ञानस्य यज्ञत्वसम्पादनेन स्तवनं कृत्वा पुनरपि तस्य स्तुत्यर्थमितरान्यज्ञान्दर्शयति दैवमिति । अपरे योगिनः कर्मयोगिनः दैवमेव यज्ञं देवा इन्द्रादय इज्यन्ते येन स दैवस्तमेव यज्ञं दर्शपूर्णमासज्योतिष्टोमादिरूपं पर्युपासते कुर्वन्ति न ज्ञानयज्ञम् । एवं कर्मयज्ञमुक्त्वान्तष्करणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमाह ब्रह्माग्नाविति । अपरे पूर्वोक्तलक्षणाः ब्रह्मज्ञाननिष्ठाः संन्यासिनः यज्ञं त्वम्पदार्थं प्रत्यगात्मानं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादिश्रुत्युक्तन्तदेवाग्निवृत्त्यारूढतया सर्वस्य दाहकत्वगुणयोगात्तस्मिन्ब्रह्माग्नौ यज्ञेनैव यज्ञशब्द आत्मनामसु यास्केन पठितः । इत्थंभूतलक्षणे तृतीया । एवकारो भेदाभेदव्यावृत्त्यर्थः । तथा च यज्ञेनैवात्मनैवाशनपानादिसर्वधर्मराहितस्वरूपेणोपजुह्वति । सोपाधिकस्यात्मनो निरुपाधिकपरब्रह्मरूपेण दर्शनमेव होमस्तं कुर्वन्ति । निर्गुणब्रह्मस्वरूपतयाऽहं ब्रह्मास्मीत्येवं पश्यन्तीति भावः । जीवब्रह्मैक्यज्ञानं यज्ञत्वेन सम्पाद्य तदेव तत्साधनयज्ञमध्ये पठ्यते "श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ" इत्यादिना स्तोतुमिति द्रष्टव्यमित्याहुः ॥ २५ ॥

एव ब्रह्मविदां कर्तव्यं ज्ञानयज्ञं विधायाथाब्रह्मविदां कर्तव्यानि यज्ञान्तराण्याह—

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥

श्रोत्रादीनीति । उक्तेभ्योऽन्ये त्वब्रह्मविदो मुमुक्षवो नैष्ठिकब्रह्मचार्यादयः श्रोत्रादीनि वागादीनि चेन्द्रियाणि संयमाग्निषु संयमो नाम तत्तदिन्द्रियस्य तत्तद्विषयाद्विनिवर्त्य तत्तत्स्थाने निग्रहः इन्द्रियाणां बहुत्वात्संयमा बहवस्त एवाग्नयस्तेषु संयमाग्निषु चक्षुरादीन्द्रियाहुतीर्जुह्वति इन्द्रियनिग्रहरूपं यज्ञं कुर्वन्तीत्यर्थः । एतदन्ये गृहिणो मुमुक्षवः स्वधर्मनिष्ठाः शब्दादिविषयाननिषिद्धान्योग्यकाल एवेन्द्रियाग्निषु तन्निक्षेपणाधिकरणत्वादिन्द्रियाण्यवाग्नयस्तेषु जुह्वति विषयानुभवनियम एव तेषां यज्ञ इत्यर्थः ।

अन्ये तु एवं मुख्यगौणौ द्वौ यज्ञौ दर्शयित्वाऽधुना यावत्किंचिद्वैदिकश्रेयःसाधनं तत्सर्वं यज्ञत्वेन संपाद्यत । तत्र तावद्यज्ञरूपं दर्शयति श्रोत्रादीनीति । अन्ये प्रत्याहारपरा योगिनः श्रोत्रादीनि ज्ञानेन्द्रियाणि शब्दादिविषयेभ्यः संयमा एवाग्नयस्तेषु संयमाग्निषु जुह्वति इन्द्रियसंयममेव कुर्वन्ति विषयेभ्य इन्द्रियाणि प्रत्याहरन्तीति भावः । ननु बाह्येन्द्रियाणां मनसि संयमस्यैकत्वात्कथं बहुवचनमिति चेन्न इन्द्रियभेदात्संयमबहुत्वोपपत्तेः । इन्द्रियप्रत्याहाराधिकरणत्वेन व्यवस्थितानां मनोरूपाणां संयमानां होमाधारत्वादग्नित्वव्यपदेशोऽप्युपपद्यते । अन्ये तत्त्वविदः प्रारब्धवशादुपलब्धान् शब्दादीन् शास्त्राविरुद्धान्विषयानिन्द्रियाग्निषु जुह्वति । श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्त इत्यर्थः ।

अन्येतु संयमाग्निषु धारणा ध्यानं समाधिरिति त्रयमेकविषयं संयमशब्देनोच्यते त्रयमेकत्र संयम इत्युक्तेः । तत्र हृत्पुंडरीकादौ मनसश्चिरकालस्थापनं धारणा । एवमेकत्र धृतस्य भगवदाकारवृत्तिप्रवाहोऽन्याकारप्रत्ययव्यवहितो ध्यानम् । सर्वथा विजातीयप्रत्ययानन्तरितः सजातीयप्रत्ययप्रवाहः समाधिः । अनेन रूपेण संयमानां भेदादग्निष्विति बहुवचनं तेषु इन्द्रियाणि जुह्वति धारणाध्यानसमाधिसिद्ध्यर्थं सर्वाणीन्द्रियाणि स्वविषयेभ्यः प्रत्याहरन्तीत्यर्थः । तदुक्तं "स्वस्वविषयासम्प्रयोगे चित्तरूपानुकार एवेन्द्रियाणां प्रत्याहार" इति । विषयेभ्यो निगृहीतानीन्द्रियाणि चित्तरूपाण्येव भवन्ति । ततश्च विक्षेपाभावाच्चित्तधारणादिकं निर्वहतीत्यर्थः तदनेन प्रत्याहारधारणाध्यानसमाधिरूपं योगांगचतुष्टयमुक्तम् । तदेवं समाध्यवस्थायां सर्वेन्द्रियवृत्तिनिरोधो यज्ञत्वेनोक्तः । इदानीं व्युत्थानावस्थायां रागद्वेषराहित्येन विषयभोगो यः सोऽप्यपरो यज्ञ इत्याह शब्दादीनिति । अन्ये व्युत्थितावस्थाः श्रोत्रादिभिरविरुद्धविषयग्रहणं स्पृहाशून्यत्वेनानन्यसाधारणं कुर्वन्ति स एवैतेषां होम इत्यर्थ इत्याहुः ॥ २६ ॥

यज्ञान्तरमाह—

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

सर्वाणीति । चपुनरपरे योगिनः सर्वाणि इन्द्रियाणां श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानां ज्ञानेंद्रियाणां वाक्पाणिपादपायूपस्थाख्यानां कर्मेन्द्रियाणां च कर्माणि शब्दस्पर्शरूपरसगन्धग्रहणात्मकानि वचनादानविहरणो-

रोषणा विपरिधाविनो मुधा
ह्रेपयन्ति जनमुज्झितह्रियः ॥ ३९ ॥

दर्पः—(सहस्तास्फालनं, विहस्य) यथावस्थितवादिने मह्यं मर्कट इव किमिति कुप्यसि ।

दम्भः—रेरे स्तम्भ इव वृथास्थूलस्त्वं विश्ववृत्तान्तं न जानासि ।

मयि चरति कदाचित्सत्यलोकोपकण्ठे
सपदि सनकमुख्यैस्साकमभ्युज्जिहानः ।
सविनयविधुताङ्गस्सम्रमः चालितेन
स्वयमुदवहदर्घ्यं पाणिना पद्मयोनिः ॥ ४० ॥

कति कतीह पुरातनतापसाः
कमलसंभववंशसमुद्भवाः ।

पादप्रक्षालनाद्युचितस्थलं गृह्यते । तन्मात्रशरणाः तदेकनिलयाः बहिष्कृताः महद्भिः परित्यक्ताः अन्यत्र सर्वजनैरपि काष्ठलोष्टादिभिः दूरोत्सारिताः आहृता जघन्या वृत्तिर्व्यापारो यैस्ते तथा अन्यत्र आहृता जघन्यैः वस्तुभिः पुरीषादिभिः वृत्तिः वर्तनं जीवनं यैस्ते तथा रोषणाः अल्पेपि निमित्ते रोषवन्तः मुहुः विपरिधाविनः इतस्ततो धावन्तः उभयत्र समानमेतद्विशेषणद्वयं उज्झितह्रियः त्यक्तलज्जाः इदमपि तथा एवं भूताः केचिज्जनं जनिमद्वस्तुजातं ह्रेपयन्ति व्रीलयन्ति एतदवलोकनमपि जनानां व्रीलाहेतुरिति भावः ॥ ३९ ॥

यथावस्थितं अवस्थितमनतिक्रम्य । स्तम्भ इव वृथास्थूलः यथा स्तम्भः स्थूलोपि न किञ्चिज्जानाति तथा त्वमपि विश्वमपि वृत्तान्तं न जानासि ।

कोऽसौ वृत्तान्त इत्यत आह—।

मयीति—॥ कदाचित् सत्यलोकोपकण्ठं मयि चरति सति पद्मयोनिः सनकः मुख्यः येषां तैः मुनिभिस्साकं सपदि अभ्युज्जिहानः अभ्युत्थितस्सन् सविनयं विनयेन सहितं यथा भवति तथा विधुतानि अंगानि येन स तथा सम्रमः सप्रकम्पः चालितेन पाणिना स्वयमेव अर्घ्यमुदवहत् ॥ ४० ॥

अन्यदप्याह—॥

कतिकतीति—॥ कमलसंभवस्य चतुर्मुखस्य वंशे समुद्भवः उत्पत्तिर्येषां ते

अतितरन्ति महान्त्यपि पातका
न्यहह मामकपादजलाप्लुताः ॥ ४१ ॥

कुहना—*सच्चं एअं दिट्ठं मआवि सहधम्मआरिणीआ ।

दर्पः (स्वगतं) नूनमयमार्यो डम्भः इयमपि कुहना नखल्वन्येषामीदृशच्चारित्रं अतिवदनं वा संभवति तदेतावेवास्मद्बन्धुभूतावभ्युपगमयामि (प्रकाशं) भगवति विश्ववेदिनि युक्तिसिद्धमिह किमपि भगवत्यै निवेदयामि—

परधनहरणप्रवीणभावा
कुटिलमतिः कुहनैव सेयमार्या ।
पशुवधपरिशेषनामयज्ञ-
स्स्ववशजनस्स्वयमेष डम्भ एषः ॥ ४२ ॥

तत्कथमेतत्सकाशाद्धर्मसंकटमोक्ष्यावः ।

असूया—अहमप्येवं संभावयामि ।

---

* सत्यमेतद्दृष्टं मयापि सहधर्मचारिण्या ।

तथा पुरातनतापसाः मामकपादजलाप्लुताः कतिकति इह महान्त्यपि पातकान्यतितरन्ति अहहेति हर्षे ॥ ४१ ॥

आर्यः ज्येष्टः अतिवदनं अत्युक्तिः ॥

युक्तिसिद्धं युक्तिभिस्सिद्धं किमपि तत्किमित्यत आह—॥

परेति—॥ परेषां धनस्य हरणे प्रवीणः समर्थः भावो अभिप्रायो यस्यास्सा तथा पशूनां वधः मारणं परिशेषः नामयज्ञः नाममात्रेण यज्ञः नतु तद्युक्तक्रियाभिः यद्वा नामनिमित्तभूतो यज्ञः वाजपेययाजी अतिरात्रयाजीत्यादिनाम्नां हेतुभूतयज्ञो यस्य स तथा स्ववशः स्वाधीनः जनोयस्य स तथा ॥ ४२ ॥

धर्मसंकटं धर्मसंशयं ।

डम्भः—(सान्तर्हासं) युवामप्यहं युक्तितः स्थापयामि—

ध्रुवमत्र गुणोत्तरापवादी
ध्वनिसारस्त्वयमागतोसि दर्प !
परिकल्पितवीतरागवेषा
तव भार्यैव भवेदसाववसूया ॥ ४३ ॥

(नेपथ्ये) गृहपतिरतिथिश्चसत्यवादिनावेतौ गौडलाटधार्मिकौ ।
सर्वे सप्रत्यभिज्ञं परस्परमवलोक्य सन्तोषमभिनयन्ति ।

डम्भः—(सानन्दं) सखे दर्प अभिव्यञ्जिता वयमशरीरिण्या भारत्या ।

दर्पः—अवितथवादिनी खल्वपा तद्वार्येणापराधो मामकः क्षन्तव्यः ।

डम्भः—मयापि खल्वपराद्धं ।

डम्भदर्पौ—अन्योन्यमञ्जलिं बध्नीतः निबध्नीतश्च—प्रियवचनं
असूयाकुहने गाढं मिथ आश्लिष्यतः

डम्भदर्पौ—यथामनोरथमिह वयं यदृच्छया देव्या समभगताः अभि-
गन्तव्यस्त्वनन्तरं समये महाराजः ।

ततः प्रविशति महामोहो दुर्मतिश्च ।

युक्तितस्थापनं कथमित्यत आह—॥

ध्रुवमिति—॥ गुणैः विद्यावृत्तादिभिः उत्तरेषु श्रेष्ठेषु अपवदितुं दूषयितुं शीलमस्यास्तीति अपवादी ध्वनिः कण्ठध्वनिः सारः बलं यस्य स तथा परिकल्पितः वीतरागाणां परिव्राजकानां वेषो यथा सा तथोक्ता ॥ ४३ ॥

गृहपतिः डंभः अतिथिः दर्पः गौडदेशे डंभप्राचुर्यं लाटदेशे दर्पप्राचुर्यं चेत्यव-गन्तव्यं । गृहपतिरित्यादिका अशरीरिणी भारती ।

एषा पूर्वोक्ता । आर्येण ज्येष्ठेन ।

महाराजः महामोहः ।

तत एवमेताभ्यां सूचनानन्तरं दुर्मत्या सह महामोहः प्रविशति ।

नासूचितस्य पात्रस्य प्रवेशो निर्गमोपिवेति लक्षणात् ।

महामोहः (विचिन्त्य) प्रिये महासाहसिकस्य कुलघ्नस्य विवेकस्य विध्वंसने कृतप्रतिज्ञेन मया समाधिसाकाङ्क्षपुरुषसंक्षोभणाय प्रेषितास्सिंहवनगुप्तिन्यायेन परस्पराभिरक्षिताश्च कामक्रोधादयः कालोपपन्नकातर्यकलुषितास्सैकतसेतव इव भग्नव्यूहाः प्रतिनिवृत्य कथमप्यस्मन्मुखमवलोकयितुमक्षमाः प्रतिदिशं प्रस्थाय प्रायोपवेशमास्थिता इत्युपश्रुतमस्माभिः तदिह भवत्या तत्प्रेयसी रतिजिघांसातृष्णास्तत्सकाशङ्गमयित्वा मामकास्ते मन्त्रिणस्समाश्वासयितव्याः ।

दुर्मतिः—*अ-अउत्त एव्वं एव्व ताओ ताणं समीपं गमिआओ ।

महामोहः—साधु प्रिये साधु यदस्मत्कुलभोचितमनुष्ठितं भवत्यामत्याश्वस्तास्ते समरसमये समाहूतव्याः ।

दुर्मतिः—† एव्व एव्व ।

महामोहः—(विषादातिशयचाटयन्) प्रिये अद्ययावदप्रतिहतकीर्तिरपत्रपेहमसदृशेन दुरात्मना विवेकेन सह विवादस्संवृत्त इति यथा त्वं नारीषु निस्समाभ्यधिका तथाहं पुरुषेषु । यतः ।

* आर्यपुत्र एवमेव तास्तेषां समीपं गमिताः ।

† एवमेव ।

कृताप्रतिज्ञायेन तेन । समाधौ साकांक्षस्य पुरुषस्य संक्षोभणाय । सिंहवनगुप्तिन्यायेन सिंहाक्रान्तं वनं दुराधर्षं भवति वनस्य गाढतया सिंहोपि दुराक्रमः एवं सिंहवनयोः परस्परं गुप्तिः सिंहवनगुप्तिः तस्याः न्यायेन । काले तस्मिन् काले उपपन्नं कातर्यं भयं तेन कलुषिताः सैकताः सिकतानिर्मिताः सेतव इव प्रायोपवेशं आमरणमनुत्थानं उपश्रुतमाकर्णितं । तत्प्रेयसीः तेषां कामक्रोधलोभानां प्रेयसीः रतिजिघांसातृष्णा तेषां कामादीनां सकाशं गमयित्वा ।

अद्ययावत् एतावन्तं कालं इत्यर्थः अप्रतिहता कीर्तिर्यस्य स तथा । असदृशेन विवादो लज्जाहेतुः विवादश्च विवाहश्च समयोरेवशोभत इत्युक्तेः ।

कथमसदृशत्वं इत्यत आह यतेति—। निस्समाभ्यधिकत्वे हेतुमाह—॥

सुरदनुजगणास्स्वमूर्ध्नि नित्यं
निदधति शासनपत्रिकां मदीयां ।
प्रतिफलितलिपिप्रकारदीप्य
न्मणिमकुटांशुमषीरसानुलिप्ताम् ॥ ४४ ॥

अपि च ।

वर्गः स्वर्गसदां मया नियमितः क्षोणीभृतः किं पुनः
पद्मास्भोनिधिपर्वतेषु निहितास्तिस्रो मया मूर्त्तयः ।
विश्वं स्रष्टुमकर्तुमन्यथयितुं मद्भूरमोघक्रमा
सोहं कस्य वशे क एष न च मे किं कस्य वा कथ्यते ॥ ४५ ॥

(स्वगतं) किं तावदन्यकेनापि हेतुना प्रदीप्यमाने विवेके प्रतिविधातव्यं अस्तु नन्वहं महामोहः (प्रकाशं) प्रिये यद्यपि च सर्वेच मया प्रवर्त्तितास्समयभेदाः केश्चिदौपनिषदापशदै रहस्करकिरणा इव घनैः किञ्चिदन्तर्धापिताः यद्यपि च कामादयश्चिकीर्षितवैकल्यजनितवैलक्ष्यवशादनालक्ष्यागू-

सुरेति—॥ सुराणां दनुजानां च गणाः प्रतिफलितानां लिपीनां प्रकारेण दीप्यद्भिः मणिभिः इन्द्रनीलैः कृतस्य मकुटस्य अंशुरेव मषीरसः तेनानुलिप्तां मदीयां शासनपत्रिकां आज्ञापत्रिकां मूर्ध्नि निदधति ॥ ४४ ॥

अन्यदप्याह—॥

वर्गेति—॥ स्वर्गसदां देवानां वर्गः मयानियमितः एवं सति क्षोणीभृतः राजानः नियमिता इत्यत्र किं पुनर्वक्तव्यं तिस्रो मूर्त्तयः ब्रह्मविष्णुरुद्राः पद्मांभोनिधिपर्वतेषु कुशेशयदुग्धाब्धिकैलासेषु निहिताः विश्वं जगत् स्रष्टुं अकर्तुं पालयितुं अन्यथयितुं अन्यथा कर्तुं संहर्तुमित्यर्थः मद्भूः अमोघः फलवान् क्रमस्स्वभावो यस्यास्सा तथा सोहं कस्यपुरुषस्यवशे न कस्यापि मे वशे न कः सर्वोपि कस्य पुरुषस्य किं कथ्यते । मद्विभवस्य सर्वलोकविदितत्वात् न किंचदपि कस्यचिद्वक्तव्यमिति भावः ॥ ४५ ॥

किं प्रतिविधातव्यमिति विचारः अस्तु । नन्वहमिति समाधानं । मयाऽर्वत्र प्रतिष्ठिताः समयभेदाः कैश्चिदन्तर्धापिताः तिरोहिताः यद्यपि तिरोहिता एव चिकीर्षितस्य वैकल्येन जनितं वैलक्ष्यं येषां ते तथा विपर्यस्य व्यत्ययेन कत्वी ।

ष्मासते तथापि भेदमभेदञ्चवस्तूनां पूर्वपक्षसिद्धान्तौ च सर्वत्र विपर्यस्य विश्वं व्यामोहयामि अथवा पुनरहमहङ्कारादिसंमतमचरमप्रमाणप्रधानमलौकिकार्थकल्पनादुर्व्यसनहीनमर्थकाममात्रपुरुषार्थहृद्यमवितथं सिद्धान्तं गम्भीरयुक्तिभिरुत्तम्भयन् वृथोत्साहमेव जडमतिं विवेकं विधित्सामि ।

अहह ।

पृथिव्यापस्तेजः पवन इति तत्वानि मिलितै-
रमीभिश्चैतन्यं भवति मदशक्त्यादिनयतः ।
किमात्मा दृष्टोऽन्यः किमुत वपुषि ध्वंसिनि सुखं
तदेतद्वागीशस्समतनुत लोकायतमतम् ॥ ४६ ॥

उपनिषदपि खलु बलवदभिमतसमयबलीयस्त्वमभिसन्धाय व्यवस्थापयति "असुराणां ह्येषोपनिष"दिति तदिह त्रय्यन्त-

---

स्थूलोऽहं कृशोऽहमित्यनुभवो अहंकारः आदिशब्देन ममेदं गृहक्षेत्रादिकमित्येवं रूपममकारो गृह्यते तत् संमतमचरमं आदिमं प्रत्यक्षं प्रमाणं प्रधानं यस्मिन् तं अलौकिकानामर्थानां कल्पना सृष्टिरेव दुर्व्यसनं वृथायासः तेनहीनमर्थकामावेवपुरुषार्थौ यस्मिन् सः अर्थकाममात्रपुरुषार्थः तत्वेन हृद्यमवितथं शास्त्रं सिद्धान्तं उद्भावयन्वृथोत्साहं व्यर्थोत्साहं विधित्सामि विधातुमिच्छामि ।

प्रकृतमेव सिद्धान्तं युक्तितः समुत्तंभयन् वक्तृविशेषादप्यस्य प्राबल्यं दर्शयति अहहेति—॥ हर्षद्योतकमिदं ।

पृथिवीति—॥ पृथिव्यादीनि चत्वार्येव तत्वानि मिलितैः युक्तैः मदशक्त्यादिनयतः केषांचिद्वस्तूनां संमेलने मदजननसमर्थाशक्तिर्भवते तद्वदेतेषामपि मिलितानां चैतन्यंजनितमस्ति अतः एतस्माच्चैतन्यात् अन्य आत्मा दृष्टः किं न दृश्यत एव एतद्वियोगे चैतन्यमपि नश्यति, एतत् समुदायरूपे वपुषि ध्वंसिनि नष्टे सति किमुत सुखं न किंचिदपि सुखमस्ति अतः युक्तियुक्तोयं सिद्धान्तः वागीशः बृहस्पतिः तदेतत्लोकायतमतं समतनुत ॥ ४६ ॥

एतन्मतस्य प्राबल्ये उपनिषदपि प्रमाणमित्याह उपनिषदपीति—॥

बलवतामसुराणामभिमतस्य समयस्य बलीयस्त्वमभिसन्धायस्मृत्वा व्यवस्थापयति केयमुपनिषदित्यत आह असुराणामिति—। उपनिषदां प्रामाण्यं वेदान्त-

वादिभिरुपनिषत्प्रामाण्यसमर्थनमपि अस्माकमरातिक-
रलिखितविजयपत्रायते ।

अपि च ।

स्वमतविपरीतमन्यैः
क्रोशति हृदये विधीयते स्वैरं ।
अमरगुरुशिक्षितार्थै
रस्मत्सार्थैर्यथाहृदयम् ॥ ४७ ॥

दुर्मतिः-*अज्जउत्त पच्चक्खमत्तप्पमाणो बुहप्फइसिद्धन्तो बहुप्पमाणसाहि
अपरोक्खविसआणं बहूणं इअरसिद्धंताणं पुरओ कहं ठाइ ।

महामोहः—प्रिये नूनं स्वमतप्राबल्यबुभुत्सया परिपृच्छसि तदेत-
दाकर्ण्यताम् ।

परमनुगुणयन्तः पण्डितंमन्यवर्गा
नवितथमिव जल्पन्त्यागमाः किञ्चिदेते ।
विबुधगुरुमतेऽस्मिन् व्यक्तमुत्तभ्यमाने
मुषितनिखिलसारा मौनमुद्रां भजन्ते ॥ ४८ ॥

* आर्यपुत्र प्रत्यक्षमात्रप्रमाणो बृहस्पतिसिद्धान्तः बहुप्रमाणसाधितपरोक्षवि-
षयाणां बहूनामितरसिद्धान्तानां पुरतः कथं तिष्ठेत् ।

वेदिभिरंगीकृतं तदस्माकमत्यन्तमनुकूल मित्याह तदिहेति—। तदस्या उपनिष-
त्वादिह जगति अरातिकरलिखितविजयपत्रायते शत्रुकरलिखितविजयपत्रं भवति ।
मतान्तराणां स्वानुभवविरोधं लोकायतिकस्य तदभावं दर्शयति—।

स्वमतेति—॥ अन्यैः मतप्रवर्तकैः हृदये क्रोशति एवं नेति प्रलपतिस्वैरं यथेच्छया
स्वमतविपरीतं स्वानुभवविपरीतं विधीयते क्रियते अमरगुरुणा शिक्षितार्थैः
निर्णीततत्वैः अस्मत्सार्थैः आस्माकैः यथाहृदयं यथानुभवं विधीयते ॥ ४७ ॥

स्वमतप्राबल्यस्य बुभुत्सया न त्वेतत् दौर्बल्यशंकया किन्तदित्यत आह—॥

परमिति—॥ एते आगमाः पण्डितंमन्यानां आत्मनः पण्डितत्वेन मन्य-
मानानां वर्गान्मूढान् परमनुगुणयन्तः अनुकूलान्कुर्वन्तः किंचिदवितथं जल्पन्ति
अस्मिन् विबुधगुरुमते व्यक्तमुत्तभ्यमाने प्रकाश्यमाने सति मुषिताः प्रतिक्षिप्ताः
निखिलास्साराः युक्तयो येषां ते तथा मौनमुद्रां भजन्ते ॥ ४८ ॥

न खलु सहस्रमपि प्रतिसूर्याः कदाचिदपि सूर्यमभिभवन्ति ।

दुर्मतिः—* अ॰अउत्त पबलअमे इमस्सिं पुरंदरपुरोहिअमए का मुत्ती को वा भोओ का वा देवआ ।

महामोहः—श्रूयतान्तावदवहितया ।

शरीरप्रलयो मुक्तिर्भोगस्तु रतिरुत्तमा ।
देवतास्तत्प्रदायिन्यस्त्रियस्तारुण्यभूषणाः ॥ ४९ ॥

एवञ्चदेवि । परमार्थदर्शिन्यास्तवप्रत्यक्षत एवैते परिप्रश्नाः प्रत्युक्ताः अपिचास्माकं विवेकरूपवैरिविजयेएतासामेव प्रत्यक्षदेवतानां प्रसादः प्रधानकारणं

दुर्मतिः—† होदुणाम पसादो इत्थिआणं सल्लावजोग्गाणं सचेअणाणं देवआणं तेण कहं विवेओ विजेदुंतिरइ ।

महामोहः—इत्थंनाम ।

अपितपश्चिरतानाप्यधीतागमाना
मपियमनियमाद्यैरन्वहं शिक्षितानां ।

* आर्यपुत्र प्रबलतमेस्मिन्पुरन्दरपुरोहितमतेकामुक्तिः कोवाभोगः कावादेवता

† भवतु नाम प्रसादः स्त्रीणां सल्लापयोग्यानां सचेतनानां देवतानां तेन कथं विवेको विजेतुं तीर्यते ।

बहूनामित्युक्तं अत्र उत्तरमाह—॥

शरीरेति—॥ शरीरस्य प्रकृष्टो लयः प्रलयः स्त्रियाश्च तारुण्यं यौवनं भूषणं यासां ताः तथा ॥ ४९ ॥

एवं ते परिप्रश्नाः प्रत्युक्ताः विवेकरूपस्य वैरिणो विजये भवतु नाम प्रसादः स्त्रीणां सल्लापयोग्यानां सचेतनानां अनेन प्रतिमारूपाभ्यो देवताभ्यो वैलक्षण्यं तेन कथं विवेको विजेतुं तीर्यते शक्यते अत्रोत्तरमाह—॥

अपीति—॥ अधीताः आगमाः यैस्तेषां यमनियमाद्यैः आद्यशब्देन आसनादयो गृह्यन्ते अत्र ।

ब्रह्मचर्यमहिंसाच सत्यास्थेयापरिग्रहाः ।
योवेत्तिनिष्कामो योग्यतां समनोनयत् ॥

Ocean of Milk at the time of Pralaya. He alone is the one and the supreme Brahman.

Then, what can be the meaning of the mantra? The interpretation that I suggest is as follows:—

The relation between Brahma and the world is indicated by the fact that Brahma is the Cause of every t hing, of motion as well as of cessation of motion, of light as well of as darkness, of evolution as well as of involution. To symbolise this, a mystic word आ३ is suggested by the seer as ओम् has been suggested by other seers and accepted by the people. Sounds often by themselves convey ideas though mostly convention fixes the meanings of words. The long-drawn sound आ३ suggests the idea of fullness. It may be objected, if आ३ was a mystic word meaning much the same as ओम्, why did it not survive the lapse of time while the latter did? The answer is, ओम् represents the idea in a much better way for अ represents the first step in evolution and म् the last step in involution, while the compound sound suggests the idea of "the Full." Hence the fitter has survived.

S'ankarāchārya takes अधिदैवतम् to mean देवताविषयं or 'regarding the gods' (देवता अधिकृत्य इत्यधिदैवतम्) But as commonly understood the word means Brahma as God i.e. the relation between Brahma and the world. C. F. the quotation from S'ruti, "सवै पुरुष उच्यते । आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत" given by S'rīdhara in his Com mentary or "पुरुषश्चाचधिदैवतम्" Gītā VIII. 4. (29)

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन
चैतदुपस्मरत्यभीक्ष्णं संकल्पः ॥ ३० ॥

TRANSLATION.

And the relation between Brahma and the individual soul is this; the mind seems to go to Him (and though it cannot really reach Him at first), a determined man constantly meditates on Him with this mind. (30)

COMMENTARY.

The ordinary man cannot realise Brahma in his mind; hence to him Brahma is an object that has no connexion with the individnal soul. But if he wants to know Brahma and perseveres in spite of his impure mind, his mind will in time be purified and will have vision of Brahma, when he will perceive the unity between Brahma and the Jīva.

In this connexion, see the commentary on mantra 3. (30)

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाऽभिहैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ३१ ॥

TRANSLATION.

He is Tad-vanam (That Light) and is to be worshipped as such. All people do long for him who know Him as such. (31)

COMMENTARY

Brahma is Light. By meditating on Light the साधक attains Light and "what is in him dark is illumined, what is low raised and supported." Consequently, his presence is filled with divine love, so that all people love him, and follow him, for "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ (Gītā III. 21).

Note:—One of the meanings of the word वनम् is light (see Apte's Dictionary). (31)

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्-
ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ३२ ॥

TRANSLATION

You said, " Recite to me the Upaniṣad." Verily we have just recited to thee the Upaniṣad—the discourse on the highest knowledge. *(32).*

COMMENTRY.

The disciple asks the preceptor to teach him the highest knowledge, i.e. knowledge regarding Brahma and the preceptor imparts to him the knowledge in mantras 1 to 31. He now concludes with a practical lesson (next mantra).

उपनिषद् primarily means true knowledge and only secondarily means the books from which this knowledge can be derived (the upaniṣads). उपनिषद्ब्राह्मी means dis course on true knowledge. (32)

तस्यै तपो दमः कर्मेति प्रतिष्ठा
वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ३३ ॥

TRANSLATION.

Of that science, penance, self-control and work form the foundation and the Vedas, all the Vedāngas and truth the abode. *(33)*

COMMENTARY.

This is the practical lesson. Unless one practises virtue, one can never derive any benefit from studying

good books. Hence तपः, दमः and कर्म are first necessary. The body must not be allowed to be the master of the man. Hence it should be kept under proper check. The mind must be controlled. And the energy thus (i.e. by तपः and दमः) saved should be spent in actions of love and renunciation. Then the mind will be in a fit condition to receive or rather to respond to the lesson and the man's study will be fruitful. (33)

यो वा एतामेवं वेदापहत्यपाप्मानमनन्ते
स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥३४॥

॥ इति चतुर्थः खण्डः ॥

इति साम वेदीयकेनोपनिषत्समाप्ता ॥

TRANSLATION.

He who knows this (the science of Brahma) to be of such nature, destroys his sin and is established beyond return in the highest heaven. *(34)*

COMMENTARY

He who knows that without practising virtue himself no one can understand the full import of a sacred text, is a practical philosopher. His is living philosophy. Consequently his Vedantic study lead him to Brahma.

The स्वर्ग mentioned here does not mean 'heaven' as it is commonly understood. For, the Vedantist has no desire for such places. He wants to be merged in Existence Absolute, Knowledge Absolute and Bliss Absolute. (34)

K. C.

The End.

ऽवश्यमधिमासपातः। अत्र सौरसावनाच्चान्द्रसावनस्य न्यूनत्वात्। तत्र स्पष्टशुद्धिर्यत्सङ्क्रान्त्यधिदिने युता त्रिंशदधिका तत्सङ्क्रान्तिमध्येऽधिमासश्चान्द्रो भवति। स्पष्टशुद्धिस्तु सम्प्रति मध्यमचान्द्री शुद्धिर्मन्दफलचान्द्रदिनोना भवतीति प्रतिपादितम्। अतो मध्यमचान्द्री शुद्धिश्चत्वारिंशत्पलाधिकत्रिपञ्चाशद्घट्यधिकैकविंशतिदिनाधिका तदोक्तकालेऽधिमासः स्पष्टो भवतीति फलितम्। अत एव मेषसङ्क्रान्तावधिकदिनस्योक्तरीत्याऽऽधिक्याद्यदा स्पष्टा शुद्धिरष्टपलाधिकषट्पञ्चघटीयुताष्टादशदिनाधिका पञ्चत्रिंशत्पलाधिकाष्टघटीयुतैकविंशतिदिनाधिका मध्यमा शुद्धिर्वा तदा संप्रति मीनमेषसङ्क्रान्तिमध्येऽप्यधिमासः पततीति न क्षतिः। एवं द्विसङ्क्रान्तिमासोऽपि यदा स्पष्टचान्द्रमाससावनदिनेभ्यः स्पष्टसौरमाससावनदिनानि न्यूनानि तदैव। न्यूनसौरमाससावनदिसम्भवस्तु सूर्यपरमगताविति।

संप्रति २। १८। एतावन्मन्दोच्चेन वृश्चिकादित्रये परमन्यूनसौरदिवसात् 'क्षयः कार्त्तिकादित्रये' इत्युक्तम्। न च चान्द्रमाससावनं यदा कदाचिन्न्यूनं संप्रति कार्त्तिकादिषु भवत्येव कथं न क्षयमास इति वाच्यम्। दर्शान्तारम्भसावनात् सौरमाससावनं यदा कदाचिन्न्यूनारम्भसमाप्तिकसौरैकमाससावनदिनानां तन्न्यूनानां वर्त्तमानत्वमिति विवक्षयात्। एतादृशं तु सम्प्रति यदा कन्यासङ्क्रान्तिः प्रतिपदि भवति तदानीं तुलावृश्चिकसङ्क्रान्ती द्वितीयायां भवतः। ततोऽग्रे धनुःसङ्क्रान्ति-२९। २१। ३९ रेभिर्दिनैरित्येभ्यो यदा चन्द्रसावनमधिकं स्यात् तदा कदाचिदमायां धनुःसङ्क्रान्तिरतोऽयं चान्द्रो मासो द्विसङ्क्रान्तिः। अथ चान्द्रो मासो धनुःस्थसूर्येण समाप्त इति "मेषादिस्थे सवितरि"—इति वचनेन मार्गशीर्षसंज्ञः। पूर्वचान्द्रमासस्तु तुलास्थेन सूर्येण समाप्त इत्याश्विनः। अतः कार्त्तिकाख्यो लुप्तः। यदाऽमायां न संक्रान्तिः किन्तु प्रतिपदि तदा वृश्चिकार्केण माससमाप्तेः कार्त्तिकः शुद्धस्ततोऽग्रे मकरसंक्रान्ति—२९। १५। ३ रेभिः सावनदिनैरित्येभ्यश्चान्द्रसावनमधिकं

यदा तदा मकरसंक्रान्तिरमायामत उक्तरीत्या मार्गशीर्षो लुप्तः । यदाऽत्रापि न्यूनचान्द्रसावनेन प्रतिपदि मकरसंक्रान्तिस्तदा मार्गशीर्षो व्यक्त एव न लुप्तस्ततोऽग्रे कुम्भसंक्रान्ति—२९ । २४ दैर्भिर्दिनैरित्येभ्यो यदा चन्द्रसावनमधिकं तदाऽमायां कुम्भसंक्रान्तिरत उक्तरीत्या पौषो लुप्तः । यदाऽत्रापि न्यूनचान्द्रसावनेन लुप्तस्तदा मीनसंक्रान्ति-२९ । ४९ । ४३ दैर्भिर्दिनै-रित्येभ्यश्चान्द्रसावनमधिकं चेत् तदा मीनसंक्रान्तिरमायामित्युक्तरीत्या माघो लुप्तः । यदाऽत्रापि न क्षयस्तदाऽग्रे मेषसंक्रान्ति-३० । २३ । ३१ दैर्भिर्दिनैरित्येभ्यश्चान्द्रसावनदिनानामधिकत्वाभावाच्च द्विसंक्रान्तिमाससम्भवः । एवं कार्त्तिकादिचतुष्टयान्यतरः क्षयमासः सम्भवति । अनयैव रीत्या तुलावृश्चिकसंक्रान्ती प्रतिपदि भवतस्तदाऽप्येषु मासेष्वन्यतमः क्षयः संभवति न निर्णीतः पतति । चान्द्रसावनस्यानियतत्वेन न्यूनत्वस्यापि सम्भवादतः कदाचिदित्युक्तम् । न च कार्त्तिकादिचतुर्मासेपूक्तरीत्या क्षयमाससम्भवात् कार्त्तिकादित्रये इत्यसंगतमिति वाच्यं स्पष्टस्यानियतत्वात् । आचार्यैरापाततो मध्यमचान्द्रसावनदिनानामधिकानामङ्गीकारात् । न हि कुम्भसंक्रान्तितो मीनसंक्रान्तिर्मध्यमचान्द्रसावनदिनेभ्यो २९ । ३१ । ५० न्यूनदिनैः संभवति । येन माघः क्षयः स्यात् । यद्वा कार्त्तिकादित्रयं चेत्यत्राव्यवहितत्वेन कार्त्तिकादित्रयम् । कार्त्तिक आदिः पूर्वं स्वारम्भात् पूर्वकाले यस्य तच्च तत् त्रयं च आदित्रयमित्यनेनैव "मासानां मार्गशीर्षोऽहम्"-इति भगवदुक्तेन वा मार्गशीर्षत्रयमित्यर्थस्तेन कार्त्तिकचतुष्टये इति पर्यवसानात् । अन्यथा कार्त्तिकत्रये इत्यनेनैवादिग्रहणमनुपपन्नं स्यात् । अत एवास्य क्षयमासस्यैकमासगामित्वादंहसः पापस्य पतिरिति माधवाचार्यैरुक्त्युत्पत्त्याऽहस्पतित्वमुक्तम् ।

"शुद्धेन्दुमासे शुद्धार्कसंक्रमद्वयमस्ति चेत् ।
शून्यमासः स विज्ञेयो न तत्र शुभमाचरेत् ॥

अंहो नाम महापापं शून्यमासे शुभे कृते ।
जायतेऽहस्पतिः प्रोक्तः संज्ञाभेदेन चेति सः" ॥

इति ब्रह्मसिद्धान्तोक्तेश्च ।

अथ कन्यातुलावृश्चिकान्यतमसंक्रान्तिः प्रतिपद्यधिमासं विना न भवतीति क्षयमासात् पूर्वमधिमासः पतत्यसंशयमिति त्र्यंशोनविंशत्याविद्धाविंशत्यवसानान्तर्गतस्पष्टशुद्ध्या द्वाविंशत्या चतुर्विंशमित्यवसानान्तर्गतमध्यमशुद्ध्या वा क्षयमाससम्भव इति फलितम् २ । १८ ईदृशे रविमन्दोच्चे ।

अथ यदा क्षयमासस्तदा कुम्भमीनस्थेऽर्के गत्यपचयेन सौरसावनस्य चन्द्रसावनाधिक्यावश्यंसम्भवेन मीनसंक्रान्तिर्मेषसंक्रान्तिर्वा पूर्वामास्यसंक्रमात् स्वसावनदिवसैः प्रतिपदि भवत्यवश्यमिति मीनान्तभोगावधि तत्सौरवर्षे क्षयमासोत्तरं द्वितीयोऽप्यसंक्रान्तिमासोऽधिमासो भवत्यत उक्तं तदा वर्षमध्येऽधिमासद्वयं चेति ।

अथ यथा—
"तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्धे तदुत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ" ॥

इति वचनेन क्षयमासोत्पन्नमृतानां जन्ममासफलश्राद्धाधिकस्य निर्णयः कृतः । जातकशास्त्रे चैत्रादिद्वादशमासानां फलश्रवणात् । तथाऽसंक्रान्तिचान्द्रमासाधिमासे तादृशानां कथं निर्णयः । चैत्राद्यन्यतमसंज्ञाभावात् । न चास्य पूर्वशेषत्वेन संज्ञाभावाभासेऽपि पूर्वमासान्तर्गतत्वात् संज्ञा युक्ता । तथा हि । यदा शुद्धाषाढस्य कृष्णचतुर्दश्यां दर्शे वाऽर्कसंक्रान्तिर्भवति । शुद्धश्रावणमासस्य शुक्लपक्षे प्रतिपदि द्वितीयायां वा सिंहसंक्रान्तिस्तदा कर्कसंक्रान्तियुक्तस्य शुद्धाषाढत्वं युक्तम् । तदीयस्य दर्शस्य कर्कस्थे रवाववसितत्वात् सिंहसंक्रान्तियुक्तस्यापि श्रावणत्वमुचितम् । तदीयदर्शस्य सिंहस्थे रवाववसितत्वात् तेनैव न्यायेन

तयोर्मध्यवर्त्तिनः संक्रान्तिरहितमासस्य दर्शः कर्कस्थ एव रवौ पूर्यत इति पूर्वाषाढवदेतस्याप्याषाढत्वं युक्तम् । "मेषादिस्थे"—इत्यादिवचनात् ।

"तावन्मासो वर्त्तमानो दिनषष्ट्यात्मकः स तु ।
निःशेषज्ञः फाल्गुनश्चेच्छुद्धः पापार्धयुक् क्रमात्" इति ॥
ब्रह्मसिद्धान्तोक्तेश्चेति वाच्यम् ।

तथा शिष्टव्यवहारादर्शनादिति चेत् । उच्यते । मेषादिसंक्रान्तीनामेव शुद्धमाससंज्ञा प्रयोजकत्वादसंक्रान्तिमासस्यासंज्ञस्य ।

"षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्धं तु परित्यज्य कर्त्तव्या उत्तरे क्रिया ॥
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः ।
एवं षष्टिदिनो मासस्तदर्धं तु मलिम्लुचः" ॥
"षष्ट्या हि दिवसैर्मासः कथितो बादरायणैः ।
पूर्वार्धं तु परित्यज्य उत्तरार्धं प्रशस्यते ॥"

इत्यादिज्योतिःपितामहादिवचनैरधिमासस्याधिममाससंज्ञत्वप्रतिपादनेन तदन्तर्गतत्वाच्च चातः । ननु स्पष्टमानपतितासंक्रान्तिमासस्याधिकत्वं न युक्तम् ।

"शुद्धेन्दुमासे शुद्धार्कसंक्रमो नास्ति यत्र तम् ।
संसर्पमासं सत्कर्मनाशनं विद्धि नारद ॥"
इति ब्रह्मसिद्धान्तवचनेन तस्य संसर्पसंज्ञत्वात् ।

किन्तु

"मध्ये चान्द्रमसे नास्ति मध्यमार्कस्य संक्रमः ।
यत्रासावधिकः पापी सर्वकर्मविनाशनः"—इति ॥

तद्वचनेन पूर्वप्रतिपादितमध्यममानपतितासंक्रान्तिमासस्याधिकत्वं युक्तम् । तस्मान्मध्यममानेनासंक्रान्तिमासस्याधिकत्वे सिद्धेऽधिमाससंज्ञा-

नार्थं स्फुट इति स्थाने मध्यमपदापेक्षा युक्ता । अन्यथाऽधिमास इति पद-स्थाने संसर्प इत्युक्तं स्यात् । न च वचनेन मध्यासंक्रान्तिमासरूपाधिकस्य मध्यमपदं विनाऽपि सिद्धत्वात् तस्य ताद्रूप्यत्वाच्च मध्यमपदापेक्षा । स्फुट इति पदं तु क्षयमासार्थमेव दत्तम् । अन्यथाऽधिकमासस्य मध्यममानेन सत्त्वात् । तदनुरोधेन मध्यमानवशात् क्षयमासानुत्पत्त्यापत्तेः । मध्यमसौरसावनान्मध्यमचान्द्रस्य न्यूनत्वात् । तथा च मूले मध्यमानाभिप्रायेणाधिमास उक्त इति नोक्तदोषः । एवं यदधिमासवचनेषु संक्रान्तिपदं मासपदं च तद्विशेषवचनानुरोधेन मध्यमपरं व्याख्येयं न स्फुटपरम् । युक्तं चैतत् । अहर्गणानयनेन मध्यममानानीताधिशेषदिनानां मध्यामान्तमध्यमसंक्रान्त्यन्तवर्त्तिनां गतमासयोजनेऽधिकत्वेनाधिकमासयोजने त्याग इत्यस्य "गोले दर्शयतः"-इत्यादिश्लोकाभ्यां मध्यममानेन प्रतिपादनात् । स्पष्टमानेन मार्गशीर्षत्रयेऽधिमासाभावनिश्चयात् । "सर्वेषु मासेष्वधिमासकः स्यात्"-इति विरोधाच्च । अस्य "द्वात्रिंशद्भिर्गतैर्मासैः"-इत्युक्तावधिनाऽवश्यं सम्भवश्च । एतज्ज्ञानं तु मध्यामावास्यां मध्यमसंक्रान्तिं च प्रसाध्योक्तलक्षणेन कार्यमतः सर्वं सुन्दरमिति वाच्यम् । स्पष्टमानेनाधिमासाभावे 'स्पष्टोऽधिमासः पतितोऽप्यलब्धः'-इति विशेषस्यासङ्गतत्वापत्तेरिति चेत् । स्पष्टाधिमासज्ञानार्थमेवास्य लक्षणस्य प्रवृत्तेः । मध्यसंक्रान्तिमासस्याधिकत्वेऽपि स्पष्टासंक्रान्तिमासस्योक्तलक्षणेनाधिकत्वे बाधकाभावाच्च वस्तुतः स्पष्टमानस्य पारमार्थिकत्वेन तदनुरोधात् पतितासंक्रान्तिमासस्याधिकत्वं मुख्यं वस्तुभूतार्थत्वात् । मध्यमस्य काल्पनिकत्वेन वचनबलादमुख्यम् । अन्यथा—

"एकस्मिन्नपि वर्षे चेद्द्वौ मासावधिमासकौ ।
पूर्वो मासः प्रशस्तः स्यादपरस्त्वधिमासकः ॥"
"एकस्मिन्नपि वर्षे यद्येदं लक्ष्म दृश्यते उभयोः ।
तत्रोत्तरोऽधिमासः स्फुटगत्या चायमर्केन्द्वोः" ॥

इति जाबालिवचनमनुपपन्नं स्यात् ।

अत एव

"शिनीवालीमतिक्रम्य यदा संक्रमते रविः ।

रविणा लङ्घितो मासो ह्यनर्हः सर्वकर्मसु" ॥

इति वचनेन क्षयमासात् पूर्वोत्तराधिमासयोर्निषिद्धयोर्मध्ये

"मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।

प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः" ॥

इत्याद्युक्तवचनैः पूर्वाधिमासस्य कर्मार्हत्वेनाधिमासवन्न निषिद्धत्वमिति प्रतिपादनात् । सम्यक् सर्पतीति संसर्प इति "शुद्धेन्दुमासे"-इत्यादिवचनेन क्षयमासात् पूर्वाधिमासः संसर्प इति युक्तम् ।

यथा—

'माधवाद्येषु षट्स्वेकमासे दर्शद्वयं यदा ।

द्विराषाढः स विज्ञेय .... ॥"

इति वृद्धमिहिरवचनेन द्विराषाढसंज्ञा ।

केचित् तु पूर्वपतिताधिमासस्य कमानर्हत्वमितराधिमासजातीयत्वात् । क्षयोत्तराधिमासस्तु क्षयानुरोधाच्च निषिद्धस्तादृश इति कर्मार्हत्वेन संसर्पः ।

"कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।

सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः" ॥

इति वचनाच्चेत्याहुस्तन्न समूलबहुवचनविरोधात् । यत् तु दर्शान्ते सूर्यचन्द्रयोः पूर्वापरान्तराभावेन योगो भूगर्भस्थानां दृश्योऽय इति केवलदर्शान्तमासान्तस्तु भूगर्भगाणाम् । भूपृष्ठस्थानां तु यदा सूर्यचन्द्रयोर्योगो दृश्योऽयस्तदा मासान्त इति । लम्बनघटीसंस्कृतगणिना-

गतप्रसिद्धदर्शान्तो मासान्तः सिद्धः । सूर्यग्रहे सूर्यचन्द्रयोरेकदृक्सूत्रस्थत्वसम्पादनार्थं लम्बनस्य साधितत्वादतस्तादृग्दर्शान्तमासाभ्यन्तरे सूर्यसंक्रमस्तदा शुद्धोऽन्यथाऽशुद्धोऽधिक इति पर्यवसन्नं न केवलदर्शान्ताभिप्रायेण युक्तम् ।

तथा च तद्वाक्यम् ।

"इदं यदुक्तं क्षितिगर्भगायां कुपृष्ठगानामथ संप्रवक्ष्ये ।
यः साधितो दर्शविरामकालः स्फुटो भवेल्लम्बनसंस्कृतोऽत्र ॥
यतः स्फुटे दर्शविरामकाले दृक्सूत्रसंस्थौ रविशीतरश्मी ।
कुपृष्ठगानामथ निश्चयेन स्यातां हि तद्गोलविदो वदन्ति ॥

इति जल्पितं तत्र ।

"भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम् ।"

इति सूर्यसिद्धान्तोक्तेन । लौकिके च पूर्णभगणान्तरेण सूर्यचन्द्रयोश्चान्द्रमासप्रतिपादनात् केवलदर्शान्त एव मासान्तः । नान्यत्र तयोः पूर्णभगणान्तराभावात् । न हि मासान्ते द्वयोर्ग्रयुतिर्हेतुर्येन तदावश्यकता स्यात् । अत एव सूर्यग्रहे स्वैकदृक्सूत्रे सूर्यचन्द्रौ तदा स्वस्य सूर्यदर्शने चन्द्रः प्रतिबन्धको नान्यथेति लम्बनदानमावश्यकम् । किञ्च चैत्रादिमासात्मककालः सर्वत्रैकरूपः । भवदुक्तौ त्वेकस्मिन् क्षणे कुत्रचिच्चैत्रः क्वचिद्वैशाखः । एवमधिमासोऽपि सर्वदेशे एककाले न भवतीति विक् ।

यदपि अधिमासनिर्णये दर्शान्तमासं प्रसिद्धं विहाय मण्डलान्तमासोऽङ्गीकृतः । तथा हि दर्शान्तकाले मण्डलकेन्द्रयोरेव प्रागपरान्तराभावो न मण्डलयोः । तथा च "रवीन्द्वोर्युतेः संयुतिर्याबदन्य।"-इत्यादिवाक्येन मासस्य रविचन्द्रसंयोगकालावधिकत्वमेव प्रति-

पाद्यते । एवं च चन्द्रबिम्बापरभागस्य यदाऽर्कबिम्बप्राङ्नेमिदेशाच्चिःसरणं तदैव तयोःसंयोग इति तदवधिकमास एव मास इति वक्तुं युक्तम् । स च विधोरर्कमण्डलभोगकालेनाधिक एव सम्पद्यते तन्मानं तु गत्यन्तरकलाभिः षष्टिर्घटिकास्तदा मानैक्यखण्डकलाभिः का इत्यनुपातेन । अत एवागतफलं द्विगुणमासन्नतया

"चन्द्रार्कयोस्तु बिम्बैक्यं प्रतिपद्दर्शसन्धिषु ।
अमान्तादुभयत्रापि स्पर्शनाड्योऽर्कमण्डलम्" ॥

इत्युक्तं स्वग्रन्थे । तथा च प्रागमान्तादर्वागेव प्रथमसंक्रमेऽनन्तरमव्यवहितद्वितीयामान्तान्मण्डलभोगकालाधिकावादत एव द्वितीयसंक्रमस्तदा स मासस्त्वसंक्रान्तित्वादधिक इति ।

"सवितृमण्डलमेति यदा शशी तदनु संक्रमणं कुरुते रविः ।
सकलहोत्सवनाशकरस्तदा मुनिवरैः कथितोऽधिकमासकः" ॥

इत्यत्र मण्डलपदोपादानात् ।

'स्फुटगत्या यदा चन्द्रो रविमण्डलनेमिगः ।
तदूर्ध्वं संक्रमे भानोर्मासः स स्यान्मलिम्लुचः ॥"
"अमां संत्यज्य घटिकास्तिस्रः किंस्तुघ्नसंज्ञके ।
संक्रान्तिं कुरुते भानुः पूर्वमासोऽधिकः स्मृतः ॥"

इति पौलिशवशिष्ठोक्तेश्च । एवं पूर्वदर्शान्ताद्घटीत्रयादनन्तरं पूर्वसंक्रमे सत्येव क्षयमासः । अन्यथा शुद्ध इति उक्तन्यायात् ।

तथा च तद्वाक्यम् ।

"दर्शावतो मण्डलनाडिकान्तं मासः स सूर्येन्दुसमागमान्तः ।
तदन्तरे चेद्रविसंक्रमः स्यात् तदा स शुद्धस्त्वधिकोऽन्यथाऽसौ ॥"

इति सिद्धान्तसुन्दरकारेण जल्पितं तदप्यसत् । भगणा-

सिद्धान्तमाह—

द्वादशाहवदुभयविधं बादराय-
णोऽतः ॥ ४ । ४ । १२ ॥

अत एव मनसेति विशेषणाद्विकल्पाऽऽमननाच्चेति लिङ्गद्वयात् । यदा शरीरादिसङ्कल्पस्तदा सशरीरेन्द्रियत्वम् । यदा तु तत्सङ्कल्पाऽभावस्तदा शरीरेन्द्रियराहित्यमित्युभयविधं विदुष ऐश्वर्यं बादरायण आचार्यो मन्यते ॥ द्वादशाहवत् ॥ यथा द्वादशाहमृद्धिकामाः उपेयुरिति उपेयचोदनागम्यत्वाद् द्वादशाहस्य सत्रत्वं द्वादशाहेन प्रजाकामं याजयेदित्यहर्गणत्वे सति यजतिचोदनागम्यत्वादहीनत्वं चेत्युभयविधत्वं तद्वदित्यर्थः ॥

ननु विदुषः शरीराद्यभावे कथं भोगस्तत्राह—

तन्वभावे सन्ध्यवदुपपत्तेः ॥ ४ । ४ । १३ ॥

तनोः सेन्द्रियशरीरस्याऽभावकाले सन्ध्यवत् । यथा स्वप्ने मानसिकविषयभोगो जाग्रद्भोगविलक्षणस्तद्भोगः । कुतः । मनसैतान् कामान् पश्यन् रमत इति श्रुतेर्भोगे साधनान्तरं वारयन्त्या एवमेवोपपत्तेरित्यर्थः ॥

ननु देहाद्यभावेऽपि भोगसत्त्वे सशरीरताङ्गीकारो व्यर्थस्तत्राह—

भावे जाग्रद्वत् ॥ । ४ । ४ । १४ ॥

देहादिभावकाले जाग्रद्वद्भोगः, स्वप्नभोगविलक्षणो भवतीत्यर्थः ॥

ननु विकल्पामननलिङ्गेन विदुषोऽनेकशरीराणि, स-

न्तीत्युक्तं तदू व्यर्थं निरात्मकेषु तेषु भोगायोगादित्याक्षेपे इदमाह—

प्रदीपवदावेशस्तथाहि दर्शयति ॥ ४ । ४ । १५ ॥

किं विदुषा सृज्यमानानि शरीराणि दारुयन्त्रवन्निरात्मकानि? उत, अस्मदादिदेहवत् सात्मकानीति संदेहः । पूर्वपक्षे विदुष एकस्मिन्नेव देहे भोगः फलं, सिद्धान्ते सर्वेष्वपीति बोध्यम् । तत्राऽनाद्यन्तःकरणपरिच्छिन्नस्य भोक्तुर्विदुषः शरीरान्तरेषु प्रवेशायोगान्निरात्मकानीति प्राप्ते, ब्रूमः । विदुषा सृज्यमानेषु सेन्द्रियमनःसु बहुषु देहेषु विदुषश्चावेशोऽभिव्यक्तिर्विद्यासामर्थ्यादुपपद्यते । पुरातनान्तःकरणपरिच्छेदस्य विद्वांसं योगसामर्थ्याद्व्यापकं प्रत्यप्रतिबन्धकत्वात् प्रदीपवत् । यथा प्रदीप एकोऽनेकवर्तिषु प्रविशति, तथा विद्वाननेकागन्तुकान्तःकरणद्वारा देहेषु प्रविशति । तथाहि दर्शयति शास्त्रम्—एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधेत्यादि । यद्यपि विदुषः सर्वेषु देहेषु एकत्वं, दीपानां तु भिन्नत्वमिति वैषम्यमस्ति, तथाप्युत्पादकदीपगतैक्यं सादृश्यादुत्पन्नदीपेषु पचर्यते इति साम्यं बोध्यम् । तस्मात् सर्वाणि शरीराणि सात्मकान्येव ॥

ननु विदुषो न शरीरवत्त्वं युक्तं "तत्केन कं पश्येत्" इति, न तु तद्द्वितीयमस्ति "ततोऽन्यद्विभक्तं यत् पश्येत्" इति च विशेषविज्ञानाऽभावश्रवणादित्यत आह—

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ ४ । ४ । १६ ॥

सुषुप्तिपरममुक्त्योरन्यतरापेक्षयेदं विशेषविज्ञाना-

भावश्रवणम् । हि यतः प्रकरणादेवमाविष्कृतं सुषुप्तिप्रकरणे, न तु तद्द्वितीयमस्ति ततोऽन्यदित्यादिश्रुतं परममुक्त्यपेक्षया च तत्केनेत्यादि । तस्मान्नेदं सगुणविदः शरीराङ्गीकारे बाधकमित्यर्थः । तत्र सुषुप्तौ द्वितीयं विभक्तं न त्वस्तीत्यर्थः ॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ ४ । ४ । १७ ॥

पूर्वं सङ्कल्पमात्रेण देहादिसर्गे यदैश्वर्यमुक्तं विदुषः तस्य जगदुत्पत्त्यादावपवादोऽत्र क्रियते । किं विदुष, ऐश्वर्यमीश्वरस्येव निरङ्कुशमुत, सातिशयमिति संशयः । पूर्वपक्षे ईश्वरनानात्वं, सिद्धान्ते तदैक्यमिति बोध्यम् । तत्र विदुषोऽनन्याधिपतित्वान्निरङ्कुशमैश्वर्यमिति प्राप्ते ब्रूमः । जगदुत्पत्त्यादिव्यापारवर्जंसातिशयमेवाणिमाद्यैश्वर्यं विदुषः । जगद्व्यापारस्तु परमेश्वरस्यैव । सृष्टिवाक्येषु सर्वत्र तस्यैव प्रकरणात् । विदुषश्च तत्राऽसन्निहितत्वात् । नित्यसिद्धं हि परमेश्वरस्य निरङ्कुशमैश्वर्यं, कथं वा विदुष ईश्वरप्रसादायत्तमागन्तुकमैश्वर्यं निरङ्कुशमिति वक्तुं शक्यम् । तस्मात् सातिशयमैश्वर्यं विदुषः ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ ४ । ४ । १८ ॥

नन्वाप्नोति स्वाराज्यमिति प्रत्यक्षश्रुत्या ऐश्वर्योपदेशान्निरङ्कुशं विदुष ऐश्वर्यमिति चेन्न । आधिकारिकमण्डलस्थोक्तेः । अधिकारे तत्तद्व्यापारे नियोजयत्यादित्यादीनित्याधिकारिकः सूर्यादिमण्डलस्थः परमात्मा । तस्योत्तरवाक्ये प्राप्नोति मनसस्पतिमित्यत्र प्राप्यत्वेनोक्तेर्वि-

दुषः सातिशयमैश्वर्यमिति गम्यते । यदि पूर्ववाक्ये एव निरतिशयमैश्वर्यमुक्तं तदेदमीश्वरप्राप्तिवचनं व्यर्थं स्याद्-तः सातिशयमैश्वर्यं विदुषः ॥

विकारावर्त्ति च तथाहि स्थितिमाह ॥४।४।१९॥

सगुणे ब्रह्मणि विकाराऽवर्ति च निर्गुणस्वरूपमस्ति। तथाहि ब्रह्मणि सगुणत्वनिर्गुणत्वयोः स्थितिमाह श्रुतिः। एतावानस्य महिमेति सगुणत्वमुक्त्वा, अतो ज्यायाँश्च पूरुष इति निर्गुणत्वमाह। एतावान् सहस्रशीर्षेत्यादि-रस्य परस्य महिमा विभूतिरित्यर्थः । अयं भावः। यथा सगुणे स्थितं निर्गुणस्वरूपमुपासको न प्राप्नोति । तदु-पासकत्वाभावात् । तथा तद्गतजगत्स्रष्टृत्वादिकमैश्वर्यं न प्राप्नोति तदुपास्त्यभावात् । उपास्त्यभावश्च श्रुत्यभा-वादिति ॥

अत्र दृष्टान्तार्थं यन्निर्गुणस्वरूपमुक्तं तत्र प्रमाणा-न्तरमाह—

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ ४ । ४ । २० ॥

एवं ब्रह्मणो निर्गुणत्वं श्रुतिस्मृती दर्शयतः। न तत्र सूर्यो भाति न चन्द्रतारकमित्याद्या श्रुतिः। न तद्भासयते सूर्य इत्याद्या स्मृतिरिति ॥

भोगमात्रसाम्यं लिङ्गाच्च ॥ ४ । ४ । २१ ॥

उपासकस्योपास्यदेवतया सह भोगमात्रेण साम्यं श्रुतं, न जगद्व्यापारेण। तमाहाऽऽपो वै खलु मीयन्ते लोको ऽसाविति। तस्माल्लिङ्गाद्विदुषः साऽतिशयमैश्वर्यं गम्यत इत्यर्थः । तं ब्रह्मलोकस्थमुपासकं हिरण्यगर्भ आह।

आपो वै खल्वमृतमापो मया मीयन्ते भुज्यन्ते । तदाप्यस्तावमृतोदकलक्षणो लोको भोग्य इत्यर्थः ॥

यदीश्वरैश्वर्येणातिशयेन सहितं विदुष ऐश्वर्यं साऽतिशयं तर्हि लौकिकैश्वर्यवदनित्यं स्यात् । तथाच विदुषोऽप्यावृत्तिः प्रसज्ज्येतेत्याशङ्क्य दयासिन्धुर्भगवान् बादरायणः समाधत्ते—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ ४ । ४ । २२ ॥

येऽर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव । तेषां न पुनरावृत्तिरित्यादिमुक्त्यभिधायकशब्दादित्यर्थः । निर्गुणब्रह्मविदाम् आवृत्तिशङ्कैव नास्ति । यतः सगुणविदामपि निर्गुणाश्रयणेनैवाऽनावृत्तिः, नान्यथा । तस्माद्ब्रह्मविदां निरस्ताऽनर्थव्रातस्वप्रभनिरतिशयानन्दब्रह्मात्मनाऽवस्थितिरिति सिद्धम् । सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ॥

यः सर्वश्रुतिबन्दिवन्दिततनुर्मायात्मनिद्रां गतः
सुप्तोऽस्मिन् भवपत्तनेऽपरिमिते कल्पान्ततल्पान्तरे ।
यः सर्वाऽपरिपन्थिसाङ्गनयतः प्रज्ञाप्रवाहान्ततः
प्रज्ञालभ्यसुखाकृतिः कृतिमिमां रामः स गृह्णातु नः॥ १॥

विदुषां कण्ठभूषेयं कृता वृत्तिर्मया प्रभो ॥
व्यासवाङ्मणि संदृब्धा, प्रीतये तेऽस्तु सर्वदा ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाऽऽचार्यश्रीमन्मुकुन्दगोविन्दश्रीचरणशिक्षितश्रीरामानन्दसरस्वतीकृतौ ब्रह्मसूत्रवृत्तौ ब्रह्माऽमृतवर्षिण्यां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

2/8-2-1k